Pothi No 271

वाचस्पतिमिश्रकृतभामतिसंज्ञकशारीरकभाष्यव्याख्यारंभोयं

श्रीगणेशायनमः॥ ॥ अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्ता यस्यैते वियदनिलतेजोऽबवनयः॥ यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतं॥ निश्वसितमस्य वेदा वीक्षितमेतस्य पंचभूतानि॥ स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः॥ २॥ षड्भिरंगैरुपेताय विविधैरव्ययैरपि॥ शाश्वताय नमस्कुर्मो वेदाय च भवाय च॥ ३॥ मार्तंडतिलकस्वामिमहागणपतीन्वयं॥ विश्ववंद्यान्नमस्यामः सर्वसिद्धिविधायिनः॥ ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे॥ ज्ञानशक्त्यवताराय नमो भगवते हरेः॥ ५॥ नत्वा विशुद्धविज्ञानं शंकरं करुणाकरं॥ भाष्यं प्रसन्नगंभीरं तत्प्रणीतं विभज्यते॥ ६॥ आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनां॥ रथ्योदकमिव गंगाप्रवाहपातः पवित्रयति। ७॥ अथ परसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरो यथा समनस्केंद्रियसन्निकृष्टः स्फीतालोकमध्यवर्ती घटः करटदंता वा॥ तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः॥ तथा हि ब्रह्मात्मैकत्वाद्दर्शनात्वात्मैव ब्रह्मेति गीयते॥ स चायमात्माकीटपतंगेभ्यः आदेवर्षिभ्यः प्राणभृन्मात्रस्याहंकारास्पदं भोदेहेंद्रियमनोबुद्धिविषयेभ्यो विवेकेनाहमित्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञास्य इति नहि कश्चित्संदिग्धे अहं वा नाहं वेति न च विपर्यस्यति नाहमेवेति। न चाहं कृशः स्थूलो गच्छामीत्यादिदेहधर्मसमानाधिकरणदर्शनात् देहालंबनप्रत्यायोऽहंकार इति सांप्रतं। तदालंबनत्वे हि योऽहं बाल्ये पितरावन्वभूवं स एव स्थविरे प्रणप्तृननुभवामीति प्रतिसंधानं न भवेत्। न हि बालस्थविरशरीरयोरस्ति मनागपि प्रत्यभिज्ञानगंधो येनैकत्वमध्यवसीयेत॥ तस्माद्येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो भिन्नं। यथा कुसुमेभ्यः सूत्रं। तथा च बालादिशरीरेषु व्यावर्तमानेष्वपि परस्परमहंकारास्पदमनुवर्तते तत्तेभ्यो भिद्यते॥ अपि च स्वप्नांते दिव्यं शरीरं मेरुमारुह्य तदुचितान्भोगान्भुंजान एव प्रतिबुद्ध एव मनुष्यशरीरमात्मानं पश्यन्नाहं देवो मनुष्य एवेति देवशरीरं बाधमाने

प्यहमास्पदमबाध्यमानं शरीराद्भिन्नं प्रतिपद्यते॥ अपि च योगव्याघ्रः॥ शरीरभेदेपि चात्मनमभिन्नमनुभवतीति॥ नाहंकारालंबनं देहः॥ अत एवेंद्रियाण्यप्यस्यालंबनमिंद्रियभेदेपि चाहमद्राक्षं स एव तर्हि स्पृशामीति ह्यालंबनस्य प्रत्यभिज्ञानात् विषयेभ्यस्त्वविवेकध्यीयानेव बुद्धिमनसोश्च करणयोरहमिति कर्तृप्रतिभासप्रत्ययानालंबनत्वात्। कथं हि मयोऽहमित्यादयश्च प्रयोगाः॥ असत्यपि भेदे कथं चिन्मंचाः क्रोशंतीत्यादिवदौपचारिका इति युक्तमुत्पश्यामः॥ तस्मादहंकारास्पदेभ्यो देहेंद्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः स्फुटतरमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति सिद्धं॥ अप्रयोजनत्वाच्च॥ तथा हि॥ संसारनिवृत्तिरपवर्गो हि प्रयोजनं विवक्षितं संसारश्चात्मयथात्म्याननुभवनिमित्तः आत्मयथात्म्यज्ञाने न निवर्तनीयः॥ स चेदयमनादिरनादिना आत्मयथात्म्यज्ञानेन सहानुवर्तते कुतोऽस्य निवृत्तिरविरोधात्॥ कुतश्चात्मयथात्म्याननुभवः। नहि अहमित्यनुभवादन्यदात्मयथात्म्यज्ञानमस्ति॥ न चाहमिति सर्वजनीनस्फुटतरानुभवसमर्पित आत्मा देहेंद्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैरप्यन्यथा कथयितुं अनुभवविरोधात्। न ह्यागमाः सहस्रमपि घटं पटयितुमीशते॥ तस्मादनुभवविरोधादुपचरितार्थ एवोपनिषद इति युक्तमुत्पश्यामः इत्याशयवानाशंकापरिहरतीति॥ युष्मदस्मत्प्रत्ययगोचरयो इति। अत्र च युष्मत्स्यादिमिथ्याभवितुं युक्तमित्यंतः ग्रंथः॥ तथापीत्यादिपरिहारग्रंथः तथापीत्यभिसंबंधात् शंकापांयद्यपीति पठितव्यं इदमस्मत्प्रत्यय गोचरयोरिति वक्तव्ये युष्मद्ग्रहणमत्यंतभेदोपलक्षणार्थं। यथा ह्यहंकारप्रतियोगी त्वंकारो नैवमिदंकारः॥ एतेवयमिमे वयमास्महे इति बहुलं प्रयोगदर्शनात्। इति चित्स्वभाव आत्मा विषयी जडस्वभावा बुद्धींद्रियदेहविषया विषयः॥ एते हि चिदात्मानं विषिन्वंति अवबध्नंति स्वेन रूपेण निरूपणीयं कुर्वंतीति यावत्। परस्परानध्यासहेतावुक्तं वैलक्षण्ये दृष्टांतः। तमःप्रकाशवदिति। न हि जातु कश्चित्समुदाचारात्॥ तमिनो प्रकाशात्मकीपरस्परात्मतयाप्रतिपत्तुमर्हतीति। नहि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

वाच॰ दमुक्तमितरेतरभावानुपपत्तिरिति इतरेतरभावः इतरेतरत्वं तादात्म्यमिति यावत्तस्यानुपपत्तिरिति। स्यादेतन्माभूद्धर्मिणोः
२ परस्परभावः। तद्धर्माणां तु जाड्यचैतन्यनित्यत्वानित्यत्वादीनामितरेतराध्यासो भविष्यति दृश्यते हि धर्मिणोर्विवेकग्रहेपि तद्धर्माणा
मध्यासो यथा जपाकुसुमाद्भेदेन गृह्यमाणेपि स्फाटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिंबोद्ग्राहिणि लोहितः स्फटिक इति आरोपवि
भ्रम इत्यत उक्तं तद्धर्माणामिति। इतरेतरत्र धर्मिणि धर्माणां भावो विनिमयः तस्यानुपपत्तिः अयमभिसंधिः रूपवद्धि द्रव्यमतिस्वच्छ
तया रूपवतो द्रव्यान्तरस्य तद्विवेके गृह्यमाणस्यापि छायां गृह्णीयात् चिदात्मा तु नीरूपो विषयी णो रमोऽन्यात्मसंभेदेन वतद्धर्माणाम
पि परस्परं न विषयच्छायामुद्ग्राहयितुमर्हति। यथाहुः। शब्दगंधरसानां च कीदृशी प्रतिबिंबतेति नदिग्पाणिभ्योप्याहुर्विषयविषयि× सं
भेदेन विनिमयात्मना भवितव्यं तेन तद्धर्मिणा असंगत विवेकेन गृह्यमाणावसंभिन्नौ असंभिन्नाः स्वरूपतयोर्धर्माः। स्वाश्रयाभ्यां व्यतथा
नेगद्दूरापेतत्वात् तदिदमुक्तं सुतरामिति तद्विपर्ययेणेति विषयविपर्ययेणेत्यर्थः। मिथ्याशब्दोपन्हववचनः। एतदुक्तं भवति। अध्या
सो भेदाग्रहेणाध्यासः। तद्विरुद्धश्चेदिहास्मि भेदग्रहः सोऽपहनितव्यतयस्य आत्मभ्यासं निवर्तयतीति मिथ्येति भवितुं युक्तं। यद्यपि तथापी
ति योजना॥ इदमत्राकूतं। भवेदेतदेवं यदि अहमित्यनुभव आत्मतत्त्वप्रकाशो न न वेत्तरः स्फीतद्याहि समस्तोपाध्ययनवच्छिन्ना नं
नानंदचैतन्यैकरसमुदासीनमेकमद्वितीयं आत्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते। न चैतान्युपक्रमणपरामर्शोपसंहा
रैः क्रियासमभिहारेणेह शास्त्रतत्त्वमभिदधति तत्पराणि संति शक्यानि धर्मेणाप्युपचरितार्थानि कर्तुं अभ्यासे हि भूयस्त्वमर्थस्य
च भवति। यथा हो दर्शनीयेति तत्र न तत्त्वमपि प्रयोगे वोपचरितार्थत्वमिति। अहमनुभवस्त्वं प्रादेशिकानेकविधशोकदुःखादिप्रपंचो
पप्लुतमात्मानमादर्शयन् कथमात्मतत्त्वगोचरः कथं वानुपप्लवः॥ न च अैष्टप्रमाणभस्त्वविरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण २

मुपचरितार्थत्वं चेति युक्तं। तस्यापौरुषेयतया निरस्तसमस्तदोषाशंकस्य बोधकतया च स्वतः सिद्धप्रमाणभावस्य स्वकार्ये प्रमितौ वा॥
परानपेक्षित्वात्। प्रमितावनपेक्षत्वेपि उत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधात्तदुत्पत्तिलक्षणमस्याप्रामाण्यमिति चेन्न तोत्पादकाप्रतिद्वंद्वित्वा
त्। न ह्यागमज्ञानं सांव्यावहारिकं प्रत्यक्षस्य प्रामाण्यमुपहंति येन कारणाभावान्न भवेत्। अपि तु तात्विकं। न चैतत्तस्योत्पादकं अतात्वि
कप्रमाणभावेभ्योपि सांव्यावहारिकेभ्यः तत्त्वज्ञानोत्पत्तिदर्शनात् तथा च वर्णे ह्रस्वदीर्घत्वादयो ऽन्यधर्मा अपि समारोपितास्तत्त्वप्रतिपत्ति
हेतवः नहि लौकिकानाग इति पदात् कुंजरं न त्वं प्रतिपाद्यमाना भवंति भ्रांताः न चानन्यपरं वाक्यं स्वार्थे उपचरितार्थं युक्तं। उक्तं हि न विधौ
परः शब्दार्थ इति अपेक्षत्वं वानपेक्षितस्य बाधत्वे हेतुर्न पुनर्बाधकत्वे रजतज्ञानस्य ज्यायसः शुक्तिकाज्ञानेन कनीयसा बाधदर्शनात्
तदनुपघातेन तदुपघातात्मनः तस्योत्पत्तेरनुपपत्तेः दर्शितं च तात्विकप्रमाणभावस्यानपेक्षितत्वं॥ तथा च पारमर्षं सूत्रं पौर्वापर्ये पूर्वदौ
र्बल्यं प्रकृतिवदिति। तथा पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयतां॥ अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेदिति अपि च। येप्यहंकारस्य
दमात्मानमाविष्कुर्वत्यपि सततात्विकमनुपेतम्। अहमिहैवास्मि सदने जानान इति सर्वव्यापिनः प्रादेशिकत्वेन ग्रहणात्। उक्ततद्गौरि
शिखरपरिवर्तिषु महातरुषु भूमिष्ठेषु हस्वतुच्छदूर्वाप्रवालनिर्भासप्रत्ययवत्। न चेदं देहस्य प्रादेशिकत्वमनुभूयते न त्वात्मन इति सांप्रतं न
हि तद्देवं भवत्यहमिति। गौणत्वेन वा आत्मनि अनात्मनि इत्यपि च पर शब्दः पर प्रत्यक्षमाणगुणयोगेन वर्तत इति यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रति
पत्तिः स गौणः स च भेदप्रत्ययपुरःसरः। तद्यथा॥ नैयमिकाग्निहोत्रवचनो अग्निहोत्रशब्दः प्रकरणांतरात् बाध्यभेदे कौंडपायिनाम
यनगते कर्मणि मासमग्निहोत्रं जुहोतीति प्रत्यक्षेण गौणः माणवके चानुभवसिद्धभेदे सिंहात् सिंहशब्दे न त्वहंकारस्पमुरस्यो
निर्लुठितगर्भतया देहादिभ्योऽभिमानोत्पत्तेयेन परशब्दः शरीरादौ गौणो भवेत्। न चाभ्यस्तनिरूढतया गौणोपि न गौणत्वाभिमानः।
सार्पपादिपुनैकशब्दवदिति वैदितव्यं तत्रापि स्नेहादिकं नायेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वमात्राभिमानो न त्वर्थयोस्तैल

वाच. सर्वथयोरभेदाध्यवसाय: ॥नखिदं गौणत्वमुभयदर्शिनो गौणमुख्यविवेकज्ञानव्यासंगरिह्याप कं विवेकज्ञानं निवर्तमानं गौणताम
३ पिनिवर्तयइति नचयथास्थवीरशरीरभेदेपि सोहमिसेकस्यात्मनः प्रतिसंधानादेहादिभ्यो भेदेना स्थात्मानुभवइतिवाच्यं। परीक्षका
णांखल्वियंकथाभ लौकिकानां परीक्षका अपिहिव्यवहारसमयेनलौकिकसामान्यमतिवर्तंते। वक्ष्यत्यनंतरमेवहिभगवान्भाष्यकारः
पश्वादिभिश्चाविशेषादितिपश्चात् अपाहु। शास्त्रचिंतकाःखल्वेवंविवेचयंतिनप्रतिपत्तारइति। तत्सिद्धोऽप्यहितदात्मगोचरअहंकारअह
मिहास्मिसदनइतिधवतुं आनोलौकिकशरीराद्यभेदव्यवहारास्मनः प्रोधीकल्पात्तमभिमन्यतेनभसइवधटमणिकमल्लिकायुतादेव्के ध्य
हादिति युष्मत्युष्मथाम। न चारंकारप्रामाण्याद्देहादिवदात्मापिप्रादेशिकइतियुक्तं नदाखल्वयमणुपरिमाणो वास्यात् देहपरिमाणो
वा। अणुपरिमाणत्वेस्थूलोहंदीर्घइतिनस्यात् देहपरिमाणत्वे सावयवतयादेहवदनित्यत्वप्रसंगः। किंचास्मिन्पक्षेऽवयवसमु
दायोवाचेतयेत्॥ प्रत्येकंवावयवाः॥ प्रत्येकचैतन्यपक्षेबहूनांचेतनानांस्वतंत्राणांएकवाक्यताभावाभावात्। अपर्यायविरुद्ध
क्रियतयाशरीरमुन्मथ्येतत्रक्रियांवाप्रसज्येतसमुदायस्तुचैतन्ययोगेऽकएकस्मिन्नवयवेविरात्मनोऽप्यवयवीनकइति नचैतये
त् नचबहूनांमप्यवयवानांपरस्पराविनाभावयनियमोदृष्टः यएवयदाविशीर्णः तदातदभावेनचेतयेत् विज्ञानालंबनतेपरंप्रत्यय
स्यभ्रांतत्वंत इवखलमेवतस्थाक्षिरवस्तुनिर्भासविषयत्वाच्च विज्ञानानां॥ एतेन कृशोहंमंधोहंगच्छामीत्यादयोध्यासतयाव्या
ख्याताः॥ तदेवमुक्तेनक्रमेणाहंप्रत्ययेकृति कूष्मांडीकृतेभगवतीश्रुतिरप्रसूतं कर्तृत्वभोक्तृत्वदुःखशोकाद्यात्मत्वमहमनुभ
वप्रसंजितमात्मनोनिषेद्धुमर्हतीति। तदेवंसर्वप्रवादिश्रुतिस्मृतीतिहासपुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्यस्वरूपनिमित्तफ
लेरूपमाख्यानं अन्योन्यस्मिन्निति। ॥अत्र अन्योन्यस्मिन्धर्मिण्यात्मशरीरादौ अन्योन्यात्मकतामध्यस्यअहंशरीरादिरिदंममेति
चवस्तुनोतत्प्रतीतिः। लोकव्यवहारो लोकानांव्यवहारः सचायमहमिति व्यपदेशीयइतिशब्दसूचितंचशरीराद्यनुकूलंचात्रमेयज्ञा
नंप्रमायप्रमाणेनतदुपदानपरिवर्जनादिअन्योन्यधर्मांश्चाध्यास्यान्योन्यस्मिन्धर्मिणीदेहादिधर्मांधर्मान्जन्ममरणजराव्याध्यादी
३

नात्मनिधर्मिणि अध्यस्यदेहादिभावसमारोप्यतथात्मचैतन्यादीनात्मधर्मान्देहादावध्यस्यात्मभावेसमारोप्यममेदंजरामरणपुत्रपश्वाद्या
दितिव्यवहारो व्यपदेशाइतिशब्दसूचितं चतदनुरूपप्रवृत्त्यादिः अत्र चाध्यायव्यवहारक्रियाभ्यांपः कर्तृनीतः समानइतिसमानकर्तृकत्वेना
ध्यस्यव्यवहारइत्युपपन्नं पूर्वकालत्वसूचितमध्यासस्यव्यवहारकारणत्वंसूच्यति। मिथ्याज्ञाननिमित्तोव्यवहारः। मिथ्याज्ञानमध्यासः
तन्निमित्तस्तद्भावाभावानुविधानात् व्यवहाराभावाभावयोरित्यर्थः तदेवं अध्यासस्वरूपं फलंचव्यवहारमुक्त्वातस्यनिमित्तमाह॥ इतरे तरावि
वेकेनेतिविवेकाग्रहणेनेत्यर्थः। अथाविवेकएकस्मिन्कस्मान्नभवति। तथाचनाध्यासइत्यत आह अत्यंतविविक्तयोर्धर्मधर्मि
णोः रितिपरमार्थतोधर्मिणोः अतादात्म्यंविवेकः। धर्माणां चासंकीर्णताविवेकः स्यादेतत्। विविक्तयोर्वस्तुसतोस्तादात्म्यग्रहणविं
धनतादात्म्यविभ्रमोयुज्यते शुक्तेरिवरजताभेदात् ग्रहे रजततादात्म्यविभ्रमः इहतुपरमार्थसतश्चिदात्मनोभिन्नमसत्वं
नदेहादयसिद्धवस्तुसतकुतश्चिदात्मनोभेदाग्रहः कुतश्चतादात्म्यविभ्रमइत्यत आह॥ सत्यानृतेमिथुनीकृत्यविवेकाग्रहाद्ध्य
स्यतियोजना॥ सत्यंचिदात्मा अनृतंबुद्धीन्द्रियदेहादितद्धर्मिणीमिथुनीकृत्ययुगलीकृत्यनत्वसंचतिपरमार्थसतोः पारमार्थि
कंमिथुनीकरणम संभवत्प्रभावार्थश्चिन्तयोगः॥ एतदुक्तंभवति। अप्रतीतस्यारोपायोगात्॥ आरोप्यस्यप्रतीति
रूपयुज्यतेनचवस्तुसत्त्वेति। स्यादेतदारोप्यस्यप्रतीतौ सत्यांपूर्वदृष्टस्यसमारोपः समारोपनिबंधनाचप्रतीतिरितिदुर्वारं
परस्पराश्रयत्वमित्यत आह॥ नैसर्गिकइति। स्वाभाविकोअनादिरयंव्यवहारो व्यवहारानादितयाचतत्कारणस्याध्या
सस्यानादितोक्तातनश्चपूर्वपूर्वमिथ्याज्ञानोपदर्शितस्यबुद्धीन्द्रियशरीरादेरुत्तरोत्तराध्यासोपयोगइत्यादितादीजांकुरवद
परस्पराश्रयत्वमित्यर्थः। स्यादेतद्वापूर्वप्रतीतिमात्रमुपयुज्यते। आरोपेनतुप्रतीयमानस्यपरमार्थसत्ताप्रतीतिरेवत्वसंता
सतोगगनकमलिनीकल्पस्यदेहेन्द्रियादेर्नोपपद्यतेप्रकाशमानत्वमेवहिचिदात्मनोपिसत्वंनतुतरतिरिक्तसत्तासामान्यस

वाच॰
५

मथायोर्थक्रियाकारिताया॥ दैन्तापत्ते:। सत्तायाश्चार्थक्रियाकारितायाश्चसत्तां तदर्थक्रियाकारितां तदकल्पने न चस्यापीत्तेनप्र
काशमानत्वेन सत्ताभ्युपेतव्या तथाच देहादय: प्रकाशमाना आन्मान्सं तथ्विहास्मयान्। असत्त्वे वा न प्रकाशमाना: तत्कथं सत्त्वानृतयो
र्मिथुनीभाव: तदभावे वा कस्य कुतो भेदाग्रहः तदसंभवात् कुतोध्यास इत्याशयवानाह॥ आक्षेप्ता कोयमध्यासो नामेति किमाक्षेपे सभा
धाता लोकसिद्धमध्यासलक्षणमाचक्षाण एवाक्षेपं प्रतिक्षिपति। उच्यते। स्मृतिरूपः परत्र पूर्वदृष्टावभासः। तस्येदमुपव्याख्यानं। पूर्वदृ
ष्ट आदि। पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः। मिथ्याप्रत्ययश्चारोपविषयारोपणीयमिथुनमंतरेण न भवतीति पूर्वदृष्टग्रहणेनान्त
मारोपणीयमुपस्थापयति तस्य च दृष्टत्वमात्रमुपयुज्यते। न वस्तुसत्तेति दृष्टग्रहणं तथापि वर्तमानं दृष्टं दर्शनं नारोपोपयोगीति
पूर्वेत्युक्तं। तत्र पूर्वदृष्टं स्वरूपेणासदप्यारोप्यतया निर्वाच्यमिति अनृतमुक्तं आरोपविषयं सत्यमाह परत्रेति। परत्र शुक्तिकादौ पर
मार्थसतीति तदनेन सत्यानृतमिथुनमुक्तं॥ स्यादेतत्। परत्र पूर्वदृष्टावभास इत्यलक्षणं अतिव्यापकत्वात्। अस्ति हि स्तिमितां
गतिपूर्वदृष्टस्य गोत्वस्य परत्र कालाक्षामवभासश्च सिचपाटलिपुत्रे पूर्वदृष्टस्य देवदत्तस्य परत्र माहिष्मत्यामवभासः समीचीनः
अवभासपरं च समीचीनेपि प्रत्यये प्रसिद्धः यथा नीलस्यावभासः पीतस्यावभास इत्यत आह। स्मृतिरूप इति। स्मृते रूपमिव रूपमस्ये
ति स्मृतिरूपः असंनिहितविषयत्वं च स्मृतिरूपत्वं संनिहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः नाप्यव्याप्तिः स्व
प्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात्। अत्रापि हि स्मर्यमाणे पित्रादौ निद्रोपप्लववशात् संनिधानापरामर्शात् पूर्वदृष्टस्य
देशसंसर्गिहि तद्देशकालत्वस्य समारोपः एवं पीतः शंखः तिक्तो गुड इत्यत्रापि लक्षणं योजनीयं। तथा हि बहिर्विनिर्गच्छन्नयनरश्मि
संपृक्तपित्तद्रव्यवर्तिनी पीतता पीतद्रव्यरहिता अनुभवन् शंखं च दोषाच्छादितशुक्लिमानं द्रव्यमात्रमनुभवन् पीततायाश्च शंखसंबं
धमननुभवन् असंबंधाग्रहणसारूप्येण पीतं तपनीयपिंडं पीतं बिल्वफलमित्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशंखयोरारोप्या

४

ह॥ पीतः शंख इति। एतेन तिक्तो गुड इति भ्रमो व्याख्यातः एवं विज्ञानात् पुरःस्थाभिमुखे व्यादर्शादिकादिषु त्विष्चेषु वा पुष्पं तेजोलय
मपिवलीपसात्सौर्येण तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंपृक्तं मुखं ग्राहयद्दोषवशाद्दर्शदेशतामनभिमुखतां च मुखस्याग्रहयत्पूर्वदृष्टदर्शा
भिमुखादर्शादिकदेशतामभिमुखत्वं च मुखस्यारोपयतीति प्रतिबिंबविभ्रमोपि लक्षितो भवतीति एवं दिङ्मोहालातचक्र
गंधर्वनगरवंशोरगादिविभ्रमेष्वपि यथासंभवं लक्षणं योजनीयं॥ एतदुक्तं भवति। न प्रकाशमानतामात्रं सत्त्वे येन देहेन्द्रियादेः
प्रकाशमानतया सत्त्वं भवेत्। न हि सर्पादिभावेन रज्ज्वादयः स्फटिकादयो वा रक्तत्वादिगुणयोगिनो न प्रतिभासंते प्रतिभासमाना
वा भवंति सर्वदासन्तस्तद्धर्मिणो वा तथा सति मरुभुमरीचिचयमुच्चावचमुच्चलत्तुंगतरंगभंगमालेयमभ्यर्णमवतीर्णमंदाकिनीत्यभिसं
धाय प्रवृत्तस्तोयमायीयपिपासामुपशमयेत्। तस्मात्प्रकाशमानतयारोपितस्य प्रकाशमानस्यापि न वस्तुसत्त्वमभ्युपगमनीयं न च मरीचि
रूपेण सलिलं न वस्तु तत्स्वरूपेण तु परमार्थसदेवदेहेन्द्रियादयस्तु स्वरूपेणाप्यसंत इत्यनुभवगोचरतामस्य मारोप्यं तदिति सांप्रतं॥
वतोपघसंतानानुभवगोचराः कथं तर्हि मरीच्यादीनामसतामनुभवगोचरत्वं न चरूपेण सत्त्वेन तोयाभ्यनापि संतो भवति। यदु
च्यते न तावदभावो नाम भावादन्यः कश्चिदस्ति अपितु भावांतरमभावांतरमभावः स्वरूपेण तु भावः। यथाहुः भावांतरमभावो हि
कयाचित्तु व्यपेक्षयेति न तस्य भावात्मनो प्रार्थ्यापनयास्य युक्ते नानुभवगोचरता प्रपंचस्य पुनरसंतो सतो नितरां समस्तसामर्थ्य
स्य निःस्वभावस्य कुतो न भवति विषयभावः। कुतो वा चिदात्मन्यारोपः न च विषयस्य समस्तसामर्थ्यविरहेपि ज्ञानमेव तं तादृशं स
प्रत्ययसामर्थ्यात् स्पष्टत्वादिति दृष्टांतसिद्धस्वभावभेदमुपजनयत् असतः प्रकाशनं तस्मादसत्प्रकाशनशक्तिरेवास्याविद्येति सांप्रतं॥
यतो पययमसत्प्रकाशनशक्तिर्विज्ञानस्य किं पुनरस्याः॥ शक्यं असत्त्वेति चेत्। किमेतत्कार्यमहो स्विदसाध्यं न तावत्का
र्यं असत्त्वात् तदनुपपत्तेः नापि ज्ञाप्यं ज्ञानांतरानुपलब्धेरनवस्थापितो च ज्ञानस्वरूपमेवासतः प्रकाश इति चेत्। कः पुनरेष सदस

वाच. तोः संबंधः असदधीननिरूपणत्वं स गोज्ञानस्वरूपमेवासनः प्रकाशइतिचेत्कः पुनरेष अहोबताय मतिनिर्देतः प्रत्ययनपरती
५ यस्यासतपिनिरूपणमापतते ॥ नचप्रत्ययस्तत्रधर्मिकिंविन्नु असत्त्वआधारत्वायोगादसदंतरेणप्रत्ययोनप्रपतइतिप्रत्ययस्यैवेष
स्वभावोनत्वसदधीनमस्यकिंचिदितिचेत् । अहोबतास्यात्मलक्षणोतोयदयमत्यंदुर्लभिरजदात्मचनरुविनाभावनियतःप्रत्य
यइति । तस्मादत्वंनासंनः शरीरेंद्रियादयोनिस्तत्त्वानानुभवविषयाभवितुमर्हतीति । अत्रब्रूमः । निस्तत्वंचेन्नानुभवगो
चरः तत्किमिदानींमरीचयोपितोयात्मनासन्नत्वायदनुभवगोचरानुभवगोचरास्तुः नसत्तत्वासदात्मनामरीचीनामसत्वा
त् । किंविधंचवस्तुनांतत्त्वंसतत्त्वतत्रपृच्छतः परंतुउच्यतः । यथाहुः ॥ स्वरूपपररूपाभ्यांनित्यंसदसदात्मकेवस्तुनिज्ञायतेकिं
चिद्रूपंकैश्चित्कदाचनेति । नत्किंमरीचिषुतोयनिर्भासप्रत्ययस्तत्वगोचरः । तथाचसमीचीनदर्शनभ्रांतोनापिबाध्येत । अद्धा
नवाध्येतयदिमरीचीनस्तोयात्मतत्वाभतोयात्मनागृह्णीयात् । तोयात्मनानुगृह्णंस्तुकथमभ्रांतः कथमबाध्यः हंततोया
भावात्मनांमरीचीनांतोयभावात्मत्वंतावभसत्तेषांतोयाभावादभेदेनतोयभावात्मतानुपपत्तेः नाप्यसत्वस्वतंत्रमेव
हिवस्त्वंतरस्यासत्वमास्थीयते ॥ भावांतरमभावोन्योनकश्चिदितिनिरूपणादितिवदद्भिः नचारोपितंरूपंवस्त्वंतरंतद्धिमरीच
योवाभवेयुर्गगनेगतंवातोयंपूर्वस्मिन्कल्पेमरीचयइतिप्रत्ययःस्यात्सलिलमिति । उत्तरस्मिंस्तुगंगायांतोयमितिहिस्यात्प्र
पुनरिहेतिदेशभेदास्मरणेतोयमित्येवस्यात्प्रत्ययोहेतिनचेदमत्यंततुच्छंनिरस्तसमस्तस्वरूपमलीकमेवास्थितिसांप्रतंतस्यानु
भवगोचरत्वानुपपत्तेरित्युक्तमधस्तात् । तस्माच्चसत्त्वापिसदसत्त्वपरस्परविरोधादित्यनिर्वाच्यमेवारोपणीयंमरीचिषुतोय
मास्थेयंतदनेनक्रमेणाध्यस्तंतोयंपरमार्थतोयमिवअतएवपूर्वदृष्टमिवतत्त्वतस्तुनतोयंनचपूर्वदृष्टंकिंत्वनिर्वाच्यं ।
एवंदेहेंद्रियादिप्रपंचोप्यनिर्वाच्योपूर्वोपिपूर्वपूर्वमिथ्याप्रत्ययोपदर्शितइवपरत्रचिदात्मन्यध्यस्तइत्युपलक्षणयोगात्देहादि

यादिप्रपंचबाधनंचोपपादयिष्यतिचिदात्मानुश्रुतिस्मृतीतिहासपुराणगोचरस्तत्स्मूलतदविरुद्धन्यायनिर्णीतः शुद्धबुद्धमुक्तस्वभा
वः सत्येनैवनिर्वाच्यो बाधितस्वयंप्रकाशतैवास्यसत्तासाचस्वरूपमेवचिदात्मनोनतुतदतिरिक्तसत्तासामान्यसमवायोर्थक्रियाका
रिताचेतिसर्वमवदातं ॥ सचायमेवंलक्षणोध्यासोनिर्वचनीयः सर्वेषामेवसंमतः परीक्षकाणांतन्मतभेदेपरंविप्रतिपत्तिरित्यनिर्व
नीयतांद्रढयितुमाह ॥ तं केचिदन्यत्रान्यधर्माध्यासइति ॥ अन्यधर्मस्यज्ञानधर्मस्यरजतस्यज्ञानाकारस्येतियावत् ॥ अध्यासोन्यत्र
बाह्येसौत्रांतिकनयेनावद्यबाह्यंवस्तुसन्नत्रज्ञानाकारस्याध्यारोपः । विज्ञानवादिनाकारस्येतियावत् ॥ अध्यासोन्यत्रबाह्येसौत्रां
तिकनयेनावद्यबाह्यंवस्तुसत्तत्रज्ञानाकारस्याध्यारोपः ॥ यद्यपिनबाह्यंवस्तुसत्तथाप्यनाद्यविद्यावासनारोपितमलीकंबाह्यंतत्रज्ञा
नाकारस्यारोपः उपपत्तिश्चयथाहश्यमनुभवसिद्धंरूपंतथादृशमेवाभ्युपेतव्यमित्युत्सर्गः ॥ अन्यथात्वंपुनरस्यबलवद्बाधकप्रत्यय
वशात् ॥ नेदंरजतमितिबाधकस्येदंतामात्रबाधेनाप्युपपत्तौनरजतगोचरतोचितारजतस्यधर्मिणोबाधेहिरजतंचतस्यधर्म
इदंताचबाधितेभवेतांतद्वरमिदंतैवास्यधर्मोबाध्यतांनपुनः रजतमपिधर्मि तथाचरजतंबहिर्बाधितमर्थादांतरज्ञानेव्यवति
ष्ठतइतिज्ञानाकारस्यबहिरध्यासःसिध्यति । केचित्तुज्ञानाकारख्यातावपरितुष्यंतोबहिरेवनिपत्यचरध्यासस्तदिवेकार्यहेतुनिबंध
नोभ्रमइतिअपरितोषकारणंचाहुः ॥ विज्ञानाकारतारजतादेरनुभवाद्वाव्यस्थाप्येत ॥ अनुमानाद्वानत्वानुमानमुपरिष्टान्निरा
करिष्यते । अनुभवोपिरजतप्रत्ययोवासाद्वाधकप्रत्ययोवानतावद्रजतानुभवः सहीदंकारास्पदंरजतमावेदयतिनत्वांतरमहमिति
हितदासात्वतिपत्तुः प्रत्यगात्मतिरेकात् । भ्रांतंविज्ञानंस्वाकारमेवबाह्यतयाध्यस्यतितथाच नाहंकारास्पदमस्यगोचरः ॥ ज्ञाना
कारतापुनरस्यबाधकप्रत्ययप्रवेदनीयेतिचेत् ॥ हंतबाधकप्रत्ययमालोचयत्वायुष्मान्किंपुरोवर्तिद्रव्यंरजताद्विवेचयत्या
होस्विद्यनीयप्रज्ञोदेशनात्प्रियःपुरोवर्तित्वप्रतिषेधादर्थाद्रस्यज्ञानाकारतेतिचेत् । नप्रसन्निधानाद्यग्रहनिषेधात्सन्निहिता

वाच॰
६

भवति प्रतिपत्तुः अत्यंतसन्निधानत्वस्य प्रतिपत्त्यात्मकं कुतस्त्वं ज्ञानाकारस्य तामप्यस्य दर्शयति न त्वज्ञानाकारतो प्रत्ययोपदर्शि
तव्यापारं बाधकस्य गुणाः श्लाघनीयः त्वज्ञादेवानां प्रियः पुरोवर्तित्वप्रतिपत्त्यर्थादस्येति न चैष रजतस्य निषेधो न वेदंतायाः
किं तु विवेकाग्रहत्वसंज्ञितस्य रजतव्यवहारस्य न रजतमेव शुक्तिकायां प्रसंज्जितं रजतज्ञानेन गृहीतनिर्भासस्य शुक्तिकालंब
नं युक्तं अनुभवविरोधात्। न खलु सत्तामात्रेणावलंबनं अतिप्रसंगात् सर्वे प्रमथार्थाः सत्त्वाविशेषात् आलंबनत्वप्रसंगेन नापि
कारणत्वेनेंद्रियादीनामपि कारणत्वात्। तथा च भासमानत्वमालंबनार्थः न च रजतज्ञाने शुक्तिका भासत इति कथमालंबनं भास
मानताभ्युपगमे वा कथं नानुभवविरोधः अपि चेंद्रियादीनां समीचीनज्ञानोपजननसामर्थ्यमुपलब्धमिति कथमेभ्यो मिथ्याज्ञा
नसंभवः दोषसहितानां तेषां मिथ्याप्रत्ययेपि सामर्थ्यमिति चेन्न। न दोषाणां कार्योपजननसामर्थ्यविघातमात्रहेतुत्वात्। अन्य
था दुष्टादपि कुटजबीजाद् वटांकुरोत्पत्तिप्रसंगात्। अपि च स्वगोचरव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसंगः। तस्मात्सर्वं
ज्ञानं समीचीनमास्थेयं तथा च रजतमिति हि विज्ञाने स्मृत्यनुभवरूपे तत्रेदमिति पुरोवर्तिद्रव्यमात्रग्रहणं दोषवशात् तद्गतशुक्तित्व
स्य विशेषाद् ग्रहणमात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजतस्मृतिं जनयति सा च गृहीतग्रहणस्वभावापि दोषवशाद् गृही
तं तदंशप्रमोषात् ग्रहणमात्रमवतिष्ठते। तथा च रजतस्मृतेः। पुरोवर्तिद्रव्यमात्रग्रहस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात् सं
निहितरजतगोचरज्ञानसारूप्येणेदं रजतमिति भिन्ने अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः क्व
चित्तु नर्ग्रहणे इदं रजतमिति भिन्ने अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः क्वचित्तु ग्रहणे एव मि
थोगृहीतभेदे पचापीतः शंख इति। अत्र हि बहिर्विनिर्गच्छन्नयनरश्मिवर्तिनः पित्तद्रव्यस्य काचस्येव स्वच्छस्य पीतत्वं श्वैत्येपि तत्तु
न गृह्यते। शंखोपि दोषवशात् शुक्लगुणरहितः स्वरूपमात्रेण गृह्यते तदनयोर्गुणगुणिनोरसंसर्गाग्रहसारूप्यात् पीततपनीयपिंडस्येवाविशो

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

पेणाभेदव्यवहारः। सामानाधिकरण्यव्यपदेशश्च भेदाग्रहप्रसंजिताभेदव्यवहारबाधनात् नेदमिति विवेकप्रत्ययस्य बाधकत्वमप्युप
पद्यते। न ह्युपपत्तौ च प्राचीनप्रत्ययस्य भ्रांतत्वमपि लोकसिद्धं सिद्धं भवति। तस्माद्यथार्थाः॥ सर्वे विप्रतिपत्तिः संदेहविभ्रमात्म
प्रत्ययत्वाद् यदि प्रत्ययवशादिदमुक्तं प्रत्यगध्यास इति यस्मिन् शुक्तिकादौ यस्य रजतादेरध्यास इति लोकप्रसिद्धिः। नासावन्यथा
ख्यातिनिबंधना। किं तु गृहीतस्य रजतादेः तत्स्मरणस्य च गृहीतत्वांशप्रमोषेण गृहीतमात्रस्य तच्चेदमिति पुरोवर्तिद्रव्यमात्र
ज्ञानाच्च विवेकः। तदग्रहणनिबंधनो भ्रमः भ्रांतित्वं च स्मरणग्रहणयोरितरेतरसामानाधिकरण्यव्यपदेशो रजतव्यवहारश्चेति।
अन्येषां परितुष्यंतो यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते। अत्रेदमाकूतं। अस्ति तावद्रजतार्थिनो रज
तमिदमिति प्रत्ययात् पुरोवर्तिनि द्रव्ये प्रवृत्तिः सामानाधिकरण्यव्यपदेशश्चेति सर्वजननीयं तदेतच्च नावद्ग्रहणस्मरणयोस्त
द्गोचरयोश्च मिथो भेदाग्रहमात्रात् भवितुमर्हति। ग्रहणनिबंधनौ हि चेतनस्य व्यवहारव्यपदेशौ कथमग्रहणमात्राद्भवेतां ननूक्तं
नाग्रहणमात्रात् किं तु स्मरणग्रहणे एव मिथः स्वरूपतो विषयतश्चागृहीतभेदे समीचीनपुरःस्थितरजतविज्ञानसारूप्येण
अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयत इति अथ समीचीनज्ञानसादृश्यमनयोर्दृश्यमानं वा व्यवहारप्रवृत्तिहेतुरग्र
हणं वा सत्तामात्रेण प्रथमाणत्वेपि समीचीनज्ञानसारूप्यमनयोः इदमिति रजतमिति च ज्ञानयोरितिग्रहणं अथवा अनयोरेव
स्वरूपतो विषयतश्च मिथो भेदाग्रह इति ग्रहणं। तत्र न तावत् समीचीनज्ञानसदृशोयमिति ज्ञानं समीचीनज्ञानवद्व्यवहारप्रवर्त
कं। न हि गोसदृशो गवय इति ज्ञानं गवार्थिनं गवये प्रवर्तयति अनयोरेव भेदाग्रह इति तु ज्ञानं पराहतं न हि भेदाग्रहेनयोरिति तावति
अनयोरपि हि भेदग्रहणमिति च भवति तस्मात्सत्तामात्रेण भेदाग्रहो गृहीत इव व्यवहारहेतुरिति वक्तव्यं तत्र किमपमारोपोसा
दक्रमेण व्यवहारहेतुराहोस्विदनुत्पादितकार्थनाशकरणं प्रवणाउपयुज्यते। इदंकारास्पदाभिमुखी रजतार्थिनां प्रवृत्तिरिति

विचारं। कथं चायमिदंकारास्पदे प्रवर्तेत यदि न तद्दिदृक्षेत्। अन्यदिच्छन्नन्यत्करोतीति व्याहतं। न चेदिदंकारास्पदं रजतमिति जानी
यात् कथं रजतार्थी तद्दिदृक्षेत् यथा तथात्वेनाग्रहणादिति ब्रूयात्स प्रतिवक्तव्यः अथ तथात्वेनाग्रहणं कस्मादयं नोपेक्षेतेति। सोयमु
पादानोपेक्षाभ्यां जिहासित आक्रम्यमाणश्चेतनोऽवस्थितः इदंकारास्पदे रजतसमारोपेणोपादानपक्ष एव व्यवस्थाप्यत इति भेदाग्रहः
समारोपोत्पादक्रमेणैव तत्र प्रवृत्तिर्हेतुः॥ तथा हि। भेदाग्रहादिदंकारास्पदे रजतत्वसमारोपेण तज्जातीयस्योपकारहेतुभावमनुविंस
न्जानीय तथा इदंकारास्पदे रजते तमनुमाय रजतार्थी प्रवर्तत इत्यानुपूर्व्यसिद्धं न च तत्र स्मर्यमाणरजतस्मृतिरिदंकारास्पदस्योपका
रहेतुभावमनुमापयितुमर्हति। रजतत्वस्याहेतोरपक्षधर्मत्वात्। एकदेशदर्शनं खल्वनुमापकं न त्वनेकदर्शनं यथाहुः ज्ञात
संबंधस्यैकदेशदर्शनादिति समारोपे त्वेकदेशदर्शनमस्ति तत्सिद्धमेतत् द्विवादाध्यासितं रजतादिज्ञानं पुरोवर्तिवस्तुविषयं रजता
र्थिनस्तत्र नियमेन प्रवर्तकत्वात् यद्यदर्थिनं यत्र नियमेन प्रवर्तयति तज्ज्ञानं तद्विषयं यथोभयसिद्धसमीचीनरजतज्ञानं त
था चेदं तस्मात्तथेति यच्चोक्तमनवभासमानत्वान्न शुक्तिकालंबनमिति तत्र भावानुपपत्त्या व्याचष्टे। किं शुक्तिकात्वस्येदं रजतमिति
ज्ञाननैरालंबनत्वं आहोस्विदिदंत्वमात्रस्य पुरःस्थितस्य सितभास्वरस्य वा यदि शुक्तिकात्वस्यानालंबनत्वं अद्धा उपेदस्या
नालंबनत्वं तु न गणस्य तव चैवानुभवविरोधः तथा हि रजतमित्यनुभवन्ननुभविता पुरोवर्तिवस्त्वंगुल्या निर्दिशति दृष्टं हि दुष्टानां का
रणानामौत्सर्गिककार्यप्रतिबंधेन कार्यांतरोपजननसामर्थ्यं यथा दावाग्निदग्धानां वेत्रबीजानां कदलीकांडजनकत्वं
दुर्जनकत्वं गमकदोषदुष्टस्य चेदर्थस्य तेजसो बहुपानपचनमिति प्रत्यक्षावाधकापकृतविषयं च विभ्रमाणां यथार्थ
तानुमानमाभासहेतुत्वाद्दुष्टत्वानुमानवत्। यच्चोक्तं मिथ्यात्वस्य व्यभिचारात्सर्वप्रमाणेष्वनाश्वास इति तद्बोधकत्वेन स्व
तः प्रामाण्यं नाव्यभिचारेणेति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिकायामिति नेह प्रतन्यते दिङ्मात्रं चास्मृतिप्रमोषभंग

७

स्योक्तं विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगंतव्य इति तदिदमुक्तं यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति। यत्र शु
क्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्मत्वकल्पनां रजतधर्मत्वकल्पनामिति योजना ननु संतु परीक्षकाणां वि
प्रतिपत्तयः प्रकृते तु किमायातमिति अत आह॥ सर्वथापि त्वन्यस्यान्यधर्मकल्पनां न व्यभिचरति। अन्यस्यान्यधर्मकल्पना अन्यतता
सा चानिर्वचनीयत्वेत्यध्यासादुपपादितं तेन सर्वेषामेव परीक्षकाणां मते त्वन्यस्यान्यधर्मकल्पनानिर्वचनीयतावश्यंभाविनीत्यनिर्वचनीय
ता सर्वतंत्रसिद्धांत इत्यर्थः। अख्यातिवादिभिरकामैरपि समानाधिकरणव्यपदेशप्रवृत्तिनियमस्य हेतुरभ्युपेय इति भावः। न के
वलमियमन्यथाप्रतीतिः परीक्षकाणां सिद्धा अपि तु लौकिकानामपीत्याह॥ तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासत इति नपु
ना रजतमिदमिति शेषः स्यादेतदन्यस्यान्यधर्मात्मना विभ्रमो लोकसिद्धः एकस्य त्वभिन्नस्य भेदविभ्रमो न दृष्ट इति कुतश्चिदात्मनो
भिन्नानां जीवानां न भेदविभ्रम इत्यत आह॥ एकश्चंद्रः सद्वितीयवदिति। पुनरपि चिदात्मन्यध्यासमाक्षिपति कथं पुनः प्रत्य
गात्मन्यविषयेऽध्यासो विषयधर्माणां अयमर्थः चिदात्मा प्रकाशते वा न वा न चेदप्रकाशमाने कथमस्मिन्नध्यासो विषयधर्माणां॥ न
खल्वप्रतिभासमाने पुरोवर्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वा समारोपः संभवतीति प्रतिभासे वा न तावदयमात्मा जडो येन परिवल
राधीनप्रकाश इति युक्तं न च स्वयमेव कर्तृकर्मभावविरोधात् परसमवेतक्रियाफलशालि हि कर्म। न च ज्ञानक्रिया परसमवायिनी।
इति कथमस्याः कर्मत्वं च तदेकस्यां परं च विरोधात्। आत्मांतरसमवायाभ्युपगमे तु ज्ञेयस्यात्मनोऽनात्मत्वप्रसंगः॥ एवं च तस्य तस्येत्यनव
स्थापत्तिः॥ स्यादेतत्॥ आत्मा जडोपि सर्वथार्थज्ञानेषु भासमानोपि कर्तैव न कर्म परसमवेतक्रियाफलशालित्वाभावात्। चैत्रवत्
तथा हि। चैत्रसमवेतया क्रियया चैत्रनगरं प्राप्नुवन्नुभयसमवेतायामपि क्रियमाणायां नगरस्यैव कर्मता परसमवेतक्रियाफलशालित्वात्।
ननु चैत्रस्य क्रियाफलशालिनोपि चैत्रसमवेतत्वाद्गमनक्रियाया नन्व इति न प्रत्यक्षविरोधात्। श्रूयते हि सत्यं ज्ञानमनंतं ब्रह्मेति उपपद्यते च

पाच. तथाहि। योयमर्थःप्रकाशः फलं यस्मिन्नर्थस्यात्मा च प्रथते स किं जडः स्वयंप्रकाशो वा जडश्चेद्विषयात्मानमपि जडाविति कस्मिन्किंप्रकाशेन

८ विशेषादिति प्रासमांध्यं अशेषस्य जगतः तथा चाभाणकः अंधस्येवांधलग्नस्य विनिपातः पदे पदे ॥ ननु नीलीनमेव विज्ञानं अर्थात्मानौ ज्ञा

पयति चक्षुरादिवदिति वाच्यं । ज्ञापनं हि ज्ञानजननं जनितं च ज्ञानं जडं स भोक्तृदूषणमिति वर्त्तते । एवमुत्तरोत्तराण्यपि ज्ञानानि अप्र

नीत्वनवस्था ॥ तस्मादपराधीनप्रकाशा संविद्रूपेतव्या ॥ तथापि किमायातं ॥ विषयात्मनोः स्वभावजडयोः एतदायातं यत्तयोः संवि

द्जडेति तत्किं पुत्रः पंडितः इति पितापि पंडितोस्तु । स्वभावद्रव्यसंविदः । स्वयंप्रकाशायायद्यर्थात्मसंबंधितेति चेत् । हंत पुत्रस्यापि पंडितस्य

स्वभाव एष यत्पितृसंबंधितेति समानं स दार्थात्मप्रकाशेन संवित्प्रकाशते । न त्वर्थात्मप्रकाशं विनेति तस्याः स्वभाव इति चेन्न । तत्किं

संविदोभिन्नौ संविदात्मार्थप्रकाशौ तथा च न स्वयंप्रकाशा संवित् । न च संविदर्थात्मप्रकाश इति अथ संविदार्थात्मप्रकाशौ न संवि

विदोभिन्नौ संविदेव तौ एवं चेत् ॥ यावद्दुःखं भवति संविदात्मार्थौ सिद्धौ विना वदुःखं भवति संविदात्मार्थात्मप्रकाशौ सहेति तथा च न विव

क्षितार्थसिद्धिः न चातीतानागतार्थागोचरायाः संविदोर्थसहत्वावेपिं तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहत्वादिति

चेत् ॥ नार्थसंविदद्वयानादिबुद्धीनामपि तद्विषयत्वानुपपत्तेः हानादिजननाद्धानाबुद्धीनां अर्थविषयत्वं अर्थविषयहाना

दिबुद्धिजननाच्चार्थसंविदस्तद्विषयत्वमिति चेत् ॥ तत्किं देहस्य प्रयत्नवदात्मसंयोगो देहप्रवृत्तिनिवृत्तिहेतुरर्थदर्सथप्रकाशोस्तु ॥

जाड्यादेहात्मसंयोगो नार्थप्रकाश इति चेत् । ननु यं स्वयंप्रकाशोपि स्यात्मन्येवरवद्योतवत्प्रकाशः । अनर्थं तु जडत्वमुपपादितं ॥ न च

प्रकाशस्यात्मनोविषयः । ते हि विच्छिन्नदीर्घस्थूलतयानुभूयंते ॥ प्रकाशस्त्वायमाद्यरोस्थूलोऽनणुर्ह्रस्वो दीर्घश्चेति प्रकाशंते । न

स्थादेकस्मिन्नंदेऽनुभूयमानद्वयद्वितीयस्यंद्रमाः प्रकाशादन्यो वा निर्वचनीय एवेति युक्तमुत्पश्यामः न चास्य प्रकाशस्याजानतः

स्वलक्षणभेदेनानुभयनेन वा निर्वाच्यार्थभेदः प्रकाशं निर्वाच्यं भेत्तुमर्हति । अतिप्रसंगात् ॥ न चार्थिगामपि परस्परं भेदः ॥ समीचीनज्ञा

८

नपह्नुतिमध्यस्वद्वयुपरिषद्गुपपादविष्यते ॥ नर स्वयंप्रकाशः एवं स्वयंप्रकाश एकः कूटस्थोनित्योनिरंशः । प्रत्यगात्मा सहि अध्यस्त निर्वच

नीयभेदैर्देहेंद्रियादिभिः आत्मानं प्रतीपं निर्वचनीयं अंचति विजानातीति प्रत्यङ् स चात्मेति प्रत्यगात्मा स चापराधीनप्रकाशत्वादनंधात्मा

विषयः तस्मिन् अध्यासो विषयधर्माणां देहेंद्रियधर्माणां कथं कर्मक्षेपे अयुक्तोयमध्यास इत्याक्षेपः कस्मादयुक्त इत्यत आह ॥ सर्वो हि

पुरोवस्थितेविषये विषयांतरमध्यस्यति एतद्दुःखं भवति । यस्वराधीनप्रकाशमंशाच तत्सामान्यांशग्रहेणैकरदोषाच्च विशेषाग्रहेऽ

न्यथाप्रकाशते प्रत्यगात्मा चापराधीनप्रकाशतया न स्वज्ञानकारणान्यपेक्षते येन तदाश्रयैर्दोषैर्दूष्येत । न चांशवान् । येन कश्चिदस्यांशो

गृह्येत कश्चिन्न गृह्येत न हि तदेव तदानीमेव तेनैव गृहीतमगृहीतं चेति संभवतीति न स्वयंप्रकाशे पदेऽध्यासः सदा तन्नेन्यप्रकाशो पुरोव

स्थितत्वस्यापरोक्षत्वस्याभावान्नाध्यासः । न हि शुक्ताव पुरोवस्थितायां रजतमध्यस्यति इदं रजतमिति तस्मादत्यंतग्रहे अत्यंता

ग्रहे च नाध्यास इति सिद्धं स्यादेतत् । अविषयत्वेचिदात्मनो नाध्यास इति विषयश्च चिदात्मा ऽस्मत्प्रत्ययस्य न कथं नाध्यास इत्यत आह ।

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोरिति विषयत्वे हि चिदात्मनोऽन्यो विषयी भवेत् तथा च यो विषयी स एव चिदात्मा विषयस्त्वनात्मा

युष्मत्प्रत्ययगोचरोऽभ्युपेयः । तस्मादनात्मत्वप्रसंगादनवस्थापरिहाराय युष्मत्प्रत्ययापेतत्वं अत एवाविषयं प्रत्यगात्मनो वक्तव्यं त

था च नाध्यास इत्यर्थः परिहरति । उच्यते न तावदयमेकांतेनाविषयः । कुतः अस्मत्प्रत्ययविषयत्वात् । अयमर्थः । सत्यं प्रत्यगात्मा

स्वयंप्रकाशत्वादविषयोऽनंशश्च । तथाप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनःसूक्ष्मस्थूलशरीरेंद्रियावच्छेदकभेदेना

वच्छिन्नोपि वस्तुतोनवच्छिन्न इवाभिन्नोपि भिन्न इवाकर्त्तापि कर्त्तेवाभोक्तापि भोक्तेवाविषयोप्यस्मत्प्रत्ययविषय इव

जीवभावमापन्नो अवभासते नभ इव घटमणिकमल्लिकाद्यवच्छेदेनभिन्नमिवानेकविधधर्मकमिवेति । न हि चिदेकरसस्यास्य

स्यात्मनः स्वरूपग्रहे नेत्यहीतं किं चिदस्ति न खल्वानंदनित्यत्वविभुत्वादयोस्य चिद्रूपाद्वस्तुतो भिद्यंते येन तद्ग्रहेनगृह्येरन् ।

गृहीताद्वस्तुकल्पितेनभेदेनविवेचिताइति अगृहीताइव भवंति न चात्मनोबुध्यादिभ्योभेदस्तात्त्विकः येनचिदात्मनि गृह्यमाणेसो
पिगृहीतोभवेत्। बुध्यादीनामनिर्वाच्यत्वेतभेदस्याप्यनिर्वचनीयत्वात्। तस्माच्चिदात्मनः स्वयंप्रकाशस्यैवानवच्छिन्नस्यैवावच्छि
न्नभोभेदाग्रहात् तदध्यासेनजीवभावइति। तस्यचानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते तथाहिकर्ताभोक्तानि
त्याऽहंप्रत्ययेप्रत्यवभासते। नचोदासीनस्यक्रियाशक्तिर्भोगशक्तिर्वासंभवति। यस्यचबुध्यादेःकार्यकारणसंघातस्यक्रि
याभोगशक्तिर्नतस्यचैतन्यं तस्माच्चिदात्मैवकार्यकारणसंघातेनाभिनोलब्धक्रियाशक्तिः स्वयंप्रकाशोपिबुध्यादिविषयविच्छुरण
तकथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदोजीवइतिचजंतुरितिचक्षेत्रज्ञइतिचाख्यायते। नखलुजीवश्चिदात्मनोभिद्यते।
तथाहिश्रुतिः। अनेनजीवेनात्मनेति। तस्माच्चिदात्मनोव्यतिरेकाज्जीवः स्वयंप्रकाशोप्यहंप्रत्ययेन कर्ताभोक्तातयाव्यव
हारयोग्यः क्रियतइत्यहंप्रत्ययालंबनमुच्यते नचाध्यासेसतिविषयत्वं विषयत्वेचाध्यास इत्यन्योन्याश्रयत्वमितिसांप्रतं।
बीजांकुरवदनादित्वात्। पूर्वपूर्वाध्यासाद्वासनाविषयीकृतस्योत्तराध्यासविषयत्वादविरोधादित्युक्तं नैसर्गिकोयंलोकव्य
वहारइतिभाष्यग्रंथे। तस्मादुक्तंनचायमेकांतेनाविषयइति जीवोहिचिदात्मतयास्वप्रकाशतयाविषयोप्यौपाधि
केनरूपेणविषयइतिभावः। स्यादेतत्। नवयमपराधीनप्रकाशतयाविषयत्वेनाध्यासमपाकुर्मः किंतुप्रत्यगात्मानस्वतो
नापिपरतोवाप्रथतइति अविषयइति ब्रूमः तथाचसर्वथाप्रथमानेप्रत्यगात्मनिकुतोध्यासइत्यतआह। अपरोक्षत्वा
च्चप्रत्यगात्मप्रसिद्धेः प्रतीचआत्मनःप्रसिद्धिःप्रथातस्यापरोक्षत्वात्। यद्यपिचप्रत्यगात्मन्यधाप्रथानास्तितथापिभे
दोपचारोयथापुरुषस्यचैतन्यमिति एतदुक्तंभवति। अवश्यंचिदात्मापरोक्षोभ्युपेतव्यः तदप्रथायांसर्वस्याप्रथने
जगदांध्यप्रसंगादित्युक्तं श्रुतिश्चात्रभवति। तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति। तदेवंपरमार्थ

परिहारमुक्त्वाभ्युपेत्यचिदात्मनःपरोक्षतांप्रौढिवादितयापरिहारांतरमाह। नचायमस्तिनियमः। पुरोवस्थितएवविषयेविषयांतर
मध्यसितव्यं कस्मादयंननियमइत्यतआह। अप्रत्यक्षेपिह्याकाशेबालास्तलमलिनताद्यध्यस्यंति इंद्रियस्यार्थेनभोहिद्रव्यं सद्रूप
स्पर्शविरहान्नवाह्येंद्रियप्रत्यक्षं नापिमानसंमनसोसहायस्यबाह्येप्रवृत्तेः तस्मादप्रत्यक्षं अथ तत्रबाला अविवेकिनः परद
र्शितदर्शिनः कदाचित्पार्थिवच्छायांश्यामतामारोप्य कदाचित्तैजसंशुक्लत्वमारोप्यनीलोत्पलपलाशश्याममलिनितिवाराजहंसमाला
धवलमितिवावर्णयंति। तत्रापिपूर्वदृष्टस्यतैजसस्यवातामसस्यवारूपस्यपररूपेनभसिस्मृतिरूपोवभासइति एवंहितदेवत
लमध्यस्यंति अवाङ्मुखीभूतमहेंद्रनीलमणिमयमहाकटाहकल्पमित्यर्थः। उपसंहरति। एवमुक्तेनप्रकारेणसर्वाक्षेपपरि
हाराद्विरुद्धः प्रत्यगात्मनि अप्यनात्मनांबुध्यादीनामध्यासः ननुसंतिचसहस्रमध्यासाः तत्किमर्थमयमेवाध्यासआक्षेपस
माधानाभ्यांव्युत्पाद्यते नाध्यासमात्रमित्यतआह। तमेतमेवंलक्षणमध्यासंपंडिताअविद्येतिमन्यंते। अविद्याहिसकलानर्थबी
जमितिश्रुतिस्मृतीतिहासपुराणेषुप्रसिद्धं दुःखेदायचवेदानाःप्रवृत्ताः इतिचस्मृतिः। प्रत्यगात्मन्यनात्माध्यासएवसर्वाना
र्थहेतुः नपुनरजतादिविभ्रमाइति सएवाविद्यातत्त्वरूपंचाविज्ञातंनशक्यमुच्छेत्तुमिति। तदेवव्युत्पाद्यंनाध्यासमात्रं।
अत्रचएवंलक्षणमित्येवंरूपतयानर्थहेतुतोक्ता यस्मात्प्रत्यगात्मन्यशनायादिरहितेऽशनायाद्युपेतांतःकरणाद्यहंता
रोपणंप्रत्यगात्मानमदुःखंदुःखाकरोति। तस्मादनर्थहेतुः नचैनं पृथक्जनाअपिमन्यंते अध्यासं येनव्युत्पाद्यते।
ति अत उक्तं पंडितामन्यंतइति नन्वियमनादिरिति निरूढनिबिडवासनादिरिदा विद्यानशक्यानिरोद्धुमुपायाभावादित्यतोभन्य
तेतं प्रतितं निरोधोपायमाह तद्विवेकेनवस्तुस्वरूपावधारणं निर्विचिकित्सज्ञानं विद्यामाहुः पंडिताः प्रत्यगात्मनिखलुत्यंतविविक्ते
बुध्यादिभ्योबुध्यादिभेदाग्रहनिमित्तोयंबुध्याद्यात्मत्वतद्धर्माध्यासः। तत्रश्रवणमननादिभिः यद्विवेकज्ञानंतेनविवेकाग्रहेनि

वाच॰ वर्तितेध्यासापवाध्यत्वकवस्तुस्वरूपावधारणंविद्याविद्यात्मरूपंस्वरूपेवतिष्ठतइत्यर्थः। स्यादेतत्। अतिनिरूढनिविडवासनावद्धावि
१० द्याविषयाप्रवाधितापिसवासनावशात्पुनरुद्भविष्यतिप्रवर्तयिष्यतिचवासनादिकार्यंस्वोचितमित्यतआह॥ तत्रैवंसति। एवंभूतवस्तु
तत्वावधारणेसतियत्रयदध्यासस्तत्कृतेनदोषेणगुणेनवाणुमात्रेणापिसनसंबध्यते। अंतःकरणादिदोषेणाशनायादिनाचिदात्मा
चिदात्मनोगुणेनचैतन्यानंदादिनाअंतःकरणादिनाअंतःकरणादिर्नसंबध्यते। एतदुक्तंभवति। तत्वावधारणाभ्यासस्यस्वभावएव
सतादृशोयदनादिमपिनिरूढनिविडवासनमपि। मिथ्याप्रत्ययमपनयतितत्वपक्षपातोहिस्वभावोधियां। यथाहुर्बाह्याअपिनिरु
पद्रवभूतार्थस्वभावस्यविपर्ययैःनबाधोयत्नवत्वेपिबुद्धेस्तत्पक्षपाततइतिविशेषस्तुचिदात्मस्वभावस्यतत्वज्ञानस्यासंतांतरंगस्य
कुतोनिर्वाच्ययाविद्ययावाधइति। यदुक्तंसत्यानृतेमिथुनीकृत्याविवेकाग्रहादध्यस्याहमिदंममेदमितिलोकव्यवहारइति। तत्रव्यप
देशलक्षणोव्यवहारःकंठोक्तः। इतिशब्दसूचितंलोकव्यवहारमादर्शयति। तमेतमविद्याख्यमितिनिगदव्याख्यातं आक्षिपति कथंपु
नरविद्यावद्विषयाणिनविद्यावंतंप्रमाणान्याश्रयंति तत्कार्यस्यविद्याया अविद्याविरोधित्वादितिभावः। संतुनामप्रत्यक्षादीनिसंव
व्यापियथालयाशास्त्राणितुपुरुषहितानुशासनपराण्यविद्याप्रतिपक्षतयानाविद्यावद्विषयाणिभवितुमर्हंतीत्याहशास्त्राणिचेतिसमा
धत्ते॥ उच्यते॥ देहेंद्रियादिष्वहंममाभिमानहीनस्यतादात्म्यतद्धर्माध्यासहीनस्यप्रमातृत्वानुपपत्तौसत्यांप्रमाणप्रवृत्त्यनु
पपत्तेः अयमर्थः। प्रमातृत्वंहिप्रमांप्रतिकर्तृत्वंतच्चस्वातंत्र्यंचप्रमातुरितरकारकाप्रयोज्यस्यसमस्तकारकप्रयोक्तृत्वंतदनेनप्रमा
करणंप्रयोजनीयंनचव्यापारमंतरेणकरणंप्रयोक्तुमर्हतीतिनचकूटस्थःनित्यचिदात्मापरिणामीस्वतोव्यापारवान् तस्माद्व्यापा
रवद्बुध्यादितादात्म्याध्यासात् व्यापारवत्तयाप्रमाणमधिष्ठातुमर्हतीतिभवति अविद्यावत्पुरुषविषयत्वं अविद्यावत्पुरुषाश्रय
त्वंप्रमाणानामिति अथमाप्रवर्तिषतप्रमाणानिकिंनश्छिन्नमित्यतआह। नहींद्रियाण्यनुपादायप्रत्यक्षादिव्यवहारः संभवति
१०

व्यवह्रियतेनेनेतिव्यवहारः फलंप्रत्यक्षादीनांप्रमाणानामित्यर्थः इंद्रियाणीति। इंद्रियलिंगादीनीतिद्रष्टव्यं दंडिनोगच्छंतीतिवत्।
एवंहिप्रत्यक्षादीत्युपपद्यते। व्यवहारक्रिययाव्यवहार्याक्षेपात्समानकर्तृता अनुपादाययोव्यवहारइति योजना किमितिपुनः
प्रमातारंतेप्रमाणानि अपत्यपनेयकस्मान्नप्रवर्तंतइत्यतआह॥ नचाधिष्ठानमंतरेणेंद्रियाणांव्यापारःप्रमाणानांव्यापारःसंभवति।
नजातुकरणान्यनधिष्ठितानिकर्तास्वकार्यमारभंते माभूत्कुविंदरहितेभ्योवेमादिभ्यःपटोत्पत्तिरिति। अथदेहएवाधिष्ठाताक
स्मान्नभवति। कृतमध्यासेनेति अतआह। नचानध्यस्तात्मभावेनदेहेनकश्चिद्व्याप्रियते। सुषुप्तेति। व्यापारप्रसंगादितिभावः॥
स्यादेतत्। यथानध्यस्तात्मभावंवेमादिकंकुविंदोव्यापारयन् पटस्यकर्तैवमनध्यस्तात्मभावंदेहेंद्रियादिव्यापारयन्भविष्यति
तदभिज्ञःप्रमातेत्यतआह। नचैतस्मिन्सर्वस्मिन्नितरेतराध्यासेइतरेतरधर्माध्यासेवाअसतिआत्मनोसंगस्यसर्वथासर्वदास
र्वधर्मधर्मिविमुक्तस्यप्रमातृत्वमुपपद्यते व्यापारवंतोहिकुविंदादयोवेमादीन्यधिष्ठायव्यापारयंति। अनध्यस्तात्मभावस्यतुदेहा
दिष्वात्मनोनव्यापारयोगोऽसंगत्वादित्यर्थः। अतश्चाध्यासाश्रयाणिप्रमाणानीत्याह नचप्रमातृत्वमंतरेणप्रमाणप्रवृत्तिरस्तिप्रमा
यांखलुफलेस्वतंत्रःप्रमाताभवति। अंतःकरणपरिणामभेदश्चप्रमेयप्रवणःकर्तृस्थश्चित्स्वभावःप्रमा कथंचजडस्यांतःकरण
स्यपरिणामःचिद्रूपोभवेत्। यदिचिदात्मातत्रनाध्यस्येतकथंचेयंचिदात्मकर्तृकोभवेत् यद्यंतःकरणंव्यापारवच्चिदात्मनि
नाध्यस्येत्। तस्मादितरेतराध्यासाच्चिदात्मकर्तृस्थंप्रमाफलंसिध्यति। नसिद्धौचप्रमातृत्वंनामैवचप्रमातुरर्हस्यप्रमाणस्यप्रवृत्तिः
प्रमातृत्वेनचप्रमोपलक्ष्यते। प्रमायाःफलस्याभावेप्रमाणंनप्रभवति। नयाचप्रमाणंप्रमाणंस्यादित्यर्थः उपसंहरति। तस्मादविद्यावद्वि
षयाण्येवप्रत्यक्षादीनिप्रमाणानिस्यादेतत्। भवतुपृथग्जनानामेवं आगमोपपत्तिप्रत्यगात्मतत्वानांतुव्युत्पन्नानामपिपुंसांप्र
माणप्रमेयव्यवहारादृश्यंतेइतिकथमविद्यावद्विषयाण्येवप्रमाणानीत्यतआह॥ पश्वादिभिश्चाविशेषादिति॥ विदंतुनामा

वाच· ग्मोपपत्तिभ्यां देहेंद्रियादिष्वोभिमंत्रसगात्मानं। प्रमाणप्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मा अतिवर्तन्ते। यादृशोपि पशुशकुंतादीना

११ मविप्रतिपन्नमुग्धभावानां व्यवहारस्तादृशो व्युत्पन्नानामपि पुंसां दृश्यतेति। न तस्मात्तस्मात्तेषामपि व्यवहारसमयेऽविद्यावत्त्वमनुमेयं॥

चशब्दः समुच्चये। उक्तशंकानिवर्तनसहितात् पूर्वोक्तोपपत्तिरविद्यावत् पुरुषविषयविषयत्वं प्रमाणानां साधयतीत्यर्थः। एतदेव विभज

ते। यथाहि पश्वादय इति। अत्र च शब्दादिभिः श्रोत्रादीनां संबंधे सतीति प्रत्यक्षं प्रमाणं दर्शयति। शब्दादिविज्ञान इति तत्फलमुक्तं। प्र

तिकूल इति चानुमानफलं तथाहि। शब्दादिस्वरूपमुपलभ्य तज्जातीयस्य प्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य

प्रतिकूलतामनुमिमत इति। उदाहरति। यथा दंडेति शेषमतिरोहितार्थं। शास्त्रे तु भवंतु प्रत्यक्षादीन्यविद्यावद्विषयाणि शा

स्त्रं तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि न देहाद्यध्यासेन प्रवर्तितुमर्हति। अत एवामुष्मिकफलोपभोगयोग्योधिकारी प्रतीयते।

तथा चापारमर्षं सूत्रं। शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यादिति न च देहादिभस्मीभूतं पारलौकिकाय फलाय क

ल्पत इति देहाद्यतिरिक्तं विद्वांसं अधिकारिणमाक्षिपति शास्त्रं न द्वगमश्च विद्येति। कथमविद्यावद्विषयं शास्त्रमित्याशं

क्याह शास्त्रीय इति। तुशब्दः प्रत्यक्षादिव्यवहाराद्भिनत्ति अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबंधं विना निर्वहति नहि

ति तावन्मात्रमाक्षिपेत्। न त्वस्यासंसारित्वमपि तस्याधिकारे त्वनुपयोगात्। प्रत्युत औपनिषदस्य पुरुषस्याकर्तुरभोक्तुरधिकार

विरोधात्। प्रयोक्ता हि कर्मणः कर्मजनितफलभोगभागी कर्मण्यधिकारी स्वामी भवति। तत्र कथमकर्ता प्रयोक्ता कथं वाभोक्ता

धर्मजनितफलभोगभागी तस्मादनाद्यविद्याध्यस्तकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं

प्रवर्तत एवं वेदांतानामपि अविद्यावत्पुरुषविषयत्वं न हि प्रमात्रादिविभागादृतेनार्थाधिगमः नेत्यविद्यावंतमनुशासंतो

निर्मृष्टनिखिलाविद्यमनुशिष्टस्वरूपं व्यवस्थापयंतीति। एतावानेवो विशेषः। तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धं॥ विप

११

स्यादेतत्। यद्यपि विरोधादनुपयोगाच्चौपनिषदः पुरुषोधिकारे नापेक्ष्यते तथाप्युपनिषद्भ्योऽवगम्यमानः शक्नोत्यधिकारं निरोद्धुं तथा

च परस्पराहतार्थत्वेन कृत्स्न एव वेदः प्रमाणं न स्यादित्यत आह। प्राक्च तथाभूतात्मेति। सत्यमौपनिषदः पुरुषाधिगमोऽधिकारविरोधीत

स्मात्तु पुरस्तात्कर्मविषयः स्वोचितं व्यवहारमभिनिर्वर्तयंतो नात्तु प्रज्ञानेन तत्त्वज्ञानेन शक्यो निरोद्धुं न च परस्परापराहतिः विद्यावत्पुरुष

भेदेन व्यवस्थोपपत्तेः। यथा न हिंस्यात्सर्वा भूतानीति साध्यांशनिषेधेपि श्येनेनाभिचरन् यजेतेति शास्त्रं प्रवर्तमानं न हिंस्यादित्यनेन न विरु

ध्यते॥ तत्कस्य हेतोः पुरुषभेदादिति अवजितक्रोधारातयः पुरुषा निषेधेधिक्रियंते क्रोधारातिवशीकृतास्तु श्येनादिशास्त्र इति अविद्या

वत्पुरुषविषयत्वं नातिवर्तत इति यदुक्तं तदेव स्फोटयति तथाहीति। वर्णाध्यासो राजा राजसूयेन यजेतेत्यादिः आश्रमाध्यासो गृहस्थः स

दृशीं भार्यां विंदेदित्यादिः वयोध्यासः कृष्णकेशोग्नीनादधीतेत्यादिः अवस्थाध्यासोप्रतिसमाधेयव्याधीनां जलप्रवेशेन प्राणत्यागा

दिः आदिग्रहणं महापातकोपपातकसंकरीकरणपात्रीकरणमलिनीकरणाध्यासोपसंग्रहार्थं एवमात्मानात्मनोः परस्पराध्यासमाक्षेपसमा

धानाभ्यामुपपाद्य प्रमाणप्रमेयव्यवहारप्रवर्तनेन दृढीकृत्य तस्यानर्थहेतुतामुदाहरणप्रपंचेन प्रतिपादयितुं तत्स्वरूपमुक्तं स्मारयति अ

ध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम॥ स्मृतिरूपः परत्र पूर्वदृष्टावभास इत्यस्य संक्षेपाभिधानमेतत्। तत्राहमिति। धर्मितादा

त्म्याध्यासमात्रं मन्येत्वनुत्पादितधर्माध्यासं नानर्थहेतुरिति धर्माध्यासमेव ममकारं साक्षादशेषानर्थसंसारकारणमुदाहरण

प्रपंचेनाह। तद्यथा पुत्रभार्यादिष्विति। देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्रकलत्रादिस्वाम्यं कृशत्वादिवदारोप्याह। अहमे

व सकलः विकल इत्यादि स्वस्य खलु साकल्येन स्वाम्यसाकल्यात् धर्मापि वैकल्यादयः स्वाम्यप्रणालिकाया संचारिताः शरीरे

तानात्मन्यध्यस्यतीत्यर्थः। यदा च परोपाध्यपेक्षो देहः स्वमीश्वरः सकलः संपूर्णो भवति। तथा स्वस्य वैकल्ये न स्वाम्यवैकल्यात्

स्वामिनोपि विकलोसंपूर्णो भवतीत्यात्मधर्मा ये वैकल्यादयः स्वाम्यधर्मस्वामिन्येषयंगतिः। तदाकैव कथानौपाधिके तु देहधर्मे कृशत्वादि

वाच॰
१२

च्छिन्नार्थत्वमाह। तथान्तःकरणधर्मानिति। देहाद्यन्तरंगाणामिन्द्रियाणामध्यस्तात्मभावानामंधमूकतादीन्धर्मान् ततोप्यन्तरंगस्यान्तःक
रणस्याध्यस्तात्मभावस्य धर्मान् कामसंकल्पादीन् आत्मन्यध्यस्यतीति योजना। तदनेन प्रपंचेन धर्माध्यासमुक्त्वा तन्मूलं धर्म्यध्यास
माह। एवमहंप्रत्ययिनमहंप्रत्ययोत्पत्तिर्यस्मिन्नन्तःकरणादौ सोयमहंप्रत्ययी तं स्वप्रचारसाक्षिणि। अंतःकरणप्रचारसाक्षिणि चैतन्यो
दासीनताभ्यां प्रत्यगात्मन्यध्यस्यति। तदनेन कर्तृत्वभोक्तृत्वे उपपादिते। चैतन्यमुपपादयति तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्यये
णांतःकरणादि विपर्ययेणांतःकरणादिष्वेवं तत्सविपर्ययेणैतन्यमित्थंभूतलक्षणे तृतीया अंतःकरणादिष्वध्यस्येति तदनेनांतः
करणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणविषयाद्याधारो हंकारास्पदं संसारी सर्वानर्थसंभारभाज
नं जीवात्मा इतरेतराध्यासोपादानस्तदुपादानश्चाध्यास इत्यनादित्वाद्बीजांकुरवन्नेतरेतराश्रयत्वमित्युक्तं भवति। प्रमाणप्रमेय
व्यवहारहेतोस्तमपि शिष्यहिताय तत्स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतयाध्यासं स्फुटीकरोति एवमयमनादि
रनंतस्तत्त्वज्ञानमंतरेणाशक्यसमुच्छेदः अनाद्यनंतत्वे हेतुरुक्तो नैसर्गिक इति मिथ्याप्रत्ययरूपो मिथ्याप्रत्ययानां रूपम
निर्वचनीयत्वं तद्यस्य तथोक्तः अनिर्वचनीय इत्यर्थः प्रकृतमुपसंहरति अस्यानर्थहेतोः प्रहाणाय विरोधिप्रत्ययं कर्म
सु प्रकृत्यये आत्मैकत्वं विगलितनिखिलप्रपंचत्वमानंदरूपस्य सतस्तत्प्रतिपत्तिं निर्विचिकित्सां भावयंतो वेदांताः समूल
घातमध्यासमुपघ्नंति। एतदुक्तं भवति। अस्यानर्थस्य स्वरूपविषयस्य समीचीनत्वे सति ब्रह्मणो आत्मत्वाभिः प्रयोजनत्वाच्च न जि
ज्ञास्यात् तदभावे च न ब्रह्मज्ञानाय वेदांताः पठ्येरन्। अपि त्वविवक्षितार्था जपमात्रे उपयुज्येरन्। नहि तद्दोषनिबन्ध
नप्रत्ययः प्रमाणतामश्नुते। न चासावप्रमाणमप्यसौ बाधितं कर्तृत्वभोक्तृत्वादि आत्मनोपनेतुमर्हति। आरोपितं
हि रूपं तत्त्वज्ञानेनापोह्यते। न तु वास्तवमतत्त्वज्ञानेन। नहि रज्जुत्वं सहस्रमपि सर्पधाराप्रत्यया अपवदितुमुत्सहन्ते॥ १२

डाक्टर भाऊदाजी इत्याख्यस्मारकम्
DR. BHAU DAJI MEMORIAL

मिथ्याज्ञानप्रसंजितं तु रूपं बध्यमानं तत्त्वज्ञानेनापवदितुं मिथ्याज्ञानसंस्कारश्च दृढोऽपि तत्त्वज्ञानसंस्कारेणादरनैरंतर्यदीर्घकाल
तत्त्वज्ञानाभ्यासजन्मेनेति। स्यादेतत् न प्रमाणाद्युपासनाद्यपि वेदान्तेषु बहुलमुपलभ्यन्ते तत्कथं सर्वेषां वेदान्तानां आत्मैकत्वप्र
तिपादनमर्थ इत्यत आह यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः शरीरमेव शरी
रकं तत्र निवासी शारीरको जीवात्मा तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयपरात्मरूपतामीमांसा या सा तथोक्ता एतावानत्रार्थसंक्षे
पः यद्यपि च स्वाध्यायाध्ययनविधिना स्वाध्यायपरवाक्यस्य नैरपेक्ष्यात् फलवदर्थावबोधपरतामापादयता कर्मविधिनिषेधानामि
व वेदान्तानामपि स्वाध्यायशब्दवाच्यानां फलवदर्थावबोधपरत्वमापादितं यद्यपि चाविशिष्टस्तु वाक्यार्थ इति न्यायान्मंत्राणा
मिव वेदान्तानामर्थपरत्वमौत्सर्गिकं। यद्यपि च वेदान्तेभ्यश्चैतन्यानंदघनः कर्तृत्वभोक्तृत्वरहितो निष्प्रपंच एकः प्रत्यगा
त्मावगम्यते। तथापि कर्तृत्वभोक्तृत्वदुःखशोकमोहमयमात्मानमवगम्यमवगाहमानेनाहंप्रत्ययेन संदेहबाधविरहिणा विरु
ध्यमाना वेदान्ताः स्वार्थं प्रत्युत उपचरितार्था वा जपमात्रोपयोगिनो वेत्यविवक्षितस्वार्थाः तथा च न तदर्थविचारात्मिका वक्तु
लक्षणी शारीरकमीमांसा आरब्धव्या न च सर्वजनीनाहमनुभवसिद्ध आत्मा संदिग्धो वा सप्रयोजनो वा येन जिज्ञास्यः न वि
चारं प्रयुंजीतेति पूर्वपक्षः सिद्धान्तस्तु भवेदेतदेवं यद्यहंप्रत्ययः प्रमाणं तस्य तूक्तक्रमेण श्रुत्यादिबाधकत्वानुपपत्तेः
श्रुत्यादिभिश्च समस्ततीर्थकारैश्चाप्रामाण्याभ्युपगमादध्यासत्वं एवं च वेदान्तानामविवक्षितार्थानामुपचरितार्थानां किं तूक्तलक्षण
प्रत्यगात्मैकत्वं तेषां मुख्यार्थः। तस्य च वक्ष्यमाणेन क्रमेण संदिग्धत्वात्प्रयोजनवत्त्वाच्च युक्ता जिज्ञासेत्याशयवान् सू
त्रकारस्तज्जिज्ञासां सूत्रयति। अथातो ब्रह्मजिज्ञासेति जिज्ञासया संदेहप्रयोजने सूचयति। तत्र साक्षादिभाष्यत्वाद्
स्य ज्ञानकर्मणोः प्रयोजनं नेच्छकर्मज्ञानात्प्राचीनमनुष्ठानमिव ब्रह्मज्ञानात्प्राचीनं किंचिदस्ति येन तदनंतरप्रयोजनं

वाच० भवेद् किंतु ब्रह्ममीमांसारम्भनर्थकमिति कर्तव्यतानुष्ठानविषयैर्वेदांतैरपाहितं निर्विचिकित्सं ब्रह्मज्ञानमिव समस्तदुःखोपशमरू
पमानंदैकरसं प्रयोजनं तमधिकृत्य हि प्रेक्षावंतः प्रवर्तेरन् नरां तच्चप्राप्तमप्यनाद्यविद्यावशादप्राप्तमिव तिरोहितं भव
१३ तियथा स्वग्रीवागतमपि ग्रैवेयकं कुतश्चिन्नष्टमात्मनो मन्यमानः परेण प्रतिपादितमप्राप्तमिव प्राप्नोतीति जिज्ञासानुसंश
यकार्यमिति स्वकारणं संशयं सूचयति संशयफलमीमांसारंभप्रयोजनमिति। तथा च शास्त्रप्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयो
जनसूचनात् युक्तमस्य सूत्रस्य शास्त्रादित्वमित्याह। भगवान् भाष्यकारः वेदांतमीमांसाशास्त्रस्य व्याचिख्यासितस्या
स्येदमादिमं सूत्रं पूजितविचारवचनो मीमांसाशब्दः परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता विचार
स्य पूजितता तस्या मीमांसायाः शास्त्रं शासनं तच्छिष्यते शिष्येभ्यो यथावत् प्रतिपाद्यत इति सूत्रं च बह्वर्थसूचनाद् भवति
यथाहुः लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च। सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिण इति। तदेवं सूत्रता
त्पर्यं व्याख्याय तस्य प्रथमपदमथेति व्याचष्टे तत्राथशब्द आनंतर्यार्थः परिगृह्यते सूत्रपदेषु प्रथमोपात्तमथशब्दः तंत्रत
स आनंतर्यार्थ इति योजना नाधिकारार्थोप्यथशब्दो दृश्यते। यथाथैष ज्योतिरिति वेदे यथा वा लोके अथशब्दानुशा
सनं अथ योगानुशासनमिति। तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह नाधिकारार्थः कुतः ब्रह्मजिज्ञासाया
ये अनधिकारित्वात्। जिज्ञासा नाम इह सूत्रे ब्रह्मणस्तद्ज्ञानाच्च शब्दतः प्रधानं प्रतीयते। न च यथा दंडीप्रैषानन्वाहेत्यत्र प्रधा
नमपि दंड शब्दार्थो विवक्षितः एवमिहापि ब्रह्मतत्त्वज्ञाने इति युक्तं ब्रह्ममीमांसाशास्त्रारम्भसंगसंशयप्रयोजनसूचनार्थत्वे
न जिज्ञासाया एव विवक्षितत्वात्। तदविवक्षायां तदसूचने तु काकदंतपरीक्षायामिव ब्रह्ममीमांसायां प्रेक्षावंतः प्रवर्तेरन्।
न हि तदानीं ब्रह्म वा तत्त्वज्ञानं वा अभिधेयप्रयोजने भवितुमर्हतः। अनध्यस्ताहंभलयविरोधेन वेदांतानामेवं विधेयैर्थाभा

१३

व्यानुपपत्तेः कर्मप्रवृत्त्युपयोगितया पचारितार्थानां वाजपेययोगिनां वा हुंमितेवमादीनामविवक्षितार्थानामपि साध्याया ध्ययनवि
ध्यधीनग्रहणत्वसंभवात्। संदेहप्रयोजनसूचनी जिज्ञासा इह पदतो वाक्यतश्च प्रधानं विवक्षित आनंतर्ये तस्या अधिकार्यत्वम
प्रकृतमानत्वात्। येन तत्समभिव्याहृतोथशब्दोधिकारार्थः स्यात्। जिज्ञासाविशेषणं तु ब्रह्मज्ञानमधिकार्यं भवेत् न च तदर्थश
ब्देन संबध्यते। प्रधानाभावात्। न च जिज्ञासा मीमांसा येन योगानुशासनवदधिक्रियेतेनांतत्वं निपातस्माङ् मानरसस्माद्दामान
पूजायामित्यस्माज्ज्ञाधातोः मान्बधे त्यादिना निच्छार्थे सनि व्युत्पादितस्य मीमांसापदस्य पूजितविचारवचनत्वात्। ज्ञानेच्छावाचकत्वा
त्तु जिज्ञासापदस्य प्रवर्तिका हि मीमांसायां जिज्ञासा स्यात्। न च प्रवर्त्यप्रवर्तकयोरैक्यं एकत्वेन भावानुपपत्तेः। न च स्वार्थपरत्वोपप
त्तौ सत्यां अन्यार्थपरत्वकल्पना युक्ता अतिप्रसंगात्। तस्मात् सूक्तं जिज्ञासाया अनधिकार्यत्वादिति। अथ मंगलार्थोऽथशब्दः कस्मा
न्न भवति तथा च मंगलहेतुत्वात् प्रशस्तं ब्रह्मजिज्ञासा कर्तव्येति सूत्रार्थः संपद्यत इत्यत आह। मंगलस्य च वाक्यार्थे समन्वयाभावा
त्। पदार्थ एव हि वाक्यार्थे समन्वीयते। स च वाच्यो वा लक्ष्यो वा न च इह मंगलमथशब्दस्य वाच्यं वा लक्ष्यं वा किंतु मृदंगध्वनिवदथश
ब्दश्रवणमात्र कार्यं न च कार्यं ज्ञापयो वाक्यार्थे समन्वयः शब्दव्यवहारे दृष्ट इत्यर्थः। तत्किमिदानीं मंगलार्थोथशब्दस्तेषु तेषु
टं न प्रयोक्तव्यः तथा च ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कंठं भित्वा विनिर्यातौ तस्मान्मांगलिकावुभाविति स्मृतिव्याकोप इत्यत आह
अर्थांतरप्रयुक्त एव ह्यथशब्दः श्रुत्या मंगलप्रयोजनो भवति। अर्थांतरेषु आनंतर्यादिषु प्रयुक्तोथशब्दः श्रुत्या श्रवणमात्रेण वेणुवी
णाध्वनिवत् मंगलं कुर्वन् मंगलप्रयोजनो भवति। अन्यार्थं नीयमानोदकुंभदर्शनवत्। तेन न स्मृतिव्याकोपेन च इहानंतर्या
वं र्थस्य सतः श्रवणमात्रेण मंगलार्थतापि सिध्यतीत्यर्थः स्यादेतत्। पूर्वप्रकृतापेक्षोथशब्दो भविष्यतीति विनैवानंतर्यार्थत्वं। तथा च अथश
ब्दं [illegible] प्रकृतविमर्शपरे किमयमथशब्द आनंतर्यं अधिकार इति अत्र विमर्शवाक्ये अथशब्दः पूर्वप्रकृतमथशब्दमपेक्ष्य प्र

धमपक्षोपन्यासपूर्वकं पक्षांतरोपन्यासेन चास्यानंतर्यमर्थः पूर्वप्रथमपक्षोपन्यासेन प्राप्तात् नवप्रकृतानपेक्षा नदनपेक्ष
स्यनद्विपयत्वाभावे नासमानविषयतयाविकल्पानुपपत्तेः नहिज्ञानुभवति किं नित्यआत्मा अथानित्यावुद्धिरिति तस्मादनं
तर्यं विना पूर्वप्रकृतापेक्षस्य हाथशब्दः कस्मान्न भवतीत्यत आह पूर्वप्रकृतापेक्षायाश्च फलत अनंतर्यमतिरेकात् अ
स्यार्थः न वयमानंतर्यार्थितां नसनिनयारोचयामहे। किंतु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्ध्ये साच पूर्वप्रकृता
र्थापेक्षत्वे पथशब्दस्य सिध्यतीति प्रथमं अनंतर्यार्थत्वावधारणग्रहोस्माकमिति तदिदमुक्तं फलमिति परमार्थस्तु क
त्वांतरोपन्यासे पूर्वप्रकृतापेक्षा। न चेदेकत्वांतरोपन्यास इतिपारिशेष्यादानंतर्यार्थं एवेति उक्तं भवत्यानंतर्यार्थः।
किमेवं सति इत्यत आह सति चानंतर्यार्थत्व इति न तावद्यस्य कस्यचिदानंतर्यमिति वक्तव्यं तस्याभिधानमंतरेणापि
प्राप्तत्वात्। अवश्यं हि पुरुषः किंचित् कृत्वा किंचित् करोतीति न चानंतर्यमात्रस्य दृष्टमदृष्टं वा प्रयोजनं पश्यामः तस्मात्तस्या
नंतर्यं वक्तव्यं यद्विना ब्रह्मजिज्ञासा न भवति यस्मिन् सति तु भवंती भवत्येवेत्यादि इदमुक्तं यत् पूर्ववृत्तं नियमेनापेक्षि
तदिति। स्यादेतत्। धर्मजिज्ञासाया इव ब्रह्मजिज्ञासायाअपि योग्यत्वात् स्वाध्यायानंतर्यं धर्मवद् ब्रह्मणोप्याम्नायैकप्र
माणगम्यत्वात् तस्य चाम्नायस्य स्वविषयविज्ञानाजननाद्ग्रहणस्य च स्वाध्यायोध्येतव्य इत्यध्ययनेनैव नियतत्वात्।
तस्माद्वेदाध्ययनानंतर्यमेव ब्रह्मजिज्ञासाया अप्यथशब्दार्थ इत्यत आह। स्वाध्यायानंतर्यं तु समानं धर्मब्रह्मजिज्ञा
सयोः अत्र च स्वाध्यायेन विषयेण तद्विषयमध्ययनं लक्षयति तथा चाथातो धर्मजिज्ञासेत्यनेनैव गतमिति नेदं सूत्रमा
रब्धव्यं धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया धर्मवद् ब्रह्मणोपि वेदार्थत्वाविशेषेण वेदाध्ययनानंतर्योपदेशसाम्यादित्यर्थः
चोदयति। नन्विह कर्मावबोधानंतर्यं विशेषो धर्मजिज्ञासातो ब्रह्मजिज्ञासायाः। अस्यार्थः। विविदिषंति यज्ञेनेति

तृतीयाश्रुत्या यज्ञादीनामंगत्वेन ब्रह्मज्ञाने विनियोगात् ज्ञानस्यैव कर्मणा तं देच्छां प्रति प्राधान्यात् प्रधानसंबंधाच्च प्रधाना
नां पदार्थानां पदार्थांतराणां त्रापि च न वाक्यार्थज्ञानेसतो अंगभावो यज्ञादीनां वाक्यार्थज्ञानस्य वाक्यादेवोत्पत्तेः।
न च वाक्यं सहकारितया कर्माण्यपेक्षत इति युक्तमिति। अकृतकर्मणामपि विविदिषत परार्थसंगतीनां समधिगतशब्दन्या
यतत्वानां गुणप्रधानभूतपूर्वापरपदार्थाकांक्षासंनिधियोग्यतानुसंधानवतामप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः। अनु
त्पत्तौ विधिनिषेधवाक्यार्थप्रत्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावप्रसंगः। तद्बोधतस्तु तदनुष्ठानपरिवर्जने परस्प
राश्रयं तस्मिन् सति तदर्थानुष्ठानपरिवर्जनं ततश्च तद्बोधयति। न च वेदांतवाक्यानामेव स्वार्थप्रत्यायने कर्मापेक्षा न वाक्यां
तराणामिति सांप्रतं। विशेषहेतोरभावात् तत्त्वमसीति वाक्यात् त्वंपदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो नित्यशुद्धबुद्धोदा
सीनस्वभावेन तत्पदार्थेन परमात्मनैक्यमशक्यं ज्ञातुं तेन प्रतिपत्तुं अपगतोशुद्धसत्त्वै यैर्मनाविरहविनिश्चयात् यज्ञ
तपोदानतं प्रकृतांतर्मलास्तु विशुद्धसत्त्वाः श्रद्दधाना योग्यत्वावगमपुरःसरं तादात्म्यमवगमिष्यंतीति चेत्। तत्किमि
दानीं प्रमाणकारणं योग्यतावधारणप्रमाणात्कर्मणो वक्तुमभ्युपगसितोस्मि प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणं वेदांतावि
दितन्मूलत्वात् बलेन तु योग्यतावधारणे कृतंकर्मभिः। तस्मात्तत्त्वमसीत्यादेः। श्रुतमयेन ज्ञानेन जीवात्मनः परमा
त्मभवं गृहीतात्मत्वया चोपपत्त्या मयस्याप्य तदुपासनायां भावनापराभिधानायां दीर्घकालआदरनैरंतर्यवत्यां ब्रह्मसाक्षा
त्कारफलायां यज्ञादीनामुपयोगः। यथाहुः। सतु दीर्घकालनैरंतर्यसत्का रसेवितो दृढभूमिरिति। ब्रह्मचर्यतपःश्रद्धायज्ञाद
यश्च सत्कारः अतएव च श्रुतिः। तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति विज्ञाय तर्कोपकरणेन शब्देन प्रज्ञां भावनां कु

द्वारे
र्गीते त्वर्थः । अत्र च यज्ञादीनां श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारेणोपयोग इति केचित् । पुरुषसंस्कारेण सत्त्वे यज्ञादिसत्कृतो हि पु-
वाच० रुष आदरनैरन्तर्यदीर्घकालैरासेव्यमानो ब्रह्मभावनामनाद्यविद्यावासनां समूलकाषं कषति । ततो ऽस्य ब्रह्मभावनासौ अप्रतिघ्नः केव-
१५ लो विशदीभवति अत एव स्मृतिः महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः यस्यैते ऽष्टचत्वारिंशत्संस्कारा इति च अपरे तु ऋणत्रयापाक-
रणेन ब्रह्मज्ञानोपयोगं कर्मणामाहुः अस्ति हि स्मृतिः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदिति अन्ये तु तमेतं वेदानुवचने-
न ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिश्रुतिभ्यः तत्फलाय चोदितानामपि कर्मणां संयोगपृथक्त्वेन ब्रह्मभावनां प्रत्यङ्गभावमाच-
क्षते । क्रत्वर्थस्यैव खादिरत्वस्य वीर्यार्थितामेकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायात् ॥ अत एव परमर्षेः सूत्रं । सर्वा-
पेक्षा च यज्ञादिश्रुतेरश्ववदिति यज्ञतपोदानादि सर्वं तदपेक्षा ब्रह्मभावनेति अर्थः तस्याद्यादिश्रुत्यादयः प्रमाणं परमर्षेर्वचः
सूत्रं सर्वथा यज्ञादिकर्मसमुच्चिता ब्रह्मोपासना विशेषणत्रयवत्सनाद्यविद्यासमुच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षाय
रनाम्नेव कल्पत इति तदर्थं कर्माण्यनुष्ठेयानि न चैतानि दृष्टादृष्टतामवाविकारादुपकारहेतुभूतौपदेशिकातिदेशिकक-
र्मपर्यन्तानां ग्रामसहितपरस्परविभिन्नकर्मस्वरूपतदधिकारिभेदपरिज्ञानं विनाशक्यान्यनुष्ठातुं न च धर्ममीमांसापरि-
शीलनं विना तत्परिज्ञानं तस्मात्साधूक्तं कर्मावबोधानन्तर्यं विशेष इति । कर्मावबोधेन हि कर्मानुष्ठानद्वारा संभवति ब्रह्मो-
पासनायाः इत्यर्थः । तदेतन्निराकरोति न कुतः कर्मावबोधात् प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः । इदमत्राकूतं ब्र-
ह्मोपासनया भावनापराभिधानया कर्माण्यपेक्षन्ते इत्युक्तं तत्र ब्रूमः कः पुनरस्याः कर्मापेक्षा किं कार्ये यथाग्नेयादीनां परमाप्-
र्वे चिरभाविफलानुकूले जनयितव्ये समिदाद्यपेक्षा स्वरूपे वा यथा तेषामेव व्रीहियवपुरोडाशादिद्रव्याग्निदेवताद्यपेक्षा १५

न तावत्कार्ये तस्य विकल्पासहत्वात् तथा हि ब्रह्मोपासनया ब्रह्मस्वरूपसाक्षात्कारः कार्योऽभ्युपेयः स चोत्पाद्यो वाप्यात् । यथा
संयावेन स्वपिण्डः । विकार्यो वा यथावघातस्य व्रीहयः । संस्कार्यो वा यथा प्रोक्षणस्योलूखलादयः । आप्यो वा यथा दोहनस्य पयः ।
न तावदुत्पाद्यः न खलु घटादिसाक्षात्कार इव जडस्वभावेभ्यो घटादिभ्यो भिन्नः इन्द्रियाद्याधेयो ब्रह्मसाक्षात्कारो भावनाधे-
त्सा यः संभवति । ब्रह्मणोऽपराधीनप्रकाशतया तत्साक्षात्कारस्य तत्स्वाभाव्येन नित्यतया साध्यत्वानुपपत्तेः । ततो भिन्नस्य भावनाधे-
यस्य साक्षात्कारस्य प्रतिभासप्रत्ययवत् संशयाक्रान्ततया प्रामाण्यायोगात् । तद्विधस्य तत्सामग्रीकस्यैव बहुलं व्यभिचा-
रोपलब्धेः । न खल्वनुमानं विशुद्धवह्निं भावयतः शीतातुरस्य शिशिरतरमन्थरतरकाण्डस्य स्फुरज्ज्वालाजटिलानल-
साक्षात्कारः प्रमाणान्तरेण संवाद्यते विसंवादस्य बहुलमुपलम्भात् तस्मात्प्रामाणिकसाक्षात्कारलक्षणकार्याभावान्नोपासन-
याउत्पा पेकर्मापेक्षा न च कूटस्थस्य नित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो विकारसंस्कारप्राप्तयः संभवन्तीत्यादेतत् । माभू-
द्ब्रह्मसाक्षात्कार उत्पाद्यादिरूप उपासनायाः संस्कार्यस्त्वनिर्वचनीयानाद्यविद्याद्वयपिधानापनयनेन भविष्यति । प्रति-
सीरापिहितनर्तकीव प्रतिसीरापनयद्वारा रङ्गव्यापृते न तत्र कर्मणामुपयोगः । एतावांस्तु विशेषः प्रतिसीरापनये परिष-
मुक्ति
दानां नर्तकीविषयः साक्षात्कारो भवति । इह तु अविद्यापिधानापनयमात्रमेव नापरमुत्पाद्यं ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभा-
वस्य नित्यत्वेनानुत्पाद्यत्वात् । अत्रोच्यते का पुनरियं ब्रह्मोपासना किं शाब्दज्ञानमात्रसन्ततिः । आहो निर्विकल्प-
शाब्दज्ञानसन्ततिः । यदि शाब्दज्ञानमात्रसन्ततिः किमियमभ्यस्यमाना विपर्यासमुच्छेत्तुमर्हति न त्वविनिश्चयः तदभ्यासो
वा न हि स्थाणुर्वा पुरुषो वेति वा । आरोहपरिणाहवत् । इदमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्या-

वाच० मं कृतेविशेषदर्शनात्। ननुकं श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा युक्तिमयेन चैनेन व्यवस्थाप्येति तस्मान्निर्वि
१६ चिकित्सशाब्दज्ञानसंततिरूपोपासना कर्मसहकारिण्यविद्याद्युच्छेदहेतुः नचासावनुत्पादितब्रह्मानुभवात दुच्छेदायपर्या
प्तासाक्षात्काररूपोहि विपर्यासः साक्षात्काररूपेणैव तत्त्वज्ञानेनोच्छिद्यते नतुपरोक्षावभासेन दिङ्मोहालातचक्रचलद्वृक्ष
मरुमरीचिसलिलादिविभ्रमेष्वपरोक्षावभासिष्वपरोक्षावभासिभिरेवदिगादितत्त्वप्रत्ययैर्निवृत्तिदर्शनात्। नोखल्वाप्तवच
नलिंगादिनिश्चितदिगादितत्त्वानां दिङ्मोहादिनिवर्तन्ते। तस्मात्तंपदार्थस्य तत्पदार्थत्वेन साक्षात्कारएष्टव्यः। इत्थं तावताहितं
पदार्थस्य दुःखत्वशोकत्वादिसाक्षात्कारनिवृत्तिर्नान्यथा। नचैषसाक्षात्कारोवटबीजादपिवटांकुरोत्पत्तिप्रसंगात्। तस्मा
न्निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमंतःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभा
वयतीतियुक्तं। नचायमनुभवो ब्रह्मस्वभावो येन न जन्येत अपितु अंतःकरणस्यैव वृत्तिभेदो ब्रह्मविषयो न चैतावता ब्रह्म
णोनापराधीनप्रकाशता नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वयंप्रकाशं न भवति सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीय
ते नतत्सहितमपि यथाहस्मभगवान्भाष्यकारः नायमेकांतेनाविषयइति। नन्वंतःकरणवृत्तावपि अस्यसाक्षात्कारस्य
विरोधि
सर्वोपाधिविनिर्मोकः तस्यैव तदुपाधेर्विभ्रमदवस्थस्य स्वपररूपोपाधिनोविद्यमानत्वात्। अन्यथा तु चैतन्यच्छायापत्तिं
विनांतःकरणवृत्तेः स्वयमचेतनायाः प्रकाशतानुपपत्तौ साक्षात्कारत्वायोगात्। नचानुमितभाविन वह्निसाक्षात्कारवत्
प्रतिभात्वेनास्याप्रामाण्यं तत्र वह्निलक्षणस्य परोक्षत्वात्। इह तु ब्रह्मस्वरूपस्य सोपाधिकलुषितस्य जीवस्य प्रागप्यपरो
क्षत्वात्। नहि शुद्धबुद्धत्वादयो वस्तुतस्ततो तिरिच्यंते जीवएव तु तत्तदुपाधिरहितः शुद्धबुद्धादिस्वभावोब्रह्मेति गीयते॥
१६

नच तदुपाधिविरहोपितत्त्वोतिरिच्यते। तस्माद्यथागांधर्वशास्त्रार्थज्ञानाभ्याससाहितसंस्कारसचिवश्रोत्रेंद्रियेणषड्जादिस्वर
ग्राममूर्छनाभेदं अध्यक्षमनुभवति। [illegible] अनुभवसेवं वेदां
तार्थज्ञानाभ्याससाहितसंस्काराजीवस्यब्रह्मस्वभावमंतःकरणेनेति अंतःकरणवृत्तौब्रह्मसाक्षात्कारेजनयितव्ये अस्तितदुपासनायाः
कर्मापेक्षेतिचेन्न तस्याः कर्मानुष्ठानसहभावाभावेन तत्सहकारितानुपपत्तेः। नखलु तत्त्वमसीत्यादेर्वाक्यान्निर्विचिकित्सं शु
द्धबुद्धोदासीनस्वभावमकर्तृत्वात्स्वमपेतब्राह्मणत्वादिजातिं देहाद्यतिरिक्तमेकमात्मानं प्रतिपद्यमानः कर्मस्वधिका
रमवबोद्धुमर्हति अनर्हश्चकथं कृतवाधिकृतो वा यधुक्तेन निश्चितेपि तत्त्वे विपर्यासनिबंधनोव्यवहारोनुवर्तमानो दृश्यते।
यथा गुडस्य माधुर्यविनिश्चयेपि पित्तोपहतेंद्रियाणां तिक्तावभासानुवृत्तिरास्वाद्यथूत्कृत्यत्यागात् तस्मादविद्यासंस्कारानु ६
नुवृत्त्या कर्मानुष्ठानं तेन च विद्यासहकारिणा तत्समुच्छेद उपपत्स्यते न च कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति कर्मणोवा
तदुच्छेदकस्य कुतउच्छेद इति वाच्यं सजातीयस्वपरविरोधिनां भावानां बहुलमुपलब्धेः यथापयः पयोंतरं जरयति स्वयं च जी
र्यति। यथाविषं विषांतरं शमयति स्वयं च शाम्यति। यथावा कतकरजो वह्निकराविलेपाथसि प्रक्षिप्तं रजोंतराणि भिंद
त्स्वयमपि भिद्यमानमनाविलं पाथः करोति। एवं कर्माविद्यात्मकमपि अविद्यांतराण्यपगमयत् स्वयमप्यपगच्छतीति। अ
त्रोच्यते। सत्यं सदेव सोम्येदमित्युपक्रमात् तत्त्वमसीत्यंतात् शब्दात् ब्रह्ममीमांसोपकरणात् असकृदभ्यस्तात् निर्विचि
कित्सेऽनाद्यविद्यो पादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेपि अविद्यासंस्कारानुवृत्त्या वनुवर्तंते सांसारिकाः
प्रत्ययाः तद्व्यवहाराश्च तथापि तानपि व्यवहारप्रत्ययान् मिथ्येति मन्यमानो विद्वान् नश्रद्धत्ते पित्तोपहतेंद्रिय इव गुडं थूत्कुर्वन्

वा०न० त्यज्ञप्रपितस्य निकृतानं तथा चायं क्रियाकर्तृकरणेति कर्तव्यताफलप्रपंचमनाविकं विनिश्चिनुवन्नकथमधिकृतो नाम विदुषोप्यधिकारोऽप्य
१७ याप्यशुश्रूषाविलक्षणमप्यधिकारो दुर्वारः स्यात्। क्रियाकर्त्रादिस्वरूपं विभागं च विद्वत्समानइह विद्वानभिमतः कर्मकांडे अतएव भ
गवानुविद्वद्विषयत्वं शास्त्रस्य वर्णयांबभूव भाष्यकारः। तस्माद्यथा राजजातीयाभिमानि कर्तृकेराजसूयेन विप्रवैश्यजाती
यभिमानिनोऽधिकारः। एवं द्विजातिकर्तृकक्रियाकरणादिविभागाभिमानि कर्तृके कर्मणि न तदनभिमानिनोऽधिकारः। न
चानधिकृतेन समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते। वैश्यस्तोम इव ब्राह्मणराजन्याभ्यां तेन दृष्टार्थेषु कर्मसु शक्तः
प्रवर्तमानः प्राप्नोतु फलं दृष्टत्वाददृष्टार्थेषु शास्त्रैकसमधिगम्यफलमनधिकारिणि न युज्यत इति नोपासनाकार्यं कर्मा
पेक्षा स्यादेतन्मनुष्याभिमानवदधिकारिके कर्मणि विहिते यथा तदभिमानरहितस्यानधिकारः। एवं निषेधविधयो
पि मनुष्याधिकारा इति तदभिमानरहितोऽपि नाधिक्रियेत पश्वादिवत्। तथा चायं निषिद्धमनुतिष्ठन्न प्रत्य वेयात्।
निर्यगादिवदिति भिन्नकर्मता पात्तः मैवं न खल्वयं सर्वथाभिमनुष्याभिमानरहितः किं तु विद्यासंस्कारानुवृत्त्या समानत्वात्त
भिमानोऽनुवर्तते अनुवर्तमानं च मिथ्येति निश्चिमानोऽश्रद्धत्त इत्युक्तं। किमतो यद्येवं एतदतो भवति विधिषु श्रद्धाधिकारिनश्रा
द्धः तत्र मनुष्याद्यभिमाने श्रद्धानो न विधिशास्त्रेणाधिक्रियते तथा च स्मृतिः अश्रद्धया हुतं दत्तमित्यादि का निषेधशा
स्त्रं तु न श्रद्धामपेक्षते अपितु निषिध्यमानः प्रत्यवैतीति नाभिन्नकर्मदर्शनाभ्युपगमः तस्मान्नोपासनायाः कार्यकर्मापे
क्षा अतएव नोपासनोत्सत्तावपि निर्विचिकित्सशाब्दज्ञानोत्पत्त्युत्तरकालमनधिकारः कर्मणीत्युक्तं तथा च श्रुतिः। न कर्मणा न
प्रजया धनेन त्यागेनैके अमृतत्वमानशुः तत्किमिदानीमनुपयोग एव सर्वथा कर्मणां। तथा च विविदिषंति यज्ञेनेत्यादयः श्रु १७

तयो विरुध्येरन्। न आरादुपकारकत्वात्कर्मणां यज्ञादीनां॥ तथा हि तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणा विवि
दिषंति विदितुमिच्छंति न तु विंदंति वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणतादिच्छायाश्च प्रत्ययार्थतया प्रा
धान्यात्। प्रधाने न च कार्यसंप्रत्ययात्। न हि राजपुरुषमानयेति वस्तुतः प्रधानमपि राजा पुरुषविशेषेण तया शब्दतउप
सर्जनमानीयते अपि तु पुरुष एव शब्दतस्तस्य प्राधान्यात्। एवं वेदानुवचनस्येव यज्ञस्यापीच्छासाधनतया विधानं ए
वं तपसोनाशकस्यकामानशनमेव तपः हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति। न तु सर्वथाऽनश्नतो मरणात्। ना
पि चांद्रायणादितपः तत्र धातुस्य धातुवैषम्यापत्तेः एतानि च नित्यान्यपापादुरितनिवर्हणेन पुरुषं संस्कुर्वंति। तथा
च श्रुतिः। स ह वा आत्मयाजी यो वेद इदं मेऽनेनांगं संस्क्रियत इदं मेऽनेनांगमुपधीयत इति। अनेनैतिह्यरूपं यज्ञादिप
रामृशति स्मृतिश्च यस्यैते अष्टाचत्वारिंशत्संस्कारा इति नित्यनैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य च विशुद्धसत्वस्य
विदुषएवत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी श्रुतिः। विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान इति।
स्मृतिश्च ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्यादिका अतएतेनैव च नित्यानां कर्मणां नित्यविहितानां पापदुरितनिवर्ह
णेन पुरुषसंस्कारेण ज्ञानोत्पत्तावंगभावोपपत्तौ न संयोगपृथक्त्वेन साक्षादंगभावो युक्तः कल्पनागौरवापत्तेः तथा हि नि
त्यकर्मानुष्ठानात्। धर्मोत्पादः ततः पाप्मा निवर्तते। स ह्यनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्यातिलक्षणेन
ध्या विपर्यासेन चित्तसत्त्वं मलिनयति। अतः पापनिवृत्तौ प्रत्यक्षोपपत्तिद्वाराऽपावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्यानित्या
शुचिदुःखरूपतामप्रत्यूहमवबुध्यते। ततोऽस्यास्मिन्नभिरतिसंज्ञं वैराग्यमुपजायते। ततस्तज्जिहासोपावर्तते ततो हा

बाव० नोपायं पर्येषते पर्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इत्युपश्रुत्य तज्जिज्ञासते। ततः श्रवणादिक्रमेण तज्ज्ञानातिदूरादुप
१६ कारकत्वं तत्त्वज्ञानोत्पत्तिं प्रतिविविच्य सत्त्वशुद्ध्या कर्मणां युक्तं इममेवार्थमनुवदति। भगवद्गीता। आरुरुक्षोर्मुनेर्योगं कर्म
कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते। १॥ एवं चानुष्ठितकर्मापि प्राग्भवीयकर्मवशात् यो विशुद्धस
त्त्वः संसारासारदर्शननिमित्तं वैराग्यः कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पत्तिरोपयोगिना प्राग्भवीयकर्मानुष्ठानादेव तत्सि
द्धेः। इममेव चतुरूपधोरियमेव मधिकृत्य प्रवर्तते श्रुतिः। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति। तदिदमुक्तं। क
र्मावबोधात् प्रागप्यधीतवेदांतस्य ब्रह्मजिज्ञासोपपत्तेरिति। अत एव न ब्रह्मचारिणः। ऋणानि संति येन तदपाकरणार्थं
कर्मानुतिष्ठेत्। एतदनुरोधाच्च जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैः ऋणवान् इति गृहस्थः संपद्यमान इति व्याख्येयं।
अन्यथा यदि वेतरथा ब्रह्मचर्यादेवेति श्रुतिर्विरुध्यते। गृहस्थस्यापि च ऋणापाकरणं सत्त्वशुद्ध्यर्थमेव जरामर्याग्निहो
त्रवादोपि सर्वां तथा वचनात् अंतेष्ट्यश्च कर्मज्ञानविदुषः प्रतितत्त्वमत्र पंडितान्। तस्मात्तत्स्थानं गर्यमथशब्दार्थो
यद्विना ब्रह्मजिज्ञासा न भवति। यस्मिंस्तु सति भवति भवत्येव न चेश्च कर्मावबोधः। तस्मात्कर्मावबोधानंतर्यमथश
ब्दार्थ इति सर्वमवदातं॥ स्यादेतत्। माभूत् अग्निहोत्रयवागूपाकवदार्थक्रमः॥ श्रौतस्तु भविष्यति। गृही भूत्वा व
नी भवेत् वनी भूत्वा प्रव्रजेदिति जाबालश्रुतिः गार्हस्थ्यानंतर्यं ज्ञायतुरानं सूचयति। स्मरंति च। अधीत्य विधिवद्वे
दान् पुत्रांश्चोत्पाद्य धर्मतः इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्। निंदंति च अनधीत्य द्विजो वेदाननुत्पाद्य तथा
त्मजान्॥ अनिष्ट्वा चैव यज्ञैस्तु मोक्षमिच्छन् व्रजत्यधः इति। अत आह। यथा चेद्याप्रवदानामानंतर्यनियमः कुतः इद

१८

यस्याग्रे जवपतिश्रुथजिह्वायाः अथवक्षस इति। अथाग्रशब्दाभ्यां क्रमस्य विवक्षितत्वात्। न तथेह क्रमनियमो विव
क्षितः श्रुत्यानयैवानियमप्रदर्शनात्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा इति। एतावता हि वै
राग्यमनुपलक्ष्यते। अत एव यदहरेव विरजेत् तदहरेव प्रव्रजेदिति श्रुतिः निंदावचनं चाविशुद्धसत्त्वपुरुषाभिप्रायं॥
अविशुद्धसत्त्वो हि मोक्षमिच्छन् आलस्यात् तदुपायेष्ववर्तमानो गृहस्थधर्ममपि नित्यनैमित्तिकमनाचरन् प्रतिक्षणमु
पचीयमानपाप्माधो गच्छतीत्यर्थः। स्यादेतत्। माभूत् श्रौतो वार्थो वा क्रमः पाठस्थानमुख्यप्रवृत्तिप्रमाणकस्तु कस्मात् न भ
वतीत्यत आह शेषशेषित्वे प्रमाणाभावात् शेषाणां समिदादीनां शेषिणां चाग्नेयादीनामेकफलवदुपकारोपनिबद्धानामेकफला
वच्छिन्नानामेकप्रयोगवचनोपगृहीतानामेकाधिकारिकर्तृकाणामेकपौर्णमास्यमावास्याकालसंबद्धानां युगपदनुष्ठानं
शक्तेः सामर्थ्यात्। क्रमप्राप्तौ तद्विशेषापेक्षायां पाठादयः तद्भेदनियमाय प्रभवंति। यत्र तु न शेषशेषिभावो नाप्येका
धिकारावच्छेदो यथा सौर्यार्यमणप्राजापत्यादीनां तत्र क्रमभेदापेक्षाभावात् न पाठादिः क्रमविशेषनियमे प्रमाणं। अव
र्जनीयतया तस्य तत्रागतत्वात्। न चेह धर्मब्रह्मजिज्ञासयोः शेषशेषिभावे श्रुत्यादीनामन्यतमत्प्रमाणमस्तीति। ननु
शेषशेषिभावाभावेपि क्रमनियमो दृष्टो यथाग्नेरारोहणस्य पुरुषार्थस्य दर्शपौर्णमासिकैरंगैः सह यथा वा दर्शपूर्णमासाभ्या
मिष्ट्वा सोमेन यजेतेति। दर्शपूर्णमाससोमयोरशेषशेषिणोरित्यत आह। अधिकृताधिकारे च प्रमाणाभावादिति योजना
स्वर्गकामस्य हि दर्शपूर्णमासादिकृतस्य पशुकामस्य सतो दर्शपौर्णमासक्रमतथा दिग्रयणयनाग्निलगोदोहने अधिकारः। नो खलु
गोदोहनं क्रममाश्रियमाणं साक्षात्पशून् भावयितुमर्हति। न च व्यापारांतराविष्टं श्रूयते यतः तदंगक्रममतिपतेत्

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्मारकम्

वा॰ सू॰ अप्रणयनाश्रितं तु प्रतीयते चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्येति समभिव्याहारात्। यो ऽयं तत्र ऽपां प्रणयनं
१९ प्रति नस्मात् क्रतार्था पूप्रणयनाश्रितत्वात्। गोदोहनस्य तत्क्रमेण पुरुषार्थमपि गोदोहनं क्रमवदिति सिद्धं श्रुतिनिराकरणे
नैवष्यिमाक्रमवरपि क्रमोपास्तो वेदित्यः। शेषशेषित्वाधिकृताधिकाराभावे ऽपि क्रमो विवक्ष्यते। यथैकफलावच्छेदेन
वेत्। यथाग्नेयादीनां षण्णामेकस्वर्गफलावच्छिन्नानां यदि वाजिमे शौक्लस्तेनौ ऽथ धर्मः स्यात् यथा चतुर्लक्षणीसु तावंत्र
त्वकेनचित् केनचिदंशेन कैकेन लक्षणेन मुख्यापनेन चतुर्णं लक्षणानां जिज्ञासाभेदेन परस्परसंबंधेन सतिक्रमो वि
वक्षितः न चेहाप्ये कजिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्षितो न चैतदुभयमस्तीत्याह। फलजिज्ञास्यभेदाच्च॥
फलभेदं विभजते॥ अभ्युदयफलं धर्मज्ञानमिति। जिज्ञासाया वस्तुनो ज्ञानतंत्रत्वात्। ज्ञानफलं जिज्ञासाफलमिति भावः।
न केवलं स्वरूपतः फलभेदः तदुत्पादनप्रकारभेदादपि भेद इत्याह॥ न चानुष्ठानापेक्षं ब्रह्मज्ञानं च नानुष्ठानांतरापे
क्षं शाब्दज्ञानाभ्यासात्मानुष्ठानांतरमपेक्षते। नित्यनैमित्तिककर्मानुष्ठानसहभावस्यापास्तत्वादिति भावः। जिज्ञास्यभेद
मात्यंतिकमाह। भव्यश्च धर्म इति भविनाश्य ऽकर्तरि कृत्यः भविता च भावकव्यापारनिर्वर्त्यतया तंत्र इति नतः प्राक् ज्ञानकाले
नास्तीत्यर्थः। भूतं सत्यं सदेकांततो न कदाचिदसदित्यर्थः। न केवलं स्वरूपतो जिज्ञास्ययोर्भेदो ज्ञापकप्रमाणप्रवृत्तिभेदा
दपि भेद इत्याह। चोदनाप्रवृत्तिभेदाच्च॥ चोदने ऽपि वैदिकं शब्दमाह। विशेषेण सामान्यलक्षणात्। प्रवृत्तिभेदं विभ
जते। या हि चोदना धर्मस्येति। अदृष्टादीनां पुरुषाभिप्रायभेदानां असंभवात् पौरुषेये वेदे चोदनोपदेशः अत एवोक्तं
तस्य ज्ञानमुपदेश इति सा च स्वसाध्ये च पुरुषव्यापारे भावनायां तद्विषये च यागादौ सहितैव भावनाविषयः॥ तदधीननिरूपणत्वात्।

१९

प्रयत्नस्य भवनायाः विज्ञसंबंधनरस्य धातोर्विषयपदमुत्पत्ते। भावनायाः द्वारेण च यागादेरपेक्षितोपायतामवगमयंती। तत्रो
ऽपहारमुखेन पुरुषं नियुंजाना यागादिधर्मं मवबोधयंति। नान्यथा ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं न तु प्रवर्त्तयं
त्यवबोधयति। कुतः अवबोधस्य प्रवृत्तिरहितस्य चोदनाजन्यत्वात्। न त्वात्माज्ञातव्य इत्यादिविधिपरैर्वेदांतैस्तदेकवाक्यतया
ऽवबोधे प्रवर्त्यते ऽपि रेव पुरुषो ब्रह्मावबोधनं इति समानं त्वं धर्मचोदनाभिर्ब्रह्मचोदनानामित्यत आह स्वपुरुषो ऽवबो
धे नियुज्यते। अयमभिसंधिः। न तावद् ब्रह्मसाक्षात्कारे पुरुषो नियोक्तव्यः। तस्य ब्रह्मस्वभाव्येन नित्यत्वादकार्यत्वात्। नाप्यु
पासनायां तस्या अपि ज्ञानप्रकर्षहेतुभावस्यान्वयव्यतिरेकसिद्धतया प्राप्तत्वेनाविधेयत्वात्। नापि शाब्दबोधे तस्या
प्यधीतवेदस्य पुरुषस्य विदितपदतदर्थस्य समधिगतशाब्दन्यायतत्त्वस्याप्रत्यूहमुत्पत्तेः। अत्रैव दृष्टांतमाह। यथाक्षा
र्थेति। दार्ष्टांतिके योजयति। तद्वदिति। अपि चात्मज्ञानविधिपरेषु वेदांतेषु वा तत्त्वविनिश्चयः शाब्दः स्यात्। न हि तदात्मतत्त्वप
रास्ते किंतु तद्ज्ञानविधिपरास्ते तदेवं नेपायमर्थः न च बोधस्य बोध्यनिष्ठत्वादपेक्षितत्वादन्यपरेभ्यो बोध्यतत्त्वनिश्चयः। समा
रोपेणापि तदुपपत्तेः तस्माद्बोधविधिपरा वेदांता नेति सिद्धं प्रकृतमुपसंहरति। तस्मात् किमपि वक्तव्यमिति यस्मिन् सति ब्रह्म
जिज्ञासा न भवति सति तु भवंती भवत्येवेत्यर्थः। तदाह उच्यते। नित्यानित्यवस्तुविवेकइत्यादि। नित्यः प्रत्यगात्मा नित्यो देहें
द्रियविषयादिः। न हि द्वयस्य विवेको विनिश्चयः। कृतमस्य जिज्ञासया ज्ञानत्वात् ब्रह्मणः अर्थविवेको ज्ञानमात्रं निश्चयः। तथा
सत्येष विपर्यासादन्यः संशयः स्यात्। तथा च न वैराग्यं भावयेत् अभावयन् कथं ब्रह्मजिज्ञासाहेतुः तस्मादेवं व्याख्येयं॥
नित्यानित्ययोर्न सत्यौ तिनित्यानित्यवस्तु तद्धर्मः। नित्यानित्ययोर्धर्मिणो [illegible]माणिंचानि [illegible]कः। एतदुक्तं भवति [illegible]दिति इदं

वाच० तदेतं नित्यमिदं तदन्तमनित्यमिति धर्मविशेषयोर्विवेकः धर्मिमात्रयोर्नित्यानित्ययोश्चविवेकं निश्चिनोत्येवं नित्यं
२० सत्यत्वं तद्यस्यास्तीति नित्यं सत्यं तथा चास्यागोचरः अनित्यमसत्यत्वं तद्यस्यास्तीत्यनित्यं अन्तं तन्नश्वरं नास्यागोचरः।
तदेतेष्वदृश्यमानेषु पुष्पदन्तस्यात्ययगोचरेषु विषयविषयिषु यदेतन्नित्यं ब्रह्मरूपात्मतत्त्वं तदस्यागोचरो भविष्यति।
यत्त्वन्तमनित्यं भविष्यति तापत्रयपरीतं तत्त्याज्यमिति। सोयं नित्यानित्यवस्तुविवेकः प्राग्भवीयादैहिकाद्वा कर्मणो
विशुद्धसत्त्वस्य भवत्यनुभवोपपत्तिभ्यां न खलु सत्यं नाम न किंचिदस्तीति वाच्यं तदभावे तदवधिभूतस्यानृतस्याप्यनुपप
त्तेः। अनृतवादिनामपि शून्यतायाएव सत्यत्वात्। अथास्य पुरुषधौरेयस्यानुभवोपपत्तिभ्यामेवं सुनिपुणं निरूपयतः।
स आसत्यलोकात् आचावीचिजीवस्य प्रियस्येति निपरिवर्तमानं क्षणमुहूर्तयामहोरात्रार्धमासमासर्त्वयनवत्सरयुगच
तुर्युगमन्वंतरप्रलयमहाप्रलयमहासर्गावांतरसर्गैः संसारसागरोर्मिभिरनिशमुह्यमानं तापत्रयपरीतमात्मानं च जीव
लोकं चावलोक्यास्मिन् संसारमंडले अनित्याशुचिदुःखात्मकं प्रसंख्यानमुपावर्त्तते ततोस्य हेयाभिलानित्यवस्तुवि
वेकलक्षणात् प्रसंख्यानादिहामुत्रार्थभोगविरागो भवति। अर्थ्यते प्रार्थ्यत इत्यर्थः फलमिति यावत् तस्मिन्वि
रागो नाभोगात्मकोपेक्षाबुद्धिः ततः शमदमादिसाधनसंपत् रागादिकषायमदिरामत्तं हि मनः तेषु तेषु विषयेषु
चावनर्मिंद्रियाणि प्रवर्त्तयद्विविधाश्च प्रवृत्तीः पुण्यापुण्यफलाश्चावयत् पुरुषं प्रतिघोरे विविधदुःखज्वालाजटिले सं
सारहुतभुजि जुहोति प्रसंख्यानाभ्यासलब्धवैराग्यपरिपाकभग्नरागादिकषायमदिरामदं तु मनः पुरुषाणां वशीये
ते। वशीक्रियन्ते सोयमस्य वैराग्यहेतुको मनोविजयः शम इति वशीकारसंज्ञा इति चाख्यायते। विजितं च मनस्त २०

त्वविषयविनियोगयोग्यतां नीयते सेयमस्य योग्यता दमः यथा दांतोयं वृषभपुंवाह इत्युक्ते कदाचिद्वाहनयोग्यः कृत इति गम्यते
आदिग्रहणेन च विषयतितिक्षा तदुपरमतत्त्वश्रद्धाः संगृह्यंते अत एव श्रुतिः तस्मात् शांतो दांत उपरतस्तितिक्षुः श्रद्धा
वित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमात्मनि इति। तस्य शमदमादिरूपस्य साधनस्य संपत् प्रकर्षः शमदमादिसाधन
संपत् ततोस्य संसारबंधनान्मुमुक्षा भवतीत्याह। मुमुक्षुत्वं चेति। तस्य च नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मज्ञानं मोक्षस्य का
रणमिति। उपस्थुसत्त्वजिज्ञासा भवति। धर्मजिज्ञासायाः प्रागूर्ध्वं च तस्मात्तेषामेवानंतर्यं धर्मजिज्ञासाया इत्याह। तेषु न
हीति। न केवलं जिज्ञासामात्रमपि तु ज्ञानमपीति आह ज्ञातुं च उपसंहरति तस्मादिति। क्रमप्राप्तमतः शब्दं व्याचष्टे
अतः शब्दो हेत्वर्थः तमेवातः शब्दस्य हेतुरूपमर्थं आह। यस्माद्वेद एवेति। अत्रैवं परिचोद्यते। सत्यं यथोक्तसाधनसंप
त्त्यनंतरं ब्रह्मजिज्ञासा भवति सैव तु नुपपन्ना इहामुत्रार्थफलोपभोगविरागस्यानुपपत्तेः। अनुकूलवेदनीयं हि फलं इ
ष्टलक्षणत्वात् फलस्य न चानुरागहेतावस्य वैराग्यं भवितुमर्हति दुःखानुषंगदर्शनात्। सुखेपि वैराग्यमिति चेत् हंत भोः
सुखानुषंगात् दुःखेप्यनुरागो न कस्माद्भवति तस्मात् सुखे उपादीयमाने दुःखपरिहारे प्रयतितव्यं अवर्जनीय तया दुःख
मागतमपि परिहृत्य सुखमात्रं भोक्ष्यते। तद्यथा। मत्स्यार्थी सशल्कान् सकंटकान् मत्स्यानुपादत्ते स यावदादेयं ताव
दादाय विनिवर्तते। यथा वा धान्यार्थी सपलालानि धान्यानि आहरति स यावदादेयं तावदुपादाय निवर्त्तते तस्माद्दुःख
भयान्नानुकूलवेदनीयमैहिकं वा सुखं परित्यक्तुमुचितं न हि मृगाः संतीति शालयो नोप्यंते न हि भिक्षुकाः संतीति स्थाल्यो
नाधिश्रीयंते अपि च दृष्टं सुखं चंदनवनितादिसंपर्कजन्म सप्रीतालक्षणेन दुःखेनाप्राचलादर्शि भीरुणा त्यजेतापि। नता

वाच०
२१

मुष्मिकं स्वर्गादि तस्याविनाशित्वं श्रूयते। अपाम सोमममृता अभूमेति तथा चाक्षय्यं ह वै चातुर्मास्ययाजिनः सु
कृतं भवतीति येन च कृतकत्वहेतुकं विनाशित्वानुमानमत्र संभवति। नरशिरःकपालशौचानुमानवदागमबाधितविष
यत्वात् तस्माद्यथोक्तसाधनसंपत्त्यभावात् न ब्रह्मजिज्ञासेति प्राप्तं। एवं प्राप्त आह भगवान् सूत्रकारः। अत इति। तस्या
र्थमाचष्टे भाष्यकारः। यस्माद्वेद एवेति अयमभिसंधिः सत्यं मृगभिक्षुकादयः शक्याः परिहर्तुं पाचककृषीवलादिभिः
दुःखं त्वनेकविधानेककारणसंपातजन्यमशक्यपरिहारं च तत्साधनपारतंत्र्यक्षयितालक्षणयोर्दुःखयोः समस्तकृत
कत्वाविनाभावदर्शनात्। न हि मधुविषसंपृक्तमन्नं विषपरिहारेण मधु शक्यं शिल्पिवरेणापि भोक्तुं क्षयितानुमानो
पोद्बलितं च तद्यथेह कर्मजित इत्यादि वचनं क्षयिताप्रतिपादकम् अपाम सोमेत्यादिकं वचनं मुख्यासंभवे जघन्यवृत्तितामा
पादयति यथाहुः पौराणिकाः। आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति। अत्र च ब्रह्मपदेन तत्प्रमाणं वेद उपस्था
पितः स च योग्यतया यथेह कर्मजित इत्यादि सर्वनाम्ना परामृश्य हेतुपंचम्या निर्दिश्यते। स्यादेतद्यथा स्वर्गादेः कृ
तकस्य सुखस्य दुःखानुषंगस्तथा ब्रह्मणोपीत्यत आह। तथा च ब्रह्मज्ञानादपीति। तेनायमर्थः अतः स्वर्गादीनां क्षयि
ताप्रतिपादकात् ब्रह्मज्ञानस्य च परमपुरुषार्थताप्रतिपादकादागमात्। यथोक्तसाधनसंपत्त्यनंतरं ब्रह्मजिज्ञासेति
सिद्धं ब्रह्मजिज्ञासापदव्याख्यानमाह। ब्रह्मण इति षष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणे जिज्ञासा ब्रह्म
कृ जिज्ञासेति चतुर्थीसमासः पराक्तो वेदितव्यः। तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्यमिति कात्यायनेन वचनेन
यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात्। अप्रकृतिविकारभूते त्वश्वघासादौ तन्निषेधात्। अथवा
२१

सादयः षष्ठीसमासा भविष्यंतीत्यश्वघासादिषु षष्ठीसमासप्रतिविधानात्। षष्ठीसमासेपि च ब्रह्मणि वास्तवप्राधान्योपप
त्तेरित्याह स्यादेतत्। ब्रह्मणो जिज्ञासेत्युक्ते तत्रानेकार्थत्वात् ब्रह्मशब्दस्य संशयः कस्य ब्रह्मणो जिज्ञासेत्यत आह ब्रह्मशब्दो
विप्रत्वजातौ यथा च ब्रह्म हंतेति अस्ति वेदे यथा ब्रह्मोज्झमिति। अस्ति च परमात्मनि यथा ब्रह्म वेद ब्रह्मैव भवतीति तद
मिमं संशयमपाकरोति। ब्रह्म च वक्ष्यमाणलक्षणमिति यतो ब्रह्मजिज्ञासां प्रतिज्ञाय तत्ज्ञापनाय परमात्मलक्षणं प्रणयति।
ततोवगच्छामः परमात्मजिज्ञासैवेयं न विप्रत्वजातिजिज्ञासेत्यर्थः। षष्ठीसमासपरिग्रहेनेयं कर्मषष्ठी किं तु शेषलक्षणा
संबंधमात्रं च शेष इति ब्रह्मणो जिज्ञासेत्युक्ते ब्रह्मसंबंधिजिज्ञासेत्युक्तं भवति। तथा च ब्रह्मस्वरूपप्रमाणयुक्तिसाधन
प्रयोजनजिज्ञासाः सर्वा ब्रह्मजिज्ञासयावरुद्धा भवंति। साक्षात्पारंपर्येण च ब्रह्मसंबंधात् कर्मषष्ठ्यां तु ब्रह्मशब्दार्थः।
कर्म। स च स्वरूपमेवेति तत्प्रमाणादयो नावरुध्येरन् तथा चाप्रतिज्ञातार्थचिंता प्रमाणादिषु भवेदिति ये मन्यंते तान् प्रत्याह
ब्रह्मण इति कर्मणीति अत्र हेतुमाह। जिज्ञास्येति। इच्छायाः प्रतिपत्त्यनुबंधो ज्ञानं ज्ञानस्य च ज्ञेयं ब्रह्म। न खलु ज्ञानं ज्ञेयं
विना निरूप्यते। न जिज्ञासा ज्ञानं विनेति प्रतिपत्त्यनुबंधात्। प्रथमं जिज्ञासा कर्मैवापेक्षते। न तु संबंधिमात्रं तदंतरेणापि स
ति कर्मणि तन्निरूपणात्। न हि चंद्रमसमादित्यं वोपलभ्य कस्यायमिति संबंधान्वेषणा भवति भवति तु ज्ञानमित्युक्ते।
विषयान्वेषणा भवति किंविषयमिति। तस्मात्प्रथममपेक्षितत्वात् कर्मतयैव ब्रह्म संबध्यते न संबंधितामात्रेण तस्य जघ
न्यत्वात्। तथा च कर्मणि षष्ठीत्यर्थः। ननु सत्यं न जिज्ञास्यमंतरेण जिज्ञासा निरूप्यते। जिज्ञास्यांतरं तु सा भविष्यति। ब्रह्म
तु शेषितया संभन्त्स्यत इत्यत आह। जिज्ञास्यांतरेति। निगूढाभिप्रायश्चोदयति। ननु शेषषष्ठीपरिग्रहेपीति। सामान्य
संबंधस्य विशेषसंबंधाविरोधेन कर्मताया अविघातेन जिज्ञासानिरूपणोपपत्तेरित्यर्थः। निगूढाभिप्राय एव दूषयति।

वाच० एवमपि ब्रह्मसंबंधलक्षण इति नाऽस्य कर्मत्वं स जिज्ञासया प्रथममपेक्षितस्य प्रथमसंबंधार्हस्य चान्वयपरित्यागेन पश्चात्कथंचि
२२ दपेक्षितसंबंधिमात्रस्य संबंधो जघन्यः प्रथमः प्रथमस्य जघन्य इति मुख्याहृतं न्याय्यत्वं प्रत्यक्षत्वपरोक्षत्वाभिधानं च प्राथम्या
प्राथम्यस्फुटत्वास्फुटत्वाभिप्रायं वा रेफं स्वाभिप्रायमुद्घाटयति न व्यर्थोऽत्र त्याधिनात्रोक्तेनि व्याख्यानमेतदधस्तात् समाधाना
त्वाणि संधिमुद्घाटयति न प्रधानपरिग्रह इति। वाक्यं प्राधान्यं ब्रह्मणः शेषं सन्निदर्शनमातिरोहितार्थं श्रुत्यनुगमं अति
रोहितार्थं श्रुत्यनुगमः तदेवमपि मतं समासं बव्यास्य जिज्ञासापदार्थमाह ज्ञातुमिति स्यादेतत्। न ज्ञानं इच्छाविष
यः सुखदुःखे चापि परिहारो वा तदुपायो वा तद्द्वारेणेच्छागोचरः न चैवं ब्रह्मविज्ञानं सुखत्वे तदनुकूलमिति वा प्रति
कूलनिवृत्तिरिति वानुभयत्वेनापि न योरुपायः तस्मिन् सत्यपि सुखभेदस्यादर्शनात् अनुवर्तमानस्य च दुःखस्यानिवृ
त्तेः तस्मान्न स्वकारक वचनमात्रादेव कर्मता ज्ञानस्येत्यत आह। अवगतिपर्यन्तमिति। न केवलं ज्ञानमिष्यते। किंत्व
वगतिं साक्षात्कारं कुर्वदवगतिपर्यन्तं सत्तासाया इच्छायाः कर्मकस्मात्फलविषयत्वादिच्छायाः तदुपायं फलपर्यन्तं
गोचरयतीत्येतिशेषः। ननु भवत्ववगतिपर्यन्तं ज्ञानं किमेतावतापीष्टं भवति न सुपेक्षणीय विषयमवगतिपर्यन्तं
मपि ज्ञानमिष्यत इत्यत आह॥ ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्मसंबंधस्तु ब्रह्मविषयमवगतिः एवमपि कथमिष्टेत्य
त आह। ब्रह्मावगतिर्हि पुरुषार्थः किमभ्युदयः किंतु निःश्रेयसं विगलितनिखिलदुःखानुषंगपरमानंदघनब्रह्मा
ग वगतिर्नैत्यणः स्वभाव इति। सैव निःश्रेयसपुरुषार्थ इति। स्यादेतत्। न ब्रह्मावगतिः पुरुषार्थः पुरुषव्यापारं व्याप्नोति
पुरुषार्थः न चास्या ब्रह्मस्वभावत्वात् आत्माः उत्पत्ति विकारसंस्कारप्राप्तयः संभवति तथा सत्यनित्यत्वेन तत्स्वभावत्वानुपप २२

त्तेः न चोत्पाद्यभावे व्यापारव्याप्यता। तस्मान्न ब्रह्मावगतिः पुरुषार्थ इत्यत आह। निःशेषसंसारबीजाविद्याद्यनर्थनिब
र्हणात्। सत्यं ब्रह्मावगतौ ब्रह्मस्वभावेनोत्पत्त्यादयः संभवति तथाप्यनिर्वाच्यानादिनीयानाद्यविद्यावशात् ब्रह्मस्वभा
वोऽपराधीनप्रकाशोऽपि प्रतिभातिवन्न प्रतिभातिवत् पराधीनप्रकाश इव देहेन्द्रियादिभ्यो भिन्नोऽप्यभिन्न इव प्रतिभासत इ
ति संसारबीजाविद्याद्यनर्थनिर्हरणं हेतुप्राप्तमाप्तमिव तस्मिन् सति प्राप्तमिव भवतीति पुरुषेणार्थ्यमानत्वात् पुरुषार्थ इति यु
क्तं अनित्यात्वादिग्रहणेन तत्संस्कारोऽवरुध्यते। अविद्यादिनिवृत्तिरूपा सत्ता कार्यान्तःकरणवृत्तिभेदात् साक्षात्कारा
दिति द्रष्टव्यं उपसंहरति तस्मात् ब्रह्मजिज्ञासि तव्यमुक्तलक्षणेन मुमुक्षुणा। न खलु तत्त्वज्ञानं विना सवासनावि
द्या दुःखनिदानमविद्योच्छिद्यते न च तदुच्छेदमन्तरेण विगलितनिखिलदुःखानन्दघनब्रह्मात्मतासाक्षात्काराविर्भा
वो जीवस्य तस्मादानन्दघनब्रह्मात्मतामिच्छता तदुपायो ज्ञाननिखिलदुःखानुषंगानंदघनब्रह्मात्मता ज्ञानमेष्टव्यं॥
तत्र न केवलेभ्यो वेदान्तेभ्योऽपि तु ब्रह्ममीमांसोपकरणेभ्य इति। इत्यानिर्भेन ब्रह्ममीमांसायां प्रवर्तनेन तु वेदान्तेषु
तदर्थविवक्षायां गतन्त्र फलवदर्थविबोधपरतां स्वाध्याय विधेः सूत्रयता धातोर्धर्मजिज्ञासेत्यनेनैव प्रवर्तितत्वा
त्। धर्मग्रहणस्य च वेदार्थोपलक्षणत्वेनाधर्मवद्ब्रह्मणोऽप्युपलक्षणत्वात्। यद्यपि च धर्ममीमांसावत् वेदार्थमीमांस
या ब्रह्ममीमांसया साक्षेपुराभ्यते तथापि प्राच्या मीमांसया नत्वध्ययनेनापि ब्रह्ममीमांसाया अध्ययनमात्रानन्तर्य
मिति ब्रह्ममीमांसारंभाय नित्यानित्यविवेकाद्यानन्तर्यप्रदर्शनाय चेदं सूत्रमारंभणीयमित्यपौनरुक्त्यं स्यादेतत्।
एतेन सूत्रेण ब्रह्मज्ञानं प्रत्युपायतया मीमांसायाः प्रतिपाद्यत इत्युक्तं तदुक्तं विकल्पासहत्वादिति चोदयति। तत्तु न
ब्रह्मेति। वेदान्तेभ्यो पौरुषेयतया स्वतःसिद्धप्रामाण्येभ्यः प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धं वेदान्तवाक्यसमु

वाच० र्थे निश्चयज्ञानेन विषयीकृतं न तो न जिज्ञासितव्यं निष्पादितक्रिये कर्मणि अविशेषाधायिनः साधनस्य व्यापारानुपपत्ता
२३ त्। अथाप्रसिद्धं वेदान्तवाक्येभ्यस्तर्हि न तद्वेदान्ताः प्रतिपादयन्तीति सर्वथा अप्रसिद्धं नैव शक्यं जिज्ञासितुं अभूते
हि प्रिये भवति इच्छा न तु सर्वथाननुभूतपूर्वे न चैष प्रमाणमपि शक्यं ज्ञातुं प्रमाणाभावात्। शब्दो हि तस्य प्रमाणं वक्त
व्यः। यथा च बृहस्पतिशास्त्रयोनित्वादिति सन्दे शात्र बोधयति कुतस्तस्य प्रामाण्यं न च प्रमाणान्तरं ब्रह्मणि प्रक्रमतेऽत
स्मात् प्रसिद्धस्य ज्ञातुं शक्यस्यापि अजिज्ञासनात् अप्रसिद्धस्येच्छाया अविषयत्वात् अशक्यज्ञानत्वाच्च न ब्रह्म
जिज्ञास्यमित्याक्षेपः परिहरति। उच्यते अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं अयमर्थः ब्रह्ममीमांसायाः
पूर्वमधीतवेदस्य निगमनिरुक्तव्याकरणादिपरिशीलिनः विदितपदतदर्थसंबंधस्य सदेव सोम्येदमग्र आसीदित्युप
५ क्रमात् तत्त्वमसीत्यन्तात् संदर्भान्नित्यत्वाद्युपेतब्रह्मावगमस्तावदापाततो विचाराद्विनाप्यस्ति अत्र च ब्रह्मे
त्यादिना वगम्येन तद्विषयमवगमं दर्शयति। तदस्तित्वस्य सति विमर्शो विचारः प्राग् निर्णयात्। नित्येति स
पिता लक्षणं दुःखमर्थं पश्यति शुद्धेति देहाद्युपाधिकमपि दुःखमपाकरोति। बुद्धेत्यपराधीनप्रकाशमानंदात्मा
नं दर्शयति। आनंदप्रकाशयोरभेदात् स्यादेतत्। मुक्तोऽसौ स्यात् मुक्तेऽत्र शुद्धादयः प्राग् नेतस्तु प्राग्देहा
यभेदेन तद्धर्मजन्ममरणादिदुःखयोगादित्यत उक्तं मुक्तेति। सदैव मुक्तः सदैव केवलोऽनाद्यविद्यावशात्तु भ्रां
त्या तथावभासत इत्यर्थः। तदेवमनौपाधिकं ब्रह्मणो रूपं दर्शयित्वाविद्योपाधिकं रूपमाह। सर्वज्ञं सर्वशक्ति
समन्वितं तदनेन जगत्कारणत्वमस्य दर्शितं शक्तिज्ञानभावाभावानुविधानात् कारणत्वभावाभावयोः कुतः पु २३

नैवंभूतब्रह्मरूपावगतिरित्यत आह। ब्रह्मशब्दस्य हीति। न केवलं सदेव सोम्येदमित्यादीनां वाक्यानां पौर्वापर्यालो
चनया इत्थंभूतब्रह्मावगतिः। अपि तु ब्रह्मपदस्यापि निर्वचनसामर्थ्यादिममेवार्थं स्वहस्तयतीति निर्वक्ति न माह। बृहतेर्धा
तोरर्थानुगमात्। बृहि कर्माणि हि बृहतिरतिशायिने वर्तते तच्चेदमतिशायनमनवच्छिन्नं पदान्तरावगमितं नित्यशुद्ध
बुद्धत्वाद्यपस्यान्यनुजानातीत्यर्थः। तदेवं तत्पदार्थस्य शुद्धत्वादेः प्रसिद्धिमभिधाय त्वंपदार्थस्याप्याह। सर्वस्यात्म
त्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वस्य पांसुलपादस्य हालिकस्यापि ब्रह्मास्तित्वप्रसिद्धिः कुतः आत्मत्वात्। तदेव स्फोटयति।
सर्वो हीति। प्रतीतिमेव प्रतीतेर्निराकरणेन दर्शयति। न नेति। न नप्रत्येत्यहमस्मीति किं तु प्रत्येत्येवेति योजना। न
न्वहमस्मीति चेत्प्रतीतिमात्रं तत्रासीदात्मानमित्यत आह यदीति। अहमस्मीति न प्रतीयात्। अहंकारास्पदं हि जीवा
त्मानं चेन्न प्रतीयादहमिति न प्रतीयादित्यर्थः। ननु प्रत्येतु सर्वो जन आत्मानमहंकारास्पदं ब्रह्मणि तु किमाया
तमित्यत आह आत्मा च ब्रह्म तत्त्वसामानाधिकरण्यात्। तस्मात् तत्पदार्थस्य शुद्धबुद्धत्वादेः शब्दतस्त्वं
पदार्थस्य जीवात्मनः प्रत्यक्षतः प्रसिद्धेः पदार्थज्ञानपूर्वकत्वाच्च वाक्यार्थज्ञानस्य त्वंपदार्थस्य ब्रह्मभावावगमः
तत्त्वमसीति वाक्यात् उपपद्यत इति भावः। आक्षेपप्रथमकल्पाश्रयं दोषमाह। यदि तर्हि लोक इति। अ
ध्यापकाध्येतृपरंपरा लोकः तत्र तत्त्वमसीति वाक्यात्। यदि ब्रह्मात्मत्वेन प्रसिद्धं आत्मा ब्रह्मत्वेनेति वक्तव्ये ब्रह्मात्म
त्वेनेत्यभेदविवक्षया गमयितव्यं परिहरति न कुतः तद्विशेषं प्रति विप्रतिपत्तेः तदनेन विप्रतिपत्तेः साधकबाधकप्रमा
णाभावे सति संशयबीजमुक्तं तस्मात् संशयात् जिज्ञासोपपद्यत इति भावः। विवादाधिकरणं धर्मिसर्वतंत्रसि

बाच० द्धांतोभ्युपेयः। अन्यथाऽनाश्रयाभिन्नाश्रया वा विप्रतिपत्त्योर्न स्युः विरुद्धा हि प्रतिपत्त्योर्विप्रतिपत्तयः। न चानाश्र
२४ याः प्रतिपत्तयो भवंति अनालंबनत्वापत्तेः। न च भिन्नाश्रया विरुद्धा। न ह्यनित्या बुद्धिर्नित्य आत्मेति प्रतिपत्ती। विप्रति
पत्ती। तस्मात्तत्पदार्थस्य शुद्धबुद्धत्वादेर्वेदांतेभ्यः प्रतीतित्वंपदार्थस्य च जीवात्मनो लोकतः सिद्धिः सर्वतंत्रसिद्धांतः। त
दाभासत्वानाभासत्व तत्तद्विशेषेषु परमत्र विप्रतिपत्तयः। तस्मात्सामान्यतः प्रसिद्धे धर्मिणि विशेषतो विप्रतिपत्तिपुनो
युक्तस्तद्विशेषेषु संशयः तत्र त्वंपदार्थे तावद्विप्रतिप त्तीर्दर्शयति। देहमात्रमित्यादिना लोकेव केवलं न कर्तृत्वं तेन
अत्र देहेंद्रियमनः क्षणिकविज्ञानचैतन्यपक्षेतत्पदार्थनित्यत्वादयस्त्वंपदार्थेन संबंध्यते। योग्यता विरहात् शून्य
पक्षेपि सर्वोपाख्यारहितत्वंपदार्थः कथं तत्त्वयोर्गोचरः कर्तृभोक्तृत्वस्वभावस्यापि परिणामितया तत्पदार्थनित्यत्वाद्यसं
गतिरेव। अकर्तृत्वेपि भोक्तृत्वपक्षे परिणामितया नित्यत्वाद्यसंगतिः अभोक्तृत्वेपि नानात्वेनावच्छिन्नत्वात्। अ
नित्यत्वादिप्रसक्तौ अद्वैतहानाच्च तत्पदार्थासंगतिः तदेवस्यैव त्वंपदार्थविप्रतिपत्त्या तत्पदार्थेपि विप्रतिपत्ति
र्दर्शिता॥ वेदप्रामाण्यवादिनो लोकायतिकादयः। तत्पदार्थप्रत्ययं मिथ्येति मन्यंते। वेदप्रामाण्यवादिनोप्यौप
चारिकं तत्पदार्थमविवक्षितं वा मन्यंते इति। तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थविप्रतिपत्तिमाह।
अस्ति तद्व्यतिरिक्त ईश्वरः। सर्वज्ञः सर्वशक्तिरिति केचिदित्यादिति जीवात्मानं परामृशंति नकेवलं शरीरादि
भ्यो जीवात्मभ्योपि व्यतिरिक्तः स च सर्वस्यैव जगत ईष्टे ऐश्वर्यसिध्यर्थं भाविकमस्य रूपद्वयमुक्तं सर्वज्ञः सर्वश
क्तिरिति। अस्यापि जीवात्मभ्यो व्यतिरेकात्तत्त्वंपदार्थेन समानाधिकरणमिति समतमाह। आत्मा स भोक्तु

२४

रित्यपरे॥ भोक्तुर्जीवात्मनो विद्योपाधिकस्य स ईश्वरः॥ न तत्पदार्थ आत्मानं ईश्वराद्भिन्नो जीवात्मा परमात्मा इत्यर्थः॥
विप्रतिप त्तीरुपसंहरन् विप्रतिपत्ति बीजमाह॥ एवं बहव इति। युक्तियुक्त्याभाससमाश्रयाः संतइति योजना॥ ननु
संतु विप्रतिपत्तयः तन्निमित्तश्च संशयः तथापि किमर्थं ब्रह्ममीमांसारंभ इत्यत आह। तत्राविचार्येति। तत्त्वज्ञानाच्च निश्रे
यसाधिगमो नातत्त्वज्ञानाद्भवितुमर्हति। अपि च॥ अतत्त्वज्ञानात् श्रास्ति श्रेयसस्यानर्थप्राप्तिरित्यर्थः सूत्रतात्पर्यमुपसंहर
ति। तस्मादिति। वेदांतमीमांसा तावत्तर्क एव तदविरोधिनश्च ये न्यायपि तर्का अध्वरमीमांसायां न्यायाश्चैते वेदत्वादि
प्रामाण्यपरिशोधनपरिपुत्ते उपकरणं यस्याः सा तथोक्ता तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोजनाब्रह्ममीमां
सारब्धव्येति। तदेवं प्रथमेन सूत्रेण मीमांसारंभमुपपाद्य ब्रह्ममीमांसामारभते। जन्माद्यस्य यतः। एतस्य सूत्रस्यापा
तनिकामाह भाष्यकारः। ब्रह्मजिज्ञासितव्यमित्युक्तं किं लक्षणं पुनस्तद्ब्रह्म। अत्र यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रथा
नस्य प्रतिज्ञया तदंगान्यपि प्रमाणादीनि प्रतिज्ञातानि तथापि स्वरूपस्य प्राधान्यात् तदेवाक्षिप्य प्रथमं समर्थ्यते। तत्र यथा
वदनुरूपनेनत्सर्वं परिमितं। अशुद्धमबुद्धं विध्वंसि न तेनोपलब्धे न तदिरूपस्य नित्यशुद्धस्वभावस्य प्रलक्षणः स्वरूपं
शक्यं लक्षयितुं न हि जातु कश्चित्कृतकत्वेन नित्यं लक्षयति। न च तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते तस्यानुपलब्धचरत्वा
त् प्रसिद्धं हि लक्षणं भवति नात्यंताप्रसिद्धं एवं च न शब्दोप्यत्र क्रमते अत्यंताप्रसिद्धतया ब्रह्मणोऽपदार्थस्यावाक्यार्थत्वात्।
प्रि तस्माल्लक्षणाभावात् न ब्रह्म जिज्ञासितव्यमिति आक्षेपाभिप्रायः। तमिमाक्षेपं भगवान् सूत्रकारः परिहरति॥ जन्मा
द्यस्य यत इति। माध्यस्तुभ्यमानं जगत्तद्धर्मतया तादात्म्येन वा ब्रह्मणोपि लक्षणं तद्दुल्लक्ष्या तु भविष्यति देशांतरप्राप्ति

Dr. BHAU DAJI

रिवमविनुर्वर्णयाद्रतितात्पर्यार्थः॥ सूत्रावयवान् विभजते॥ जन्मोत्पत्तिरादिरस्येति। लाघवाय सूत्रकृता जन्मादीति नपुंस
कप्रयोगः कृतः तद्रूपपादनाय समाहारमाह। जन्मस्थितिभंगमिति। जन्मनश्चेत्यादिः कारणनिर्देशाद् इति। संदर्भो
निगदव्याख्यातः स्यादेतत्। प्रधानकालग्रहलोकपालक्रियायदृच्छास्वभावाभावेषु पृथक्समानेषु सत्सु सर्वज्ञं सर्व
शक्तिस्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः संभावनेत्यत आह अस्य जगत इति अत्र नामरूपाभ्यां व्याकृतस्येति
चेतनस्यापि कारकत्वसंभावनया प्रधानादिचेतनकर्तृकत्वं निरूपयस्य कर्तृकत्वं च व्यासेधयति यत्खलु नाम्ना रूपेण
च व्याक्रियते तच्चेतनकर्तृकं दृष्टं यथा घटादि विवादाध्यासितं च जगन्नामरूपव्याकृतं तस्माच्चेतनकर्तृकं संभावितं चेतनो
हि बुद्धावालिख्य नामरूपे घट इति नाम्ना रूपेण च कंबुग्रीवादिना बाह्यं घट निष्पादयति अत एव घटस्य निर्वर्त्यस्याप्यंतः सं
कल्पात्मना सिद्धस्य कर्मकारकभावो घटं करोतीति यथाहुः बुद्धिसिद्धं तु न तदसदिति। तथा चाचेतनो बुद्धावनालिख्य
तिन करोति न शक्यं संभावितुमिति भावः। स्यादेतत् चेतनो यमहालोकपालादीनामरूपे बुद्धावालिख्य जगज्जनयिष्यंति। कृतमु
क्तस्वभावेन ब्रह्मणेत्यत आह। अनेककर्तृभोक्तृसंयुक्तस्येति केचित्कर्तारो भवन्तीति। यथा लिंगादयो न भोक्तारः।
केचित्भोक्तारो यथा। श्राद्धवैश्वानरीयेष्ट्यादिषु पितापुत्रादयो न कर्तारः तस्मादुभयग्रहणं देशकालनिमित्तक्रिया
फलानीत्येतद्द्वन्द्वः देशादीनि च तानि प्रतिनियतानि चेति विग्रहः। तदाश्रयो जगत्तस्य केचित्खलु प्रतिनियत
देशोत्पादाः यथा कृष्णमृगादयः केचित्प्रतिनियतकालोत्पादाः यथा कोकिलादयः केचित्प्रतिनियतनिमित्ताः।
यथा नवांबुदध्वान्यादिनिमित्ताः बलाकागर्भादयः केचित्प्रतिनियतक्रिया यथा ब्राह्मणानां याजनादयो नेतरेषां एवं प्रतिनियतफ
ला यथा केचित्सुखिनः केचिद्दुःखिनः एवं य एव सुखिनः स एव कदाचिद्दुःखिनः सर्वमेतदाकस्मिकापरनाम्नि यत्फला

यादृच्छिकत्वे स्वाभाविकत्वे वा सर्वशक्तिकर्तृकत्वेन च घटते परिमितज्ञानशक्तिभिः ग्रहस्कर लोकपालादिभिः ज्ञातुं कर्तुं
वा अशक्यत्वात्। तदिदमुक्तं। मनसाप्यचिन्त्यरचनारूपस्येति॥ एकस्या अपि हि शरीररचनायारूपं मनसा नाशक्यं
चिंतयितुं कदाचिल्लागेव जगद्रचनायाः किमंग पुनः कर्तुमित्यर्थः। सूत्रवाक्यं पूरयति। तद्ब्रह्मेति वाक्यशेषः स्यादेतत्। कस्मात्पुन
र्जन्मस्थितिभंगमात्रमिहादिग्रहणेन गृह्यते। न वृद्धिपरिणामापक्षया अपीत्यत आह। अन्येषामपि भावविकाराणां वृद्ध्या
दीनां त्रिष्वेवांतर्भाव इति वृद्धिस्तावदवयवोपचयने नास्थूललक्षणः उत्पत्तिरेव धर्मिणो हि हाटकादेर्द्धर्मलक्षणः परिणामः।
× स्वलक्षणः उत्पत्तिरेव धर्मिणो हि बाल्यावयवानपचयविनाशितं तु कादूर स्य एव महापदेजायत इति। अन्यैव वृद्धिः सा
परिणामिश्च विशेषधर्मलक्षणः व× कटकमुकुटादिः तस्योत्पत्तिः वृक्कटकादेरपि प्रत्युत्पन्नतादिलक्षणोपरिणाम उत्पत्तिः। एवमस्याः
परिणामो नवपुराणत्वादिरुत्पत्तिः अपक्षयस्तु वयवहासो नाश एव तस्माज्जन्मादिषु यथास्वमंतर्भावात् वृध्यादयः पृथ
क् नोक्ता इत्यर्थः। अथैते वृध्यादयो न जन्मादिष्वंतर्भवंति यथोत्पत्तिस्थितिभंगमेवोपादत्तं तथा सति हि तन्निपातके
यतो वा इमानि भूतानीति वेदवाक्ये बुद्धिस्थीकृते जगज्जन्मादिकारणं ब्रह्म लक्षितं भवति अन्यथा तु जायतेऽस्ति वर्धते प्रतिपार
न परमहासर्ग पूर्वस्थितिकालेपि नद्धावाक्योदितानां इत्यादीनां ग्रहणेन तत्प्रतिपादकं नैरुक्तवाक्यं बुद्धौ भवेत् तच्च न मूलका
रणजन्मादीनां भावविकाराणामुपपद्यते इत्याशंकानिराकरणार्थं वेदोक्तोत्पत्तिस्थितिभंगग्रहणमित्याह यास्कपरिपठि
तानां त्विति उत्पत्तिमात्रस्य भवनान्तरीयकतया तु स्थितिभंगग्रहणमत इत्यत आह यावदुत्पत्तिर्न लयः कारणादिति।
त्रिभिरस्योपदानत्वं सूच्यते। उत्पत्तिमात्रं तु निमित्तमात्रं कारणसाधारणमिति नोपादानत्वं सूचयते। तदिदमुक्तं तत्रै

वाच० वेति। पूर्वोक्तानां कार्यकारणविशेषणानां प्रयोजनमाह। नयथोक्तेति। तदनेनग्रंथनेन प्रतिज्ञाविषयस्यब्रह्मस्वरूपस्यलक्ष
२६ णद्वारेणसंभावनोक्ता तत्रप्रमाणंवक्तव्यं यथाहुर्न्यायिकाः। संभावितःप्रतिज्ञार्थःसाध्यहेतुनान तस्यहेतुभिस्त्राणमु
त्पन्नेवयोहतः। यथावंध्याजननीसादिद्रष्टव्यं नाभ्रजआदिसंभावनाहेतुः परस्मैवैशेषिकादयः इतएवानुमानादीश्वर
विनिश्चयमिच्छंतीतिसंभावनाहेतुतांदूषयितुमाह। एतदेवेति। चोदयति नन्विहापीति एतावतैवाधिकरणार्थेसमाप्तेवक्ष्य
माणाधिकरणार्थंवदन्नुत्कहभावेनपरिहरति। नेति। वेदांतवाक्यकुसुमग्रंथनार्थतामेवदर्शयति। वेदांतेति। विचारः
साध्यवसानसवासनाविद्याद्वयोच्छेदः ततोहिब्रह्मात्मनानिर्वृत्तिराविर्भावः। नत्विंब्रह्मणिशब्दादुत्पन्नमानांतरमनुसर
णीयंतथाचकुतोमननं कुतश्चनददुभवः साक्षात्कारइत्यतआह। सत्स्वपुवेदांतवाक्येष्विति। अनुमानंवेदांताविरोधि
तदुपजीविचेत्यपिद्रष्टव्यं शब्दाविरोधिन्यातदुपजीविन्याचयुक्त्या [illegible]
[illegible] विवेचनंमननंयुक्तिश्चार्थापत्तिरनुमानंचस्यादेतत्। यथाधर्मेणिपुरुषबुद्धिसहायं
एवंब्रह्मण्यपिकस्मान्नभवतीत्यतआह। नधर्मजिज्ञासायामिवेतिश्रुत्यादयइति। श्रुतीतिहासपुराणस्मृतयःपु
राणंअनुभवोंतःकरणवृत्तिभेदः। ब्रह्मसाक्षात्कारस्याविद्यानिवृत्तिद्वारेणब्रह्मस्वरूपाविर्भावःप्रमाणफ
लंतच्चफलमिवफलमितिगमयितव्यं यद्यपिधर्मजिज्ञासायामपिसामग्र्यांप्रत्यक्षादीनांव्यापारः। तथापिसाक्षा
त्रास्तिब्रह्मजिज्ञासायांतुसाक्षादनुभवादीनांसंभवोऽनुभवार्थंचब्रह्मजिज्ञासेत्याह। अनुभवावसानत्वात्
ब्रह्मानुभवोब्रह्मसाक्षात्कारःपरःपुरुषार्थोनिर्मृष्टनिखिलदुःखपरमानंदरूपत्वादिति। ननुभवतुब्रह्मानुभ
वार्थाजिज्ञासादेतेनुभवादयस्तुनशक्योब्रह्मणस्तद्विषयतायोग्यत्वादित्यतआह। भूतवस्तुविषयत्वाच्चब्रह्मविज्ञा

२६

नस्यव्यतिरेकसाक्षात्कारकस्यविकल्परूपोविषयविषयिभावः नत्वेवंधर्मज्ञानमनुभवावसानंतदनुभवस्यस्वयम
पुरुषार्थत्वात्। तदनुष्ठानसाध्यत्वात् पुरुषार्थस्य अनुष्ठानस्यचविनाप्यनुभवंशाब्दज्ञानमात्रादेवसिद्धेरित्याह॥ ×
× पुरुषाधीनेति॥ पुरुषाधीनत्वमेवलौकिकवैदिककार्याणामाह। कर्तुमकर्तुमितिलौकिकंकार्यमनवस्थितमुदा
हरति। यथाश्वेनेति। लौकिकेनोदाहरणेनसहवैदिकमुदाहरणंसमुच्चिनोति। तथातिरात्रइति। कर्तुमकर्तु
मित्यस्योदाहरणमुक्तंकर्तुमन्यथावाकर्तुमित्यस्योदाहरणमाह। उदितइतिस्यादेतत् पुरुषस्वातंत्र्यात् क
र्तव्येविधिप्रतिषेधानामानर्थक्यं अतदधीनत्वात् पुरुषप्रवृत्तिनिवृत्योरित्यतआह॥ विधिप्रतिषेधाश्चात्रार्थवंतःस्युः
यद्गृह्णातीतिविधिर्नगृह्णातीतिप्रतिषेधः उदितानुदितहोमयोर्विधिःएवंनारास्थिस्पर्शननिषेधोभस्मघस्यतद्वारणवि
धिरित्येवंजातीयकाविधिनिषेधाअर्थवंतःकुतइत्यतआह। विकल्पोत्सर्गापवादाश्चभवंतीति। यस्माद्ग्रहणाग्र
हणयोः उदितानुदित होमयोर्विरोधात् समुच्चयासंभवेतुल्यत्वतयाचबाध्यबाधकभावाभावेसत्यगत्यास
तिविकल्पः। नरास्थिस्पर्शननिषेधतद्वारणयोस्तुविरुद्धयोरतुल्यबलतयानविकल्पः किंतुसामान्यशास्त्रस्यस्प
र्शननिषेधस्यधारणविषयेणविशेषशास्त्रेणबाधः। एतदुक्तंभवति। विधिप्रतिषेधैरेवसतादृशोविषयोनागतोसा
धारूपउपनीतोयेनपुरुषस्यविधिनिषेधाधीनप्रवृत्तिनिवृत्तोऽपिस्वातंत्र्यंसंभवतीतिकृतेवस्तुनितुनेयमस्तिविधेत्याह।
नतुवस्त्वेवंनैवमिति। तदनेनप्रकारविकल्पोनिरस्तःप्रकारिविकल्पंनिषेधतिअस्तिनास्तीति। स्यादेतत्। भूतेऽपिवस्तु
निविकल्पोदृष्टःयथास्थाणुर्वापुरुषोवेतितत्कथंनवस्तुविकल्पितइति। अतआह। विकल्पनास्तीति। पुरुषबुद्धिरंतः
करणंतदपेक्षाविकल्पनाःसंशयविपर्यासः। सवासनमनोमात्रयोनयोनायथास्वप्नेवासनेंद्रियमनोयोनयोवाग्य

वात्र० स्थाणुर्वा पुरुषो वेति स्थाणौ संशयः। पुरुष एवेति वा विपर्यासः अन्यशब्देन वस्तुतः स्थाणो रन्यस्य पुरुषस्याभिधानात्।
२७ ननु पुरुषत्वं वा स्थाणुत्वं वा पेक्षते समानधर्मधर्मिदर्शनमात्राधीनजन्मत्वात्। तस्मादयथावस्तुतो विकल्पना न कल्प
विकल्पयंति वा अन्यथयंति वेत्यर्थः। न तत्त्वज्ञानं तु वस्तुबुद्धितंत्रं किंतु वस्तुतंत्रं अतः तत्त्वो वस्तुविनिश्चयोऽयुक्तो न तु कल्प
नाप्रइत्याह। न तु वस्तुयाथात्म्येति। एवमुक्तेन प्रकारेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यं वस्तुतंत्रं तथा प्रसाध्य ब्रह्म
ज्ञानस्य वस्तुतंत्रतामाह। तत्रैवं सतीति। अत्र चोदयति ननु भूतेति यत्किल भूतार्थं वाक्यं तरितत्प्रमाणांतरगोचरं तथा
अनुवादकं दृष्टं यथा नद्यास्तीरे फलानि संतीति तथा च वेदांताः तस्मात् भूतार्थतया प्रमाणांतरदृष्टमेवार्थमनुवदेयुः
युक्तं चात्र लक्षणजगज्जन्मादिहेतुकमनुमानं प्रमाणांतरं एवं च मौलिकं तदेव परीक्षणीयं न तु वेदांतवाक्यानि तदभी
नसत्यत्वानीति कथं वेदांतवाक्यग्रथनार्थता सूत्राणामित्यर्थः। परिहरतिनेंद्रियाविषयत्वइति। कस्मात्पुनरैंद्रियविषय
त्वं प्रतीक इत्यत आह। स्वभावत इति। अत एव श्रुतिः। पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात्पराङ् पश्यति नांतरा
त्मन्निति प्रत्यगात्मतत्त्वविषयत्वमुपपादितं। यथा च सामान्यतो दृष्टमप्यनुमानं ब्रह्मणि न प्रवर्तते तथोपरिष्टान्निपुण
तरमुपपादयिष्यामः। उपपादितं चास्माभिः विस्तरेण न्यायकारिकायां मेतद्वच भूतार्थतामात्रेणानुवादतेत्युपरि
ष्टादुपपादयिष्यामः। तस्मात्सर्वमिवदातं श्रुतिः यतो वेति जन्मदर्शयितियेन जातानि जीवंतीति जीवनं स्थि
तिं यत्प्रयंत्यभिसंविशंतीति तत्रैव प्रलयं। अत्र च प्रधानादिसंशये निर्णयवाक्यं आनंदाद्ध्येवेति एतदुक्तं भवति। यथा रज्ज्व
ज्ञानसहितरज्जूपादाना स्पर्शरज्जांसत्रामसिरजोमेवविलीयते। एवमविद्यासहितब्रह्मोपादानं जगत्ब्रह्म
ण्येवास्ति तत्रैव च लीयत इति सिद्धं। सूत्रांतरमवतारयितुं पूर्वसूत्रसंगतिमाह। जगत्कारणत्वप्रदर्शनेनेति॥

२८

शास्त्रयोनित्वात्। न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता शास्त्रयोनित्वादपि बोद्धव्या। शास्त्रयोनित्वस्य सर्वज्ञ
तासाधनत्वं समर्थयते महत ऋग्वेदादेः शास्त्रस्येति। चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथावथं निषेकादिश्मशानांता
सु अत्यमुहूर्तोऽभिक्रमप्रदोषसमापनीयास्तु नित्यनैमित्तिककाम्यकर्मपद्धतिषु अत्यंत लेकशिष्याणां शासनात् शास्त्रमृग्वे
दादि अत एव महाविषयत्वाच्च महत्। न केवलं महाविषयत्वेनास्य महत्त्वं अपितु अनेकांगोपांगोपकरणत्वापी
त्याह। अनेकविद्यास्थानोपबृंहितस्य पुराणन्यायमीमांसादयो दश विद्यास्थानानि तैस्तैर्यथायथं द्वारोपकृतस्य च
तदनेन समस्तशिष्टजनपरिग्रहेण प्रामाण्याशंकाप्यपाकृता। पुराणादिप्रणेतारो महर्षयः शिष्टास्तैस्तथा तया द्वारा वेदा
र्थव्याख्यानैस्तदर्थादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति। नचायमनवबोधको नाप्यस्पष्टबोधको येन न प्रमाणं स्या
दित्याह प्रदीपवत्। सर्वार्थावद्योतिनः सर्वमर्थं ज्ञानं सर्वथाववोधयन् नानवबोधको नाप्यस्पष्टबोधक इत्यर्थः। अ
त एव सर्वज्ञकल्पस्य सर्वज्ञसदृशस्य सर्वज्ञस्य हि ज्ञानं सर्वविषयं शास्त्रस्यापि अभिधानं सर्वविषयमिति सादृश्यं।
तदेवमन्वयमुक्त्वा व्यतिरेकमाह। नहीदृशस्येति सर्वज्ञस्य गुणः सर्वविषयता तदन्वितं शास्त्रं अस्यापि सर्व
विषयत्वात्। उक्तमर्थं प्रमाणयति यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति स पुरुषविशेषः
ततोपि शास्त्रादधिकतरविज्ञान इति योजना अयत्नेष्वस्मदादिभिर्यत्समीचीनार्थविषयं शास्त्रं विरच्यते। त
त्रास्माकं वक्तॄणां तस्मात् ज्ञानमधिकविषयं न हि ते ते असाधारणधर्माः अनुभूयमाना अपि शक्या वक्तुं। न खल्विक्षुक्षीरगुडादीनां मधुररसभेदाः शक्यास्सरस्वत्याप्याख्यातुं विस्तरार्थमपि वाक्यं न वक्तृज्ञाने नतु अविषय
मिति कथयितुं विस्तरग्रहणं सोपनयं तिगमनमाह किमु वक्तव्यमिति वेदस्य यस्मान्महतो भूताद्योनेः संभवः॥

वाच- तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं किमु वक्तव्यमिति योजना। अत्र चानेकशाखाभेदभिन्नस्य वेद
२८ स्येत्यादिः संबन्धइत्यन्त उपनयः। तस्येत्यादि सर्वशक्तित्वं चेत्यन्तं निगमनं। अप्रयत्नेनैवेति। ईषत्प्रयत्नेन यथाऽऽवर्ण
यवार्धूरिति। देवर्षयो महापरिश्रमेणापि यच्छाशक्तास्तदयमीषत्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं
सर्वशक्तित्वं चोक्तं भवति। अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता। अस्य महतो भूतस्येति। यद्यपि तावद्वर्णानां नित्यत्वमा
स्थितं तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेतव्यं। आनुपूर्वीभेदवन्तो हि वर्णाः पदं पदानि चानुपूर्वीभेदवन्ति वाक्यं।
व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्म वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात्। व्यक्तीश्चानित्येति॥
कथं तदुपगृहीतानां वर्णानां नित्यानां विभूनामपि पदतानि त्यापदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता।
तस्मात् कृत्वानुकरणवत्। यद्यप्यनुकरणं यथा हि यादृशं गात्रचलनादि नर्तकः करोति तादृशमेव शिक्षमाणानुक
[illegible] रोति नर्तकी न तु तदेव ब्र
वीति एवं यादृशीमनुपूर्वीं वैदिकानां वर्णपदानां करोति अध्यापयिता तादृशीमेवानुकरोति माणवकः न तु तामेवोच्चारयति
आचार्यव्यक्तिस्थो माणवकव्यक्तिस्थानुपूर्व्याः अन्यत्वात् तस्मान्नित्यानित्यवादिनां लौकिकवैदिकपदवाक्यादि पौरुषेयत्वे वि
वादः। केवलं वेदवाक्येषु पुरुषस्वातंत्र्यास्वातंत्र्ये विप्रतिपत्तिः यथाहुः यत्नः प्रतिषेध्यान्तः पुरुषाणां स्वातंत्र्यमात्रनुत्स
ष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रति। अस्मादृशगुरुशिष्यपरंपरां अविच्छिन्नामनन्तं अक्रियार्थत्वापि
ब्रह्मस्वरूपविधिपरा वेदान्ता भविष्यन्ति तथा च विधिना त्वेकवाक्यत्वादिति राद्धान्तसूत्रमनुस्य दृश्यते। न च
स्वप्रकाशप्रवर्तनमेव विधिः उक्ता विधेरज्ञातज्ञापनार्थत्वात्। वेदान्तानां चाज्ञानब्रह्मज्ञापयतां तथाभावादित्यत आह॥
२८

न च परिनिष्ठितइति। अनागतोत्पाद्यभावविषय एव हि सर्वो विधिः रूपेयः उत्पत्त्यधिकारविनियोगप्रयोगरूपाणां
परस्पराविनाभावात् सिद्धे च तेषामसंभवात्। तदाम्नानां तैदंपर्यं भिद्यते यथाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि
ष्वो विकारविनियोगप्रयोगाणां प्रतिलंभात् अग्निहोत्रं जुहोतीत्युत्पत्तिमात्रपरं वाक्यं। न त्वत्र विनियोगादयो न संति सं
तोप्यन्यतो लब्धत्वात् केवलमविवक्षिताः तस्माद्भाव्यविषयो विधिर्न सिद्धे वस्तुनि भवितुमर्हतीति उपसंहरति॥
तस्मादिति। अत्रारुचिकारणमुक्त्वा पक्षान्तरमुपसंहरति। अथेति। एवं च सत्युक्तरूपे ब्रह्मणि शब्दस्यातात्पर्यात् प्र
माणान्तरेण यादृशं रूपं व्यवस्थाप्यते तत्र शब्देन निरूप्यते। तस्योपासनापरत्वात्। समारोपेण चोपासनायाः उपपत्ते
रिति प्रकरणमुपसंहरति तस्माच्चेति। सूत्रेण सिद्धान्तयति। एवं प्राप्ते उच्यते। तत्तु समन्वयात्। तदेव ब्रह्म तुशब्द
इति तदित्युत्तरपक्षप्रतिज्ञां विभजते॥ तद्ब्रह्मेति। पूर्वपक्षी कर्कशाशयः पृच्छति कथं कुतः प्रकारादित्यर्थः। सिद्धं कैप
क्षे हेतुप्रकारान्तरभेदात्। समन्वयात् सम्यगन्वयः समन्वयस्तस्मात् एतदेव विभजते॥ × पश्चात्तत्रस्थायं शोधः। दिमाच
क्षते वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योपधानलब्धसर्वश
क्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि नित्येषु स्वातन्त्र्यं पूर्वपूर्वसर्गानुरूपेण तादृशतादृशानुपूर्वीरचना सा
त् यथा यागादि ब्रह्महत्यादयः अर्थानर्थहेतवो ब्रह्मविवर्ता अपि सर्गान्तरे विपरीतं तेन जातु कश्चित्सर्गे ब्रह्महत्या
र्थहेतुरनर्थहेतुश्चाश्वमेधो भवति। अग्निर्वा क्लेदयत्यापो वा दहंतीति नद्वत् यथात्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्यु
दयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयानर्थहेतुः एवं सर्गान्तरेष्वपीति तदनुरोधात्। सर्वज्ञोपि सर्वशक्तिर
पि पूर्वसर्गानुसारेण वेदान् विरचयन् स्वतन्त्रः पुरुषस्यातंत्र्यमात्रं तु पौरुषेयत्वं रोचयन्ते जैमिनीया अपि तच्चास्माकमपि

समानमन्यत्राभिनिवेशात्। नन्वेकस्य प्रतिभाने तन्निश्वास इति युक्तं न हि बहूनामप्यज्ञानां विज्ञानां वाशयदोषवतां प्रतिभाने
युक्तमाश्वासः तत्तज्ज्ञानवत अपास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्तऐश्वर्यतिः सर्गादिभुवां च आपतिदेव
र्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्त्वरूपावधारणं तत्सम्प्रदायाचार्याणामपि तत्र संप्रत्ययः॥
इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वं शास्त्रस्य चापौरुषेयत्वं प्रामाण्यं चेति। वर्णकान्तरमारभते। अथवेति। पूर्व
याधिकरणेन ब्रह्मस्वरूपलक्षणसंभवाशंकमुदस्य लक्षणसंभव उक्तः तस्यैव तु लक्षणस्यानेनानुमानत्वाशंकामप
पाकृत्यागमोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तं अक्षरार्थस्तु अतिरोहितः शास्त्रप्रमाणकत्वमुक्तं ब्रह्मणः प्रतिज्ञा
मात्रेण तदनेन सूत्रेण उपपादनीयमिति। तत्र पूर्वपक्षमारचयति भाष्यकारः। कथं पुनरिति किमाक्षेपश्रु
द्बुद्धोदासीनस्वभावतयोपेक्षणीयं ब्रह्म भूतमभिदधतां वेदान्तानामपुरुषार्थोपदेशितया प्रयोजनत्वाप
त्तेः भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत् तद्दर्थानुवादकत्वेनाप्रामाण्यप्रसं
गात्। न खलु लौकिकानि वाक्यानि प्रमाणान्तरविषयमर्थमवबोधयन्ति स्वतः प्रमाणं एवं वेदान्ता अपीत्यन
पेक्षत्वलक्षणप्रामाण्यमेषामाहन्यते न चैतेषां प्रमाणं भवितुं युक्तं न चाप्रयोजनत्वे स्वाध्यायाध्ययनविध्यापादि
तप्रयोजनवत्त्वनियमात्। तस्मात् तद्विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपादनपरत्वेनैव क्रियार्थत्वं यदि तद
संनिधानात्परत्वं तदा च वर्तते। तत्संनिहितोपासनादिक्रियापरत्वं वेदान्तानां एवं हि प्रत्यक्षाद्यनधिगतगोचरत्वेनान
पेक्षतया प्रामाण्यं च प्रयोजनवत्त्वं च सिध्यतीति तात्पर्यार्थः। पारमर्षसूत्रोपन्याससु पूर्वपक्षदार्ढ्यायानर्थक्यं
चाप्रयोजनवत्त्वं सापेक्षतया प्रमाणत्वात् फलं चानुवादकत्वादिति। अतदर्थानामित्यादि वार्तं ग्रहणकवाक्यं अस्य विभाग
भाष्यं न हि तासामुपपन्नत्वेऽसंतत्स्यादेः × सर्वेषु हि वेदान्तेषु वेदान्तानामैकान्तिकी भस्मपरता आम्नायसुर्बहूनि वा

क्यान्युदाहरति। सदेवेति। यतो वा इमानि भूतानीति तु वाक्यं पूर्वमुदाहृतं जगदुत्पत्तिस्थितिनाशकारणमिति चेहस्मारि
तमिति न पठितं। येन हि वाक्यमुपक्रम्यते येन चोपसंह्रियते स एव वाक्यार्थ इति शाब्दाः। यथोपांशुयाजवाक्ये नूद्येनु
रोधशायो जामितादोषसंकीर्तनपूर्वकोपांशुयाजविधाने तस्याति समाधानोपसंहारे चापूर्वोपांशुयाजकर्मविधिपरत्वाए
कवाक्यताबलादाश्रिता एवमत्रापि सदेव सोम्येदमिति। ब्रह्मोपक्रमात् तत्त्वमसीति च जीवस्य ब्रह्मात्मनोपसंहारात्।
तत्परत्वेन वाक्यस्य संवाक्यान्तराणामपि पौर्वापर्यालोचनया ब्रह्मपरत्वमवगन्तव्यं न च तत्परत्वं दृष्टस्य सति संभवे
न्यपरतादृष्टा युक्ता कल्पयितुं अतिप्रसंगात्। न केवलं कतिपयान्येषां अद्वेष्टा उपपन्ना चेत्याह। न केवलमेषामिति। साप
क्षत्वेनाप्रामाण्यं पूर्वपक्षबीजं दूषयति। न च परिनिष्ठितरूपत्वेपीति। अयमभिसंधिः पुंवाक्यदृष्टान्तेन हि भूतार्थ
तया वेदान्तानां सापेक्षत्वमा शंक्यते। न चैवं संभवान् दृष्टो माचष्ट। किं पुनर्वाक्यानां सापेक्षता भूतार्थत्वेनाहो पौ
रुषेयत्वेन यदि भूतार्थत्वेन ततः प्रत्यक्षादीनामपि परस्परापेक्षत्वेनाप्रामाण्यप्रसंगः तान्यपि हि भूतार्थान्येव।
अथ पुरुषबुद्धिप्रभवतया पुंवाक्यं सापेक्षं एवं तर्हि तदपूर्वकाणां वेदान्तानां भूतार्थानामपि नाप्रामाण्यं प्रत्यक्षादी
नामिव नियतेन्द्रियलिंगादिजन्मनां यथा युज्यते सिद्धे किल अपौरुषेयत्वे वेदान्तानामनपेक्षतया प्रामाण्यं सिध्येत् तदेव तु
भूतार्थत्वेन न सिध्यति। भूतार्थस्य शब्दानपेक्षेण पुरुषेण मानान्तरतोपि शक्यज्ञानत्वात्। बुद्धिपूर्वविरचनोपपत्तेः
वाक्यत्वादिलिंगकस्य वेदपौरुषेयत्वानुमानस्याप्रत्यूहमुत्पत्तेः। तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारं न तु भूतार्थत्वेन
कार्यार्थत्वे तु कार्यस्यापूर्वस्य मानान्तरागोचरतया अत्यन्तानुभूतपूर्वस्य तत्त्वेन समारोपेण वा पुरुषबुद्धावनारोहात् त
दर्थानां वेदान्तानां अशक्यरचनतया [illegible] पौरुषेयत्वाभावात्। अनपेक्षं प्रमाणत्वं सिध्यतीति

वाच॰
३० प्रामाण्याय वेदांतानां कार्यपरत्वमातिष्ठामहे। अत्र ब्रूमः। किं पुनरिदं कार्यमभिमतमायुष्मतः यद शब्दः पुरुषेण ज्ञातुं अपूर्व
मिति चेत् हंत कुतस्त्यं लिङादिपदार्थत्वं नालौकिकेन संगतिसंवेदनविरहात् लोकानुसारतः क्रियाया एव लौकिक्याः कार्याया लिङा
देरवगमात्। स्वर्गकामो यजेतेति साध्यस्वर्गविशिष्टो नियोज्योऽवगम्यते स च न देवकार्यमवगच्छति यत्स्वर्गानुकूलं न च क्रिया
क्षणभंगुरा आमुष्मिकाय स्वर्गाय कल्पत इति परिशेषात् वेदादेवापूर्वं कार्यं लिङादीनां संबंधग्रह इति चेत् हंत चैत्यवंदना
दिवाक्येष्वपि स्वर्गकामादिसंबंधात् अपूर्वकार्यत्वप्रसंगस्तथा च तेषामपि अशक्यरचनत्वेन अपौरुषेयत्वमनुमितिअपू
र्वार्थता न स्यात् अन्यतस्तु वाक्यत्वादीनामनुमानाभासत्वोपपादने रूढमपूर्वार्थत्वेनात्र त्वदुपपादकं जामपि वेदांतानां नसा
पेक्षतया प्रामाण्यविघातः। न चानभिगतगंतृत्वं नास्ति येन प्रामाण्यं न स्यात्। जीवस्य ब्रह्मताया अन्यतोऽनधिगमात्।
तदिदमुक्तं न च परिनिष्ठितरूपत्वेऽपीति। द्वितीयं पूर्वपक्षबीजं स्मारयित्वा दूषयति। यत्तु हेयोपादेयरहितत्वादिति।
विधर्यावगमात् खलु पारंपर्येण पुरुषार्थप्रतिलंभहेतुत्वमसीत्यवगतिपर्यंतात्। वाक्यार्थज्ञानात् बाह्यानुष्ठा
नानपेक्षात् साक्षादेव पुरुषार्थप्रतिलंभो नायं सर्पो रज्जुरियमिति ज्ञानाद्द्विवेतिसोयमस्य विपर्ययज्ञानात्प्रक
र्षः एतदुक्तं भवति द्विविधं हीप्सितं पुरुषस्य किंचिदप्राप्तं ग्रामादि किंचित्पुनः प्राप्तमपि विभ्रमवशादप्राप्तमिवावगतं।
यथा स्वग्रीवावनद्धं ग्रैवेयकं एवं जिहासितमपि द्विविधं। किंचिदहीनं जिहासति। यथा वलयितचरणं फणिनं किं
चित्पुनर्हीनमेव जिहासति यथा चरणाभरणे नूपुरे फणिनं समारोपितं तत्राप्राप्तप्राप्तौ चात्यक्तत्यागे च बाह्योपायानुष्ठान
साध्यत्वात् तदुपायतत्त्वज्ञानादृते पराचीनानुष्ठानापेक्षा न जातु ज्ञानमात्रं स्वरूपं नयति न हि सहस्रमपि रज्जु
प्रत्ययाः सुलग्नं फणिनं अन्यथयितुमीशाते समारोपितेप्सितजिहासिते तत्त्वसाक्षात्कारमात्रेण बाह्यानुष्ठानानपेक्षेणापा

DR. BHAU DAJI

३०

क्येप्राप्तमिवहातुमिवसमारोपमात्रजीविते हि ते समारोपं च तत्त्वसाक्षात्कारः समूलघातमुपहंतीति तथेहाप्यविद्यासमारोपित
जीवभावे ब्रह्मण्यानंदवस्तुनः शोकदुःखादिरहिते समारोपनिबंधनमप्राप्तत्वमसीति वाक्यार्थतत्त्वज्ञानादवगतविपर्यता
न्निवर्तते। तत्त्वविज्ञानात्प्राप्तमपरानंदरूपं अप्राप्तमिव प्राप्तं भवति त्यक्तमपि शोकदुःखादि अत्यक्तमिव त्यक्तं भवति। तदिदमुक्तं
ब्रह्मात्मावगमादेव जीवस्य सर्वस्यैव क्लेशस्य सवासनस्य विपर्यासस्य स हि क्लेशपातिजंतुः ततः क्लेशात्मकस्य प्रकर्षेण हानात् पुरुषार्थस्य दुः
खनिवृत्तिरूपत्वात् निरतिशयानंदलक्षणस्य सिद्धेरिति यत्त्वात्मेत्येवोपासीत। आत्मानमेव लोकमुपासीतेत्युपासनवाक्यगतदेवतादिप्रति
पादनेनोपासनापरत्वं वेदांतानामुक्तं तद्दूषयति। देवतादिप्रतिपादनस्य स्वार्थत्वेऽपि तावन्मात्रस्य स्ववाक्यगतोपासनार्थत्वेऽपि
न कश्चिद्विरोधः। यदि न विरोधः संतु तर्हि वेदांता देवताप्रतिपादनद्वारोपासनाविधिपरा एवेत्यत आह। न तु तथा ब्रह्मण इ
ति उपास्योपासकोपासनादिभेदसिद्ध्यधीनोपासना न निरस्तसमस्तभेदप्रपंचे वेदांतवेद्ये ब्रह्मणि संभवतीति नोपासनाविधि
शेषत्वं वेदांतानां तद्विरोधित्वादित्यर्थः। स्यादेतत्। यदि विधिविरहेऽपि वेदांतानां प्रामाण्यं हंत तर्हि सोऽरोदीदित्यादीनामपि ज
गुप्सितं प्रामाण्यमेवोपेक्षणीयार्थानां प्रामाण्यं न हि हानोपादानबुद्धिवत् प्रमाणस्य फलमुपेक्षाबुद्धेरपि फलत्वेन प्रामाणिकैरभ्युपेत
त्वात् इति कृतं बर्हिषि रजतं न देयमित्यादिनिषेधविधिपरत्वेनैतेषामित्यत आह। यथापीति स्वाध्यायविध्यधीनग्रहणतया हि स
र्वो वेदराशिः पुरुषार्थतंत्रः स च यतो न रोदनविषयमात्रादेव कश्चित्पुरुषार्थ उपलभ्यते तेनैव पदसंदर्भः साकांक्ष एव पुरुषार्थ
मुपेक्ष्यमाणः बर्हिषि रजतं न देयमित्ययमपि निषेधविधिः स्वनिषेध्यस्य निंदामपेक्षते न ह्यन्यथा ततश्चेतनः शक्यो निवर्त
यितुं न परिहर्तु तेऽपि निंदामवाप्स्यत्। ततो विधिनिषेधैरेव रजतनिषेधे च निंदायां च सामर्थ्यादेकवाक्यत्वमकल्पयिष्यत्। तदेव
सुतत्तयोः सोऽरोदीदिति च बर्हिषि रजतं न देयमिति च पदसंदर्भयोर्लक्षणनिंदाद्वारेण नष्टाश्वदग्धरथवत्परस्परं सम ३१

वाच॰ न्वयः। नत्वेवं वेदांतेषु पुरुषार्थापेक्षा तदर्थवगमादेवानपेक्षत्वात् परमपुरुषार्थत्वादित्युक्तं। ननु विध्यसंस्पर्शिनो वेदस्यान्यस्यन
३१ त्य प्रामाण्यं दृष्टमिति कथं वेदांतानां तदस्पर्शे तत्संविष्यतीत्याह। न चानुमानगम्यमिति। अबाधितानधिगतासंदिग्धबोधज
नकत्वं हि प्रमाणत्वं प्रमाणानां तच्च स्वत एवेत्युपपादितं यद्यपि चैषामीदृग्बोधजनकत्वं कार्यार्थापत्तिसमधिगम्यं तथापि त
द्बोधोपजनने मानांतरं नापेक्षते नापि नामेवार्थापत्तिं परस्पराश्रयप्रसंगात् इति स्वतस्त्वमुक्तं ईदृक्बोधजनकत्वं चका
र्यवद्विभीनां वेदांतानां ब्रह्मणप्यस्तीति दृष्टांतानपेक्षं तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवति। अन्यथा नेंद्रियांतराणां रूपप्र
काशनं दृष्टमिति चक्षुरपि न रूपं प्रकाशयेदिति। प्रकृतमुपसंहरति तस्मादिति। आचार्यदेशीयानां मतमुत्थाप
यति अत्रापरे प्रत्यवतिष्ठंत इति। तथाहि। आम्नातसंगतित्वेन शास्त्रत्वेनार्थवत्तया मननादिप्रतीतावचकार्यार्थात्
ब्रह्मनिश्चयः न खलु वेदांताः सिद्धब्रह्मवस्तुपरा भवितुमर्हंति। तत्राविदितसंगतित्वात्। यत्र हि शब्दाः लोके न प्रयुक्तं ते
तत्र तेषां संगतिग्रहः न चाहेयमनुपादेयं रूपमात्रं कश्चिद्विवक्षति प्रेक्षावान् तस्याबुभुत्सितत्वात्। अबुभुत्सितावबोधने
चप्रेक्षावत्ताविघातः तस्मात् प्रतिपित्सितं प्रतिपिपादयिषन्नयं लोकः प्रवृत्तिनिवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत्। कार्यं चा
वगतं तद्धेतुरिति तदेवबोधयेत्॥ एवं चवृद्धव्यवहारयोगात्पदानां कार्यपरतामवगच्छति तत्र किंचित्साक्षात्कार्याभि
धायकं किंचित्कार्यार्थस्यार्थाभिधायकं तद्भूतार्थपरतापदानां अपि च। नरांतरस्य सुखसाधनप्रत्ययमनुमाय
तस्य च शब्दभावाभावानुविधानमवगम्य शब्दस्य तद्विषयनावकत्वं निश्चेतव्यं न च भूतार्थरूपमात्रप्रत्यये परनरवर्ति
न किंचिल्लिंगमस्ति कार्यप्रत्यये तु नरांतरवर्तिनि प्रवृत्तिनिवृत्ती स्तो हेतू इत्यज्ञातसंगतित्वात् न ब्रह्मपरा वेदांताः अपि च
वेदांतानां वेदत्वात् शास्त्रत्वप्रसिद्धिरस्ति प्रवृत्तिनिवृत्तिपराणां च संदर्भाणां शास्त्रत्वं यथाहुः। प्रवृत्तिर्वा निवृत्तिर्वा नि
३२

लेन कृतकेन वा पुंसां येनोपदिश्यते तच्छास्त्रमभिधीयत इति। तस्माच्छास्त्रत्वप्रसिद्ध्या आहतमेषां स्वरूपपरत्वं। अपि च नब्र
ह्मरूपप्रतिपादनपराणामेषां अर्थवत्त्वं पश्यामः न च रज्जुरियं न भुजंग इति यथा कथंचिद्विलक्षणवाक्यार्थतत्त्वनिश्च
ये यथा भयकंपादिनिवृत्तिः एवं तत्त्वमसीति वाक्यार्थावगमात् निवृत्ताभिर्दृष्टा इति सांसारिकाणां धर्माणां श्रुतवाक्यार्थस्यापि पुंस
स्तेषां तादवस्थ्यात्। अपि च। यदि श्रुतब्रह्मणो भवति सांसारिकधर्मनिवृत्तिः कस्मात् पुनः श्रवणस्योपरितनामननादयः
श्रूयंते तस्मात्तेषां वैयर्थ्यप्रसंगादपि न ब्रह्मरूपपरा वेदांताः किंत्वात्मप्रतिपत्तिविषयकार्यपराः तच्च कार्यं स्वात्मनि नियो
ज्यं नियुंजानं नियोगः इति चमानांतरापूर्वं तयाज्ञपूर्वमिति वा व्याख्यायते। न च विषयानुष्ठानं विना तत्सिद्धिरिति स्वसि
द्ध्यर्थं तदेव कार्यं स्वविषयस्य कारणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति यथा च कार्यं विषयानिरूपणमिति ज्ञानेन विषय
णा निरूप्यते। एवं ज्ञानमपि स्वविषयमात्मानं अंतरेणाशक्यनिरूपणमिति तन्निरूपणात् एतादृशमात्मानमाक्षिपति
तदेव कार्यं यथाहुः यत्तु तस्य हि स्व्यर्थमुपादीयते आक्षिप्यते तद्विषयमिति तं तेष्वव्यवहार इति विधेयगत्वा नियोगविषयस्य
ज्ञानस्य भावार्थतया अनुष्ठेयतया तद्विषयं त्वात्मनः स्वरूपसत्ताविनिश्चितः। आरोपितत्वभावस्य त्वन्यस्य तन्निरूपकत्वेन त
पंक्ति त्रिरूपितं तस्मात्तस्मात्तादृगात्मप्रतिविधिपरेभ्यो वेदांतेभ्यस्तादृगात्मविनिश्चयः तदेतत्सर्वमाह। यद्यपीति। विधिपरेभ्योपि
संस्कारादिष्टं विशिष्टसंस्कारं तदाद्यस्वरूपइतिगम्यते। एतमाह भगीयादयोप्यवगंतव्याः प्रवृत्तिपरस्य शास्त्रत्वं न स्वरूप
परस्य कार्य एव संबंधेन स्वरूपइति। हेतुद्वयं भाष्यभाक्येनोपपादितं प्रवृत्तिनिवृत्तिप्रयोजनत्वादित्यादिना तत्सामा
न्याद्वेदांतानामपि तथैवार्थवत्त्वं स्यात् इत्यंतेन च स्वगतं कार्यं नियोगम धिकरणमनुष्ठानारंभं तरेणेति। नियोज्यभे
दमाह। सति च विधिपरत्व इति। ब्रह्मवेदब्रह्मैव भवतीति सिद्धवदर्थवादावगतस्यापि ब्रह्मभवनस्य नियोज्य

वाच. विशेषाकांक्षायां ब्रह्मभूयस्य नियोज्यविशेषसमर्पकत्वमिति न्यायेन प्रतिलंभः पिंडपितृयज्ञन्यायेन तु स्वर्गकामस्य नियोज्य
३२ स्य कल्पनायामर्थवादस्यासमवेतार्थतया लक्षणया परोक्षवृत्तित्वं स्यादिति ब्रह्मभावस्यामृतत्वमिति अमृतत्वकामस्येत्युक्तं॥
अमृतत्वं च अमृतत्वादेव न कृतकत्वेन शक्यमनित्यत्वमनुमातुं आगमविरोधादिति भावः उक्तेन धर्मब्रह्मणोर्वैलक्ष ना
ण्येन विध्यविषयत्वं चोदयति। न त्विति। परिहरति। नाहत्यवमिति। अत्रात्मदर्शनं न विधेयं न हि दृशेरुपलब्धिव
चनत्वात् श्रावणं वा स्यात् प्रत्यक्षं वा प्रत्यक्षमपि लौकिकमहंप्रत्ययो वा भावनाप्रकर्षपर्यंतजं वा तत्र श्रावणं न विधेयं स्वा
ध्यायविधिनैवास्य प्रापितत्वात् कर्मश्रावणवत्। नापि लौकिकं प्रत्यक्षं तस्य नैसर्गिकत्वात् न चौपनिषदात्मविषयं भा
धिपवैशद्यं विधेयं तस्योपासनाविधानादेव वाजिनवत् तु निष्पादितत्वात्। तस्मादौपनिषदात्मोपासनाममृत
त्वकामं नियोज्यं प्रति विधीयते। इष्टमद्रत्वादयस्तु विधिस्वरूपा न विधय इति तदिदमुक्तं। तदुपासनात्त्रेति। अर्थव
त्त्वाय मननादिप्रणीतात्वेत्यस्य शेषः प्रपंचोनिगदव्याख्यातः तदेतदेकदेशिमतं दूषयति। अत्राभिधीयते नैतदेकदे
शिमतं कुतः कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात् पुण्यापुण्यकर्मणोः फले सुखदुःखे तत्र मनुष्यलोकमारभ्या ब्र
ह्मलोकात् सुखतारतम्यं अधोऽधिकोत्कर्षः एवं मनुष्यलोकमारभ्य दुःखतारतम्यमावीचिलोकात् तच्च स
र्वं कार्यं विनाशि च आत्यंतिकमशरीरत्वमनति शायं स्वभावसिद्धतया नित्यमकार्यं आत्मज्ञानस्य फलं तद्धि
फलमिव फलमविद्यापनयनमात्रेणाविर्भावात्। एतदुक्तं भवति त्वयाप्युपासनाविधिपरत्वं वेदांतानामभ्युपगच्छता नि
त्यशुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदांतगम्या आस्थीयते सा चोपासनाविषयस्य विधेर्न फलं नित्यत्वादका
र्यत्वात्। नाप्यनाद्यविद्यापिधानापनयः तस्य तत्त्वविरोधिविद्योदयादेवाभावात् नापि विद्योदयः तस्यापि श्रवणमननपूर्व
३२

कोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्। उपासनासंस्कारवदुपासनापूर्वमपि चेतःसहकारीति चेत्।
दृष्टं च खलु योगिकं फलमैहिकमपि यथा चित्राकारीर्यादिनियोगानां अनियतनियतफलानां गांधर्वशास्त्रोपा
सनावासनायाश्च पूर्वानपेक्षायाः षड्जादिसाक्षात्कारे वेदांतार्थोपासनावासनाया जीवब्रह्मभावसाक्षात्कारे अनपेक्षाया एव
सामर्थ्यात्। तथा चामृतीभावं प्रत्यहेतुत्वात् उपासनाऽपूर्वस्य नामृतत्वकामः तत्कार्यमवबोद्धुमर्हति अन्यद्धि स्व
त्करोतीति विप्रतिषिद्धं न च तत्कामः क्रियामेव कार्यमवगमिष्यति नापूर्वमिति सांप्रतं तस्यामानांतरादेव तत्साधनत्व
प्रतीतेर्विधिवैयर्थ्यात्। न चावघातादिविधितुल्यता तत्रापि नियमापूर्वस्याम्नातो नवमात् न च ब्रह्मभूयात् अन्यदमृ
तत्वमार्थवादिकं किं चित्स्वीयेन तत्काम उपासनायामधिक्रियेत विश्वजिन्न्यायेन तु स्वर्गफलतायां तस्य सातिशयित्वं
क्षयित्वं चेति न नित्यफलत्वमुपासनायाः तस्माद् ब्रह्मस्वरूपस्याविद्यापिधानापनयनमात्रेणाविर्भावात् अविद्यापन
यस्य च वेदांतार्थविज्ञानादवगतिपर्यंतादेव संभवात् उपासनायाः संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारो
पजनने मनःसाचिव्यस्य च मानांतरसिद्धत्वात्। आत्मेत्येवोपासीतेति न विधिः अपि तु विधिसरूपोऽयं यथोपांशुया
जवाक्ये विष्णुरुपांशु यष्टव्य इत्यादयो विधिसरूपा न विधय इति तात्पर्यार्थः। श्रुतिस्मृतिन्यायप्रसिद्धमित्युक्तं तत्र श्रुतिं द
र्शयति तथा हि च श्रुतिरिति न्यायमाह अत एवेति यत्किल स्वाभाविकं तन्नित्यं यथा चैतन्यं स्वाभाविकं चेदं तस्मान्नित्यं।
परे हि द्वयीं नित्यतामाहुः कूटस्थनित्यतां परिणामिनित्यतां च तत्र नित्यमित्युक्ते माभूदस्य परिणामिनित्यतेत्याह तत्र किं
चिदिति परिणामिनित्यता हि न पारमार्थिकी तथा हि तत्सर्वात्मना वा परिणमेदेकदेशेन वा सर्वात्मना परिणामे कथं न तत्त्व
माहतिः एकदेशपरिणामे वा स एकदेशस्ततो भिन्नो वाभिन्नो कथं तस्य परिणामो न ह्यन्यस्मिन्परिणममानेऽन्यः प
भिन्नो

वाच· रिण मते। अतिप्रसंगात्। अभेदे वा किं सर्वात्मना परिणामः भिन्नाभिन्नं तदिति चेत् तथा हि तदेव कारणात्मनाभिन्नं का
३३ र्यात्मना कटकादयश्चापि भिन्ना हाटकात्मनाभिन्नाश्च कटकाद्यात्मना न च भेदाभेदयोर्विरोधान्नैकत्र समवाय इति युक्तं विरु
द्धमिति हि नः क्व संप्रत्ययः यत्प्रमाणविपर्ययेण वर्तते यत्तु यथाप्रमाणेनावगम्यते तस्य तथाभाव एव कुंडलमिदं सुवर्णमिति
सामानाधिकरण्यं च वास्तवम्। आधाराधेयभावे एकाश्रयत्वे वा न सामानाधिकरण्यं न हि भवति कुंडं बदरमिति नाप्येकासन
स्थयोश्चैत्रमैत्रयोश्चैत्रो मैत्र इति। सोयमबाधितः संस्थितः सर्वजनीनः सामानाधिकरण्यप्रत्यय एव कार्यस्य जगतो भेदं का
र्यरूपेण गोचयति नेति। यथाहुः कार्यरूपेण नानात्वमभेदः कारणात्मना हेमात्मना यथाभेदः कुंडलाद्यात्मना भिदा इति।
अत्रोच्यते। कः पुनरयं भेदो नाम यः सहाभेदेन एकत्र भवेत् परस्पराभाव इति चेत् किमयं कार्यकारणयोः कटकहाट
कयोरस्ति न वा न चेदेकत्वमेव भवेत् न भेदः अस्ति चेद्भेद एव नाभेदः न च जातु भावाभावयोरविरोधः सहासंभवात्। संभ
वे वा कटकवर्धमानकयोरपि तत्त्वेनाभेदप्रसंगः भेदस्याभेदाविरोधात्। अपि च कटकस्य हाटकादभेदे यथा हाटकात्म
ना कटकमुकुटकुंडलादयो न भिद्यंते एवं कटकात्मनापि न भिद्येरन् कटकस्य हाटकादभेदात् तथा च हाटकमेव वस्तुस
त् कटकादयो भेदस्याप्रतिभासात्। अथ हाटकत्वेन त्वैनाभेदो न कटकत्वेन तु भेद एव कुंडलादेः यदि हाटकादभिन्नः कट
कः कथमयं कुंडलादिषु नानुवर्तते न चेत् कथं हाटकादभिन्नः येषु यस्मिन्ननुवर्तमाने ये व्यावर्तन्ते ते ततो भिन्ना एव यथा सूत्रा
त्कुसुमभेदाः नानुवर्तन्ते चानुवर्तमानेपि हाटकत्वे कुंडलादयः। तस्मात्तेपि हाटकाद्भिन्ना एवेति सत्तानुरत्या च सर्ववस्त्वनु
गमेदमिह नेदमिहेदमिदानीं नेदमिदमेवं नेदमिति विभागो न स्यात्। कस्यचित् क्वचित् कदाचित् कथंचिद्विवेकहेतोरभा
वात्। अपि च दूरात्कनकमिति अवगतेन तस्य कुंडलादयो विशेषा जिज्ञास्येरन् कनकादभेदात् तेषां तस्य च ज्ञातत्वात्। ३३

अथ भेदोऽप्यस्तीति कनकात्कुंडलादीनामिति कनकावगमेपि अज्ञातास्तेन भेदोप्यस्तीति किं ज्ञाताः प्रस्तुतज्ञानमेव तेषां तु
कं कारणाभावे हि कार्याभाव औत्सर्गिकः स च कारणसत्तयापोद्यते अस्ति चासौ कारणसत्त्वे इति कनके ज्ञाते ज्ञाता एव कुंडला
दय इति न जिज्ञासा ज्ञानानि चानर्थकानि स्युः। तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत्ततो भिद्यते यथा करभे गृह्यमाणे गृह्यमाणो रास
भः करभात् गृह्यमाणे च दूरतो हेम्नि न गृह्यंते तस्य भेदाः कुंडलादयः तस्मात्ते हेम्नो भिद्यंते। कथं तर्हि हेम कुंडलमिति चेत्
न ह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तं अथानुवृत्तिव्यावृत्तिव्यवस्था हेम्नि ज्ञाते च कुंडलादिजिज्ञासा
च कथं न स्वत्वमेव ऐकान्तिकानैकान्तिकं चैतदुभयमुपपद्यते यदि त्वयुक्तं तस्मादेतयोरन्यतरस्मिन्नवहेय भेदोपादाने वा भे
दकल्पनानामभेदोपादानाभेदकल्पनाऽस्ति युक्तं भिद्यमानतंत्रत्वात् भेदस्याभिद्यमानानां च प्रत्येकमेकत्वात् एकाभावे
चानाश्रयस्य भेदस्यायोगात् एकस्य च भेदाधीनत्वात्। नायमयमिति वा भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्व
ग्रहस्य चानानपेक्षत्वात्। अभेदोपादानैवानिर्वचनीयभेदकल्पनेति सांप्रतं तथा च श्रुतिः मृत्तिकेत्येव सत्यमिति तस्मात्कूटस्थ
नित्यतैव पारमार्थिकी न परिणामिनित्यतेति सिद्धं व्योमवदिति च दृष्टान्तः परसिद्धः अस्मन्मते तस्यापि कार्यत्वेनानित्यत्वात् त
च कूटस्थनित्यमिति निर्वर्त्यकर्मतामपाकरोति सर्वव्यापीति। प्राप्यकर्मतां सर्वविक्रियारहितमिति विकार्यकर्मतां निरव
यवमिति संस्कारकर्मतां व्रीहीणां खलु प्रोक्षणेन संस्कारो यथा जन्यते न चैवं ब्रह्मणि कश्चिदंशः क्रियाधेयोऽस्त्यनव
यवत्वात्। अनंशत्वादित्यर्थः। पुरुषार्थमाह। नित्यतृप्तमिति तृष्णादुःखरहितं सुखमुपलक्षयति न दुःखनिवृत्ति
सहितं हि सुखं तृप्तिः सुखं चाप्रतीयमानं न पुरुषार्थ इत्यत आह। स्वयंज्योतिरिति तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्या
दिभिरुपपाद्य क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसंजयति। तद्यदीति। न चागमबाधः आगमस्योक्तेन प्रकारेणोपपत्तेः। ज्ञानजन्या

वाच. पूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य संनिधापनस्य श्रुतयो निकारिका इत्याह। अपि च ब्रह्म वेदेति। अविद्याद्वयप्रति
३४ पगममात्रेण च विद्यायाः मोक्षसाधनत्वं न स तो पूर्वेक्षि देन न वेस्य श्रुपिश्रुतीरुदाहरति। तं हि नः पितेति। न केवलम
स्मिन्नर्थे श्रुत्यादयो ऽपि तु अक्षपादाचार्यसूत्रमपि न्यायमूलमस्तीत्याह। तथा चाचार्यप्रणीतमिति। आचार्यश्चोक्त
लक्षणः पुराणे आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मादाचार्यस्तेन चोच्यत इति। तेन हि
प्रणीतं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति पाठापेक्षया कारणमुत्त
रं कार्यं च पूर्वं कारणापाये कार्यापायः कफापाये कफकोद्भवस्य ज्वरस्यापायः जन्मापाये दुःखापायः प्रवृत्त्यपाये
जन्मापायः दोषापाये प्रवृत्त्यपायः मिथ्याज्ञानापाये दोषापायः मिथ्याज्ञानं चाविद्या रागाद्युपजननक्रमेण दृष्टे
न संसारस्य परमं निदानं सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वज्ञानेनापगतिपर्यन्तविरोधिना निवर्त्यते ततो विद्यानि
वृत्तौ ब्रह्मस्वरूपाविर्भावो मोक्षः न तु विद्याकार्यः न ज्ञाननाश्र्कार्यो भारतिसूत्रार्थः तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्ये
तावन्मात्रेण सूत्रोपन्यासो न तु तत्पादसंमननं तत्त्वज्ञानमिह संमतं तदनेनाचार्यान्तरसंवादेनायमर्थो दृढीकृतः स्यात्
ननु नैकत्वविज्ञानं यथावस्थितवस्तुविषयं येन मिथ्याज्ञानं भेदावभासं निवर्तयत् विधिविषयो भवेत्। अपि तु
संपदादिरूपं तथा च विधेः गोचरः पुरुषेच्छया कर्तव्यं सत् विधिगोचरो भविष्यति यथा चलं नं तेन मनसो विश्व
देवसामान्यात्। विश्वेदेवा मनसि संपाद्य मन आलम्बनं अविद्यमानसमं कृत्वा आधानेन संपाद्यानि विश्वेषामेव दे
वानां अनुचिन्तनं तेन चानन्तलोकजयप्राप्तिः एवं चिद्रूपसाम्याज्जीवस्य ब्रह्मरूपतां संपाद्य जीवमालम्बनमविद्य
मानसमं कृत्वा ब्रह्मानुचिन्तनं तेन चामृतत्वफलप्राप्तिः। अध्यासे त्वालम्बनस्यैव प्राधान्येनारोपिततद्भावस्यानुचिन्तनं॥

यथा मनो ब्रह्मेत्युपासीतादित्यो ब्रह्मेत्यादेश इत्यत्र वंजीव ब्रह्मस्व ब्रह्मेत्युपासीतेति क्रियाविशेषयोगेन यथा वायुर्वाव संवर्गः
प्राणो वाव संवर्गः। वायुरिव वायुर्देवता वह्न्यादीन् संवृणते महाप्रलयसमये हि वायुर्वह्न्यादीन् संहृत्यात्मनि स्थापयति॥ य
थाह द्रविडाचार्यः। संहरणाद्वा संवरणाद्वा स्वात्मीभावाद्वा वायुः संवर्ग इति। अध्यात्मं च प्रा णः संवर्ग इति स हि सर्वाणि वागा
दीनि संवृङ्क्ते स्वापकाले हि सर्वाणि वागादीन्द्रियाणि संवृत्त उत्क्रामतीति स एष संवर्गदृष्टिर्वायौ प्राणे च दृश्यमाना गतं जगद्दर्शय
ति यथा एवं जीवात्मनि बृंहणक्रियया ब्रह्मदृष्टिरमृतत्वफलाय कल्पत इति तदेते पुनिष्ठ पिपक्षे अनिदर्शनोपा
सनादयः प्रधानकर्माण्यपूर्वविषयत्वात् स्तुतशास्त्रवित्। आत्मा तु प्रकर्मणि गुणभूत इति संस्कारो चात्मनो दर्शनं विधी
यते यथा दर्शपूर्णमासप्रकरणे पत्न्यवेक्षितमाज्यं भवतीति समाम्नातं प्रकरणि नाचगृहीतं उपांशुयाजाङ्गभूताज्यस्य
संस्कारतया वेक्षणं गुणकर्म विधीयते। एवं कर्तृत्वेन क्रत्वङ्गभूत आत्मन्यात्मा वा द्रष्टव्य इति दर्शनं गुणकर्म विधीयते तेन सु
इत्यं चिकीर्षितगुणलक्षणमीयते इति मायान्यजनतोऽत आह। न चेदं ब्रह्मात्मैकत्वविज्ञानमिति। कुतः संपदादिरूपे हि ब्रह्मा
त्मैक इति दर्शपूर्णमासप्रकरणे हि समाम्नातमाज्यावेक्षणं तदङ्गभूताज्यसंस्कार इति युक्तं तेन चात्मा वाऽरे द्रष्टव्य
इत्यादिकस्य चिद्प्रकरणे समाम्नातं न चानारभ्याधीतमपि यस्य पर्णमयी जुहूर्भवतीति अभि यद्यपि तत्क्रतुसम्बन्धो
येन तद्दर्शनं क्रत्वङ्गं सत् आत्मानं कर्त्वर्थं संस्कुर्यात्। तेन यद्यप्ययं विधिः तथापि स्तुतवर्णभार्यमिति यद्। विनियोगभं
गेन प्रधानकर्मैवापूर्वविषयत्वात् न गुणकर्मेति स्तुतियुक्त्यै एतद्दूषणमनभिधाय सर्वपक्षसाधारणं दूषणमुक्तं। तद्
तिरोहितार्थत्वान्न व्याख्यातं किं ज्ञानक्रियाविषयत्वं विधानमस्य बहुश्रुतिविरुद्धमित्याह। ननु विदिक्रिया तिर्यं
कर्तृजविषयत्वइति। ततः शान्तिकर्मण्येताजोदयइति भावः निराकरोति न कुतः अविद्याकल्पितात् इदं नित्यनिविषयत्वा

शांक· रितिसर्वमेवहिशास्त्रंनेदंतयावस्तुनेदंबोधयितुमर्हति। न हि क्षीरगुडादीनांमधुररसभेदः शक्य आख्यातुं एवमन्यत्रापि
३५ सर्वत्रद्रष्टव्यंतेनप्रमाणांतरसिद्धे लौकिक एवार्थे पदानांशक्तिग्रहाच्छब्दस्य कैव कथा प्रत्यगात्मनः लौकिके अदूरविप्रकर्षेण
तुकथंचित्प्रतिपादकत्वं इहापिसमानं स्वंपरार्थो हि प्रमाता प्रमाणाधीनया प्रमित्या प्रमेयं घटादि व्याप्नोतीति अविद्याविलसितं
तदस्याविषयीभूतोदासीनतत्पदार्थप्रत्यगात्मसामानाधिकरण्येन प्रमातृत्वाभावात्। तन्निवृत्तौ प्रमाणादयः निवृत्तावि
धानिवृत्तं तेन हि युष्मदस्मदोरयमप्ययनकल्पनानिवृत्तिं संतानं वितुमर्हंतीति तथाहि विगलितपराग्त्वमर्थत्वं परस्मात्तर
सदात्म्यमितिहि पदेनैकार्थत्वेन मिलत्प्रियत्वं तदपि तु तदागत्यैकार्थ्यं विशुद्धं विदात्मगां त्वजातिसकलानर्थकर्तृत्वा
दीन् पदार्थमलान्निजान्नित्यं तराम्लोकः। अत्रै नार्थश्रुतिं उदाहरतितथाचशास्त्रं प्रमाणमिति प्रकृतमुपसंहरति। अतो
विद्याकल्पितेनेति परपक्षेमोक्षस्यानित्यतामापादयति। यस्त्विति। कार्यमपूर्वं यागादिव्यापारजन्यं तदपेक्षते मोक्षः
स्वोत्पत्तावितितयोः पक्षयोरितिनिरस्तत्वविकार्ययोः क्षणिकविज्ञानमात्मेतिबोधः। तथाचविशुद्धविज्ञानोत्पादो मो
क्ष इति निर्वर्त्यो मोक्षः। अन्येषांतु संसाररूपावस्थामपहाय या कैवल्यावस्थाव्याप्तिः आत्मनः स मोक्ष इति विकार्यो मोक्षः य
थापयसः पूर्वावस्थापहानेनावस्थांतरप्राप्तिः विकारो दधीति तदेतयोः पक्षयोः अनित्यतामोक्षस्य कार्यत्वाद्दधिघटा
प्र दिवत्। अथ यदुक्तं परोरिति ओतिर्दृष्टो लइतिश्रुतेः ब्रह्मणोविकृतदेशभेदात् कगमादविकृतदेशब्रह्मप्राप्तिर्गम
नादिविधिकार्यं भविष्यतीति तथा चाप्यकर्मत्वाद्ब्रह्मण इत्यत आह नचाप्यत्वेनापीति। अन्येन विकृतदेशपरिहारेणाविकृ
तदेशं प्राप्यते यथा पूर्वेद्युं जलधिरतिबहलचपलकल्लोलमालापरस्परास्फालनसमुत्सेत्स्फेनपुंजस्तबकतया
विकृतो मध्ये तु प्रशांतसकलकल्लोलोपसर्गः स्वस्थः स्थिरतयाविकृतस्य मध्यं अविकृतं पोतिकः पोतेन प्राप्नोति जीवस्तु ब्रह्मेति ३५

किंकेनप्राप्यतां भेदाश्रयत्वात् प्राप्तेरित्यर्थः। अपजीवो ब्रह्मणोभिन्नः तथापि न तेन ब्रह्माप्यते ब्रह्मणो विभुत्वेन नित्यप्रा
प्तत्वादित्याह। स्वरूपव्यतिरिक्तत्वेपीति। संस्कार्यकर्मतामपाकरोति नापिसंस्कारकार्यइति। द्वयी हि संस्कार्यता गुणा
धानेन वा यथा बीजपूरकुसुमस्य लाक्षारसावसेकस्तेन हि तत्कुसुमं संस्कृतं लाक्षारससवर्णं फलं प्रसूते दोषापनये
न वा यथा मलिनमादर्शतलं निघृष्टमिष्टकाचूर्णेनोन्मीलितभास्वरत्वं संस्कृतं भवति नत्र तावद्ब्रह्मणि गुणाधानं संभवति गु
णो हि ब्रह्मणः स्वभावो वा भिन्नो वा स्वभावश्चेत् कथमाधेयः तस्य नित्यत्वात् भिन्नत्वे तु कार्यत्वेन मोक्षस्यानित्यत्वप्रसंगः।
न च भेदे धर्मधर्मिभावो गवाश्ववत्। भेदाभेदश्च सुरलोविरोधात् न इत्येनाभिसंधिनोक्तं अनाधेयातिशयब्रह्मस्वरूप
त्वात् मोक्षस्याहितेषं यतमपर्हिंक्ति। नापिदोषापनयेनेति। अशुद्धिः सती शुद्धिः दर्पणे निघर्षणेन तु ब्रह्मण्य सती नि
र्वर्तनीया नित्यनिवृत्तत्वादित्यर्थः। शंकते स्वात्मधर्म एवेति ब्रह्मस्वभाव एव मोक्षो अनाद्यविद्याम अवृतमुपासनादि
यया आत्मनि संस्क्रियमाणे अभिव्यज्यते न तु क्रियते तदुक्तं भवति नित्यशुद्धबुद्धत्वमात्मनो सिद्धं संसारावस्थायामविद्या
अविद्यामलिनत्वादिति शंकां निराकरोति नकुतः क्रिया प्रयत्नानुपपत्तेः। नाविद्याब्रह्माश्रयाकिंतुजीवे साचानिर्वचनीयेत्युक्तं
तेन नित्यशुद्धमेव ब्रह्म अभ्युपगम्य शुद्धिक्रियासंस्कार्यत्वं दूष्यते क्रिया हि ब्रह्मसमवेता वा ब्रह्म संस्कुर्यात् यथा निघर्षणेष्टका ७
चूर्णसंयोगविभागप्रचयो निरन्तर आदर्शतलसमवेतः अन्यसमवेता वा न तावद्ब्रह्मधर्मः क्रिया तस्याः स्वाश्रयविका
रहेतुत्वेन ब्रह्मणो नित्यत्वव्याघातात्। अन्याश्रया तु कथमन्यस्योपकरोति अतिप्रसंगात् न हि दर्पणे निघृष्यमाणे मणिर्विशुद्धो
दृष्टः न व्यभिचार इति। तदाचाधुनं पराम्शति अत्रव्यभिचारंचोदयति ननुदेहाश्रयेति। परिहरति न देहेति अनाद्यनिर्वा
च्याविद्योपधानमेव ब्रह्मणो जीव इति च क्षेत्रज्ञ इति चाचक्षते स च स्थूलसूक्ष्मशरीरेंद्रियादिसंहतः तत्संघातमध्यपति
तः तदभेदेनाहमितिप्रत्ययविषयीभूतः अतः शरीरादिसंस्कारः शरीरादिधर्मोप्यात्मनो भवति तदभेदाध्यवसायात् यथांगरा

वाच॰ गधर्मः स्कंधिनाकामिनीनां व्यपदिश्यन्ते तेनात्रापि यद्यग्निनाक्रियासाध्यत्वं ह्यारिकप्रमाणविषयीकृतानस्यैवसंस्कारेणान्यस्ये
३६ तिनव्यभिचारः नत्वतस्तुनक्रियानसंस्कार इतिसनिरस्तं ननुशेषमभाष्यभाष्ये एवकृत आख्यानमितिनेत्व्याख्यानंतया
रन्यः पिप्पलमितिअन्नोजीवात्मापिप्पलेकर्मफलं अनश्नन्न इतिपरमात्मासंहृतस्यैवभोक्तृत्वमाह मंत्रवर्णः आत्मेंद्रिये
तिच अनुपहितस्य दुःखभावप्रत्यभावप्रदर्शनपरौमंत्रौ पठनिएकोदेवइति। शुक्रं दीप्तिमत्। अव्रणं दुःखरहितं अ
स्नाविरं अविगलितं अविनाशीतियावत्। उपसंहरति तस्मादिति ननुमाभून्निर्वर्त्यादिकर्मतात्तुरीयेपंचमीतुकाचि
द्विधाभविष्यतियथामोक्षस्यकर्मताघटिष्यते इत्यतआह अतोन्यदिति। एभ्यःप्रकारेभ्योनप्रकारांतरमस्तिहस्तियतोमो
क्षस्यक्रियानुप्रवेशोभविष्यतिएतदुक्तंभवतिचतुर्णांफलानांमध्येअन्यतमतया क्रियाफलत्वंव्याप्तं साचमोक्षाद्व्यावर्तमा
नाव्यापकानुपलब्ध्यामोक्षस्यक्रियाफलत्वंव्यावर्तयतीति। तत्किंमोक्षेक्रियैवनास्ति तथाचतद्वर्यानिशास्त्राणितदर्थानि
प्रवचनयोरनर्थिका इत्यतउपसंहरव्याजेनाह तस्माज्ज्ञानमेकमिति। अथज्ञानं मानसीक्रिया कस्मान्नविधिगोचरः
कस्माच्चनस्याःफलंनिर्वर्त्यादिष्वन्यतमन्नमोक्षइतिचोदयति। ननुज्ञानमिति। परिहरति नेतिकुतः वैलक्षण्यात्।
अयमर्थः सत्यंज्ञानंमानसीक्रिया नत्वियंब्रह्मणिफलंजनयितुमर्हतितस्यस्वयंप्रकाशतयाविदिक्रियाकर्मभावानु
पपत्तेरित्युक्तंवेदेतस्मिन्नेववैलक्षण्येस्थितएववैलक्षण्यांतरमाह क्रियाहिनामसेति। यत्रविषयेवस्तुस्वरूपनिरपेक्षे
वचोद्यते यथादेवतासंप्रदानकहविर्ग्रहणेदेवतावस्तुस्वरूपानपेक्षादेवताध्यानक्रियायथावायोषितिअग्नित्
त्वानपेक्षाग्निबुद्धिः यासाक्रियानामेतियोजना॥नहियस्यैदेवतायैहविर्गृहीतंस्यात्तांध्यायेत् वषट्करिष्यन्निति
स्माद्विधेः साक्षाद्देवताध्यानं प्राप्तं मानं त्वधीतवेदस्यविदितपदतदर्थस्यसंबंधस्याधिगतशाब्दन्यायतत्वस्य देवसो
३६

मेदमित्यादेरुत्तत्वमसीत्यंतात्छंदस्संदर्भात् ब्रह्मात्मभावज्ञानं शब्दप्रमाणसामर्थ्यात् इंद्रियार्थसन्निकर्षसा
मर्थ्यादिवप्रणिहितमनसःस्फीतालोकमध्यवर्तिकुंभानुभवः। नह्यसौस्वसामग्रीबलब्धजन्मा मनुजेच्छयान्यथाक
र्तुमकर्तुंवाशक्योदेवताध्यानवद्येनार्थवान्नत्रविधिःस्यात्। नचोपासनाद्याअनुभवपर्यंततावस्यविधिगोचरः तयो
रन्वयव्यतिरेकावधृतसामर्थ्ययोःसाक्षात्कारेजनपवियापनयेवाविधिमंतरेणप्राप्तत्वेनपुरुषेच्छयान्यथाकर्तुं
अकर्तुंवाशक्यत्वात्। तस्माद्ब्रह्मज्ञानंमानसीक्रियापिनविधिगोचरः पुरुषचित्तव्यापाराधीनायाश्चक्रियायावस्तु
स्वरूपनिरपेक्षताक्वचिद्विरोधिनीयथादेवताध्यानक्रियायाः नह्यत्रवस्तुस्वरूपेणकश्चिद्विरोधः वस्तुस्वरूपविरोधिनी
यथायोषित्पुरुषयोरग्निबुद्धिरित्येतावताभेदेननिदर्शनमिथुनद्वयोपन्यासः क्रियैवेत्येवकारेणवस्तुतंत्रतामपाक
रोतिनत्वात्मेत्येवोपासीतेत्यादयोविधयः श्रूयंतेनचतेप्रमत्तगीताः तुल्यं हि सांप्रदायिकं तस्माद्विधेयेनात्रभवितव्यमि
त्यतआह। तद्विषयोलिङादयइति॥ सत्यंश्रूयंते लिङादयो न तु ते विधिविषयाः तद्विषयत्वेअप्रामाण्यप्रसंगात्
हेयोपादेयविषयोहिविधिःसएवहेयमुपादेयंवायंपुरुषःकर्तुमन्यथाकर्तुंशक्नोतितत्रैवसमर्थः। कर्ताअधिकृतो
नियोज्योभवति नचैवंभूतानिआत्मश्रवणमननोपासनदर्शनानीतिविषयः तदनुष्ठात्रोर्विध्यापकयोरभावाद्वि
धेरभावइतिप्रयुक्ताअपिलिङादयः प्रवर्तनायामसमर्थाः उपलइवक्षुरतैक्ष्ण्यंकर्तुमप्रमाणीभवंतीति॥
अनियोज्यविषयत्वादितिसमर्थोहिकृतअधिकारीनियोज्यः। असामर्थ्येतुनकर्तता। नतोनाधिकृततोननियोज्यइत्यर्थः।
यदिविधेरभावात् नविधिवचनानिकिमर्थानि तर्हिवचनान्येतानिविधिच्छायानीतिपृच्छतिकिमर्थानीति। नचानर्थकानि
युक्तानिस्वाध्यायविध्यधीनग्रहणत्वानुपपत्तेरितिभावः। उत्तरंस्वाभाविकेति। अन्यतः प्राप्ताएवहिश्रवणादयोविधिसरूपै

वाच॰ नीक्षैरनूद्यते। न चानुवादोऽप्यप्रयोजनः। प्रवृत्तिविशेषकरत्वात् तथाहि। तत्तदिष्टानिष्टविषयेप्साजिहासापहृतहृदयतया
३७ बहिर्मुखो न प्रत्यगात्मनि मनः समाधातुमर्हति। आत्मश्रवणादिविधिसरूपैस्तु वचनैर्मनसो विषयस्रोतः खिलीकृत्य प्रत्यगात्म
स्रोत उद्घाट्यत इति प्रवृत्तिविशेषकरतानुवादानामस्तीति सप्रयोजनतयाध्ययनविध्युपात्ततोपपद्यत इति।
यच्चोदितं आत्मज्ञानमनुष्ठानानङ्गत्वादपुरुषार्थमिति तदयुक्तं स्वतोऽस्य पुरुषार्थत्वे सिद्धे यदनुष्ठानानङ्गत्वं तद्भूष
णं न दूषणमित्याह। यद्यपीति। अनुसंज्वरेत् शरीरं तप्यमानमनु तप्येत स्त्रक्चन्दनवनितादि। प्रकृतमुपसंहरति। तस्माच्छ्रुति
प्रतीति। प्रकृतसिद्ध्यर्थमेकदेशिमतं दूषयितुमनुभाषते। यदपि केचिदाहुरिति। दूषयति नेत्यतिइदमत्राकूतं कार्यबोधे
यथा चेष्टालिङ्गं हर्षादिस्तथा॥ सिद्धबोधेऽर्थवत्त्वं शास्त्रत्वं हितशासनात्। यदि हि पदानां कार्याभिधाने तदर्थस्वार्थाभिधाने
वा नियमेन वृद्धव्यवहारे सामर्थ्यमवधृतं भवेत्। न भवेद् वेदेहेयानुपादेये भूतेऽब्रह्मात्मतापरत्वमुपनिषदां तत्रावि
दितसामर्थ्यत्वात् पदानां लोके तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेः। अथानुभूतेऽप्यर्थे पदानां लोके शक्यः संगतिग्रहः
तत उपनिषदां तत्परत्वं पौर्वापर्यालोचनया अवगम्यमानमपह्नुत्य न कार्यपरत्वं शक्यं कल्पयितुं श्रुतहान्यश्रुतकल्प
नाप्रसंगात्। तत्र तावदेवमकार्येऽर्थे न संगतिग्रहो यदि तत्परः प्रयोगो न लोके दृश्येत न तत्प्रयोगा सुलभः सोऽन्येतुं न श
क्यते। न तत्परः प्रयोगो न दृश्यते लोके कुतूहलभयादितिवृत्तार्थानां अकार्यपराणां पदसंदर्भाणां प्रयोगस्य लोके बहुल
मुपलब्धेः तद्यथा। आखण्डलादिलोकपालचक्रवालाधिवासः सिद्धविद्याधरगन्धर्वाप्सरःपरिवारो ब्रह्मलोकावतीर्ण
मन्दाकिनीपयःप्रवाहपातधौतकलधौतमयशिलातलो नन्दनादिप्रमदावनविहारिमणिमयशकुन्तकमनीयनिनदम
नोहरः पर्वतराजः सुमेरुरिति नैष भुजङ्गो रज्जुरियमित्यादिः नापि प्रतिपादितार्थबुद्धिप्रसूत्यपुरुषवर्त्तिनी नश्यात
३८

मुन्नेतुं हर्षादेरन्यथापि हेतोः संभवात्। तथा हि अविदितापरिशाजनभाषार्थो द्रविडो नगरं गतो राजमार्गमभिमुखं देव
दत्तमन्दिरमध्यासीनः प्रतिपन्नजनकानन्दनिबन्धनपुत्रजन्मवार्ताहारेणसह नगरं गतो देवदत्ताभ्याशमागतः पथ्वासोपाय
नार्पणपुरःसरं हिस्त्वा वर्धसे देवदत्त पुत्रस्ते जात इति वार्ताहारव्याहारश्रवणसमनन्तरमुपजातरोमाञ्चकंचुकं विकसि
तनयनोत्पलं अतिस्मेरमुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते प्रमोदस्य च प्रागभूतस्य तदाहारश्रवण
समनन्तरं भवतस्तद्धेतुतां न चापरमप्रतिपाद्यन् हर्षहेतुमर्थं हर्षायकल्पत इति अनेन हर्षहेतुरर्थ उक्त इति प्रतिपद्यते॥
हर्षहेत्वन्तरस्य चाप्रतीतेः पुत्रजन्मनश्च तद्धेतोरवगमात्। तदेव वार्ताहारेणाभ्यधायीति निश्चिनोति। एवं भयशोका
दयोऽप्युदाहार्याः। तथा च प्रयोजनवत्तयाभूतार्थाभिधानस्यप्रेक्षावत्प्रयोगोऽप्युपपन्नः। एवं च ब्रह्मस्वरूपज्ञानस्य परम
पुरुषार्थहेतुत्वसंभवात्। अनुपदिशन्तामपि पुरुषं प्रवृत्तिनिवृत्ती वेदान्तानां पुरुषहितानुशासनात्। शास्त्रत्वं सिद्धं
भवति तद्धि दुमेतत् विकाराभासितानि वचनानि भूतार्थविषयाणि भूतार्थविषयप्रमाजनकत्वात् यथापि हि विषयप्र
माजनकं तत्तद्विषयं यथा रूपादिविषयं चक्षुरादि तथा चैतानि तस्मात्तथेति तस्मात्सूक्तं तत्तौपनिषदस्य पुरुषस्या
नन्यशेषत्वादिति। उपनिपूर्वात् सदेर्विशरणार्थात् क्विपुपनिषत्पदं व्युत्पादितं उपनीयाद्वयं ब्रह्म सवासनामविद्यां हि
नस्तीति ब्रह्मविद्यामाह। तद्धेतुत्वाद् वेदान्ता अप्युपनिषदः। ततो विदितः औपनिषदः पुरुषः एतदेव विभजते योऽसाउप
निषत्स्विति। अहं प्रत्ययविषयो यः कर्त्ता तस्मादन्यः प्रतिअसंसारीति अतएव क्रियारहितत्वाच्चतुर्विधद्रव्यविलक्षणः अतश्चचतुर्विधद्रव्यवि
लक्षणो यदनन्यशेषः। अन्यशेषं हि भूतं भाव्युपयोगि यद्धिद्रव्यं निकीर्षितं सत्तदुत्पाद्यं संभवति यथा यूपं तक्षतीत्यादिय
तु नरन्यस्यान्यशेषत्वेतत आह। यतः स्वप्रकरणस्थ यत इतिउपनिषदां अनारभ्याधीतानां पौर्वापर्यालोचनया पुरुषप्रति

वाच॰ पादत्वेन पुरुषस्य च प्राधान्येनेदं प्रकरणं न वृक्षादिवत् अव्यभिचरितकर्मसंबन्धः पुरुष इत्युपपादितं अतः स्वप्रकरणस्थः
३८ सोयं तथाविध उपनिषत्स्वेव प्रतीयमानो न नास्तीति शक्यो वक्तुमित्यर्थः स्यादेतत् मानांतरागोचरत्वेनागृहीतसंगतितया परा
र्थस्य ब्रह्मणो वाक्यार्थत्वानुपपत्तेः कथमुपनिषदर्थत्वमत आह स एष नेति नेत्यात्मेत्यात्मशब्दात् यद्यपि गवादिवदात्मा
नांतरगोचरत्वमात्मनो नास्ति तथापि प्रकाशात्मन एव सतः तत्तदुपाधिपरिहाण्या शक्यं वाक्यार्थत्वेन निरूपणं हाटकस्ये धि
व कटककुंडलादिपरिहाण्या नहि प्रकाशः स्वसंवेदनो न भासते नापि तदवच्छेदकः कार्यकारणसंघातः तेन स एष
नेति नेत्यात्मेति तदवच्छेदपरिहाण्या वृत्ताज्ञापनाच्च स्वयंप्रकाशः शक्यो वक्तुमात्मेत्यात्मेति निरूपयितुमित्यर्थः
अथोपाधिनिरासवदुपहितमप्यात्मरूपं कस्मान्न निरस्येत इत्यत आह। आत्मनश्च प्रत्याख्यानस्याशक्यत्वात्। प्र
काशो हि सर्वस्यात्मा तदधिष्ठानत्वाच्च प्रपंचविभ्रमस्य न चाधिष्ठानाभावे विभ्रमो भवितुमर्हति नहि जातु रज्ज्वभावे
रज्जुभुजंग इति धारेति वा विभ्रमो दृष्टपूर्वः अपि चात्मनः प्रकाशस्य भासा प्रपंचस्य प्रथा। तथा च श्रुतिः तमेव
भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति न चात्मनः प्रकाशस्य प्रत्याख्याने प्रपंचप्रथा युक्ता तस्मादात्मनः
प्रत्याख्यानायोगात् वेदांतेभ्यः प्रमाणांतरागोचरसर्वोपाधिरहितब्रह्मरूपावगतिसिद्धिरित्यर्थः। उपनिषत्स्वेवाग
त इत्यवधारणमसंमृष्यमाण आक्षिपति। नन्वात्मेति। सर्वजनीनाहंप्रत्ययविषयो ह्यात्मा कर्ता भोक्ता च संसारी तत्रैव
प्रत्ययिकाणां आत्मपदप्रयोगात्। यएव लौकिकाः शब्दास्तएव वैदिकास्तएव चैतेषामर्था इत्यौपनिषदेपि मण्यात्म
पदं तत्रैव प्रवर्तितुमर्हति नार्थांतरे तद्विपरीते इत्यर्थः समाधत्ते न अहंविषयत्वौपनिषदः पुरुषः कुतः तत्साक्षित्वेन
अहंप्रत्ययविषयो यः कर्ता कार्यकरणसंघातोपहितो जीवात्मा साक्षित्वेन परमात्मनोऽहंप्रत्ययविषयत्वस्य प्रत्युक्तत्वात्। ३८

एतदुक्तं भवति विषयत्वेन जीवेनात्मनेति जीवपरमात्मनोः पारमार्थिकमैक्यं तथापि तस्योपहितं रूपं जीवः शु
द्धं तु रूपं तस्य साक्षितच्च मानांतरानधिगतमुपनिषद्गोचर इति। एतदेव प्रपंचयति। न ह्यहंप्रत्ययविषयेति विधिशेषत्वं वा
नेतुं शक्यः कुतः आत्मत्वादेव न त्याज्यो नाप्यो अन्यत्तु सर्वथा तथा च श्रुतिः॥ नवा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्म
नस्तु कामाय सर्वं प्रियं भवतीति अपि च अतः सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः सर्वस्य प्रपंचजातस्यात्मैव तत्व
मात्मा न च स्वभावो हेयो शक्यहानत्वात् न चोपादेय उपात्तत्वात्। तस्माद्धेयोपादेयविषयौ विधिनिषेधौ न तद्विपरीतमा
त्मतत्त्वं विषयीकुरुत इति सर्वस्य प्रपंचजातस्यात्मैव तत्वमिति एतदुपपादयति सर्वं हि विनश्यद्विकारजातं पुरुषांतं विनश्यति।
अयमर्थः पुरुषो हि श्रुतिस्मृतीतिहासपुराणैरविरुद्धन्यायव्युत्पादितत्वात् परमार्थसन् प्रपंचस्त्वनाद्यविद्योपदर्शितोऽपरमा
र्थसन् यश्च परमार्थः सत्सोऽपरमार्थः रज्जुतत्त्वमिव सर्पविभ्रमस्य विकारस्य च तत्त्वं वाचास्यानिर्वाच्यत्वेनादृढस्वभावस्य विना
शः पुरुषस्तु परमार्थसत्योऽसौ कारणसहस्रेणाप्यसन् यथा कर्तुं नहि सहस्रमपि शिल्पिनो घटं पटयितुमीशत इत्युक्तं तस्मा
दविनाशिपुरुषांतो विकारनाशः॥ शुक्तिरज्जुतत्त्वांत एव रजतभुजंगविकारनाशः पुरुष एव हि सर्वस्य प्रपंचविकारजा
तस्य तत्त्वं न च पुरुषस्यास्ति विनाशो यतोऽनंतो विनाशः स्यादित्याह। पुरुषो विनाशहेत्वभावादिति। नहि कारणानि स
हस्रमपि असदन्यथयितुमीशानीत्युक्तं अथ माभूत्स्वरूपेण पुरुषो हेय उपादेयो वा तदीयस्तु कश्चिद्धर्मो हास्यते क
श्चिच्चोपादास्यत इत्यत आह। विक्रियाहेत्वभावाच्च। कूटस्थनित्यः त्रिविधोपि लक्षणावस्थापरिणामलक्षणो विकारो ना
स्तीत्युक्तं अपि चात्मनः परमार्थसतो धर्मा अपि परमार्थसन्त इति न तस्यात्मवदन्यथात्वं कारणैः शक्यं कर्तुं न च धर्मा
न्यथात्वादृतेऽविकारः तदिदमुक्तं। विक्रियाहेत्वभावादिति सुगममन्यत् यत्तु नेति केचिदिति नाशात् स्याद्विनं साक्षित्वेना

नुक्रांतं। तदस्योपपादयति। यदपि शास्त्रविदामनुक्रमणमिति। इष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनमिति वक्त
थधर्मजिज्ञासायाः प्रकृतत्वात्। धर्मस्य च कर्मत्वात्। कर्मावबोधनमित्युक्तं ननु सिद्धरूपब्रह्मावबोधनव्यापारं वेदस्य
वारयति नहि सोमशर्मणि प्रकृते तद्गुणाभिधानं परिसंचष्टे विष्णुशर्मणो गुणवत्तां विधिशास्त्रं विधीयमानकर्मवि
षयं प्रतिषेधशास्त्रं च प्रतिषिध्यमानकर्मविषयमिति। उभयमपि कर्मावबोधनपरं। अपि चाम्नायस्य क्रियार्थत्वा
दिति शास्त्रकृद्वचनं तदर्थग्रहणं यद्यभिधेयत्वाविवक्षितं तो भूतार्थानां द्रव्यगुणकर्मणां आनर्थक्यमनभिधेयत्वाविव
तो भूतार्थानां द्रव्यगुणकर्मशब्दानां क्रियार्थत्वेनैव भूतद्रव्यगुणकर्माभिधानं न स्वनिष्ठतया यथाहुः शास्त्रविदः चो
दना हि भूतं भवन्तमित्यादि एतदुक्तं भवति कार्यमर्थमवगमयन्ती चोदना तदर्थं भूतादिकमप्यर्थं गमयतीति तत्रा
ह प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेदिति। अयमभिसंधिः तत्त्वाननु कार्यार्थप्रत्ययः स्यात्। तथा हि लोके स्वप्रधा
×× एवं स्वार्थपराणां संगतिग्रहणे प्रत्रो नानार्थत्वमुपपादितं भूतेष्वर्थसंगतिदर्शयन्निः नापि स्वार्थमात्रपर
नैयात् गुणप्रधानभावरहितानां एकवाक्यता दृष्टा तस्मात्पदानां स्वार्थमभिदधतां एकप्रयोजनवत्त्वादर्थपर
×× तैर्वपराणां तथात्वे तिन वाक्यार्थ ×८×
तयैकवाक्यता तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति। यथाहुः शास्त्रविदः साक्षाद्यद्यपि कु
र्वन्ति पदार्थप्रतिपादनं वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले वाक्यार्थमितये तेषां प्रवृत्तौ नांतरीयकं पाके ज्वा
लेव काष्ठानां पदार्थप्रतिपादनमिति। तथा कार्यान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपर
त्वनियमः पदानां एवं च सति कूटस्थनित्यब्रह्मरूपपरत्वेप्यदोष इति। भव्यं कार्यं तेनुपयुज्यमानं भूतमुपदिश्यते तेन
तद्भूतं भव्यसंसर्गेण तस्याभिधेयत्वादित्यत आह। नहि भूतमुपदिश्यमानमिति तदात्मकलक्षणसंसर्गः किंतु

कार्येण सह प्रयोजनित्वलक्षणोन्वयः कार्यद्वित्वेन भावार्थेन भूतार्थानां क्रियाकारकलक्षण इति। न भूतार्थानां क्रिया
र्थत्वमित्यर्थः शंकते क्रियार्थत्वेपीति। एवं तु वाक्रियार्थकूटस्थनित्यब्रह्मोपदेशानुपपत्तिरिति भावः। परिहरति नैष
दोषः क्रियार्थत्वमित्यर्थः। नहि क्रियार्थं भूतमुपदिश्यमानं अभूतं भवति अपि तु क्रियानिर्वर्तनयोग्यं भूतमेव तत्। तथा च
भर्तव्यं जनयत्नयः कचित्स्वनिष्ठभूतविषया दृश्यमानाः मतापि चोदनकथंचित्क्रियानिष्ठतां गमयितुमुचिताः।
न ह्युपहितं रागशो दृष्टमप्यनुपहितं कचिद्दृष्टमदृष्टं भवति तथा च वर्तमानापदेशा अपि क्रियोपहिता अकार्या
र्थ अप्पदवीवर्णकारणो लोके बहुलमुपलभ्यंते एवमक्रियानिष्ठा अपि संबंधमात्रपर्यवसायिनो यथा कस्यैष
पुरुष इति प्रश्नोत्तरं राज्ञ इति तथा भातिपरिकार्यमात्रनिष्ठा यथा कीदृशास्तर इति प्रश्नोत्तरं फलिता इति नहि दृष्टता
पुरुषस्य तात्पर्यं चास्तित्व नास्तित्वे प्रतिपादिते किंतु पुरुषस्याभिभेदत्वरूपं च प्रकारभेदः। प्रष्टुरपेक्षितं वाक्यलक्षणः
स्वामिभेदमेव प्रकारभेदमेव प्रतिवक्ति न पुनरस्तित्वं तस्य तेनाप्रतिपिपित्सितत्वात्। उपपादिता च भूतेष्वर्थेष्वपि व्युत्पत्तिः
प्रयोजनवती पदानां चोदयति यदि नाम उपदिष्टं भूतं किं तवोदासीनस्य सर्वक्रियारहितत्वेनानुपकारकत्वादिति भावः॥
परिहरति अनवगतात्मोपदेशस्य तथैव प्रयोजनवत्त्वं भवितुमर्हति। अप्यर्थश्चकारः। एतदुक्तं भवति। य
द्यपि ब्रह्मोदासीनं तथापि तद्विषयं शाब्दज्ञानमवगतिपर्यंतं विद्यास्वविरोधिनीं संसारमूलनिदानमविद्यामुच्छिंद
त्प्रयोजनवदित्यर्थः। अपि च येपि कार्यपरत्वं सर्वेषां पदानामास्थितवन्तः तैरपि ब्राह्मणो न हंतव्यो न सुरा पातव्येत्यादीनां
न कार्यपरता शक्यास्थातुं कुतस्तु पहितमर्थां हि कार्यं कृत्या व्याप्ततंत्रवैतौ निवर्तते शिंशुपाले मिव वृक्षत्वनिवृत्तौ। कृत
हि पुरुषप्रयत्नः स्वविषयाधीननिरूपणं विषयस्यास्य साधत्वभावनया भाव्य एव पूर्वापरीभूतोत्पाद्यानुकूलाप्या

वाक्य॰ भवितुमर्हति। नद्रव्यगुणौ। साक्षात्कृतिव्यापोरिकृतेर्विषयौ न च द्रव्यगुणयोः सिद्धयोरस्ति कृतिव्याप्यता अतएवशा
ध्ये स्त्रकृद्भावोभावार्थः कर्मशब्दास्तेभ्यः क्रियाप्रतिपत्तेर्निद्रव्यगुणशब्दानां नैमित्तिकावस्थायांकार्यावगमनोपिभावस्यस्तो
४० द्रव्यगुणशब्दानांनुभावयोगात्कार्यावगमइति। भावार्थेभ्यएवापूर्वावगतिर्नद्रव्यगुणशब्देभ्यइति। ननुदध्नाजुहो
तिसंततमाघारयतिइत्यादिषुदध्यादीनांकार्यविषयतातत्रापिहिहोमाघारभावार्थविषयतातत्रापिविषयमेवकार्यं। न
चैतावतासोमेनयजेतेतिवद्दधिसंततादिविशिष्टहोमाघारविधानात्। अग्निहोत्रंजुहोति। आघारमाघारयतीतिवद
नुवादः यद्यप्यत्रापिभावार्थविषयमेवकार्यंतथापिभावार्थानुबंधतयाद्रव्यगुणावविषयावपिविधीयेते। भावार्थो
हिकारकव्यापारमात्ररूपः अविशिष्टः। कारकविशेषेणद्रव्यादिनाविशेष्यते। इतिद्रव्यादिस्तदनुबंधः तथाचभा
वार्थेविधीयमानेसएवसानुबंधोविधीयतइतिद्रव्यगुणावविषयौअपितदनुबंधतयातदनुवादेतुतदनुबंधीभूत
द्रव्यादिपरोभवतीतिसर्वत्रभावार्थविषयएवविधिः एतेनयदाग्नेयोष्टाकपालोभवतीत्यत्रसंबंधविषयोविधिरितिप
रास्तंननुभवतुसर्वोविधेयःसिद्धेभवतिलब्धरूपस्यभवनंत्वसकृत्त्वात्। नखलुगगनंभवतिनाप्यसिद्धे आसि
द्धस्यानियोज्यत्वात्। गगनकुसुमवत्तस्मात्भवेनप्रयोजनव्यापारेणादीसः प्रयोजकस्यभावयितुर्व्यापारोविधेयः
सचव्यापारोभावनाकृतिःप्रयत्नइतिनिर्विषयस्यास्याशक्यप्रतिपत्तेः एतोविषयापेक्षायांआग्नेयशब्दोपस्थापितेनद्र
व्येदेवतासंबंधएवास्यविषयः। ननुव्यापारविषयः पुरुषप्रयत्नः कथंव्यापाररूपंसंबंधंगोचरयेत्। नहिघटंकु
र्वतोपिसाक्षात्कामार्थघटंपुरुषप्रयत्नोगोचरयत्यपितुदंडादिहस्तादिनाव्यापारयतितस्माद्यथार्थीकृतिंव्यापारविष
यामेवपुरुषःप्रतिपद्यतेनतुलक्षणोघटविषयांउद्देशतयात्वस्यामस्तिघटेनतुविषयतयातुहस्तादिव्यापारएवअतएवाग्नेयद्र
४०

व्यत्रापिद्रव्यदेवतासंबंधाख्यप्रयोगेरेवकार्यविषयोविधेयः। किमुक्तंभवति। आग्नेयोभवतीतिआग्नेयेनयागेनभावये
दितिअनएवैवंविद्वान्पौर्णमासींयजतेयएवंविद्वान्अमावास्यांयजतेइत्यनुवादोभवति। यदाग्नेयइत्यादिविहितस्ययाग
षट्कस्यअतएवविहितानुष्ठितस्यतस्यैवदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेति अधिकारसंबंधः। तस्मात्सर्वत्रकृतिप्रणालि
कयाभावार्थविषयएवविधिरित्येकांतः। तथाचनहन्यान्नपिबेदित्यादिषुयदिकार्यमभ्युपेतेतनत्वाख्यापिकाकृतिरभ्युपेतव्या
तद्व्यापकस्यभावार्थोविषयः। एवंचप्रजापतिव्रतन्यायेनपर्युदासवत्साहननपानसंकल्पलक्षणयानद्विषयोविधिःस्यात्
तथाचप्रसज्यप्रतिषेधोदत्तजलांजलिःप्रसज्येतनन्वसतिसंभवेलक्षणान्याय्यानक्षेतोयंतमित्याहादौतुतस्यत्रतमित्यधिका
रात्प्रसज्यप्रतिषेधासंभवेनपर्युदासवत्साअनीक्षणसंकल्पलक्षणायुक्तातस्मान्नहन्यान्नपिबेदित्यादिषुप्रसज्यप्रतिषेधे
षुभावार्थाभावात्। तद्भावाभावायाःकृतेरभावस्तदभावेचतद्व्याप्यस्यकार्यस्याभावइतिनकार्यपरत्वनियमःसर्वत्रवाक्येदृश्य
ह। ब्राह्मणोनहंतव्यइत्येवमादिपुनिनुकस्मान्निवृत्तिरेवकार्यंनभवतितत्साधनंवेत्यतआह। ननुसाक्रियेति। क्रि
याशब्दःकार्यवचनः। एतदेवविवृणुते। अक्रियार्यागामिति। स्यादेतत्विधिविभक्तिश्रवणात्कार्यंतावदत्रप्रतीयते।
तच्चनभावार्थमंतरेणतत्वरागतः प्रवृत्तस्यहननपानादावकस्मादौदासीन्यमुपपद्यते। विनाविधारकप्रयत्नंतस्मात्
एवप्रवृत्तस्यपुरुषस्यमनोवाग्देहानांविधारकःप्रयत्नोनिषेधविधिगोचरःक्रियेतिशक्रियापरमस्तिशक्यंकिंचिदपीत्याह॥
नचहननक्रियानिवृत्तौदासीन्यव्यतिरेकेणनञःशक्यंप्रतिपत्तुंक्रियार्थत्वंकल्पहेतुंकेनहेतुनाशक्य मितिन्तआह। स्वाभा वि
वप्राप्तहननार्थानुरागेणनञः अयमर्थःहननपानपरोहिविधिप्रसंगःप्रतीयमानत्सएवविधित्वदलुत्सर्गः नचैतेशास्त्रविधा
नुरागतःप्राप्तत्वात्प्रसज्यप्रतिषेधोविधेयःतस्याप्यौदासीन्यरूपस्यसिद्धतयाप्राप्तत्वात्। नचविधारकप्रयत्नःतस्मा

भाम.
४२ श्रि

स्युन तेनलक्ष्यमाणत्वात्सतिसंभवे च लक्षणाया अन्याय्यत्वात् विधिविभक्तेश्च रागतः प्राप्तस्य तदनुवादकत्वेन विधिविषयतायो
गात्। तस्मात् सत्त्वं पिबेत् हन्यादिति अनूद्य नञ् निषिध्यते न रभावो ज्ञाप्यते न तु नञर्थो विधीयते अभावश्च सविरोधिभाव
निरूपणतया भावधर्मा तु पानीति सिद्धः सिद्धवत्साध्ये साध्यवद्भासत इति साध्यविषयो नञर्थः कार्यइतिभ्रमस्तदिदमाह
न अश्रेष स्वभावइति ननु बोधयतु संबंधि नोभावं नञ अत्र च सुन्मुखानां तु मनोवाग्देहानां कुतोऽकस्मान्निवृत्तिरित्यत आह।
अभावबुद्धिश्चौदासीन्यपालनकारणं अयमभिप्रायः ज्वरितः पथ्यमश्नीयान्न सर्पाय अंगुलिं दद्यादित्यादिवचनश्रवणसं
मनंतरं प्रयोजकवृद्धस्य पथ्याशने प्रवृत्तिं भुजंगांगुलिदानोन्मुखस्य च ततो निवृत्तिमुपलभ्य बालो व्युत्पित्सुः प्रयोजकवृद्ध
स्य प्रवृत्तिहेतू इच्छाद्वेषावनुमिमीते तथाहि इच्छाद्वेषहेतुके वृद्धस्य प्रवृत्तिनिवृत्ती स्वगतं प्रवृत्तिनिवृत्तित्वात् मत्प्रवृत्ति
निवृत्तिहेतुभूतेच्छाद्वेषवत् ननु मम शब्दव्यापारपुरुषाशयत्रैकाल्यानवच्छिन्नभावनापूर्वं प्रत्यक्षा विच्छेदेषावभूतां
अपि तु भूयोभूयः स्वगतमालोचयतः उक्तकारणपूर्वावेव प्रसवव्यावभासेते तस्माद्वृद्धस्य प्रवृत्तिनिवृत्तीच्छा
द्वेषभेदात्र कर्तव्यमेतेकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वावितानुपूर्व्यात्सिद्धः कार्यकारणभाव इति इष्टानि
ष्टसाधनतावगमात् प्रयोजकवृद्धप्रवृत्तिनिवृत्ती इति सिद्धं स चावगमः प्रागभूतः श्रवणानंतरमुपजायमानः शब्दश्रवण
हेतुक इति प्रवर्तके पुनः प्रयुज्यते लाघवेन शब्द एव कर्तव्यमिष्टसाधनव्यापारमवगमयन् तस्येष्टसाधनतां कर्तव्य
तां चागमयति। अनन्यलभ्यत्वात् उभयोः। अनन्यलभ्यस्य च शब्दार्थत्वात् यत्र तु स्वकर्तव्यतान्यतरवलभ्यते यथा न ह
न्यात् अपि वैरिणमित्यादिषु रूचनापानप्रवृत्तोराशतः प्रतिस्तंभात्। तत्र तद्रूढु गादेन न ज्ञासमभिव्याहृतात् लिङः विभक्तिरन्यतो ज्ञास
६ × निवृत्तिहेतुभूतेच्छाद्वेषवत्त्वात् ॥ × ६
× ७ मदीयस्वतंत्रप्रवृत्ति निवृत्तिवत् कर्तव्यमेतेकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वकौ वास्वेच्छाद्वेषौ प्रवृत्तौ × ६

४२

मनयोरनर्थहेतुभावमात्रमवगमयति प्रत्यक्षं हि तयोरिष्टसाधनभावो वगम्यते अन्यथा रागविषयत्वायोगात् तस्मा
द्रागादिप्राप्तकर्तव्यता तु वादेनानर्थसाधनताप्रज्ञापनपरं न हन्यात् कपिंजलादिवाक्यं। ननु कर्तव्यतापरमिति स्पष्ट
मकार्यं निष्ठलं निषेधानां च अनर्थसाधनता बुद्धिरेव निषेधाभावबुद्धिः तयाखल्वयं चेतन आपातरमणीयतां पश्य
न्नपि आयतिमालोच्य प्रवृत्त्यभावं निवृत्तिमिव बुध्य निवर्तते औदासीन्यमात्मनो वस्थापयतीति यावत्। स्यादेतत्। अ
भावबुद्धिश्चेदौदासीन्यस्थापनकारणं यावदौदासीन्यमनुवर्तेत तच्चानुवर्तेते। न खलूदासी
नोपि विषयांतरव्यासक्तिविनसदभावबुद्धिमान् न चावस्थाफलकारणाभावे कार्यावस्थानं दृष्टं न हि सोभावपाते प्रासादोवति
ष्ठते। तत्राह साचदग्धेंधनाग्निवत् स्वयमेवोपशाम्यति तावदेव खलु अयं प्रत्युन्मुखो न यावदस्यानर्थहेतुभावमधि
गच्छति अनर्थहेतुत्वाधिगमोस्य समूलोद्धारं प्रवृत्तिमुच्छिद्य दग्धेंधनाग्निवत् स्वयमेवोपशाम्यति एतदुक्तं भवति।
यथा कर्दमप्रासादावस्थानकारणं सांभो न त्वौदासीन्यावस्थानकारणमभावबुद्धिः अपि त्वागंतुकाद्विनाशहेतोस्त्राणेना
वस्थानकारणं यथा कमठपृष्ठनिष्ठुरकवचः शस्त्रप्रहरणे न राजन्यजीवनाशनस्थानहेतुः न च कवचापगमे चासति च
शस्त्रप्रहारे राजन्यजीवनाश इति। उपसंहरति तस्मात् प्रसक्तक्रियानिवृत्त्युपलक्षितविशिनष्टि तत्किमक्रियार्थत्वेनानर्थ
त्वेनानर्थक्यमाशंक्याक्रियार्थत्वोपवर्णनं जैमिनीयमसमंजसमेवेत्युपसंहारव्याजेन परिहरति तस्मात् पुरुषार्थे
ति पुरुषार्थानुपयोग्युपाख्यानादिविषयाक्रियार्थत्वात्क्रियार्थतया च पूर्वोक्त उपसौनत्वुपनिषद्विषयो॥ उपनिषदां स्वपंपु
रुषार्थब्रह्मरूपावगमपर्यवसानादित्यर्थः। यद्यप्युपनिषदात्मज्ञानमपुरुषार्थं मन्यमाने नोक्तं कर्तव्यविध्यनुप्रवेशमंत
रेणेति अत्र निगूढाभिसंधिः पूर्वोक्तं परिहारं स्मारयति तत्परिहृतमिति अत्राद्येसास्वोक्तमर्थं स्मारयति। ननुस्तुतत्र

अन्योन्यमनेनावगन
नि कारणं अपि तु साक्षात्कारपर्यंतं ब्रह्मसाक्षात्कारस्यांतःकरण
रिषड्जादिभेदसाक्षात्कार इव गांधर्वशास्त्रश्रवणाभ्याससंस्कृतम
न्मूलयन् आत्मानमपि प्रपंचाविशेषादुन्मूलयतीत्युपादितमर्थजात्।
ननु तथा वेदप्रमाणजनितेत्युक्तं अत्र न सुखदुःखानुत्पादभेदेन
क्तमिति चोदयति शरीरे पतितेति परिहरति न सशरीरत्वस्येति
ज्ञाननिमित्तं तु न तत् तथोत्पन्नतत्त्वज्ञाने न जीवतापि शक्यं निवर्त
यितुं। स्वभावहानेन भावविनाशप्रसंगादित्याह नित्यमशरी
मपि तु धर्माधर्मनिमित्तं न त्वस्व कारणधर्माधर्मनिवृत्तिमंतरेण
त्वमिति शंकते। तत्कृतेति नहि त्वात्मानं परामृशति निराकरो
मर्हति वायुश्च शरीरं भजति नौहि तौ नास्ति शरीरसंबंधे भव
रोषमावहति। तदिदमाह शरीरसंबंधे भवतः तावतां तु श
न सत्यमस्ति परस्पराश्रयं। न त्वेष दोषो नादित्वात्। बीजांकुरा
तेनेयमंधपरंपरातुल्या नादितान् अहियतो धर्माधर्मभेदापत्ता
स्मादात्मशरीरसंबंधात् पूर्वधर्माधर्मभेदजन्मनः एषता

४२

किंपात्मनापाभावादिति शंकते संनिधानमात्रेणेति। परिहरति
नश्यति। ये तु देहाद्यात्माभिमानो न मिथ्या अपि तु गौणो मानव
त्यति अत आहुरिति। प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः।
पते। यथा मंदांधकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पु
रुषत्वमनियतमपि समारोपितमेव। एवं संशये समारोपितमनि
रास्तु शुक्तिकायामिति। शुक्लभास्वरद्रव्यस्य पुरःस्थितस्य सितशर्करा
कस्माच्छुक्तिविनिश्चय एव न भवति। संध्यायांगा ध्यायुक्तः समान
तो विशेषदृश्यस्मृतेश्च संस्कारोद्बोधहेतोः सादृश्यस्य च दृष्टत्वे
नदृष्टस्य हेतोः समानत्वेप्यदृष्टं हेतुरुक्तः तच्च कार्यदर्शनोन्नेय
मननकुशलतामात्रेण पंडितानामनुत्पन्नतत्त्वसाक्षात्काराणामिति वा
जीवतो विदुषो शरीरत्वेपि तीत्युदाहरति तथा चेति सुबोधं सूत्र
रिजीवस्य ब्रह्मात्मतावगतिरेव संसारिकधर्मनिवृत्तिहेतुरित्यमन
नुभाष्यदूषयति। यत्तु नरुक्तं श्रवणात् पराचीनयोरिति मनननिदिध्या
फलयोर्विधिसरूपैर्वचनैरनुवादात्। तदिदमुक्तं अवगत्यर्थता
नयोरन्यतिरेकसिद्धमित्यर्थः। अथ कस्मान्मननादिविधिरेव न

डाक्टर भाऊ दाजी स्मारक
Dr. BHAU DAJI MEMORIAL

वाच॰ त्वेणार्पयति विप्रतिपन्नमभिसंधिं समाधातोद्घाटयति अत्रोच्यते नावगत
४२ ब्रह्मात्मभावस्येति सत्यं न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणं अपि तु साक्षात्कारपर्यन्तं ब्रह्मसाक्षात्कारश्चान्तःकरण
वृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा दिग्विदिग्भेदसाक्षात्कारवद्गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतम
नोयोनिः स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन् आत्मानमपि प्रपञ्चाविशेषादुन्मूलयतीत्युपपादितमधस्तात्।
तस्मादृज्वुस्वरूपकथनतुल्यतैवात्रेति सिद्धं अन्नवद्वेदप्रमाणमूलतया वेदप्रमाणजनितेत्युक्तं अत्रैव सुखदुःखानुत्पादभेदेन
निदर्शनद्वयमाह नहि धनिन इति। श्रुतिमत्रोदाहरति तदुक्तमिति चोदयति शरीरे पतित इति परिहरति न सशरीरत्वस्येति
यदि वास्तवसशरीरत्वं भवेन्न जीवतस्तन्निवर्तेत मिथ्याज्ञाननिमित्तं तु तत्। तच्चोत्पन्नतत्त्वज्ञाने जीवतोपि शक्यं निवर्त
यितुं यत्पुनरशरीरत्वं तदस्य स्वभाव इति न शक्यं तन्निवर्तयितुं। स्वभावहाने भावविनाशप्रसंगादित्याह नित्यमशरी
रत्वमिति। स्यादेतत् न मिथ्याज्ञाननिमित्तं सशरीरत्वमपि तु धर्माधर्मनिमित्तं न च स्वकारणधर्माधर्मनिवृत्तिमन्तरेण
निवर्तेत कश्चित् च तावत्प्रापणमेवेति न जीवतोशरीरत्वमिति शंकते। तत्कृतेति तदिदमात्मानं परामृशति निराकरो
ति न शरीरसंबंधस्येति। न तावदात्मसाक्षाद्धर्माधर्मौ कर्तुमर्हति वाग्बुद्धिशरीरारंभजनितौ हि तौ न चासति शरीरसंबंधे भव
तः। ताभ्यां तु शरीरसंबंधं रोचयमानो व्यक्तं परस्पराश्रयदोषमावहतीति। तदिदमाह शरीरसंबंधे भवतः ताभ्यां तु श
रीरसंबंधं रोचयमानो व्यक्तं परस्पराश्रयस्येति यद्युच्येत सत्यमस्ति परस्पराश्रयं। न त्वेष दोषो नादित्वात् बीजांकुरा
दिवदित्यत आह। अंधपरंपरैषानादित्वकल्पनायत्तु मन्यते नैयमंधपरंपरा तुल्यानादित्वात् हि यतो धर्माधर्मभेदाप्य
सशरीरसंबंधभेदः तत एव च धर्माधर्मभेदः। किं त्वेष पूर्वस्मादात्मशरीरसंबंधात् पूर्वधर्माधर्मभेदजन्मनः एषता
४२

त्मशरीरसंबंधो अस्माद्धर्माधर्मभेदादित्यतत्त्वमाह। क्रियासमवायाभावादिति शंकते संनिधानमात्रेणेति। परिहरति
नेति उपार्जनं स्वीकरणं न त्वियं विधा सत्येत्याह। नत्वात्मन इति। ये तु देहादावात्माभिमानो न मिथ्यापि तु गौणो माणव
कादाविव सिंहाभिमान इति मन्यन्ते तन्मतमुपन्यस्य दूषयति अत्राहुरिति। प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः।
उपपादितं चैतत् अस्माभिरध्यासभाष्य इति नेहोपपाद्यते। यथा मंदांधकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पु
रुषात्मांशयिकौ पुरुषशब्दप्रत्ययौ स्थाणुविषयौ न त्वत्र हि पुरुषत्वमनियतमपि समारोपितमेव। एवं संशये समारोपितमनि
श्चितमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति। यथा वा शुक्तिकायामिति। शुक्लभास्वरद्रव्यस्य पुरःस्थितस्य सितरजत
रजतसाधारण्येपि यावद्रजत विनिश्चयो भवति तावत्कस्माच्छुक्तिविनिश्चय एव न भवति। संशयो वोभयधापि मुक्तः समान
धर्मधर्मिणोर्दर्शनात्। उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषद्वयस्मृतेश्च संस्कारोद्बोधहेतोः सादृश्यस्य च द्विष्ठत्वे
नोभयत्र तुल्यत्वादित्यत उक्तं। अकस्मादिति। अनेन दृष्टस्य हेतोः समानत्वेप्यदृष्टं हेतुरुक्तः तच्च कार्यदर्शनोन्नेय
त्वेनासाधारणमिति भावः॥ आत्मानात्मविवेकिनामिति श्रवणमननकुशलतामात्रेण पंडितानामनुत्पन्नतत्त्वसाक्षात्काराणामिति वा
वत्। तदुक्तं पश्वादिभिश्चाविशेषादिति विशेषमतिरोहितार्थं। जीवतो विदुषोशरीरत्वे श्रुतीरुदाहरति तथा चेति सुबोधं त्रैकुत
मुपसंहरति। तस्मान्नावगतब्रह्मात्मभावस्येति यदुक्तं यदि जीवस्य ब्रह्मात्मतावगतिरेव सांसारिकधर्मनिवृत्तिहेतुः हंतमन
नादिविधानानर्थक्यं न स्यादिति विधिपरवेदांतादिति तदनुभाष्य दूषयति। यत्पुनरुक्तं श्रवणात्पराचीनयोरिति मनननिदिध्या
सनयोरपि न विधित्वयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात्। तदिदमुक्तं अवगत्यर्थत्वा
दिति। ब्रह्मसाक्षात्कारोवगतिस्तदर्थत्वं मनननिदिध्यासनयोरन्वयव्यतिरेकसिद्धमित्यर्थः। अथ कस्मान्मननादिविधिरेव न

DR. BHAU DAJI MEMORIAL

वाच. भवतीत्याह। यदिह्यवगतमिति। न तावन्मनननिदिध्यासने प्रधानकर्मणी अपूर्वविषये अमननं फलेऽदृष्टत्वकल्पनमयुक्तमिति। अ
तोगुणकर्मत्वं मनननयोरवधातप्रोक्षणादिवत्परिशिष्यते। तदप्ययुक्तं अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावादात्मनः। वि
४३ शेषनस्यौपनिषदस्य कर्मानुष्ठानविरोधादित्यर्थः। प्रकृतमुपसंहर ति। तस्मादिति। एवं च सिद्धरूपब्रह्मपरत्वादुपनिष
दां ब्रह्मणः शास्त्रार्थस्य धर्माद्भिन्नत्वात् भिन्नविषयत्वेन शास्त्रभेदात्तथा तो ब्रह्मजिज्ञासेत्यस्य शास्त्रारंभकत्वमुपपद्यत इ
त्याह। एवं चसतीति। इतरथा तु धर्मजिज्ञासैवेति न शास्त्रान्तरमिति। न शास्त्रारंभकत्वं स्यादित्याह। प्रतिपत्तिविधिपरत्व इ
ति। न केवलं सिद्धरूपत्वाद्ब्रह्मणो धर्माद्भिन्नत्वं अपितु तद्विरोधादपीत्युपसंहारव्याजेनाह। तस्मादहं ब्रह्मास्मी
तीतिकरणेन ज्ञानं परामृशति विधयो हि धर्मे प्रमाणं। ते च साध्यसाधनेति कर्तव्यताभेदाधिष्ठानां धर्मोत्पादितत्व
~~सिद्धिधयानानत्रत्वाजैकस्य धर्मादिन्नत्वं अपितु तद्विरोधादपीत्युपसंहारव्याजेनाह तस्मादहं ब्रह्मास्मीति इतिक~~
~~रणेन ज्ञानं परामृशति विधयो हि धर्मे प्रमाणं। ते च साध्यसाधनेति कर्तव्यताभेदाधिष्ठानां धर्मोत्पादितत्व~~ तदधिष्ठानानप्र
त्यागे कोऽसतिप्रसंगनिविरोधादित्यर्थः। न केवलं धर्मप्रमाणस्य शास्त्रस्य गतिरपि तु सर्वेषां प्रमाणानामित्याह सर्वाणि
चेतराणि प्रमाणानीति। कुतः न हीति। अद्वैते हि विषयविषयिभावो नास्ति न च कर्तृत्वं कार्याभावात् न च करणत्वमत
एव तदिदमुक्तं प्रमातृकाणि प्रमाणानि चेति च कारणं अत्रैव ब्रह्मविदां गाथामुदाहरति। अपि चाहुरिति। पुत्रदारादि
ष्वात्माभिमानो गौणः यथा स्वदुःखेन दुःखी स्वसुखेन सुखी तथा पुत्रादिगतेनापीति सोयं गुणः। न त्वेकत्वाभिमानो भेद
स्यानुभवसिद्धत्वात्। तस्माद्गौणो वाहिक इतिवद्गौण एवेहं दृढ्यादिषु त्वभेदानुभवात् गौण आत्माभिमानः। किं तु शुक्तिरजत
वज्ज्ञानवन्मिथ्या तदेवं द्विविधोऽयमात्माभिमानो लोकयात्रां वहति। तदसत्त्वे तु न लोकयात्रा नापि ब्रह्मात्मैकत्वभावः। तदुप

४३

पत्यश्रवणमननादेरभावात्। तदिदमाह। पुत्रदेहादिबाधनात्। गौणात्मनोऽसत्त्वे पुत्रकलत्रादिबाधनं ममकाराभाव
इति यावत्। मिथ्यात्मनोऽसत्त्वे देहेन्द्रियादिबाधनं श्रवणादिबाधनं च तत्त्वे न केवलं लोकयात्रासमुच्छेदः। सद्ब्रह्माहमित्येवं
बोधशीलं यत्कार्यमिति यावत्। तदपि कथं भवेत्। कुतः स्यात् संभवतीति। अत आह अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमा
त्मनः। उपलक्षणं चैतत् प्रमातृप्रमेयप्रमाणविभाग इत्यपि द्रष्टव्यं। एतदुक्तं भवति। एष हि विभागो द्वैतसाक्षात्कारकारणं
नतोऽनियमेन प्रागपगमे तेन तदभावे कार्यं नोत्पद्यत इति। ननु प्रमातुरात्मनोऽन्वेष्टव्य आत्मा अन्य इत्याह। अन्विष्टः
स्यात्प्रमातैव पापदोषादिवर्जितः। उक्तं हि श्रीवाक्यैर्वैयकनिदर्शनं स्यादेतत्। अप्रमाणा कथं पारमार्थिकाद्वैतानुभवो
त्पत्तिरिति अत आह। देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणं तु आ सावधिमाह। आत्म
निश्चयात्। आत्मस्वरूपसाक्षात्कारादित्यर्थः। एतदुक्तं भवति। पारमार्थिकं प्रपंचकादिभिरपि देहादिष्वात्माभिमानो मिथ्ये
ति वक्तव्यं प्रमाणबाधितत्वात्। तस्य च समस्तप्रमाणकारणत्वं स्वाभाविकलोकयात्रावाहित्वं चास्युपेयं सेयमस्माकमद्वैत
साक्षात्कारे विधा भविष्यति न चायमद्वैतसाक्षात्कारोऽप्यन्तःकरणवृत्तिभेदत्वात् ततः परमार्थः यस्तु साक्षात्कारो भावि
को नासौ कार्यः तस्य ब्रह्मस्वरूपत्वात्। अविद्यानुपपत्तिविषामुच्छिंपात्। जनयेद्धानतत्र काचिदनुपपत्तिः। तथा च श्रुतिः
विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इति। तस्मात्सर्वमवदातं एवं कार्यात्मकविनाऽसि
द्धरूपब्रह्मणि मानता। पुरुषार्थस्य यं तावत् वेदान्तानां प्रसाधिता॥ ब्रह्मजिज्ञासां प्रतिज्ञाय जन्माद्यस्य यत इत्यादिना तल्लक्षण
सर्व मुक्त्वा इत्यादिसंगतेन सूत्रसंदर्भेण सर्वज्ञेशात्कौ जगदुत्पत्तिस्थितिविनाशकारणं प्रामाण्यं वेदान्तानामुपपादितं। तत्र लक्षणीति
परमार्थतोऽनन्ययापि कर्मण्येवेति कुत्सादिर्तनतस्त्र्यसंदिह्यते। तज्जगदुपादानकारणं किं चेतनमुताचेतनमिति। अत्र च विप्रति

वाच॰

४४ पत्तेः वारितांविद्धेयमनुपलंभे सति संशयः। तत्र च प्रधानमचेतनं जगदुपादानाधिकरणमनुमानसिद्धमनुवदंत्युपनिषद इति सांख्याः।
जीवाणुव्यतिरिक्तचेतनेश्वरनिमित्ताधिष्ठितास्त्वनुविधाः परमाणवो जगदुपादानादिकारणमनुमितमनुवदंतीति कारणाद्यिहणेना
भावोपादानत्वादि इहेतव्यं। अनिर्वचनीयाँविद्याशक्तिमच्चेतनोपादानं जगदागमिकमिति ब्रह्मविदः एतासां च विप्रतिपत्तीनां अ
नुमानत्वानुपादानत्वासावीजं तदेवं विप्रतिपत्तेः संशये किं तावत्प्राप्तं तत्र ज्ञानक्रियाशक्तिमत्त्वात् त्रिगुणं परिणामि नः नसर्व
शक्ति विज्ञाने ब्रह्मा नत्वस्ति संभवः ज्ञानक्रियाशक्ती खलु ज्ञानक्रियाकार्यदर्शनोन्नेयसद्भावे न च ज्ञानक्रिये चिदात्मनि स्तः
तस्यापरिणामित्वादेकत्वाच्च। त्रिगुणे तु प्रधाने परिणामिनि संभवतः॥ यद्यपि च साम्यावस्थायां प्रधाने समुदाचरद्वृत्तिनी
क्रियाज्ञाने न स्तः तथाप्यव्यक्तेन शक्त्यात्मना रूपेण संभवत एव तथा च प्रधानमेव ज्ञानेन सर्वज्ञं सर्वशक्ति च॥ ननु ब्रह्म
स्वरूपचैतन्यस्य नित्यस्यातिरिक्तमनुपयोगी जीवात्मनामिवास्माकं न च स्वरूपचैतन्ये ज्ञानकर्तृत्वमकार्यत्वात्तस्य कार्यत्वे
वा न सर्वदा सर्वज्ञता भोगापवर्गलक्षणपुरुषार्थद्वयप्रयुक्तत्वात् प्रधानपुरुषसंयोगनि तन्महदहंकारादिक्रमे
णाचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य परिणामः सर्गः दृष्टं चाचेतनं चेतनानधिष्ठितं पुरुषार्थेन प्रवर्तमानं
यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्तते। तदैक्षत बहु स्यां प्रजायेयेत्यस्याश्च श्रुतेर्यच्चेतनेपि चेतनवदुपचा
रात् स्वकार्योन्मुखत्वमादर्शयति। यथा कूलं पिपतिषतीति। यत्रायं श्रूयते प्रत्यक्षेत नादेव गम्यते। कालत्रापे श्रुत
मिरमगोभाकं प्रणीयते। अपि चाहुर्वृद्धाः यथाग्रायेक्षिति तदद्घ्रावदं निभवंतिदयमस्मदिति तदिदमपि ता आप
ऐक्षंत तेज ऐक्षतेत्याद्युपचारप्रायेश्रुतं तदैक्षत लौपचारिकमेव विज्ञेयं अनेन जीवेनात्मनानुप्रविश्य नामरूपे
व्याकरवाणीति च प्रधानस्य जीवात्मत्वं जीवार्थकारित्वमाह। यथाहि भद्रसेनो राजार्थकारी राज्ञो भद्रसेनो ममात्मेत्युपचर्यते।

एवं तत्त्वमसीत्याद्याः श्रुतयो भाक्ताः संपत्त्यर्था वा द्रष्टव्याः। स्वमपीतो भवतीति निरुक्तं जीवस्य प्रधाने स्वकीयेप्ययं सुषुप्ता
वस्थायां ब्रूते। प्रधानांशस्तमः समुद्रेके हि जीवो निद्राणः तमसीव मग्नो भवति यथाहुरभावप्रत्ययालंबना वृत्तिर्निद्रेति।
वृत्तीनामन्यासां प्रमाणादीनामभावकारणं तमः तदालंबना निद्रा जीवस्य वृत्तिरित्यर्थः तथा सर्वज्ञं प्रसूतस्य चेतनान्तरम
त्रोपि सकारणं करणाधिपाधिप इति प्रधानाभिप्रायः प्रधानस्यैव सर्वज्ञत्वं प्रतिपादितमधस्तात्। तस्मादचेतनं प्रधानं ज
गदुपादानमनुवदंति श्रुतय इति पूर्वः पक्षः एवं काणादादिमतेपि कथंचिद्योजनीयाः श्रुतयः अस्तु नाम प्रधानकारण
पक्षे गतिः प्रधानस्य तु नित्यपि कारणत्वे वकारार्थं त्वादेतत्। सत्त्वसंपत्तावेतस्य सर्वज्ञता अथ तमः संपत्तावज्ञत्वेन वासक
ल्पाज्ञभवतीत्याह। तेन च सत्त्वधर्मेण ज्ञानेनेति सत्त्वं हि प्रकाशशीलं निरतिशयोत्कर्षं सर्वज्ञताबीजं यदाहुः निरति
शयं सर्वज्ञताबीजमिति यत्खलु सातिशयं तत्क्वचिन्निरतिशयं दृष्टं यथा कुवलामलकबि ल्व पु सातिशयं महत्त्वं व्यो
म्नि परममहति निरतिशयं एवं ज्ञानमपि एकद्विबहुविषयतया सातिशयमित्यनेनापि क्वचिन्निरतिशयेन भवि
तव्यं इदमेवास्य निरतिशयत्वं न चिदात्मन इत्यर्थः तदापि च योग्यतामात्रेणैव चिदात्मनः सर्वज्ञताभ्युपगमो न
कार्ययोगादित्याह त्वयापीति॥ न केवलस्याकारणे कार्यस्येत्येतत् सिंहावलोकितेन प्रपंचयति प्रागुत्पत्तेरि
ति अपि च प्रधानस्येतीत्यनिरस्तार्थः एवं प्राप्त उच्यते ईक्षतेर्नाशब्दं नामरूपप्रपंचलक्षणकार्यदर्शनादेत्कारण त
मात्रं वदितिसामान्यकं नायामस्ति प्रमाणं ननु तत्रे ×१॰ यद्धितेसमस्तवेहितयत्वं तदिदं सर्वज्ञत्वं सत्त्वस्य
निरतिशयोत्कर्षं लभते यथापरिजलमसी अपि सः तथापि पुरुषार्थप्रयुक्तगुणवैषम्यातिशयात्सत्त्वस्य निरतिशयोत्कर्षे सार्वज्ञं कार्यमुत्पद्यत इति प्र
धानावस्थायामपि तन्मात्रं विवक्षितं विवक्षितावतमः कार्यं प्रधानं सर्वज्ञमुच्यत इति अपि भाम वधारणस्य व्यवच्छेद्यमाह। न केवलस्येति। न हि
किंचिदेककार्यं जनयेत् अपितु बहूनि चेदात्मा चैकः प्रधानं तु निर्गुणमिति तदेव न एकं कार्यमुत्पत्तुमर्हति ×१॰ तन्नचेतनमितिना विशेष
म

ते।

वाच॰ कत्वमाथामस्त्यनुमानमित्युपरिष्टाद्व्यवस्थापयिष्यते तस्मान्नामरूपप्रपंचकारणत्वेन प्रमाणमाम्नाय एव भगवानुपासनीयः तदेवमा

४५ म्नायैकसमधिगमनीये जगत्कारणे पौर्वापर्यपरामर्शात् यदाम्नायांजसा वदेत् जगद्बीजं तदेवेष्टं चेतनं तु समांजसः।

ते पुनेषु खल्वाम्नायप्रदेशेषु ईक्षते त्यवंजातीयकैर्वाक्यैरीक्षतुः कारणात् जगज्जन्माख्यायते इति न च प्रधानपरमाण्वा

देरचेतनस्येक्षितृत्वमांजसं। सत्वांशेनेक्षितृ प्रधानं तस्य प्रकाशकत्वादिति चेत्। न तस्य जाड्येन तत्वानुपपत्तेः कत्व

हि रजस्तमोभ्यां सत्वस्य विशेषः स्वच्छता स्वच्छं हि सत्वं अस्वच्छे च रजस्तमसी स्वच्छस्यैव चैतन्यबिंबोद्ग्राहितया प्रका

शकत्वव्यपदेशो न तु तयोः अस्वच्छतया न ग्राहित्वाभावात्। पार्थिवत्वे तुल्य इव मणेर्बिंबोद्ग्राहिता न लोष्टादीनां प्रकृतेः

रीक्षितृत्वमांजसं तस्याम्नायतो नित्यज्ञानस्वभावत्वनिश्चयात्। नन्वत एवास्यानीक्षितृत्वं नित्यज्ञानस्य स्वभावभू

तस्येक्षणस्याक्रियात्वेन ब्रह्मणस्तत्प्रति निमित्त भावाभावात्। अक्रियानिमित्तस्य च कारकत्वनिवृत्तौ न ब्रह्मस्यतादृ

शस्य कर्तृत्वस्य निवृत्ते। सत्यं ब्रह्मस्वभावस्य चैतन्यं नित्यत्वेन या न क्रियात्वस्य न च न वच्छिन्नस्य न तद्विषयोपधानभेदस्यानित्य

त्वं कार्यत्वं चोपपद्यते। तथा च वक्ष्यमाण ईक्षणे सर्वविषयोपधानभेदावच्छेदेन कल्पितभेदस्यानित्यत्वं कार्यत्वं चोप

पद्यते तथा चैवं लक्षणईक्षणे सर्वविषयोपधानब्रह्मणः स्वातंत्र्य लक्षणं कर्तृत्वमुपपन्नं यद्यपि कूटस्थनित्यस्यापरि

मित औदासीन्यमस्य वास्तवं तथाप्यनादिनिर्वचनीयाविद्यावच्छिन्नस्य व्यापारवत्त्वभासनादीति कर्तृत्वोपपत्तिः। परैरप्यव

निक्तैः कूटस्थनित्याया चितिशक्तेः कर्तृत्वमीदृशमेवाभ्युपेयं। चैतन्यसामानाधिकरण्येन ज्ञातत्वोपलब्धेः। न हि यथा

निकान्यंतर्बहिःकरणानि त्रयोदश सत्वगुणप्रधानान्यपि स्वयमचेतनानि तत्र पश्यत्वं व्यापारं वा वेदितुमुत्सहंते।

नोखल्वंधः स्वहस्तमपि पाथः प्रधानं वेदयति चक्षुष्मतावेदेकेन वेद्यते स एव तद्धि मार्गदर्शी स्वतंत्रः कर्ता नेतातेषां एवं ४५

बुद्धिसत्वस्य स्वयमचेतनस्य चितिबिंबसंक्रांत्याचेतनापत्तौ चैतन्यस्य ज्ञातृत्वं चितिरेव ज्ञात्री स्वतंत्रानांतर्बहिःकरणानि अंधस्य हस्त

प्रतिमान्यस्वतंत्राणि न चास्याश्चितेः कूटस्थनित्याया अस्ति व्यापारयोगः न च तद्योगे पेक्षात्वं व्यापारवतामपि जडानामज्ञता

त्। तस्मादंतःकरणवर्तिनं व्यापारमारोप्य चितिशक्तौ कर्तृत्वाभिमानः। अंतःकरणे वा चैतन्यमारोप्य तस्य ज्ञातृत्वाभिमानः सर्व

था भवन्मते पि नेदं स्वाभाविकं कर्तृत्वं ज्ञातृत्वमपि तु सांख्यव्यावहारिकमेवेति परमार्थतो नित्यस्यात्मनो ज्ञानं परिणाम इति

च भेदाभेदपक्षमपाकुर्वद्भिरपास्तं कूटस्थस्य नित्यस्यात्मनो व्यापारवत्त्वं एवमिच्छाज्ञानं धर्म इति चोपरिष्टाद्व्युत्पादयिष्यते।

तस्मादवस्तुनोवच्छिन्नं चैतन्यं तत्वान्यत्वाभ्यामनिर्वचनीयाव्याकृतव्याचिकीर्षितनामरूपविषयावच्छिन्नं सत् ज्ञानकार्यं

तस्य कर्तेश्वरो ज्ञाता सर्वज्ञः सर्वशक्तिरिति सिद्धं तथा च श्रुतिः तपसा चीयते ब्रह्म ततोन्नमभिजायते अन्नात्प्राणोम

नः सत्यं लोकाः कर्मसु चामृतं यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते इति। तपसा

ज्ञानेनाव्याकृतनामरूपविषयेण चीयते तद्व्याचिकीर्षावद्भ

ति। यथा कुविंदादिरव्याकृतं पटादिबुद्ध्या व्यालिख्य चिकीर्षति। एकधर्मवान् द्वितीयधर्मोपजनने उपचितउच्यते

व्याचिकीर्षायां चोपचये सति ततो नामरूपमदनीयं साधारणं सांसारिणां व्याचिकीर्षितमभिजायते तस्माद्व्याकृ

ताद्व्याचिकीर्षितादन्नात् प्राणो हिरण्यगर्भो ब्रह्मणो ज्ञानक्रियाशक्त्यधिष्ठानं जगत्साधारणो जायते यथा

व्याकृताद्व्याचिकीर्षितात्प्रयत्नः अवांतरकार्यं द्वितं तु कादितस्माच्च प्राणान्मनो रवं संकल्पविकल्पादिव्याकरणात्मकं

जायते ततो व्याकरणात्मकान्मनस आकाशादीनि सत्यशब्दवाच्यानि जायंते तेभ्यश्च सत्यारव्येभ्यो नुक्रमेण समस्ता लोकाः

भूरादयः तेषु मनुष्यादिप्राणिवर्णाश्रमक्रमेण कर्माणि धर्माधर्मरूपाणि जायंते कर्मसु चामृतं फलं न इत्यादि। तत्र स्वनिमि

ण्य

या॰च॰ तयोः धर्माधर्मयोः सतोर्न विनश्यतीत्यमनं यावत्धर्माधर्मभावीतियावत् यः सर्वज्ञः सामान्यतः सर्वविद्विशेषतः यस्य भगवतोज्ञा
४६ नमयं तपः धर्मेनियासमयः तस्मात् ब्रह्मणः पूर्वस्मादेतदपरं कार्यं ब्रह्म किंच नामरूपमन्नं च व्रीहियवादिजायत इति। तस्मात्तथा
नस्य साम्यावस्थायां अ नैतिरिक्त त्वात् क्षेत्रज्ञानां च सत्यपि चैतन्ये सर्गादौ विषयानीक्षणात्। मुख्यसंभवे नोपचारस्यान्याय्यत्वात्
मुमुक्षोश्च यथार्थपिरेशानुपपत्तेर्युक्तिविरोधित्वात् तेजः प्रभृतीनां मुख्यासंभवे नोपचाराश्रयणस्य युक्तिसिद्धत्वात्। सं
शये च सति तत्ता यथार्थस्य निश्चायकत्वात्। इह तु मुख्यस्य औत्सर्गिकत्वेन निश्चये सति संशयाभावात्। अन्यथा किरातश
तसंकीर्णदेशनिवासिनो ब्राह्मणायनस्यापि किरातत्वापत्तेः। अतो नेक्षितृ अनात्मनिर्वाच्याविद्यासचिवं जगदुपादानं शुक्ति
रिव समारोपितस्य रजतस्य मरीचय इव जलस्य एकश्चंद्रमा इव द्वितीयस्य चंद्रमसः। न खचेतनं प्रधानपरमाण्वादि अशब्दं हि
तत्। न च प्रधानं परमाणवो वा तदतिरिक्त सर्वज्ञेश्वराधिष्ठिता जगदुपादानमिति साम्प्रतं। तेषां भेदेन कार्यत्वात् कार्याणां
च भेदा भावात् कारणज्ञानेन समस्त कार्यपरिज्ञानस्य मृदादिनिदर्शनेन प्रसाधितत्वात् भेदे च तदनुपपत्तेः सा
क्षाच्चैकमेवाद्वितीयं नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोतीत्यादिभिर्बहुभिर्वचोभिर्ब्रह्मातिरिक्तस्य प्रपंचस्य प्रतिषेधात्।
चेतनोपादानमेव जगत् भुजंग इवारोपितो रज्जूपादान इति सिद्धांतः सदुपादानत्वेसि द्धे जगतः सदुपादानं चेतनमचेतनं
वेति संशयो मीमांसाधने अथापि तु सदुपादानत्वमसिद्धमित्यत आह। तत्रेदं शब्द वाच्यमित्यादि दर्शयतीत्यंतं। अथापी
क्षिता पारमार्थिक प्रधानं क्षेत्रज्ञातिरिक्त ईश्वरो भविष्यति। अथाहुर्हैरण्यगर्भा इत्यतः श्रुतिः पठिता। एकमेवाद्वितीयमिति
बहुस्यामिति च चेतनकारणमात्म न एव बहुभावमाह तेनापि कारणाच्चेतनाद् भिन्नं कार्यमभ्युपगम्यते। यद्यप्याकाशा
द्यात्मतः सृष्टिस्तथापि तेजोबन्नानामेव त्रिवृत्करणस्य विवक्षितत्वात्। तत्र तेजसः प्राथम्यात् तेजः प्रथममुक्तं। एकमेवाद्वितीयं
जगदुपादानमित्यत्र श्रुत्यंतरमपि पठति। तथा चान्यत्रेति। ब्रह्म चतुष्पात् षोडशकलं तद्यथा प्राचीप्रतीचीदक्षिणोदीची ४६

दिक् चतस्रः कला ब्रह्मणः प्रकाशवान्नाम प्रथमः पादः तदर्थ शक्तः तथा पृथिव्यंतरिक्षद्यौः समुद्र इत्यपराश्चतस्रः कला द्वितीयः
पादोनंतवान्नाम। तथाग्निसूर्यचंद्रमाविद्युदिति चतस्रः कला सज्योतिष्मान्नाम तृतीयपादः प्राणश्चक्षुः श्रोत्रं वागिति
चतस्रः कलाः चतुर्थ आयतनवन्नाम ब्रह्मणः पादः तदेव षोडशकलं षोडशावयवं ब्रह्मोपास्यमिति श्रुत्यंतरे षोडशकलं प्रसि
द्धं सारेन तु। ईक्षतेर्निर्दिष्टधातु स्वरूपमुच्यते तेन चाविवक्षितार्थस्य धातुस्वरूपस्य चेतनोपादानसाधनत्वसंभव इत्यत आह इ
क्षतेरिति। धात्वर्थ निर्देशोभिमतो विषयिणा विषयलक्षणात्। प्रसिद्धा चेयं लक्षणेत्याह। यज्ञेरिति। यः सर्वज्ञ इत्यामा
त्यतः सर्वविद्विशेषतः सांख्यीयं स्वमत साधनमुपन्यस्य दूषयति। यत्तूक्तं सत्वधर्मेणेति पुनः सांख्यमतमुत्थापयति। नतूक्त
मिति। दूषयति तदपीति। समुच्चरद्दितावत्र भवति सत्वं गुणवैषम्यप्रसंगे तत्साम्यानुपपत्तेः न चाव्यक्तेन रूपेण ज्ञान
मयुज्यते। रजस्तमसोस्तत्वतिबंधत्वस्यापि सूक्ष्मेण रूपेण सद्भावादित्यर्थः। यदि तु कापिलमतमपहाय हैरण्यगर्भा
स्त्रीयतत्त्वमाह अथ पुनः साक्षिनिमित्तमिति। तेषामपि हि प्रकृष्टसत्वोपादानपुरुषविशेषस्यैव क्लेशकर्मविपाकाशया
परामृष्टस्य सार्वज्ञं न तु प्रधानस्याचेतनत्वस्य तदपि चाद्वैत श्रुतिभिरपास्तमित्याभावात् पूर्वपक्षबीजमनुभाषते। यत्पुनरुक्तं ब्रह्म
णोपीति चैतन्यस्य शुद्धस्य नित्यत्वेपि उपहितं तत्कार्यमाकाशमिव घटावच्छिन्नमित्यभिसंधाय परिहरति। इदं तावत् वानिति।
प्रतनोप प्रकाशोस्य वितरीत्येन तदपि विषयावच्छिन्नः प्रकाशः। कार्यं इत्येतदभिप्रायं वैषम्यं चोदयति। ननु सवितुरिति। किं वा
त्वं कर्माभावमभिप्रेत्य वैषम्यमाह भगवानुत तद्विषयाभावं तदा प्रकाशयतीत्यनेन माभूत्ताम्यं प्रकाशत इत्यनेन त
स्ति। तस्य कर्म विवक्षितं। अथ प्रकाशस्वभावं प्रत्यस्ति स्यान्नं स सवितुः परिहरति नासत्यपीति कर्मणीति। असत्यपि इत्य
विवक्षितेपीत्यर्थः अथवा त्वं कर्माभावमभिसंधाय वैषम्यमुच्यतेन तज्ञसिद्धत्वात्। कर्माभावस्याविवक्षितत्वात्।

वाच. चात्रकर्मणिइतिपरिहरति। कर्मापेक्षायांविति। यावांसतिकर्मण्यविशिलेष्वुतीनामुपपत्तितासांसतिकर्मणिविवक्षितेस्फुगम
मित्यर्थः। यस्यभाराद्रिति। यस्यभगवनईश्वरस्यप्रसादात्तस्यनित्यसिद्धस्येश्वरस्यज्ञानंनित्यसिद्धंभवतीतियुक्तम्
४७ मितियोजना यथाहुर्योगशास्त्रकाराः ततःप्रत्यक्चेतनाधिगमोप्यंतरायाभावश्चेति। तत्राप्यकाराश्चभक्तिविशेषाद्धावर्जि
तईश्वरस्तमनुगृह्णातिज्ञानवैराग्यादिनेतिसवित्स्मकाशवदितिवत्सुनोनित्यस्यकारणानपेक्षास्वरूपेणोत्काव्यतिरेकमुखेना
प्याहअपिचाविद्यादिमतइति। आदिग्रहणेनकामकर्मादयःसंगृह्यंतेनज्ञानप्रतिबंधकारणरहितस्येति। संसारिणांव
स्तुतोनित्यज्ञानत्वेपि अविद्यादयःप्रतिबंधकारणानिसंतिनवीरस्याविद्यारहितस्यज्ञानप्रतिबंधकारणसंभवइतिभावः।
नतस्यकार्यमावरणायपगमोविद्यतेनायतलादितिभावः अपाणि ग्रहीताजपाद्योजवनोवेगवद्दिहरणवान्। ज्ञानव
त्वेनक्रियाप्रधानस्यत्वचेतनस्यज्ञानबलाभावान्नजगत्क्रियेत्यर्थः आतिरोहितार्थमन्यत्। स्यादेतत्। अन्यत्र
नित्योक्तिघटाद्युपाधिरूतोभवत्वकेहविभ्रमोनत्वात्मानित्स्वभावसिद्धप्रकाशोसचघटनइत्यतआह। ह्रश्यतेचात्म
नएकस्तदिति। अभिनिवेशोभिमानोमिथ्याबुद्धिमात्रेणपूर्वेणेतिजनेनारितादर्शिता।मात्रग्रहणेनविचारासहत्वेनानिर्व
चनीयतानिरस्तापरिशिष्टंनिगदव्याख्यानंतत्रिष्ठस्यमोक्षोपदेशादितिराकोजरत्वेनवाख्यानंत्रेणप्रधाननिराकारणार्थं
सूत्रं शंकाचभाष्येउक्ता॥ स्यादेतत् ब्रह्मैवजीसितंतत्त्वनप्रथमंसूक्ष्मतयाशक्यंश्वेतकेतुंग्राहयितुमितितत्संबं
धप्रधानमेवस्थूलतयाआत्मत्वेनाग्रस्तेश्वेतकेतुः अरुंधतीमिवसूक्ष्मांदर्शयितुंतत्संनिहितांस्थूलतारकांदर्शयंती
यमद्यवरुंधतीमि अस्यांशंकायांउत्तरं। इयत्वाद्विचनाक्षेतिसूत्रं चकाराजनुक्तसमुच्चयार्थः तच्चानुक्तंभाष्यउक्तं।
अपिचजगत्कारणप्रकृतस्यापितस्यनिरुक्तंकुर्वतीश्रुतिः चेतनमेवजगत्कारणंब्रूते। यद्दिक्षात्आलवचनः तथापि

चेतनस्यपुरुषस्याचेतनप्रधानत्वानुपपत्तिः। आत्मीयवचनः तथाप्यचेतनेप्रधानेपुरुषार्थतया आत्मीयेपिचेतनस्य
मुख्यानुपपत्तिः नहिमद्रात्माधरात्मीयपिपायर्ति प्रतीयतेअपित्वात्मभृत्यायांम्चेव। ननुरजतमनात्मभृतेहस्तिनिप्र
तीयते किंत्वात्मभृत्यायांतु भावेवेत्यात। स्याध्यातः। गतिसामान्यात् गतिरवगतिः तार्किकसमयइवेतियथाहितार्कि
काणांसमयभेदेषुपरस्परपराहतताथतोनवेदांतेषुपरस्परपराहतिरपितुतेषुसर्वत्रजगत्कारणत्वेतन्नावगतिःसमा
नेति। नसुयदीनाभिवरूपादिति। यथाहिसर्वेषांचक्षुःरूपमेवगृह्णातिनतुरसादिकंकस्यचिद्दर्शयतिकस्यचिद्रूपमे
वरसनादिष्वपिरसादिगतिसामान्यंदर्शनीयंश्रुतत्वात्तवत्तरैश्च तेसर्वेपिजगत्कारणस्यश्रुतंनतुसर्वविषयंज
गत्कारणसंबंधितयानुदर्शात् सर्वविषयमवगतंश्रुतानांतराणांतुउपनिषदिसर्वज्ञईश्वरोजगत्कारणमितितात्पर्यमिति
विशेषःउत्तरसूत्रसंदर्भमाक्षिपतिः अन्यापर्यदित्यारभ्यते। ब्रह्मजिज्ञासितव्यमितीतिहिप्रतिज्ञातंतत्रशास्त्रैकसमधिग
म्यंशास्त्रंचसर्वज्ञसर्वशक्तिजगदुत्पत्तिस्थितिप्रलयकारणंब्रह्मण्येवप्रमाणं। नप्रधानादाविति न्यायतोप्युक्तादितंचालि
वेदांतानांगोपस्थापितत्वमपिवाधयेदितिचगतिसामान्यादित्युक्तं। तत्किमपरमवशिष्यतेयदर्थमुत्तरसूत्रसंदर्भस्यावता
रस्याहितिकिमुत्थानमितिकिमाक्षेपे। समाधत्ते उच्यतेद्विरूपं हीति। यद्यपितत्वतोनिरस्तसमस्तोपाधिरूपंतथापितु
तेनरूपेणशक्यमुपदेष्टुमितिसोपाधिकेनरूपेणोपदेश्यमिति। तत्रचकश्चिदुपाधिविशिष्टः तदुपासनानिचकानिचिद
भ्युदयार्थानिमनोमात्रसाधनानियात्रपठितानिकानिचित्क्रममुक्त्यर्थानि। कानिचित्कर्मसमृद्ध्यर्थानि। क्वचित्पुनर
सोप्युपाधिरविवक्षितोयथात्रैवात्रमनारयआनंदमयांताःपंचकोशाःतदत्रकस्मिन्नुपाधिर्विवक्षितः कस्मिन्नेतिना
द्यापिविवेचनंतथागतिसामान्यमपिसिद्धवदुक्तंनत्वद्यापिसाधितमिति। तदर्थमुत्तरग्रंथसंदर्भारंभइत्यर्थः। स्यादेतत्

बात॰ परस्यात्मनस्तदुपाधिभेदविशिष्टस्याभेदात्। कथमुपासनाभेदः कथं च फलभेद इत्यत आह। एक एव चेति। रूपाभेदेऽप्यु
पाधिभेदाद्उपाधिहितभेदादुपासनाभेदः। तथा च फलभेदः। इत्यर्थः। कः पुनः कस्य। ननु यद्येक आत्मा कूटस्थनित्यो निरतिशयः
४८ सर्वभूतेषु गूढः। कथमेतस्मिन्नभूमाश्रये तारतम्यश्रुतय इत्यत आह। यद्यप्येक आत्मेति। यद्यपि निरतिशयमेकमेव रूप
मात्मनः ऐश्वर्यं च ज्ञानं चानंदश्च तथाप्यनाद्यविद्यातमःसमावृतं तेषु तेषु प्राणभृत्सु तेषु कश्चिद्दस इव कश्चिद्विरलतापक्ष
मिव च कश्चिदपकृष्टमिव कश्चिद्विप्रकर्षवदु कश्चिदिव तत्प्रकर्षवदिव भासते तत्कस्य हेतोः अविद्यातमसः प्रकर्षनिकर्षतारतम्या
दिति यथोत्तमप्रकाशः सविता दिङ्मण्डलमेकरूपेणैव प्रकाशेनापूरयन्नपि वर्षासु निकृष्टप्रकाशः शरद्वसंतादिषु प्रकृष्टप्रकाश
इव प्रथते तथेदमपि ज्ञेयेषितोपाधिसंबंधगुणस्यत्वेन निरस्तोपाधिसंबंधो ज्ञेयस्त्वेनेति। आनंदमयोऽभ्यासात्। तत्र प्रथम
तावदेकदेशिमतेनाधिकरणमारचयति। तैत्तिरीयकेऽन्नमयमित्यादि गौणत्वाहपानेपि युज्यते मुख्यमीक्षणं मुख्यत्वे
न यैत्सुत्येपायदृष्टिविशेषिका आनंदमयश्रुतिर्हि विकारे प्राचुर्ये च मयटः स्मृतं मुख्यार्थत्वमिति। विकारार्थेन्नमयादिषु
प्र योगादानंदमयपदमपि विकारार्थमेवेति युक्तं न प्राणमयादिषु विकारार्थत्वायोगात्स्वार्थिको मयडिति युक्तं प्राण
पुपाघ्नवच्छिन्नो ह्यात्मा वा न प्राणादिविकारोऽधय काशामिव घटविकारः न चमलयं स्वार्थिकत्वमुचितं च तु कोशांतरत्वेतु न स
र्वांतरितोच्यते प्रियादिभागी शरीरो जीवो न ब्रह्मयुज्यते। न च सर्वांतरस्येतया ब्रह्मैवानंदमयं जीव इति सांप्रतं नहीयं श्रुतिरा
नंदमयस्य सर्वांतरतां ब्रूते अपि त्वन्नमयादिकोशचतुष्टयांतरतामानंदमयकोशस्य न चास्मादन्यस्यांतरस्याश्रवणादयमेव सर्वांतर
इति युक्तं परप्रेक्ष्यं यस्मात्त्वंतरं तस्मादेवांतरं भवति नहि देवदत्तो पल्लवानित्युक्ते सर्वान्नृसिंहसार्द्धा दीनपि प्रति बलवान्प्र
तीयते अपि तु समानजातीयं न यं तमपेक्ष्यं एवमानंदमयोऽन्नमयादिभ्योंतरो न तु सर्वस्मात् न च निष्कलस्य ब्रह्मणः प्रिया
४८

DR. BHAU DAJI

प्रियाद्यवयवयोगो। नापि शरीरत्वं युज्यत इति संसार्येवानंदमयः तस्मादुपहितमेवात्रोपास्यत्वेन विवक्षितं न तु ब्रह्मस्वरूपं ज्ञेय
त्वेनेति पूर्वः पक्षः। अपि च यदि प्राचुर्यार्थो मयट् तथापि संसार्येवानंदमयो न तु ब्रह्म आनंदप्राचुर्यं हि तद्विपरीतदुःख
लवसंभवे भवति। ननु तदसंतापाभावेन च परमात्मनो मनागपि दुःखसंभवः आनंदैकरसत्वादित्यत आह न च अशरी
रस्यत्वादिति अशरीरस्य तु न रविज्जसंबंधो मनागपि नास्तीति प्राचुर्यार्थोपि मयट् नोपपद्यत इत्यर्थः। उच्यते। आ
नंदमयावयवस्यतावद्ब्रह्मणः पुच्छत्वांगतया न प्राधान्यं अपि तु अंगिन आनंदमयस्यैव ब्रह्मणः प्राधान्यं तथा च तदधि
कारे पठितमभ्यस्यमानमानंदपदं तद्बुद्धिमास्थितस्यैवानंदमयस्याभ्यास इति युक्तं ज्योतिष्टोमादिकारे वसंते वसंते ज्यो
तिषा यजेतेति ज्योतिःपदमिव ज्योतिष्टोमाभ्यासः कालविशेषविधिपरः। अपि च साक्षादानंदमयात्मन्यासः श्रूयते।
एतमानंदमयमात्मानमुपसंक्रामतीति। पूर्वपक्षबीजमनुभाष्य दूषयति यत्तूक्तमन्नमयादिति। न हि मुख्यारुंधती
दर्शनं। तत्तर मुख्यारुंधतीदर्शनप्रायपठितमप्यमुख्यारुंधतीदर्शनं भवति तादर्थ्यात्। एवं दर्शनार्थमंतरदर्शनानु
गुण्ये तेनु न तु तद्विरोधितेति चेत्। इहाप्यानंदमयादांतरस्यान्यस्याश्रवणात्। तस्यैवान्नमयादिसर्वांतरत्वश्रुतेरुपर्यु
पसन्न ताद्रूप्यं प्रियाद्यवयवयोगशरीरत्वे च निगदव्याख्यातेन भाष्येण समाहिते प्रियाद्यवयवयोगवच्च दुःखलवयोगो
पि परमात्मनः उपाधिकृत उपपादितः तथा चानंदमय इति प्राचुर्यार्थता मयट उपपादितेति। अपि च मंत्रब्राह्मणयोरुपे
योपायकत्वयोः संप्रतिपत्तेः ब्रह्मैवानंदमयार्थः। मंत्रे हि तु नः पुनरन्योंतर आत्मेति परब्रह्मण्यांतरत्वश्रवणात्॥
तस्यैव चान्योंतर आत्मा आनंद इति ब्राह्मणे प्रत्यभिज्ञानात् परब्रह्मैवानंदमय इत्याह सत्प्रकारः मांत्रवर्णिकमेव च गीयते।
मांत्रवर्णिकमेव परब्रह्म ब्राह्मणेऽप्यानंदमय इति अपि चानंदमयं प्रकृत्य शरीराद्युपपत्तेः प्राकृतस्वशब्दश्रवणात्। वहुस्या

चाव० मिति च स्वजमानानां स्वष्टुरानंदमयादभेदश्रवणादानंदमयः पर एवेत्याह सूत्रं नेतरोनुपपत्तेः। नेतरो जीव आनंदमयः त
४९ स्यानुपपत्तेरिति भेदव्यपदेशाश्च रसः सा रो ह्ययमानंदमय आत्मा स रसं ह्येवायं लब्ध्वा जीवात्मा आनंदी भवति चोदयति कथं
नर्हीति इतिलब्धा न लब्धव्यः कथं नर्हि परमात्मनो वस्तुतोभिन्नेन जीवात्मना परमात्मा लभ्यत इत्यर्थः परिहरति बाढं तथापी
निसत्यं परमार्थतो अभेदेप्यविद्यारोपितभेदमुपाश्रित्य लब्धृलब्धव्यतोपपद्यते। जीवो ह्यविद्यया परब्रह्मणोभिन्नो दर्शितो नतु
जीवा इत्यपि तथा चानंदमयश्चेज्जीवो न जीवस्याविद्यया स्वतोभेदो दर्शित इति न लब्धृलब्धव्यभाव इत्य
र्थः भेदाभेदौ च न जीवपरब्रह्मणोरिष्टु क्रमथ स्यात्। स्यादेतत्। यथा परमेश्वरादभिन्नो जीवात्मा दृष्टा न भवत्येवं जीवात्मनो
पि द्रष्टुर्न भिन्नः परमेश्वर इति जीवस्याविद्यात्मत्वे परमेश्वरोप्यविद्यावान्स्यात्तथा च न न स्यात्तु सन्निलग आह परमेश्वरस्त्वविद्या
कल्पिताद्दृतिरजतं हि समारोपितं न शुक्तितो भिद्यते न हि तद्भेदेनाभेदेन वा शक्यं निर्वक्तुं शुक्तिस्तु परमार्थसती निर्वचनी
या अनिर्वचनीयाद्रजताद्भिद्यत एव अनेन स्वरूपमात्रं दृष्टांतमाह यथा मायाविन इति। एतदपरितोषेणात्यंतस्वरूपता
दृष्टांतमाह यथा च परकाशादिति शेषमतिरोहितार्थं समतपरिग्रहार्थमेकदेशिमतं दूषयति इदं त्विह वक्तव्यमिति। ए
षतावदुत्सर्गः यद्ब्रह्मपुच्छं प्रतिष्ठेति ब्रह्मशब्दात्प्रतीयते विशुद्धं ब्रह्म प्रकृतं त्वानंदमयशब्दतः तत्र किं पुच्छपदसमास्तिवा
हारात्। अन्नमयादिषु चात्मावयवपरत्वेन प्रयोगादिहाप्यवयवपरत्वात्। पुच्छपदस्य न त्वामानाधिकरण्यं ब्रह्मपदस्मि
नित्यार्थत्यागेन कथंचिदवयवपरं व्याख्यायतां आनंदमयपदं चान्नमयादिविकारवाचिप्रायपठितं विकारवाचिना कथंचि
त्स्वतुरानंदवाचिना ब्रह्मलक्षणप्रतिद्वंकयान्विद्व्या ब्रह्मणि व्याख्यायतां आनंदपदाभ्यासेन ज्योतिःपदेन वज्योतिष्टोम आनंद ४९

मयोत्स्यतां उतानंदमयं परं विकारार्थमस्तु ब्रह्मपदं ब्रह्मलक्षणे वस्वार्थेस्तु आनंदाभ्यासपरत्वात् पुच्छपदमात्रमवयवत्रापलि
क्षितमधिकरणपरतया व्याख्यायतां इति कृतदुभय एव विशंकुर्वंतु। तत्र प्रायपाठपरित्यागो मुख्यत्रितयलंघनं पूर्वस्मिंस्तु
तरे पक्षे प्रायपाठस्य बाधनं। पुच्छपदं हि वालधौ मुख्यं स न आनंदमयावयवे गौणमेवेति मुख्यशब्दार्थलंघनं अवयवप
रतायां अधिकरणपरतया च तुल्यं अवयवप्रायत्वेस्य बाधश्च विकारप्रायत्वेस्य बाधेन तुल्यः ब्रह्मपदं आनंदमयपदं त्रि
तयलंघनं त्वधिकं। तस्मान्मुख्यत्रितयलंघनात्। असाधीयान् पूर्वः पक्षः मुख्यत्रयानुगुण्येन तूत्तर एव पक्षो युक्तः अ
पि चानंदमयपरस्य ब्रह्मार्थत्वे ब्रह्म पुच्छमिति न समंजसं न हि तदेवावयव्यवयवश्चेति युक्तं आधारपरत्वे तु पुच्छशब्द
स्य प्रतिष्ठात्वेन रूढ्युपपन्नतरं भवति। आनंदमयस्य चांतरत्वमन्नमयकोशापेक्षया अभ्यंतरत्वमानंदमयाद
र्थादुन्नीयत इति तस्मुल्लोकं एवं चान्नमयादिवदानंदमयस्यापि प्रियाद्यवयवयोगो युक्तो वाङ्मनसागोचरे तु परब्रह्मणि कृपा
धिमं तदभिप्रियाद्यवयवयोगः प्रादुर्यच्छकेशेन व्याख्यायते तां तथा च मांत्रवर्णिकस्य ब्रह्मण एव ब्रह्म पुच्छं प्रतिष्ठेति प्रधा
नस्याभिधानात्। तस्यैवाधिकारेणानंदमयस्येति सोऽकामयतेत्यादावपि श्रुतयोर्ब्रह्मविषयानानंदमयविषयादित्यर्थसंक्षेपः
कागममन्यत्। सूत्राणि त्वेवं व्याख्येयानीति। वेदस्य त्रयोर्विरोधे गुणत्वसाम्यकल्पनेतिसूत्राण्यन्यथा नेतव्यानि। आनंदमय
शब्देन तदात्मकं ब्रह्मपुच्छं प्रतिष्ठेत्यत्र ब्रह्मपदमुपलक्ष्यते एतदुक्तं भवति आनंदमयेत्याहिनाक्षेपयद्ब्रह्मपुच्छं प्रतिष्ठेति
ब्रह्मपदं तत्प्रधानमेवेति। यत्तु अस्याधिकरणमिति वक्ष्ये ब्रह्मपुच्छमित्याद्यश्रुतिः। तत्कस्य हेतोः पूर्वमवयवप्रधानप्र
योग तत्प्रयोगस्यैव बुद्धौ संनिधानात् तेनापि चाधिकरणेऽलक्षणोपपत्तेरिति। मांत्रवर्णिकमेव च गीयते। यत्सत्यं ज्ञान
मित्यादिना मंत्रवर्णेन ब्रह्मात्मकं तदेवोपपन्नं तेनात्र लक्षणेन स्वप्राधान्येन गीयते ब्रह्मपुच्छं प्रतिष्ठितं अवयववचनत्वेतस्य

वाच॰ मंत्रेण आधारत्वं ब्राह्मणेन आधारत्वं इत्युभयोः पक्षयोर्मंत्रब्राह्मणयोर्विप्रतिपत्तिः स्यादिति नेतरोनुपपत्तेः। अन्नरसवानंदमय
५० इति भाष्यस्य स्थाने इत्थं ब्रह्मपुच्छं प्रतिष्ठेति पवितभंभेदव्यपदेशाच्च अत्रापीतश्चानंदमयइत्यस्य चानंदमयाधिकारइत्यस्य
भाष्यस्य स्थाने ब्रह्मपुच्छं प्रतिष्ठेति ब्रह्मपुच्छाधिकार
इति व पठितव्यं। कामाच्चानुमानापेक्षा॥ अस्मिन्नस्य च तद्योगं शास्तीत्यनयोरपि सूत्रयोर्भाष्ये आनंदमयस्थाने ब्रह्मपुच्छ
पाठो द्रष्टव्यः॥ तद्धेतुव्यपदेशाच्च। विकारस्यानंदमयस्य चेत् ब्रह्मपुच्छमवयवः कथं सर्वस्यास्य विकारजातस्य सानंदम
यस्य ब्रह्मपुच्छं कारणमुख्येन इदं सर्वमसृजत यदिदं किंचेति श्रुत्या न हि स्वानंदमयविकारावयवो ब्रह्मविकारः॥ सतु सर्वस्य का
रणमुपपद्यते तस्मादानंदमयविकारावयवो न ब्रह्मेति तदवयवमोगानंदमयो विकार इह नोपास्यत्वेन विवक्षितः किंतु
स्वप्रधानमेव ब्रह्मपुच्छं ज्ञेयत्वेनेति सिद्धं तस्माद्धर्मोपदेशात् पूर्वस्मिन्नधिकरणे उपास्यसमस्तविशेष ब्रह्मप्रतिपत्त्यर्थ
मुपायतामात्रेण पंचकोशा उपाधयः स्थिताः न तु विवक्षिताः ब्रह्मैव तु प्रधानं ब्रह्मपुच्छं प्रतिष्ठेति ज्ञेयत्वेनोपक्षिप्तमिति
निर्णीतं संप्रति सकलब्रह्म विवक्षितोपाधिभेदमुपास्यत्वेनोपक्षिप्यते। ननु विद्याकर्मातिशयलब्धोत्कर्षो जीवात्मादित्य
यवेदनीय इति निर्णीयते तत्र मर्यादाधाररूपाणि संसारिणि परे न तु। तस्मादुपास्यः संसारी कर्मानधिकृतो रविः। हिर
ण्यश्मश्रुरित्यादिरूपश्रवणात्॥ ये येषां तरादित्यस्थ एषोंतरक्षिणीति चाधारभेदश्रवणात्। ये चामुष्मात्परांचो लोकास्ते
षांचेष्टे देवकामानां चेत्यैश्वर्यमर्यादाश्रुतेश्च सांसर्यविकार्यकारणसंघातात्मको रूपादिसंपन्न इहोपास्यो न तु परमात्मा
अशब्दमस्पर्शमित्यादिश्रुतिभिरपास्तरूपश्च स्वे महिम्नि इत्यादिश्रुतिभिरयाकृताधारश्च स एव सर्वेश्वर इत्यादि
श्रुतिभिरधिगतनिर्मर्यादैश्वर्यश्च शक्यउपास्यत्वेनेह प्रतिपत्तुं सर्वपापविरहश्चादित्यपुरुषे संभवति शास्त्रस्य म ५०

नुष्याधिकारत्वात्तस्य सर्वात्मकत्वं श्रूयते न तत्कथं देवतायाः पुण्यपापानधिकाराद्धृग्वादिमत्तान्यथानुपपत्तेश्च कारणात्मके जीवे
उपास्यत्वेन विवक्षितेयत्तदृग्गपात्मतयास्य सर्वात्मकत्वं श्रूयते तत्कथंचिदादित्यपुरुषस्य स्तुतिरित्यादित्य पुरुष एवोपास्यो न
परमात्मेत्येवं प्राप्ते अनाधारत्वे च नित्यत्वं सर्वगतत्वं च हेतुः अनित्यं हि कार्यं कारणाधारमिति नानाधारं नित्यमप्यसर्वगतं
च यत्तस्मादाधारभावेन स्थितं। तदेव तस्मात्तरस्याधार इति नानाधारं तस्मादुभयमुक्तं एवं प्राप्तेऽभिधीयते। अंतस्तद्धर्मोपदे
शात्। सर्वात्मसर्वदुरितविरहाभ्यामिहोच्यते ब्रह्मैवाव्यभिचारिभ्यां सर्वहेतुविकारवत्। नामनिरुक्तेन हि सर्वपाप्मापादान
तयास्योदय उच्यते। न चादित्यस्य देवतायाः कर्मानधिकारेऽपि सर्वपाप्मविरहः प्राग्भवीयधर्माधर्मरूपपाप्मसंभवे सति। न
चैतेषां प्राग्भवीयो धर्मो ह्यार्जितपाप्मेति सांप्रतं विद्याकर्मातिशयसमुदाचारेण्यनादिभवपरंपरोपार्जितानां पाप्मनां संभ
वात्। न च श्रुतिप्रामाण्यादादित्यदशरीराभिमानिनः। सर्वपाप्मविरह इति युक्तं। ब्रह्मविषयत्वेनाप्यस्याः प्रामाण्योपपत्तेः न च
विनिगमनाहेत्वभावः। तत्र तत्र सर्वपाप्मविरहस्य भूयोभूयो ब्रह्मण्येव श्रवणात्। तस्यैव चेह भिन्ना प्रत्ययविनिगमनाहेतोः विद्यमा
नत्वात्। अपि च सर्वात्मं जगत्कारणस्य ब्रह्मण एवोपपद्यते। कारणादभेदात् कार्यजातस्य ब्रह्मणश्च जगत्कारणत्वादा
दित्यशरीराभिमानिनस्तु जीवात्मनो न जगत्कारणत्वं न च मुख्यार्थसंभवे प्राशस्त्यलक्षणया स्तुत्यर्थता युक्ता रूपवत्त्वं चास्य
परानुग्रहाय कायनिर्माणेन चातद्विकारतया सर्वस्य कार्यजातस्य विकारस्य च विकारवत्तोनन्यत्वात् गंधरूपभेदेनोपक्षिप
ते यथा सर्वगंधः सर्वरस इति न च ब्रह्मनिर्मितं मायारूपमनुवदत्। शास्त्रमशास्त्रं भवति अपि तु तां कुर्वदितिना ध्यास्यत्व
प्रसंगः यत्र तु ब्रह्मनिरस्तसमस्तोपाधिभेदं ज्ञेयत्वेनोपक्षिप्यते। तत्र शास्त्रमशब्दमस्पर्शमरूपमव्ययमिति प्रवर्तते। तस्मा
द्रूपवत्त्वमपि परमात्मन्युपपद्यते एतेन स्वमहिमाधाराभेदावपि व्याख्यातौ अपि च आदित्यदेहाभिमानिनः संसारिणोंतर्यामिभेदेनोक्तः

बा० च० सएषांतरादित्यइत्यनेन श्रुतिसाम्येन प्रत्यभिज्ञायमानो भवितुमर्हति। तस्मात्यएनसनयदितिथनवंतोविभूतिमंन्त इति या वदकला
५३ सुनर्विभूतिमत्वं परमेश्वरपरिग्रहे घटत इत्यत आह। यद्यद्विभूतिमदिति सर्वात्मकत्वेपि विभूतिमत्वे च परमेश्वरस्वरूपाभि
व्यक्तिर्न त्वविद्यातमः पिहितपरमेश्वरस्वरूपेषु विभूतिमत्स्वित्यर्थः। लोकवानेश्वत्यत्वमपीति अत्यंतपारार्थ्यत्वाद्येन निरंकु
शमैश्वर्यमित्यर्थः। आकाशस्तल्लिंगात्। पूर्वस्मिन्नधिकरणे ब्रह्मणो असाधारणधर्मदर्शनात् विवक्षितोपाधिनोस्यैवोपासनानत्वा
दित्यशरीराभिमानिनो जीवात्मन इति निरूपितं। इदानीं तु साधारणधर्मदर्शनात् तदेवोद्गीथे संपाद्योपास्यत्वेनोपदिश्यते न भूता
काश इति निरूप्यते। तत्राकाश इति होवाचेति किं मुख्याकाशपदानुरोधेनास्य लोकस्य का गतिरिति च। सर्वाणि ह वा इमानि
भूतानि वज्ञायानीति च परायणमिति च कथं विद्यास्यतां उत तदनुरोधेनाकाशशब्दो गौण्या नयाप्रमात्मनि आख्यायतामिति।
तत्र प्रथमत्वात् प्रधानत्वादाकाशं मुख्यमेव नः तदनुगुणेनान्यानि आख्यापनीति निश्चयः। अस्य लोकस्य का गतिरिति प्रश्नोत्तरे आ
काश इति होवाचेत्याकाशस्य गतित्वेन प्रतिपद्यत यात्प्राधान्यात्। सर्वाणि ह वेत्यादीनां तु तद्विशेषणतया गुणत्वात् गुणत्वाच्च
कत्वेनेति वह्न्यप्यप्रभानाति प्रधानानुरोधेन यानि अपि चाकाश इति होवाचेत्युत्तरे प्रथमावगतमाकाशमनुपजातविरोधि
तेन तदुत्तरं रमयं वुद्धौ यद्वद्दैवावगतमुपनिपतितं तद्रुपजातविरोधितदनुगुणेनैव व्यवस्थानमर्हति। न च ब्रह्मविदा
काशशब्दोत्रस्यात् ब्रह्मणि प्रयुक्त इति सर्वत्रैव तत्परेण भवितव्यं संभवश्चोभयत्र तुल्यः न च ब्रह्मणि आकाशशब्दो मुख्यो न
कार्यस्यान्यायत्वात्। अत्यवब्रह्मणि प्रयोगदर्शनोपपत्तेः। लोकेवास्य नभसि निरूढत्वात्। तत्पूर्वकत्वाच्च वैदिकार्थप्र
तीतेर्वैपरीत्यानुपपत्तेः। तदानुगुण्येन च सर्वाणि ह वेत्यादीनि भाष्यरूपान्यपमेव नीतानि तस्माद्भूताकाशमेवात्रोपा
स्यत्वेनोपदिश्यते। न परमात्मेति प्राप्तं। एवं प्राप्तेभिधीयते। आकाशशब्देन ब्रह्मणो ग्रहणं। कुतः तल्लिंगात् तथाहि। सा ५३

मानाधिकरण्येन प्रश्नप्रतिवाक्ययोः पौर्वापर्यपरामर्शे प्रधानत्वेपि गौणतया अप्याकाशपदं प्रधानार्थं तथापि यत्
घंतदेवप्रतिवक्तव्यं न खल्वनुरूपमज्ञात्वा पृष्टः कोविदः सचानष्टे तदिहास्य लोकस्य का गतिरिति प्रश्नोद्दृश्यमानो नामरू
पप्रपंचमात्रगतिविषय इति तदनुरोधात्। य एव सर्वलोकस्य गतिः स एवाकाशशब्देन प्रतिवक्तव्यः। न च भूताकाशः स
र्वस्य लोकस्य गतिः। तस्यापि लोकमध्यपतितत्वात्। तदेव तस्य गतिरित्यनुपपत्तेः। न चोत्तरे भूताकाशश्रवणात्। भूताकाश
कार्यमेव घटस्थमिति युक्तं प्रश्नस्य प्रथमावगतस्यानुपजातविरोधिनो लोकसामान्यविषयस्य उपजातविरोधिनोत्तरेण सं
कोचानुपपत्तेः तदनुरोधेनोत्तरस्य व्याख्यानात्। न च प्रश्नेन पूर्वपक्षरूपेणाव्यवस्थितार्थेन उत्तरं व्यवस्थितार्थं नियन्तुं शक्यं
नियंतुमिति युक्तं तन्निमित्तानामज्ञानसंशयविपर्यासानां अनवस्थानेपि तस्य स्वविषये व्यवस्थानात् अन्यथोत्तरस्याल
वनत्वापत्तेः वैयधिकरण्यापत्तेर्वा अपि चोत्तरेपि बहु असमंजसं तथाहि सर्वाणि ह वा इमानि भूतान्याकाशादेवोत्पद्यन्त
इति सर्वशब्दः कथंचिदल्पविषयो व्याख्येयः एवमेवकारोप्यसमंजसः न खल्वेषामाकाशमेव कारणमपितु तेजोपि ए
तन्स्यापि नाकाशमेव कारणं अपितु पावकपाथसी अपि मूलकारणविवक्षायां तु ब्रह्मण्येवावधारणं समंजसं। असमं
जसं तु भूताकाशे एवं सर्वेषां भूतानां लयो ब्रह्मण्येव एवं सर्वेभ्यो ज्यायस्त्वं ब्रह्मण एव एवं परमत्वं ब्रह्मणस्तस्मात्सर्वे
षां लोकानामिति प्रश्नोपक्रमात्। उत्तरे च तत्तदसाधारणब्रह्मगुणपरामर्शात् ज्यायस्त्वयतेः परमयनमित्यसाधारण
ब्रह्मगुणोपसंहारात्। भूयसीनां तु श्रुतीनां अनुग्रहाय लज्जे हे कं कुलस्यार्थ इति वद्दारमाकाशपदं मात्रसमंजसम
स्तु। एतावता हि बहु समंजसं स्यात्। न चाकाशस्य प्राधान्यमुत्तरे किं तु पृष्टार्थत्वादुत्तरस्य लोके सामान्यगतेश्च परत्वा
त्परायणमिति च तस्यैवोपसंहारात् ब्रह्मैव प्रधानं। तथा च तदर्थसदाकाशपदं प्रधानार्थं भवति नान्यथा। तस्माद्ब्रह्मै

वा॰ ब्रह्मप्रधानमाकाशपदेनेहोपास्यत्वेनोपक्षिप्तं न भूताकाशमिति सिद्धं। अपि चास्मिन्नुपक्रमे अंतवद्वत्किलते सामसंतवत्व
दोषेण शालावत्यस्येति न चाकाशशब्दो गौणोपि विलंबितप्रतिपत्तिस्तत्र न तु ब्रह्मणि आकाशशब्दस्य तत्पर्यायस्य च प्रयोग
५२ प्राचुर्यात् उत्संगाभ्यासेनास्यापि मुख्यवत्प्रतिपत्तेरविलंबनादिति दर्शनार्थं ब्रह्मणि प्रयोगप्राचुर्यं वैदिकं दर्शितं भाष्यकृ
ता न त्वेतन्मुख्यभावगत्यानुगुण्येनोत्तरं नीयते। तत्र तदन्यथाकर्तुं शक्यं यत्र तु न शक्यं तत्रोत्तरानुगुण्येनैव प्रथमं नीयते इ
त्याह वाक्योपक्रमेपीति। अत एव प्राणः। उद्गीथे प्रस्तावदेवता प्रस्तावमन्वायत्ता इत्युपक्रम्य श्रूयते। कतमा सा देवतेति प्रा
ण इति होवाचेत्युषस्तिश्चाक्रायणः उद्गीथोपासनप्रसंगेन प्रस्तावोपासनमप्युक्तं। उद्गीथ इत्युक्तं भाष्यकृता प्रस्ताव इति
साम्नो हि भक्तिविशेषत्वमन्वायत्तानुगता प्राणो देवता अत्रापि प्राणशब्दस्य ब्रह्मणि च वायुविकारे दृष्टत्वं यथैवं तत्रैवग
तार्थमेतदिति कोधिकरणांतरारंभस्यार्थः तत्रोच्यते। अर्थश्रुतेः कस्माद्धि श्रुतिमेवादित्यमहे मानांतरावगम्ये तु
तद्व्याप्तत्वावक्लृप्तिः। ब्रह्मणो वा सर्वभूतकारणत्वमाकाशस्येव वायव्याद्यादिभूतकारणत्वं प्रतिनागमाद्दते मानांतरं
प्रभवति। तत्र पौर्वापर्यपर्यालोचनया यत्रार्थे समंजसो ह्यागमः। स एवार्थस्तस्य गृह्यते न त्यज्यते वेतरः। इह तु सर्व
शब्दोद्गमने भूतानां प्राणं प्रत्युच्यमाने किं ब्रह्म प्रत्युच्यते आहो वायुविकारं प्रतीति विषये। यदा वै पुरुषः स्वपिति प्राणं त
र्हि वागप्येतीत्यादिकायाः श्रुतेः सर्वभूतसारेंद्रियसंवेशनोद्गमनप्रतिपादनद्वारा सर्वभूतसंवेशनोद्गमनप्रतिपा
दिकायाः मानांतरानुग्रहेण प्रसामर्थ्याद्बलात् संवेशनोद्गमने वायुविकारस्य प्राणस्यैव न ब्रह्मणः अपि चोद्गीथप्र
तिहारयोः सामभक्त्योः ब्रह्मणो अन्ये आदित्यश्चान्नं च देवते निहिते कार्यकारणसंघातरूपे तत्साहचर्यात् प्राणोपि का
र्यकारणसंघातरूपदेवता भवितुमर्हतीति निरुक्तोप्यर्थमथ इक्षत्यधिकरणे पूर्वोक्तः पूर्वपक्षे हेतुः पोद्बलनाय पुनरुपन्यस्तः।
५२

तस्माद्वायुविकार एवात्र प्राणशब्दार्थ इति प्राप्तं एवं प्राप्तेभिधीयते पुंवाक्यस्य बलीयस्त्वं मानांतरसमागमात्। अपौरुषेयवा
क्यस्य तत्संगतिः किं करिष्यति नो खलु स्वतः सिद्धप्रमाणभावमपौरुषेयं वचः स्वविषयज्ञानोत्पादे तद्व्यवहारे वा मानांतरम
पेक्षते। तस्यापौरुषेयस्य निरस्तसमस्तदोषाशंकस्य स्वत एव निश्चायकत्वात् निश्चयपूर्वकत्वाच्च व्यवहारप्रवृत्तेः। तस्मा
त् संवादिनो वाक्यस्य सर्वरूपेणैंद्रियस्य वादिनोद्गमने तु न ततो वाक्यात् प्रतीयते प्रतीतौ वा तत्रापि प्राणो ब्रह्मैव भवे
न्न वायुविकारः यथा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवतीति। अत्र वाक्ये यथा प्राणशब्दो ब्रह्मैवाभ
वेत् न चास्मिन् वायुविकारे सर्वेषां भूतानां संवेशनोद्गमने मानांतरेण दृश्यते न च मानांतरसिद्धसंवादेंद्रियसंवेश
नोद्गमने मानांतरेण दृश्यते तेन च मानांतरसिद्धसंवादेंद्रियसंवेशनोद्गमनवाक्यसाहचर्यात् सर्वभूतसंवेशनोद्गमनवाक्यं
कथंचिदिंद्रियविषयतया व्याख्यानमर्हति। स्वतः सिद्धप्रमाणभावस्य स्वभावदृढस्य मानांतरानुपयोगात्। न चास्य तेनैक
वाक्यता एकवाक्यत्वायां तदपि ब्रह्मपरमेवस्यादित्युक्तं इंद्रियसंवेशनोद्गमनं तु अवयुतवादेनापि वदिष्यते। एकं
वृणीते द्वौ वृणीत इतिवत्। न तु सर्वशब्दार्थः संकोचमर्हति तस्मात्प्रस्तावकं प्राणशब्दाभिधेय ब्रह्मदृष्ट्योपासीत न वायु
विकारदृष्ट्येति सिद्धं तथा चोपासकस्य प्राणादिभिः कर्मसमृद्धिर्वा फलं भवतीति वाक्यशेषबलेनेति वाक्यासन्निधानं
दुर्बलमित्यर्थः उदाहरणांतरं तु निगदव्याख्यातेन भाष्येण दूषितं। ज्योतिश्चरणाभिधानात्। इदमाम्नायते अथ यद
तः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरि
ति। यत् ज्योतिरतो दिवो द्युलोकात्परं दीप्यते प्रकाशते। विश्वतः पृष्ठेषु विश्वेषामुपरि असंकुचद्वृत्तिरयं विश्वशब्दो न चय
वतेन संसारमंडलं भूतद्दति दर्शयितुमाह सर्वतः पृष्ठेषु उत्तमेषु न केवलमुत्तममात्रं अपितु सर्वोत्तममित्याह। अनुत्तमेषु।

वा० नास्तोभोग्य उत्तमइत्यर्थः। इदं वालनत्। यदिदमस्मिन्पुरुषेंतर्ज्योतिः तस्याह्येषा शरीरेणोष्मणा श्रोत्रग्राह्येण चापिहितकर्णेन
५३ पुंसा घोषेण लिंगेनानुमीयते। तत्र शारीरोष्मणः स्पर्शनं दृष्टिः घोषस्य श्रवणं श्रुतिः तयोः स्पष्टदृष्टिश्रुती ज्योतिष एव लिं
गेन तदनुमानादिभिः अत्र संशयः किं ज्योतिःशब्दं तेज उत ब्रह्मेति किं तावत्प्राप्तं तेज इति कुतः गौणमुख्यग्रहणविषये मुख्य
ग्रहस्यौत्सर्गिकत्वात् स्ववाक्ये तेजोलिंगोपलंभात्। वाक्यांतरेणानियमात् तदधीप्रतिसंधितः बलवद्बाधकोपनिपातेन खल्वा
काशप्राणशब्दौ मुख्यार्थौ त्याजितौ तदिह ज्योतिः परस्य मुख्यतेजोवचनत्वबाधकस्याभावत्वाद्वाक्यशेषानास्ति। प्रत्युत ते
जोलिंगमेव दीप्यत इति च कौक्षेयज्योतिः सारूप्यं च चक्षुष्मान् श्रुतो विश्रुतो भवतीति इति अल्पफलत्वं स्ववाक्ये श्रू
यते न जातु जठरानलपरमा महिम्नि विना तेजो ब्रह्मणि संभवति। न च कौक्षेयज्योतिः सारूप्यं तेजसोऽब्रह्म
ण्यस्ति न चौष्ण्यघोषलिंगदर्शनश्रवणमुदयं तेजसोऽन्यत्र ब्रह्मण्युपपद्यते। न च महाफलब्रह्मोपासनमणीयसे फ
लाय कल्पते। औरस्येति तेजसः स्वस्य बाह्यतेज उपासनमेतत्फलानुरूपं युज्यते न दत्त तेजोलिंगं एतद्रूपेद्धृतनाय च
निरस्तमपि मर्यादाधारत्वं द्युलोकप्रसंगेत्तन्निराकरणाभावात्। तस्य चोपास्यत्वेन विधानात् ब्रह्मणस्त्वनवयवस्याव
यवोपासनानुपपत्तेः अवयवकल्पनायां च सर्वांगतावनवकल्पनात् न च पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति
ब्रह्मप्रतिपादकं। वाक्यांतरं यदतः परो दिवो ज्योतिरिति ज्योतिःशब्दं ब्रह्मणि व्यवस्थापयतीति युक्तं नहि संनिधानमात्रा
द्वाक्यांतरेण वाक्यांतरगता श्रुतिः सूक्ष्मा क्षमाश्रावयितुमर्थान्। न च वाक्यांतरे अधिकरणत्वेन द्यौः श्रुता दिव इति
मर्यादा श्रुतौ श्रुतौ प्रत्यभिज्ञातुं अपि च वाक्यांतरस्यापि ब्रह्मार्थत्वं प्रसाध्यमेव न त्वावपि सिद्धमिति तत्कथं। तेन नियंतु
ब्रह्मपरतया यदतः परदिति वाक्यं शक्यं तस्मात्तेज एव ज्योतिर्न ब्रह्मेति प्राप्तं तेजः कथं न प्रस्तावे तमः कथं न प्रतिपक्षोपन्यासे ५३

न प्रतिपक्षांतरे द्वयप्रतिपत्तिर्भवति येन दर्थं च प्रकृते ज्योतिर्निरोधकमित्यर्थो वरकत्वेन आक्षेप आह न न कार्यस्यापीति समाधात्रेकदे
शी ब्रूते अस्तु तर्हीति। यत्तु तेजो अनुभूतस्पर्शवत्वेन [illegible] नाभ्यामसंपृक्तं वदन्निवृत्तं तन्मुच्यते॥ आक्षेप्ता दूषयति नेति।
नहि तद्धि कचिदप्युपयुज्यते। सर्वा स्वार्थक्रियास्त्रिवृत्कृतस्यैवोपयोगित्वादित्यर्थः। एकदेशिनः शंकामाह इदमेवेति
आक्षेप्ता निराकरोति न प्रयोजनांतरेति। एकैकां त्रिवृतं करवाणीति तेजः प्रभृत्यपभस्य मानविषयत्वपाश्रुतिर्न सं
कोचयितुं युक्तेत्यर्थः। एवमेकदेशिनि दूषिते परमसमाधाता पूर्वपक्षी ब्रूते। अस्तु तर्हि। तत्त्रिवृत्कृतमेवेति ज्योति
रित्युक्ता यद्यपि आधारत्वश्रुतिर्ब्रह्मण्यपि कल्पितोपाधिनिबंधना कथंचिदुपपद्यते। तथापि यथा कार्यज्योतिष्यतिश
येनोपपद्यते न तथा तत्र सा तदुक्तं उपपद्यते तरामिति। प्राकृतं प्रकृतेजोति कार्यमिति यावत्। एवं प्राप्ते उच्यते सर्वनाम
प्रसिद्धार्थं प्रसाध्यर्थवाक्यातदर्थ। प्रसिद्धापेक्षि सत्सर्वथा स्वस्य मपकर्षति।१॥ तद्धलात्तेन नेयानि तेजोलिंगान्यपि ध्रुवं॥
ब्रह्मण्येव प्रधानं हि ब्रह्मच्छंदेन तत्र तु।२॥ औत्सर्गिकं तावद्यदः सिद्धार्थानुवादकत्वं यद्विधिविभक्तिमपि उपूर्वार्था
वबोधनस्वभावान् प्रच्यावयति। यथा यस्याहिताग्नेरग्निर्गृहान्दहेत्। यस्योभयं हविरार्तिमार्च्छेदिति यत्र पुनस्तत्प्रसि
द्धमन्यतो न कथंचिदाप्यते तत्र वचनादिनिरूर्वत्वादिति सर्वनाम्नः प्रसिद्धार्थत्वं बलाद्धनीयते। यथा यदाग्नेयोऽष्टाकपालो भव
तीति तदिह यदतः प्रसिद्धिरस्ति पूर्ववाक्ये द्युसंबंधितया त्रिपादस्य प्रसिद्धमिति प्रसिध्यपेक्षायां तदेव संबध्यते। न च यथा
तस्य प्रातिपदिकार्थस्य तत्त्वेन प्रत्यभिज्ञानेन तद्विशेषणस्य विभक्त्यर्थस्यान्यतामात्रेणान्यता युक्ता एवं च स्ववाक्यस्था
नि तेजोलिंगान्यसमंजसानीति ब्रह्मण्येवावगमयितव्यानि। गमितानि च भाष्यकृता तत्र ज्योतिर्ब्रह्म विकार इति। ज्योतिषा
ब्रह्मैवोपलक्षितं। अथ वाप्रकाशमात्रवचनो ज्योतिःशब्दः प्रकाशश्च ब्रह्मेति ब्रह्मणि मुख्य इति ज्योतिर्ब्रह्मेति सिद्धं॥

प्रकृतहानाप्रकृतप्रक्रियेदिति प्रसिध्यपेक्षायां पूर्ववाक्यगतं प्रकृतं संनिहितं अप्रसिद्धं तु कृतं अप्रकृतं अत एवोक्तं कृतस्तत्प्रति
संदधानान्यपमाह। न केवलमिति। परस्यापि ब्रह्मणो नामादिप्रतीकत्ववदिति। कोऽन्योयं हि ओतिर्वभावेनानुप्रविष्टस्य प
रमात्मनो विकारो जीवाभावो देहस्यशैत्यात्। जीवतश्चैष्याज्ज्ञायते तस्मात्त्वतीकस्योपासनमुपपन्नं शेषं निगदव्याख्यातं भा
ष्यं छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्। तथाहि दर्शनं पूर्ववाक्यस्य हि ब्रह्मार्थत्वे सिद्धे स्यादेतदेवं न तु ब्रह्मार्थ
मपि तु गायत्र्यर्थं गायत्री वा इदं सर्वं भूतं यदिदं किंचेति गायत्रीं प्रकृत्येदं श्रूयते। त्रिपादस्यामृतं दिवि न त्वाकाशस्य लिं
गादित्वेनैव गतार्थमेतत्। तथाहि ज्यायान् समहिमेत्यस्यामृचि ब्रह्म चतुष्पादुक्तं सैव च तदेतदृचाभ्यनूक्तमि
त्यनेनैव गतार्थमेतत्। तथाहि न गायत्री वा इदं सर्वमित्यक्षरसंनिवेशमात्रस्य गायत्र्या न सर्वात्मकत्वमुपपद्य
ते। न च भूतपृथिवीशरीरहृदयवाक्प्राणात्मत्वं गायत्र्याः स्वरूपेण संभवति न च पंचब्रह्मपुरुषसंबंधित्वमस्ति गा
यत्र्याः तस्माद्गायत्रीद्वारा ब्रह्मणएवोपासना न गायत्र्या इति पूर्वेणैव गतार्थत्वान्नारंभणीयमेतत्। न च पूर्वन्यायस्मा
रणेऽस्त्वत्रैहेर्भाष्टेन त्वाक्युक्तः इति। अत्रोच्यते। अस्त्यधिकाशंका तथाहि गायत्रीद्वारा ब्रह्मोपासनेति कोर्थः। गायत्रीविका
रोपाधिनो ब्रह्मण उपासनेति। न च तदुपाधिनः तदवच्छिन्नस्य सर्वात्मत्वं तदुपाधेरवच्छेदात्। नहि घटावच्छिन्नं नभो नव
च्छिन्नं भवति। तस्मादस्य सर्वात्मकत्वात् स्तुत्यर्थं न द्वारं गायत्र्या एवास्तु स्तुतिः कया चित् प्रणा अत एव गायत्री वा इदं स
र्वं भूतं गायति च त्रायति चेत्यादिश्रुतिभ्यः तथा च गायत्री वा इदं सर्वमित्युपक्रमो गायत्र्या एव हृदयादिभिर्व्याख्याय सैषा चतुष्
पदा षड्विधा गायत्रीत्युपसंहारो गायत्र्यामेव समंजसो भवति ब्रह्मणि सर्वमेतदसमंजसं इति पद्वेन लक्ष्यति न ब्रह्मशब्दः छंदोविषय एव य
थैतां ब्रह्मोपनिषदमित्यत्र वेदोपनिषदं तद्वचनेन तस्मात् गायत्रीछंदोभिधानात् न ब्रह्मविषयमेतदिति प्राप्ते एवं प्राप्ते अभिधीयते न कु ५४

तः। तथा चेतोर्पणनिगदात्। गायत्र्याख्यछंदो द्वारेण गायत्रीरूपविकारानुगते ब्रह्मणि चेतोर्पणं चेतःसमाधा
नं ब्राह्मणवाक्यं न निगद्यते। एतदुक्तं भवति। न गायत्री ब्रह्मणोवच्छेदिका कुंडलस्येव नीलत्वं येन तदवच्छिन्नमस्त्रनस्या
त्। अनवच्छेदविरहात्। किंतु यद्वेतनद्वंत्वसर्वात्मकं सर्वकारणं तत्स्वरूपगायत्र्युपदेशमिति तद्विकारगायत्रीद्वारेणो
पलक्ष्यते। गायत्र्याः सर्वछंदोव्यापित्वाच्च सवनत्रयव्यापित्वाच्च द्विजानां द्वितीयजन्मजननीतया श्रुतौ वैदिकादिषु मध्ये प्राधा
न्येन द्वारत्वोपपत्तेः न चान्यत्रोपलक्षणाभावेनोपलक्ष्यं प्रतीयते न हि कुंडलेनोपलक्षितं कटरूपं कुंडलवियोगेपि
पश्चात् प्रतीयमानं प्रतीयमानं भवति तद्वत् प्रत्यायनमात्रोपयोगित्वादुपलक्षणानामनवच्छेदकत्वात् न देवं गायत्री
शद्वस्य मुख्यार्थत्वे गायत्र्या ब्रह्मोपलक्षणतद्युक्तं। संप्रति तु गायत्रीशब्दः संख्यासामान्यात् गौण्या वृत्त्या ब्रह्मण्येव वर्त
त इति दर्शयति। अपरआह इति। तथाहि। षडक्षरैश्चतुर्भिः पादैर्यथा गायत्री चतुष्पदा एवं ब्रह्मापि चतुष्पात् सर्वाणि हि भूता
नि स्थावरजंगमान्यस्यैकः पादः त्रिदिवि द्योतनवंति चेतनत्वस्वरूपेत्वात्मनीतियावत्। त्रयः पादाः अथवा दिव्याकाशे त्रयः
पादाः तथाहि श्रुतिः इदं वाव तद्योयं बहिर्धा पुरुषादाकाशः। न हि तस्य जागरितस्थानं जाग्रत्त्वं प्रत्यं बाह्यान्पदार्थान्पश्य
तीति वेद। तथायं वाव स योयमंतः पुरुष आकाशः शरीरमध्य इत्यर्थः। न हि तस्य स्वप्नस्थानं तथायं वाव स योयमंतर्हृदय
आकाशः हृदयपुंडरीक इत्यर्थः। न हि तस्य सुषुप्तिस्थानं तदेतत् त्रिपादस्यामृतं दिवीत्युक्तं। तदेवं चतुष्पात्त्वसामान्या
द्गायत्रीशब्देन ब्रह्माभ्युक्तइति। अस्मिन् पक्षे ब्रह्मैवाभिहितमिति। ब्रह्मपरत्वादभिहितमित्युक्तं षड्विधेति भूतपृथिवीश
रीरहृदयवाक्प्राणा इति षट्प्रकारा गायत्र्याख्यस्य ब्रह्मणः श्रूयन्ते पंच ब्रह्मपुरुषा इति च हृदयस्य सुषिपु ब्रह्मपुरुषश्रुति
ब्रह्मसंबंधितायां संभवति अस्यार्थः। हृदयस्यास्य खलु पंच देवसुषयः पंचछिद्राणि तानि च देवैः प्राणादिभिरक्षमा

DR BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

णाग्निस्वर्गश्चाग्निद्वाराणीति देवसुषयः। तथा हि हृदयस्य यत्प्राङ्मुखं छिद्रं तत्स्थो वायुविशेषः स प्राणः तेन हि प्राणः प्राय
णकाले संचरति स्वर्गलोकं स एव चक्षुः स एवादित्य इत्यर्थः। आदित्यो ह वै बाह्यः प्राण इति श्रुतेः अथ योऽस्य दक्षिणः सुषिः
तत्स्थो वायुविशेषो व्यानः तत्संबद्धं श्रोत्रं तच्चंद्रमाः श्रोत्रेण सृष्टा दिशश्चंद्रमाश्चेति श्रुतेः अथ योऽस्य प्रत्यङ्मुखः तत्स्थो
वायुः विशेषः समानः तत्संबद्धं मनः तत्पर्जन्यो देवता। अथ योऽस्योर्ध्वः सुषिः स उदानः पादतलादारभ्योर्ध्वं नयनात्। स
वायुस्तदाधारश्चाकाश इत्येवं देवताः। सर्वा एते पंचसुषयः तत्संबद्धाः पंच हार्दस्य ब्रह्मणः पुरुषाः नगरस्य प्राभृतस्य स्थि
तेशमात्रे संभवंति किं तु ब्रह्मण्येवेति। यथा लोक इति यदाधारत्वं मुख्यं दिवस्तथा कथंचिन्न यदि ब्याख्येयायोग्नि श्रवा
दस्याप्येवं स्तुतोस्मिन्नतः परतोप्यस्ते वर्धाभागातिरिक्तमध्यमभागरूपस्य तस्यैव दस्यात्परतो वस्थानात्। एवं च
बाह्यद्युभागातिरिक्तशरीरहार्ददुभागरूपस्य ब्रह्मणः बाह्याद्दुभागात्परतो वस्थानमुपपन्नं यद्यप्यनुपयोगादेव मुख्य
तयाधारत्वेन विवक्षिता तदा लक्षणयाधारत्वं व्याख्येयं यथा गंगायां घोष इत्यत्र सामीप्यादिति तदिदमुक्तमपरं ज्योतिरिति अ
तद्यदिवः परमपीति प्राणस्तथानुगमात्। अनेकलिंगसंदोहे बलव [illegible] त्कस्य किं भवेत्। लिंगिनो लिंगमित्यत्र चिंत
ते प्रागचिंतितं मुख्यप्राणजीवदेवताब्रह्मणामनेकेषां लिंगानि बहूनि संभूवंते। तत्र कतमदत्र लिंगं लिंगाभासं च कत
मदित्यत्र विचार्यते। न चायमर्थोऽभितर्दनप्राणइत्यत्र विचारितः। स्यादेतत् हिततमपुरुषार्थसिद्धिश्च निखिलाश्रण हत्या
दिपापपरामर्शश्च प्रज्ञात्मत्वं चानंदादिश्च न मुख्ये प्राणे संभवंति तथैष साधु कर्म कारयति एष लोकाधिपतिरित्या
द्यपि। जीवे तु प्रज्ञात्मत्वं कथं चिन्नवेदितरेषां तत्संभवः वक्तृत्वं च वाकरणव्यापारवत्त्वं यद्यपि परमात्मस्वरूपेण संनि
भवती तथाप्यनन्यथासिद्धबहुब्रह्मलिंगाविरोधात् जीवद्वारेण ब्रह्म कथंचिद्व्याख्येयं जीवस्य ब्रह्मणोऽभेदात्। न

याचश्रुतिः। यद्वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धीति वाग्वदनस्य ब्रह्मकारणमित्याह। शरीरधारणमपि यद्यपि
मुख्यप्राणस्यैव तथापि प्राणव्यापारस्य परमात्माश्रयत्वात् परमात्मन एव। यद्यपि चार्थे इंद्रदेवताया विग्रहवत्त्वालिंगमस्ति तथा
हि इंद्रः प्रतर्दनं प्रतीदं ऊ। मामेव विजानीहि त्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेति आत्मनि प्राणशब्दमुच्चचार। प्रज्ञात्मत्वं
चास्योपपद्यते देवतानामप्रतिहतशक्तित्वात्। सामर्थ्यातिशयाच्चेंद्रस्यापि हिततमपुरुषार्थहेतुत्वमपि। मनुष्याधिकारित्वात्
शास्त्रस्य देवान्प्रत्यस्य मद्गुरोर्ब्रह्म हत्यादिपापपरामर्शासोपपन्नः। लोकाधिपत्वं चेंद्रस्य लोकपालत्वात्। आनंदादि
रूपत्वं च स्वर्गस्यैवानंदत्वात् अपहतसर्वदुःखानन्तत्वं हि भाष्यत इति स्मृतेश्चामृतत्वमिंद्रस्यामरत्वाद्यसहनमिलापात्
विग्रहवत्त्वेन स्तुतिरत्रैवोपपद्यते। तथापि परमपुरुषार्थस्यापवर्गस्य परब्रह्मज्ञानायत्तत्वान्वालेः परमानंदरूपस्य
मुख्यस्यामृतत्वस्याजरत्वस्य च ब्रह्मरूपाव्यभिचारात्। अध्यात्मसंबंधभूमाप्यपराचीं इंद्रे नुपपन्नः। इंद्रस्य देवतायाः आ
त्मनि प्रतितु इंद्रस्य चरमदेहस्य वामदेवस्येव प्रारब्धविपाककर्माशयमात्रभोगेनोपपद्यते ब्रह्मणएव सर्वमेतत् कल्पत
इति विग्रहवदिंद्रजीवप्राणवायुपरित्यागेन ब्रह्मैवात्र प्राणशब्दवाच्यमिति स्वरूपस्याभावात्। अनारम्भमेतदिति। अत्रोच्यते।
यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः। सह ह्येतावस्मिन्शरीरे वसतः सहोत्क्रामत इति यस्यैव प्राणस्य प्रज्ञात्मनः उप
स्य मुक्तं तस्यैव प्राणस्य प्रज्ञात्मना सहोत्क्रमणमुच्यते। न च ब्रह्मणो भेदेऽपि वचनं न च सहभावेन चोत्क्रमणं तस्माद्वायुरेव प्राणः
जीवश्च प्रज्ञात्मा स हप्रवर्तते निवसाभ्यां स एकत्वमनयोरुपचरितं। यो वै प्राण इत्यादिना। आनंदाजरापहतपाप्मत्वादि
श्च ब्रह्मणि प्राणे भविष्यतीति तस्माद्यथा यो गंत्रय एवं त्रोपास्याः न चैषवाभेदादोषभावहविषाभ्यार्थिगमस्य परार्थाधिगम
पूर्वकत्वात्। पदार्थानां चोक्तेन मार्गेण स्वातंत्र्यात्। तस्मादुपास्यभेदादुपासात्रैविध्यमिति पूर्वः पक्षः। सिद्धांतस्तु सत्यं पदार्थावगमो

वाच० पायो वाक्यार्थावगमः॥ न तु पदार्थावगमपराणि पदानि। अपि तु वाक्यार्थावगमपराणि तमेव तु केवलं वाक्यार्थं पदार्थावगममंत
५६ रेण न शक्नुवंति कर्तुमिति सतरां तदर्थमेव तमप्यवगमयंतीति तेन पदानि विशिष्टैकार्थबोधनस्वभावान्येव स्वयं लघु ह्यधिकोपनिपाता
आनर्थक्यबोधनपरतां नीयंते। यथाहुः। संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यत इति तेन उपांशुयाजवाक्ये जामित्वदोषो
पक्रमेण तन्निमित्तसमाधानोपसंहारं चैकवाक्यत्वाय भजापनिरूपांशु यष्टव्य इत्यादयो नन्यपरविधयः किंत्वर्थवादा इति निर्णी
तं। तथेहापि प्राणमेव विजानीहीत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेत्युक्त्वा अंते स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति उपसं
हारात्। ब्रह्मण्येव वाक्यतावगतौ सत्यां जीवमुख्यप्राणलिंगं ज्ञापितदनुगुणतया नेतव्यं अन्यथा वाक्यभेदप्रसंगात्। यत्तु
नर्भेददर्शनं सह ह्येतावित्यत्र तद्ज्ञानक्रियाशक्तिभेदेन बुद्धिप्राणयोः प्रसंगात्तोपाधिभूतयोर्निर्देशः प्रसंगात्मानमे
वोपलक्षयितुं अन्यदेवोपलक्ष्यस्य प्रत्यगात्मस्वरूपस्याभेदमुपलक्षणाभेदेनोपलक्षयति। प्राण एव प्रज्ञात्मेति। तस्मा
दनन्यथासिद्धब्रह्मलिंगानुसारतः। एकवाक्यबलात् प्राणजीवलिंगोपपादनमिति संग्रहः। न ब्रह्मवाक्यं भवितुमर्ह
तीति नैष संदर्भो ब्रह्मवाक्यमेव भवितुमर्हतीति इति किंतु यथायोगं किंचिदत्र जीववाक्यं किंचिन्मुख्यप्राणवाक्यं किंचिद्ब्र
ह्मवाक्यमित्यर्थः। प्रज्ञासाधनप्राणांतराश्रयत्वादिति। प्राणांतराणींद्रियाणि तानि हि मुख्यप्राणे प्रतिष्ठितानि। जीवमुख्य
प्राणयोरित्युपक्रममात्रं उपाविति तु पूर्वपक्षत्वं। अत्र तु ध्रुवं। नभक्ति न प्राणेवत्यर्थः। दश भूतमात्राणामिति। पंचशब्दा
दयः। पंच पृथिव्यादय इति। दश भूतमात्रा पंच बुद्धींद्रियाणि पंच बुद्धय इति दश प्रज्ञामात्राः॥ तदेवं समतेव्याख्याय प्राचां
वृत्तिकृतां मतेन व्याचष्टे। अथवेति। पूर्वं प्राणस्यैकस्योपासनमपरं जीवस्यापरं ब्रह्मण इति उपासनात्रैविध्येन वाक्यभेदप्रसंगाद्
दूषणमुक्तं। इह तु ब्रह्मण एकस्यैवोपासात्रयविशिष्टस्य विधानान्न वाक्यभेद इत्यभिमानः प्राचां वृत्तिकृतां तदेतद्दालो ५६

चनीयं। कथं न वाक्यभेद इति। युक्तं सोमेन यजेतेत्यादौ सोमादिगुणविशिष्टयागविधानं। न तु गुणविशिष्टस्य पूर्वस्य कर्म
णोऽप्राप्तस्य विधिविषयत्वात्। वाक्यांतरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात्। तदनुवादेन प्राणाद्युपासनानां वाक्यार्थो विधेयः तस्य च
भेदात्। विध्यावृत्तिलक्षणो वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्घाटितः स्वमारव्याने गोक्तप्रायत्वादिति सर्वमवदातं। ॥
ने
इति वाचस्पतिमिश्रविरचिते भाष्यविभागे भामत्यां प्रथमस्य प्रथमश्चरणः समाप्तः॥ १ ॥ ८७ ॥ ७ ॥ श्रीगणेशाय०॥
अथ द्वितीयं पादमारिप्सुः पूर्वोक्तमर्थं स्मारयति वक्ष्यमाणोपयोगितया प्रथमे पाद इति उत्तरत्र हि ब्रह्मणो व्यापित्वनित्यत्वा
दयः सिद्धवद्धेतुतयोपदेक्ष्यंते न चैते साक्षात्सर्वमुपपादिता इति कथं हेतुभावेनोपदेक्ष्यमिति अत उक्तं समस्तजगत्का
रणस्येति यद्यप्येतन्न पदं कंठोक्तं तथापि ब्रह्मलक्षणे जगज्जन्मादिकारणत्वोपपादनेनाधिकरणसिद्धं तन्नाये नोपक्षिप्ता
इति उपपन्नस्योपादानमुत्तरत्र हेतुभावेनोपन्यास इत्यर्थः। अर्थांतरप्रसिद्धानां चेति। पदार्थांतरप्रसिद्धा आकाशज्योतिरा
दयो ब्रह्मणि व्याख्यायंते तदव्यभिचारिलिंगश्रवणात्। तत्र केवलं कथा मनोमयादीनां अन्यत्र प्रसिद्धानां पदानां प्रयोगो वस्तु
निर्णयं प्रतीत्यभिप्रायः। सर्वप्रश्नाभिप्रायं त्वग्रे दर्शयिष्यामः। सर्वत्र प्रसिद्धोपदेशात्। इहमाम्नायते सर्वं खल्विदं ब्रह्म कुतः॥
तज्जलानिति यतस्तस्माद्ब्रह्मणो जायत इति तज्जं तस्मिंश्च लीयत इति तल्लं तस्मिन्नानिति स्थितिकाले चेष्टत इति तदनं जगत्तस्मा
त्खल्विदं जगद्ब्रह्म जनकः कस्मिन्नजने कश्च कं द्वेष्टीति रागद्वेषरहितः शांतः सन्नुपासीत अथ खलु क्रतुमयः पुरुषो यथाक्र
तुरस्मिंल्लोके पुरुषो भवति। तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि तत्र संशयः किमिह मनोमयत्वा
दिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यत आहोस्विद्ब्रह्मेति किं प्राप्तं शारीरो जीव इति कुतः। क्रतुमित्यादिवाक्येन वि
हितां क्रतुभावनां॥ अन्यत्सर्वमित्यादिवाक्यांशं गुणविधिः। प्रथमो निर्विषयः सन् पर्यवस्यति विषयापेक्षः। स्वयमनिर्देशोऽनिवि

भा॰ ध्यानेनोपजीवितुं शक्यः। अनुग्राहकत्वात्तस्मात्तां न तद्गुणविधानात् ब्रह्मैव मनोमयः। प्राणः शरीरं यस्यादिभिर्विषयोपनायकैः
५७ संबन्धनेन मनोमयत्वादिवत्कार्यकारणसंघातात्मनो जीवात्मन एव निरू ढमिति जीवात्मानोपसेत्रापुरक्षेपासनान्यथा
ब्रह्मणा संबद्धुमर्हति। उक्तविशिष्टगुणावरोधात् तत्सर्वं खल्विदमिति वाक्यं ब्रह्मपरं अपि तु शमहेतुत्वनिगदार्थवादः
शांतताविधिपरात्म्यैगह्रुहोतितेन त्रयं क्रियत इति चेत्। न चान्यपरादपि क्रमापेक्षितन्यायात्स्वीकृत इति युक्तं॥ मनोम
यत्वादिभिर्जीवेनेपुत्रसिद्धैर्जीवविषयसमर्पणेनानपेक्षितत्वात्सर्वकर्मादिवज्जीवस्य पर्यायेण एवं कणीयस्त्वमप्युपपत्तिमा
त्मनस्तपरिच्छेदस्य तदनुपपत्तिः अथमावाग्नेनाणीयस्त्वेन ज्यायस्त्वं तदुगुणतया ख्येयं व्याख्यानं भाष्यकृता एवं क
र्मकर्तृव्यपदेशः समसीमप्यमानतानाभेदेपि जीवात्मनि कथं विभेदोपचारेण राहोः शिर इतिदृष्टत्वादुपलब्धे तिच जीवविष
यं जीवस्यापि देहाद्विबृंहणेन ब्रह्मत्वात्त्वंस सत्यसंकल्पादयोपि परमात्मवर्तिनो जीवेपि संभवंति तद्व्यतिरेकात्तस्माज्जी
व एवोपास्यत्वेनात्राविवक्षितो न परमात्मेति प्राप्त एवं प्राप्तेभिधीयते। समासः सर्वनामार्थः सन्निकृष्टमपेक्षते। तद्धि
तार्थोपि सामान्यं नापेक्षायामितर्कः। तस्मादपेक्षितं ब्रह्मसयाप्यसमन्वयादपि। न यावत्सत्यसंकल्पत्वपरंगतीनां यथार्थता। अवेद
तदेवं यद्ग्राणशरीरस्य ईदृशां सा तस्य जीववा [illegible] चकत्वं भवेन्नन्वे तदस्मिन्प्राणः शरीरमस्येति सर्वनामार्थो बहुव्रीहिः
सन्निहितं च सर्वनामार्थं प्राप्य तदभिधानपर्याप्तस्येति। तत्र मनोमयपदं पर्यवसानाभिधानं तदभिधानपर्यवसानात्
तदेव तु मनोविकारो वा मनः प्रचुरं वा किमर्थमित्यस्यापि न विज्ञायते तत्पत्रैषशब्दः समवेतार्थोभिवतिसमासार्थः न्वे
पजीव एव समवेतार्थो न ब्रह्मणीति तत्साप्राणाह्यमनाद्यत्वादिभिस्तद्धि रहत्रतिषादनादिति युक्तं। तस्यापि सर्वविका
रकारणतया विकाराणां च तस्य कारणत्वे सति तेषां च मनोमयतया ब्रह्मणस्तत्कारणस्य मनोमयत्वोपपत्तेः स्यादेतत् जी ५७

वस्य साक्षान्मनोमयत्वादेर्यो ब्रह्मणस्तु तद्द्वारतः प्रथमं द्वारस्य बुद्धिस्थत्वात्तदेवोपास्यमस्तु न पुनर्जघन्यं ब्रह्म ब्रह्मलिंगभिन्नजीवस्य ब्र
ह्मणोभेदाज्जीवेप्युपपद्यन्ते। तदेतदत्र संप्रधार्यं किं ब्रह्मलिंगैर्जीवानादेबैभिन्नानामस्तु तद्गतानां च जीवस्य मनोमयत्वादिभिः।
अथ मनोमयत्वस्योपास्यत्वं उत न जीवस्य ब्रह्मलिंगवतान तदभिप्रत्यापि जीवलिंगैरस्तु ब्रह्म तद्वत्। तथा ब्रह्मलिंगानां दर्शना
त्तेषां च जीवेनुपपत्तेर्ब्रह्मैवोपास्यमिति॥ वयं तु पश्यामः॥ समारोप्यरूपेण विषयो रूपवान् भवेत्। विषयस्य तु रूपेण समारो
प्यं न रूपवत्॥ समारोपितस्य हि रूपेण भुजंगस्य भीषणत्वादिना रज्जुरूपवती न तु नारज्जुरूपेणाधिगम्यत्वा
दिना भुजंगो रूपवान् तदा भुजंगस्यैवाभावात्किं रूपवान् भुजंगः दृश्यमानं तु नन्वास्ति वास्तवी रज्जुः तदिह समारोपि
तजीवरूपेण वस्तुसद्ब्रह्मरूपवत् पुनस्तत् ब्रह्मरूपैर्नित्यत्वादिभिर्जीवः सहाप्यत्वबितुमर्हति तस्य तदनित्यसंभवात् तस्मा
द्ब्रह्मलिंगदर्शनाज्जीवे चैतदसंभवाद्ब्रह्मैवोपास्यं न जीव इति सिद्धं। एतदुपलक्षणाय च सर्वं खल्विदं ब्रह्मेति वाक्यमुपन्यस्त
मिति। यदप्यपौरुषेय इति। शास्त्रयोनित्वेपीश्वरस्य पूर्वपूर्वसर्गस्थितसंदर्भापेक्षरचनत्वेनास्वातंत्र्यादपौरुषेयत्वा
भिधानं तथा च स्वातंत्र्येण विवक्षा नास्तीत्युक्तं परिग्रहणपरित्यागौ वा पादानानुपादाने उक्ते न तूपादेयत्वेपि ग्रहणे उद्देश्यत
या परिग्रहीतो विवक्षितस्तदनंबकतमवच्छेदकत्वेन वर्जितमविवक्षितं तद्ध्वनिर्वेदैभक्तिसः। तदिदमुक्तं वेदवाक्यानां तत्प
र्यातात्पर्याभ्यामवगम्यते इति यत्परं वेदवाक्यं तत्तेनोपात्तं विवक्षितं अतत्परेणानुपात्तमविवक्षितमित्यर्थः। स्यादेतत्
यथा सत्यसंकल्पत्वादयो ब्रह्मण्युपपद्यन्ते एवं शरीरेप्युपपद्यन्ते शारीरो ब्रह्मणोभेदाच्छरीरगुण इव मनोमयत्वादयो ब्रह्म
णीति अत आह सूत्रकारः॥ अनुपपत्तेस्तु न शारीरः यत्र तद्वा चामसमारोप्यधर्मा समारोपविषये संभवंति न तु विषयध
र्माः समारोप्य इति तस्येतदुत्थानं अत्राह चोदकः कः पुनरयं शारीरो नामेति न तावद्भेदस्तत्प्रतिषेधाद्भेदव्यपदेशाच्च भेदाभेदयो

वाच॰ कथं भाविकौ भवितुमर्हति विरोधादित्युक्तं तस्मादेकमिह तात्त्विकं चेन्न तत्र पौर्वापर्येणाद्वैतप्रतिपादनपरत्वाद्वेदान्तानां द्वैतग्रा

५८ हिण्यमानानन्तरस्याभावान्तद्बाधनाच्चेनाद्वैतमेव परमार्थः। तथा चानुपपत्तेश्चेत्यादि असंगतमित्यर्थः। परिहरति। न नाव

द्वैतप्रतिषेधाद्व्यपदेशाच्च भेदाभेदयोर्वत्र भाविकौ भवितुमर्हति विरोधादित्युक्तं तस्मादेकमिह तात्त्विकमतात्त्विकं चेत्तत्र

तत्र पौर्वापर्येणाद्वैतप्रतिपादनपरत्वाद्वेदान्तानां द्वैतग्राहिण्यमानानन्तरस्याभावान्तद्बाधनाच्चेनाद्वैतमेव परमार्थः। तथा

चानुपपत्तेश्चेत्यादि असंगतमित्यर्थः। परिहरति। सत्यमेवं तत्तु। परएवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः

शारीर इत्युपचर्यते अनाद्यविद्यावच्छेदलब्धजीवभावः परएवात्मा स्वतोऽभेदेनावभासते। तादृशांतं जीवानामविद्यानन्तु नि

रुपाधिनो भवति। न चाविद्यायां सत्यां जीवात्मविभागः सति च जीवात्मविभागे तदाश्रयाविद्येत्यन्योन्याश्रयमिति सांप्रतं अनादि

त्वेन जीवाविद्ययोर्बीजांकुरवदवकल्पते रयोगात्। न च सर्वज्ञस्य सर्वशक्तेश्च सतः कुतः कस्मात्तत्त्वमार्गितापादिपरत्वः

सोऽन्येन बन्धनागारे प्रवेश्येत नतु स्वतन्त्र इति वाच्यं नहि तत्प्रागस्य जीवस्य संप्रति तानि बंधनागारप्रवेशितायेनानुयुज्येत किं

नियमनादिः पूर्वपूर्वकर्माविद्यासंस्कारनिबंधनाननुयोगमर्हति न चैवं तावदीश्वरस्यानीशितान स्वपकरणाद्यपेक्षाकर्तुः

स्वातंत्र्यविहतिर्न स्याद्यत्किंचिदितरणीति विशेषात्सिद्धिरिव कल्पते नैषोऽन्यादिधानमात्मं तिकं विशेषं प्रतिपादयितुं तथा द्यवि

द्याकल्पितः कर्त्रादिलक्षणो भोगो विद्याकल्पनाएव जीवस्योपपद्यते न तु निर्लेपनिखिलाविद्यातद्वासनस्य शुद्धबुद्धस्वभावस्य

परमात्मन इत्यर्थः। शेषमतिरोहितार्थं अतात्त्विकस्य ग्रहणात्। करुणवन्धीयुपपत्तेयस्य [illegible] न्नत्तस्य तत्र

चाभेदवतन्त्रोदनः स्मृतः यस्योपसेचनं कथंवेदयत्रसइति। अत्र चोरनीयौदनोपसेचनसङ्कुचितः कश्चिदन्याप्रतीयते

न तत्र भोक्तृतावा संहर्तृताचास्या न तत्र स्तुतस्यापि परमात्मनोभोक्तृता स्ति अत्र च अन्योऽभिचाकशीतीति भोक्तृताप्र ५९

तिषेधाज्जीवात्मनस्त्वभोक्तृताभिधानात्तयोरन्यः पिप्पलं स्वाद्वत्तीति तद्यदि भोक्तृत्वमात्मत्वं न तो मुक्तसंशयं जीवात्मे

यत्रातिपत्त्यः। अथ तत्राद्वैतवाक्यस्य कार्यकरणसंघातो भोगायतनतया वा सांसारिकसंभवतिभोग्यं अथ तु संहर्तृ

ताभोक्तृतात्तत्त्वयाणमपि मन्नि जीवपरमात्मनांप्रश्नोपन्यासोपलब्धेः संहर्तृत्वसाविशेषात्संभवति संशयः

किमन्नाग्निः उतजीवः आहोस्वित्परमात्मेति। तत्रौदनस्य भोग्यत्वेन लोकत्वसिद्धेर्भोक्तृत्वमेव प्रथमं बुद्धौ विपरिव

र्तते चरमं तु संहर्तृत्वमिति भोक्तैवात्र तथा च जीव एव न जायते इति च तस्यैव स्तुतिः संहारकालेपि संस्कारेणमा

त्रेणान्तस्यावस्थानात्। दुर्ज्ञानत्वं चास्य सूक्ष्मत्वात्तस्माज्जीव एव हात्रोपास्य इति प्राप्तं यद्यपि तु संहर्तृत्वं तथाप्यग्नि

स्तात्र्निरत्यार इति श्रुतिप्रसिद्धिमात्रं वा प्रासङ्गिभिधीयते अत्तात्र परमात्माकुतश्चराचरग्रहणात्। उभे यस्यौदनइति

च मृत्युर्यस्योपसेचनमिति च यतेनत्र यदि जीवस्य भोगायतनतयानत्साधनतया वा कार्यकारणसंघातस्तु तोऽनन्त

र्यदितः नह्योदनो भोगायतनं नापि भोगसाधनमपितु भोग्यः न च भोगायतनस्य भोगसाधनस्य च भोग्यत्वं मुख्यं नचान्न

लुपसेवनतया कल्प्यते न च जीवस्य कार्यकारणसंघातो ब्रह्मक्षत्रादिरूपो भक्ष्यः कस्यचित् क्रूरसत्वस्याघ्राणेः कस्य

चित्स्वेच्छत्वमपि [illegible] तः ब्रह्मक्षत्रविषयमपि जीवस्यात्तत्त्वं नव्याप्नोति किं मंगपुनर्मृत्यु

पसेचनतया सचराचरं। नचौदनपदार्थमापत्तभोग्यत्वानुरोधेन यथासंभवमात्तत्वं योजनइति युक्तं नत्यौर

नपरं स्वसाभोग्यतमाह किंतु लक्षणया न च लाक्षणिकानुरोधेन मृत्युर्यस्योपसेचनमिति प्रत्यक्षमिति च श्रुतिसंको

चमर्हतः। न च ब्रह्मक्षत्रे एवात्र विवक्षिते मृत्यूपसेवनेनप्राणभृन्मात्रोपस्थापनात्। प्राणिषु प्रधानत्वेन च ब्रह्मक्षत्रो

पन्यासस्योपपत्तेरन्नविक्षेरशात्त्वतादनर्थकत्वाच्च तथा च चराचरसंहर्तृत्वं परमात्मन एव नान्यस्य नापि जीवस्य तथा

बाद. चनजायतेनम्नियतेवाविपश्चिदितिब्रह्मणः प्रकृतत्वसनहानंभविष्यतिकद्वइत्थावेदयन्नसदित्यत्र दुर्ज्ञानत्वोपपत्तेरयते जीवस्तुसर्व
५९ लोकप्रसिद्धस्यनदुर्ज्ञानतातस्मादत्रापरमात्मेतिसिद्धं गुहांप्रविष्टावात्मनौहितद्दर्शनात् संशयमाहतत्रेति। पूर्वपक्षप्र
योजनमाह। यदिबुद्धिजीवाविति सिद्धांतप्रयोजनमाह। अथ जीवपरमात्मानाविति औत्सर्गिकस्यमुख्यत्वाबलात्प्रवृत्तेपक्षा
सिद्धांतपक्षारंभ वेनपक्षांतरं कल्पयितमंइतिमन्वानः संशयमाक्षिपति अत्राहासेयेति। ऋतंससमवश्यंभावी
त्रियानत्। समाधत्ते अत्राच्यत इति अध्यात्मिकाधिकारात्रैतावत्स्वात्मानवशायौ कल्पयितुंतदिहबुद्धेरचैतन्येनपरमा
त्मनश्चभोक्तृत्वनिषेधेन जीवात्मैवैकः पानापरिशिष्यत इतिस धीरूपरधागीतिवद्विवचनानुरोधादपिचलंसत्वज्ञांखार्थ
स्यपिबन्तौ लुस्य यत्वार्थंसंजहदिनरेतरयुक्तं पिबत्पिबत्सरोभक्तीत्यर्थः। अस्तुवाङ्मुखएवतथापिनदोषइत्याह
हे नित्यानंत्वलक्षणंहिकर्तृत्वंतत्रयातुरिव पाययितुरप्यस्तीति सेपिकर्ताअतएवचातुर्यः कारयतिसकरोत्येवेति। एवं
करणस्यापिस्वातंत्र्यविवक्षया कथंचित्कर्तृत्वं यथा काष्ठानि पचंतीतितस्मान्मुख्यत्वेप्यविरोधइति। तदेवंसंशयंसमाधा
यपूर्वपक्षंगृण्हातिबुद्धिक्षेत्रज्ञाविति। नियताधारताबुद्धिजीवसंभविनीनहिक्लेशात्कल्पयितुंयुक्तास्वर्गेपरमात्मनि
नचापिवंतावितिवत्साविद्यपदमपिलाक्षणिकंयुक्तंसतिमुख्यार्थत्वेलाक्षणिकत्वायोगात्बुद्धिजीवयोश्च गुहाप्रवेशो
पपत्ते अपिचसुकृतस्य लोकइतिसुकृतलोकशब्दस्थानेनकर्मगोचरत्वानतिक्रमउक्तः बुद्धिजीवौ चकर्मगोचरमनति
क्रांतौ जीवोहिसोक्तृतयाबुद्धिश्चभोगसाधनतया धर्मस्यगोचरोस्तितौ नतुब्रह्मतस्यावरायत्तत्वात्। किंचछायातपावि
तितमः प्रकाशावुक्तौनचजीवः परमात्मनोभिन्नस्तमः प्रकाशरूपत्वात्बुद्धिस्तुजडतया तमइतिशक्योपदेष्टुंतस्माद्बु
द्धिजीवावेवात्रकथ्यंते इति तत्रापिप्रेतेविधिवत्सावुपनये बुद्धेर्भेदेनपरलोकीजीवदर्शनीयइतिबुद्धिरुच्यते। एवंप्रा ५९

तेभिधीयते। ऋतपानेनजीवात्मानिश्चितोस्यद्वितीयत्वा। ब्रह्मणैवसरूपेणनतुबुद्ध्याविरूपयाप्रथमंसद्वितीयत्वेब्रह्मणावगते
सति। गुहाश्रयत्वंपरमंग्यात्मेयमविरोधतः नः सद्वितीयेत्युक्तेसजातीयेनैवगवांतरेणावगम्यतेनतुद्वितीयेनाश्वादिनात
दिदंचेतनोजीवः सरूपेणैवचेतनांतरेणैवब्रह्मणासद्वितीयः प्रतीयते नत्वचेतनयाविरूपयाबुद्ध्यात्वेवमतंपिवंतावितित्रप्र
थममवगतेब्रह्मणितदनुरोधेनचरमंगुहाश्रयत्वंसात्वज्ञामेहरिरितिवव्याख्येयंबहुलंहिगुहाश्रयत्वंश्रुतयोब्रह्मणआहुः
तदिदमुक्तंतद्दर्शनादिति तस्यब्रह्मणोगुहाश्रयत्वस्यश्रुतिषुदर्शनादितिअस्यब्रह्मणोगुहा श्रयत्वस्यश्रुतिषुदर्शनादिति।
एवंप्रथमावगतब्रह्मानुरोधेनसुकृतलोकवर्तित्वमपितस्यलक्षणयाछत्रिन्यायेनगमयितमंछायातपत्वमपिजीवस्या
विद्याश्रयतयाब्रह्मणश्चशुद्धप्रकाशस्यस्वभावस्यतदनाश्रयतयामंतव्यं स्वमेव न्यायंदासरूपणेपिप्रापुदाहरणेद
रेथांसिपचंतीतिनकर्तृत्वोपचारा बुद्धिजीवाविति पूर्वपक्षयित्वासिद्धांतितंसिद्धांतश्चभाष्यकृतास्फोरितः। तद्दर्शनादि
ति। वसमाने वृक्षे पुरुषोनिमग्नइत्यत्रमंत्रे नखलुमुख्यं कर्तृत्वं संभवति करणे कर्तृत्वोपचारोयुक्तइतिकृत्वाचिंतामुद्घाट्य
ति। अपरआहसत्त्वंबुद्धिः शंकतेसत्वशब्दइतिसिद्धांतार्थंब्राह्मणंव्याचष्टइत्यर्थः। निराकरोतितत्रेतियेनस्वप्नंपश्यती
तियेनेति करणमुपदिश्यतीतितत्वश्चभिन्नकर्तारं क्षेत्रज्ञंयोयंशारीरउपद्रष्टेति। अस्तु नत्वंसाधिकरणस्यपूर्वपक्ष
एवब्राह्मणार्थः वचनविरोधेन्यायस्याभासत्वादित्यतआह नाप्यस्यपूर्वपक्षसंभजनइति एवंहिपूर्वपक्षमस्यभजेयदि
हिक्षेत्रज्ञोसंसारित्वे पर्यवस्येदस्यतुब्रह्मरूपतायांपर्यवसानेपूर्वपक्षमपिस्वीकरोतीत्यर्थः। अपिचनावेतौसत्वक्षेत्र
ज्ञौनहवाएवंविधिकिंचनरगआगच्छतिनइतिरलोविद्यानाभंसननंसंश्लेषविदिकरोतीत्येतावतेवविद्योपसंहाराज्जीवब्रह्मा

वाच० ६० सत्तोपरतास्य लक्ष्यत इत्याह। नावतावेति। चोदयति कथं पुनरिति परिहरति उच्यते नेयं श्रुतिरिति। अनश्नन् जीवो ब्रह्मा
भिचाकशीति तु केशांक्यते। यदि जीवो ब्रह्मात्मानाश्नाति कथं तर्हि स्विन्नभोक्तृत्वागमः चैतन्यसमानाधिकरणभोक्तृत्वमव
भासत इति न विरासाया हश्रुतिः तयोरन्यः पिप्पलं स्वाद्वत्तीति एतदुक्तं भवतीति नेदं भोक्तृत्वं जीवस्य तत्त्वतः अपितु बुद्धि
सत्त्वं सुखादिरूपपरिणतं चितिच्छायापत्त्योपपन्नं चैतन्यमिव भुंक्ते न तु तत्त्वतो जीवः परमात्मा भुंक्ते तदेतदध्यासभाष्ये कृत
व्याख्यानं। तदनेन कृत्वाचिंतोद्घाटिता। अंतर उपपत्तेः। ॥ न त्वं तस्य द्भुमेपि देशा
दिसनेनैवैनद्गतार्थं संतिरित्वत्व आप्यमृतत्वादयो ब्रह्मधर्माः प्रतिबिंब जीवदेव तास्य संभविनः तस्माद्ब्रह्म
धर्मापरेणाद्बाह्वैवात्र विवक्षितं साक्षाच्च ब्रह्मशब्दोपादानानुपपत्ते एष दृश्यत इत्येन रास्यर्थं प्रयुज्यते परोक्षं ब्रह्मत्वनत
थाप्रतिबिंबं तु प्रयुज्यते। उपक्रमवशात्सर्वमितरेषां विवर्णनं॥ कृतं मायेनये नैव सख्लत्रानुप्रज्यते। कृतंपि वंतावि
स्वेहि जीवपरमात्मानौ प्रथमावगमाविति तदनुरोधाद्धृहा प्रवेशादयपश्चादवगता आख्याताः तद्वदिहापि यएषोक्षिणिपुरु
षो दृश्यत इति प्रत्यक्षाभिधानात्प्रथममवगते छायापुरुषे तदनुरोधेनामृतत्वाभयत्वादयः कुलाकथंचिद्व्याख्येयाः। तत्र
चामृतत्वं कतिपयक्षणावस्थानात् अभयत्वमचेतनत्वात् पुरुषत्वं पुरुषाकारत्वात् आत्मत्वं कनीनिकायाआयतनात्
ब्रह्मत्वं सर्वमुखेष्वामृतत्वादियोगात् योऽयं वामनीत्वादयोप्यसुखेन कथंचिद्भेतायाः कंचखं चेत्यादि तु वाक्यमन्यीनां
नाचार्यवास्यं नियंतुमर्हति। आचार्यस्तु गतिं वक्ष्यतीति संतराभिप्रायं न तु रूपरिशिष्टाभिप्रायं न स्वाच्छायापुरुष एवात्रोप
स्य इति पूर्वपक्षः संभवमात्रेण तु जीवदेवतेउत स्यबाधकांतरोपदर्शनाय च। एष दृश्यत इत्यस्यात्राभावात् अंतस्तद्धर्मो
पदेशादित्यनेन निराकृतत्वात्। एवंप्राप्त उच्यते य एष इति अनिर्वाच्याभिधाने दृश्यत इति नामपदेसतीत्राप्यसन्निहितस्यापि ६०

नाभिधानत्वणीसन्निहितास्य पुरुषान्मादिशब्दास्ते च न यावत्स्वार्थमभिदधति तावत्सर्वनाम्नां नार्थं तु योप्यभिधीयत इति
कुतस्त्यद्यस्या परोक्षतानुरूपात्मशब्दो च सर्वनाम निरपेक्षौ त्वर सतो जीवे वा परमात्मनि वा वर्तेते इति। न च तयोश्चक्षुषि
प्रत्यक्षदर्शनमिति निरपेक्षपुरुषपरमात्मापि गाथानुरोधेन यएष इति च दृश्यत इति च यथासंभवं व्याख्येयं व्याख्या
यत्वं च प्रसिद्धवदुपादानं शास्त्राद्यपेक्षं विद्वद्विषयं प्ररोचनार्थं विदुषः शास्त्रत उपलब्धिरेव दृष्टत्वयाप्रत्यक्षवदुपचर्यते
प्रशंसार्थमित्यर्थः। अपि च द्वैनवरमं प्रथमानुगुणतया भीयते यत्नेनुं शक्यं अत्वं च इहत्वमृतत्वादयोवहवो बाधकाश्च
नेतुं नहि क्षणावस्थानमात्रममृतत्वं भवति तथा सति किं नाम नामृतं स्यादिति अपि चमृतत्वभयाभपेक्षापि चेन
न धर्मी नाचेतनत्वे संभवतः एवं वामनीत्वादयोप्यत्र ब्रह्मणो नेतुमशक्याः ब्रह्मस्यपदेशश्चोपपादितः तदिदमुक्तं उपप
त्तेरिति। एतदमृतमभयमेतद्ब्रह्मेत्युक्तेस्तदाशंकां न तु सर्वगतस्येश्वरस्य कस्माद्विशेषणं चक्षुरेवस्थानमुपदिश्यत
इति तत्परिहरति श्रुतिः तत्र यद्यप्यस्मिन्सर्पिर्वोदकं वाभिषिंचति वर्त्मनी एव गच्छतीति वर्त्मनीपस्थाने एतदुक्तं भ
ति निर्लेपस्येश्वरस्य निर्लेपं चक्षुरेव स्थानमनुरूपमिति तदिदमुक्तं तथा परमेश्वरानुरूपमिति संयद्वामादिगुणोपदेश
श्चास्मिन्ब्रह्मणि कल्पते घटते समवेतार्थत्वात् प्रतिबिंबादिषु त्वसमवेतार्था वा नीयानीयानि संभजनीयानि शोभनानि पुण्य
फलानि वामानि संयंति संगच्छमानि वामान्यनेन नैति संयद्वामः परमात्मा तत्कारणत्वात् पुण्यफलोसत्तेः तेन पुण्यफलानि सं
गच्छंते सएव पुण्यफलानि वामानि नयति लोकमिति वामनीः एष उ एव भामनीः भामनी भानि नानि नयति लोकमिति
भामनीः तदुक्तं श्रुत्यान्तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति स्थानादिव्यपदेशाच्च आशंकोत्तरमिदं सूत्रं
आशंकामाह कथं पुनरिति स्थानि नोहि स्थानं महद्दृष्टं यथा गारसामधिस्तत्कथमल्पं चक्षुरधिष्ठानं परमात्मनः परममहत

वाच॰ इति शंकार्थः परिहरति । अत्रोच्यत इति । स्थानान्तरस्योपेयत्वात्स्थानान्तरस्योनामरूपप्रकारस्यैवामुपदेशात् सर्वगतस्यैकस्य
न नियमो नावकल्पते न नु नानास्थानत्वं नभस इव नानास्थानिपात्रादिस्थानत्वं विशेषतस्तु ब्रह्मण स्थानितानुपासनार्थ्था
६१ नानि नैरस्स्युक्तोऽप्युपदेशः अपि च ब्रह्मतानुसारादपि ब्रह्मैवात्रासेनेमं न तु प्रतिबिंब जीवदेवतादीत्याह सूत्रकारः ॥ सु
खविशिष्टाभिधानादेव च । एवं खलु पास्नायते उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्याचार्यस्य
द्वादश वर्षाण्यग्नीनुपचचार स ह आचार्योऽन्यान् ब्रह्मचारिणः स्वाध्यायं ग्राहयित्वा समावर्तयामास तमेवैकमुपकोसलं न सम
मावर्तयति स्म जाया यथा न तु समावर्तनार्थिनोऽपि तद्वचनमनधीयीयाचार्यः प्रोषितवानन्तेवासिदूनमानसमग्निपरिचर
णकुशलमुपकोसलमुपेत्य त्रयोऽग्नयः परिचरणपराधीनचेतसः प्रस्थानायास्मै दुःखभाक्षे समेत्य ब्रह्मविद्यामब्रुवन् प्राणो
ब्रह्म कं ब्रह्म खं ब्रह्मेति अथोपकोसल उवाच विजानाम्यहं प्राणो ब्रह्मेति किं ह्यस्त्रमा विभूतिमत्त्वाद्ब्रह्मरूपाविर्भावाद्ब्रह्मेति कं
च खं च तु ब्रह्मत्वेन च जानामि नहि विषयेन्द्रियसंपर्कजं सुखमनित्यं लोके सिद्धं खं च भूताकाशमचेतनं ब्रह्मभवितुमर्हति
अथैनमग्नयः प्रत्यूचुः यद्वाव कं तदेव खं यदेव खं तदेव कमिति एवं संभूयोक्त्वा प्रत्येकं च स्वस्वविषयां विद्यामूचुः पृथिव्यग्नि
रन्नमादित्य आदिना पुनस्ते तं संभूयोचुः एषा सौम्य तेऽग्निविद्यात्मैकमुक्ता स्वविषया विद्या आत्मविद्या चास्माभिः संभूयपूर्व
मुक्ता प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति आचार्यस्तु ते गतिं वक्ता ब्रह्मविद्यायमुक्तास्माभिर्गतिमात्रं तु विशिष्टं नोक्तं न तु विद्याफलप्राप्तये
जाबालस्त्वाचार्यो विस्मितो मुक्तात्मपरकउपरेऽभिरूपवंश्चितयद्वाव कं तदेव खं यदेव खं तदेव कमिति तदृष्टं भाष्यकारः तत्र खंशब्द क्षा॰ च
इति प्रतीकाभिप्रायेणेति आश्रयस्याश्रयं तदैरत्रक्षेपः प्रतीकः यथा ब्रह्मशब्दः परमात्मविषयः नामादिषु क्षिप्यते इदमेव
तद्ब्रह्म ज्ञेयं यच्चाग्नेति तथैवमेव तद्ब्रह्म यद्भूताकाशमिति प्रतीतिः स्यान्न चैतदिष्टं लौकिकस्य सुखस्य धनपारतंत्र्यं च
६१

यिष्णुतावमयत्वेन सह वर्तत इति सामर्थ्यात् कं खं तदेकं व्यतिरेके दोषमुक्त्वोभयत्वे गुणमाह इतरेतरविशेषितौ तिति । तदर्थयोर्वि
शेषितात्वं चापि विशेषितावुच्यते । कंखशब्दसमानाधिकरणो हि खंशब्दो भूताकाशमर्थं परित्यज्य ब्रह्मणि गुणयोगेन व
र्तते तादृशा खेन च कं विशिष्यमाणं सामयाभावरूपं निरामयं भवति । तस्मादुपपन्नमुभयोपादानं ब्रह्मशब्दाभ्यासस्य प्रयोज
नमाह तत्र द्वितीय इति ब्रह्मपदं कंपदस्योपरि प्रयुज्यमानं शिरः । एवं खंपदस्यापि ब्रह्मपदं शिरोऽनयोः कंखंशब्दयोस्ते ब्रह्मशि
रसी तयोर्भावो ब्रह्मशिरस्त्वं अस्तु प्रस्तुते किमायातमित्यत आह तदेवं वाक्योपक्रम इति न चाग्निभिः पूर्वं निर्दिश्यता
ब्रह्मपरोऽक्षिणीत्याचार्यवाक्येऽपि तदेवानुवर्तनीयमिति नु कुत इत्यत आह आचार्यस्तु ते गतिं वक्तेति चगतिमात्राभि
धानमिति यद्यप्येते नि...वल्लीवाक्ये तथापि पूर्वेण चक्रगतां गम्यते गतिमात्राभिधानात् किमुक्तं भवति तुभ्यं ब्रह्मविद्या
स्माभिरुपदिष्टा न हि इह तु गतिर्नोक्ता तां च किं विद्धि अधिकमाख्येयं पूरयित्वाचार्यो वक्ष्यतीति । तदनेन पूर्वासंबद्धार्थ्यं निरवि
वक्षावारितेति अथैवमग्निभिरुपदिष्टे प्रोषित आचार्यः काले नाजगाम आगतश्चावे क्ष्योपकोसलमुवाच ब्रह्मविद
इव नेऽस्य खं ब्रह्म भाति को नु त्वामनुशशास उपकोसलस्तु ह्रीणो भीतश्च को नु मामनुशिष्याद्भगवन्प्रोषिते त्वयीत्यपालयायज्ञा
यनिर्वर्ध्यमानो यथावदग्नीनामनुशासनमवोचत् तत इदं तुभ्यं साकल्येन वक्ष्यामि इदं तु भव माहात्म्याद्यथा पुष्करपलाशआपो
न श्लिष्यन्ते न दुष्प्रश्रुत्याचार्यस्य विरांक्लिष्ट उपकोसले समुपजातरयाई हृदयः प्रत्युवाच सौम्य किल तुभ्यमग्नयो न ब्रह्मसाकल्ये
नावोचन् एवमेवं विदि पाकर्म न श्लिष्यत इत्येवमुक्त्वाऽऽचार्य आह उपकोसलो ब्रवीतु भगवानिति तस्मै होवाचाचार्योऽर्चिरादि
कां गतिं वक्तुमना यदुक्तमग्निभिः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तत्परिपूरणाय य एषोऽक्षिणि पुरुषो दृश्यत इत्यादि एतदुक्तं भवति
आचार्येण यत्कं खं ब्रह्मत्याक्षिस्थानसंयद्वामवामनीभामनीत्वं गुणकं प्राणसहितमुपासनेन सर्वे अपहतपाप्मानो त्वक

मं कुर्वंतु मा वा का पुरर्चिषमर्चिरभिमानिनीं देवतामभिसंभवंति प्रतिपद्यंते अर्चिषोऽहः। अहरहर्देवतां अह्न आपूर्यमाणपक्षं
शुक्लपक्षदेवतां ततः षण्मासान्येषु मासेषु उत्तरां दिशमेति सविता तान्षण्मासानुत्तरायणं तद्देवतां प्रतिपद्यंते तेभ्यो मासेभ्यः सं
वत्सरदेवतां तत आदित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्र स्थितानेतान्पुरुषः कश्चिद्ब्रह्मलोकादेत्य नीर्यामान
वो मानुष्यं सृष्टौ भवो ब्रह्मलोकभवं इति यावत्। स तादृशः पुरुषः एतान्सत्यलोकस्थं कार्यब्रह्म गमयति स एष देवपथो
देवैरर्चिरादिभिर्नेतृभिरुपलक्षित इति देवपथः। स एव ब्रह्मणा गंतव्येनोपलक्षितब्रह्मपथः। एतेन पथा प्रतिपद्य
मानाः सत्यलोकस्थं ब्रह्म इमं मानवं मनोः सर्गं किंभूतं आवर्तं जन्मजरामरणपौनःपुन्यभाक्तित्वलक्षणं आवर्तमान
वो लोकस्तान्नावर्तंते तत्र च स्थिताः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदं॥ तद्दने
नोपाख्याने नत्रुतोपनिषत्कगत्यभिधानाच्चेत्यपि सूत्रं व्याख्यातं अनवस्थितेरसंभवाच्च नेतरः। य एषोऽक्षिणि तनित्यव
स्थितं अनित्येष्वयात्तुरूपेणावकल्पते कल्पनागौरवं नास्ति स्वात्मे प्रसज्यत इत्याह नचात्मा तु पासनाको इति तथा विज्ञा
नात्मनोऽपीति विज्ञानात्मनो हि नमरेशो उपासनात्मन इष्टव्यं तरी ब्रह्मणस्तु तत्र श्रुतं पूर्वं स्वर्थः भीषाम यादस्माद्ब्रह्मणः
शोषमतिरोहितार्थं अंतर्यामि अधिदैवादिषु तद्धर्मव्यपदेशात् स्वकर्मोपार्जितदेहं नेतान्स्वनियच्छयति छच्यादिश
रीरस्यनात्मानं तर्यामितां भजेत्। प्रवृत्तिनियमलक्षणं हि कार्यं चेतनस्य शरीरिणः स्वशरीरेंद्रियादौ वा शरीरेण वा
स्यादौ दृष्टं नाशरीरस्य ब्रह्मणो भवितुमर्हति न हि जातु वटांकुरः कुटजबीजाज्जायते तद्दने नजन्माद्यस्य यत इत्येतदूभ्या
क्षिप्तं वेदितव्यं तस्मात्परमात्मनः शरीरेंद्रियादिरहितस्यांतर्यामिता या असंभवात्प्रधानस्य वा पृथिव्याद्यभिमान
वतां वा देवतानां वा अणिमाद्यैश्वर्ययोगिनो वा जीवात्मनो वांतर्यामितास्यात् तत्र यद्यपि प्रधानस्यादृष्टत्वाश्रुतत्वान्मतता ६२

विंशत्यानि वसंति। तथा तस्याचेतनस्य द्रष्टृत्वश्रोतृत्वमंतृत्वविज्ञातृत्वानां श्रुतानामभावात्। अनात्मत्वाच्चैषत आ
त्मेति श्रुतिः श्रुतेरनुपपत्तेर्न प्रधानस्यांतर्यामिता यद्यपि पृथिव्याद्यभिमानिनो देवस्यात्मत्वमस्ति अदृष्टत्वादयश्च सह
द्रष्टृत्वादिभिरुपपद्यंते शरीरेंद्रियादियोगश्च पृथिव्येवयवस्यायतनमग्निर्लोको मनोज्योतिरित्यादिश्रुतेः। तथापि तस्य प्र
तिनियत मनाद्यः सर्वांल्लोकानंतरो यमयतीयः सर्वाणि भूतान्यंतरो यमयतीति श्रुतिविरोधादनुपपत्तेः। योगी तु य
द्यपि लोकभूतवशितया सर्वांल्लोकान्सर्वाणि च भूतानि नियंतुमर्हति तत्र तत्रानेकविधदेहेंद्रियादिनिर्माणेन
स एकधा भवति। स त्रिधा भवतीत्यादिश्रुतिभ्यः। तथापि जगद्व्यापारवर्जं प्रकरणादिति वक्ष्यमाणे यन्मोक्षविकारवि
षये विचारसिद्धानां व्यापाराभावात्सोऽपि नांतर्यामी तस्मात्तादृशोऽप्याज्जीव एव चेतनो देहेंद्रियादिमान्द्रष्टृत्वादिसंपन्नः स्वय
मदृश्यादिः। स्वात्मनि वृत्तिविरोधादन्यस्तत्र देहे नाशोऽप्यनाशात्। अन्यथा सुभिक्षकृतोपभोगाभावेन कृतविप्रणाशा
कृताभ्यागमप्रसंगात्। आत्मनि निष्ठितिति चाभेदेऽपि कथंचिद्भेदोपचारात्। स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीतिवत्।
यमात्मा न वेदेति च स्वात्मनि विरोधाभिप्रायं यस्यात्मा शरीरमित्यादि च सर्वस्वे महिम्नीति वचो जगीयं परिपुनरात्मनोऽपि नि
यंतुरन्यो नियंता प्रभवेत्। वेदितानेन तस्य स्वाप्न्यादृत्वनवस्थास्यात्सर्वलोकभूतनियंतृत्वं च आत्माभिप्रायं तस्माज्जीवा
त्मैवांतर्यामी न परमात्मेति। एवं प्राप्तेऽभिधीयते। देहेंद्रियादिनियमेनास्य देहेंद्रियांतरं। तत्कर्मोपार्जितं ते न दविद्यार्जितं
जगत् श्रुतिस्मृतीतिहासपुराणेषु तावत् अत्र भगवतः सर्वशक्तेः परमेश्वरस्य जगद्योनित्वमवगम्यते न तत्पृथग्जनसा
धारणानुमानाभासेनागमविरोधिना शक्यमपह्नोतुं तथा च सर्वविकारजातं तदविद्याशक्तिपरिणामः तस्य शरीरेंद्रि
यादिस्थानवर्नतयथायथ्यं पृथिव्यादिदेवतादिकार्यकारणैस्तान्वपृथिव्यादिदेवतादीन्नियच्छतीति नियंतृत्वानवस्थान

वाच० हि नियंत्रंतरं तेन न नियम्यते किंतु यो जीवो नियंता लोकसिद्धः परमात्मैवोपाध्यवच्छेदकल्पितभेदस्तद्व्याख्येयं तदितिअस
कृत्स्नवेदितं न नु कुतो नियंत्रंतरं कुतश्चानवस्थातथा च नान्योतोस्ति द्रष्टेत्याद्या अपि श्रुतय उपपन्नार्थाः परमार्थतोंतर्या
६३ मिणोन्यस्य जीवस्य द्रष्टुरभावात् अविद्याकल्पितजीवपरमात्मभेदाश्रयास्तु ज्ञातृज्ञेयभेदश्रुतयः। प्रत्यक्षादीनि प्रमाणा
नि संसारानुभवो विधिनिषेधशास्त्राणि च एवं चाधिदैवाधिष्ठैकस्यैवांतर्यामिणः प्रत्यभिज्ञानं समंजसं भवति यः स
र्वांल्लोकान्सर्वाणि भूतानीत्यत्र य इत्येकवचनमुपपद्यते। अन्यतत्त्वं च परमात्मनि समंजसं नात्र य आत्मनि तिष्ठन्
त्यादावभेदेपि भेदोपचारात्क्लेशो न भविष्यति तस्मात्परमात्मांतर्यामी न जीवादिरिति सिद्धं। पृथिव्यादिस्तनयित्नंतमधि
दैवं यः सर्वेषु लोकेषु इत्यधिलोकं यः सर्वेषु वेदेष्वित्यधिवेदं यः सर्वेषु भूतेष्वित्यधिभूतं यः प्राणादात्मांतमध्यात्मं
मंतव्या अप्रसिद्धत्वादित्युपक्रममात्रं पूर्वपक्षः। दर्शनादिक्रियायाः कर्तरि वृत्तिविरोधादिति कर्तरि आत्मनि वृत्ति
विरोधादित्यर्थः। अदृश्यत्वादिगुणको धर्मोक्तेः। अथ परा यया तदक्षरमधिगम्यते यत्तददृश्यं बुद्धींद्रियादिविषयः
अग्राह्यं कर्मेंद्रियगोचरः अगोत्रं कारणरहितं अवर्णं ब्राह्मणत्वादिहीनं। न केवलमिंद्रियाणामविषय इंद्रिया
ण्यप्यस्य न संतीत्याह अचक्षुःश्रोत्रमिति बुद्धींद्रियाण्युपलक्षयति अपाणिपादमिति कर्मेंद्रियाणि नित्यं विभुं प्रभुं
सर्वगतं सूक्ष्मं दुर्विज्ञानत्वात्। स्यादेतत् नित्यं सत्किं परिणामिनित्यं नेत्याह अव्ययं कूटस्थनित्यमित्यर्थः। परिणा
मो विवर्तो वा सरूपस्योपलभ्यते। चिदात्मनस्तु सारूप्यं जडं नानोपपद्यते जडं प्रधानमेवातो जग निःप्रतीयतां धो
योनिशब्दो निमित्तं चेत् कुतो जीवनिराक्रिया परिणामिमानं सरूपाः एव हि परिणामादृष्टा यथोर्णनाभिर्लालापरिणामा
लूतातंतवस्सरूपाः। तथा विवर्ता अपि वर्तमानं सरूपा एव न विरूपा यथा रज्जुविवर्ता धारोरगादयो रज्जुसरूपाः न जातु
६३

रज्जांकुर इति विपर्य संति न च हेमपिंडपरिणामो भवति लूतातंतुस्तत्कस्य हेतोः स्तंत वैरूप्यात् तस्मात्प्रधानमेव जडं
जडस्य जगतो योनिरिति युज्यते तस्य विकारान् श्रुतिरिति न रक्षरं यः सर्वज्ञः स सर्वविदिति वाक्षरात्परतः परस्मात्मानं अक्ष
रात्परतः पर इति श्रुतेः न हि परस्मादात्मनोर्वाग्विकारजातस्य च परस्मात्प्रधानादृते अन्यदक्षरं संभवति अतः प्रधा
नात्परतः परमात्मा सर्ववित् इति वाक्यांतरे भूतयोनिस्त्वक्षरं प्रधानमेव तच्च सांख्याभिमतमेवास्तु अथ तस्याप्रा
माणिकत्वान्न तत्र परितुष्यति अस्तु तर्हि नामरूपबीजशक्तिभूतं आ व्याकृतं भूतसूक्ष्मं प्रधीयते हि तेन विकारजातमिति
प्रधानं तत्खलु जडमनिर्वाच्यस्य जडस्य नामरूपप्रपंचस्योपादानं युज्यते सारूप्यात्। न तु चिदात्मा निर्वाच्यो विदूरो हि सः
अचेतनान्नाभिविभाव्यं सारूप्यप्रतिपादनपरं स्यादेतस्मात्प्रधाननिराकरणेनैवैतदपि निराकृतप्रायं न तु तोस्य शंकै
स्यत्त आह अपि च पूर्वत्रादृष्टत्वादिति सति बाधके स्थानाश्रयणं इह विद्याशक्तेरेव जगद्योनित्वसंभवेन द्वारद्वारिभा
वो युक्त इति प्रधानमेवात्र वाक्ये जगद्योनिरुच्यत इति पूर्वः पक्षः। अथ योनिशब्दो निमित्तकारणपरस्तथापि ब्रह्मैव नि
मित्तं न तु जीवात्मेति विनिगमनायां न हेतुरस्तीति संशयेन पूर्वः पक्षः। अत्रोच्यते अक्षरस्य जगद्योनिभावमुक्त्वा
अनंतरं यः सर्वज्ञ इति श्रुत्या सर्वज्ञत्वस्य उच्यते। तेन निर्देशसामान्यात्प्रत्यभिज्ञानतः स्फुटं अक्षरं सर्ववित्प्रयो
निनान्चेतनं भवेत्। अक्षरात्परत इति श्रुति सव्याकृतेमता। अश्रुतेयत्त्व कार्याणि तत्तो व्याकृतमक्षरं ते हि तिरो
हितमिवास्ति किंचित्। यत्तु सारूप्याभावान्नेह चिदात्मपरिणामः प्रपंच इति यद्वा विवर्तस्तु प्रपंचोयं ब्रह्मणोप
रिणामिनः अनादिवासनोद्भूतो न सारूप्यमपेक्षते। न खलु बाह्यसारूप्यनिबंधन एव सर्वो विभ्रम इति नियम
निमित्तमस्ति अंतरादपि कामक्रोधभयोन्मादस्वप्नादेर्मानसादपचारात्सारूप्यानपेक्षात्तस्यतस्य विभ्रमस्य दर्शनात्।

वा॰

६४

अपिचहेतुमनिविकमेनरभावादनुयोगोयुक्तनेत्थनाघविधानद्वासनाम्नवाहप्रतितस्तुनानुयोगमर्हतितस्मात्परमात्मवि
वर्तनयाप्रपंचस्ययोनिः भुजंगइवरज्जुविवर्तनयानयोनिः नतुतत्परिणामतयातस्मात्तद्धर्मसर्वविलोकोर्लिंगापत्तदृदे
श्यमित्यत्रब्रह्मैवोपदिश्यतेज्ञेयत्वेननतुप्रधानंजीवात्मावोपास्यत्वेनेतिसिद्धंनकेवलंलिंगादृश्यपितुपराविद्येतिसमाख्या
नादप्येतदेवप्रतिपत्तव्यमित्याह। अपिचद्वेविद्येइतिलिंगांतरमाह कस्मिन्नुभगवइति। भोगभोग्ययोर्व्यतिरिक्तो
भोक्तरि अवच्छिन्नोहिजीवात्माभोग्येभ्योविषयेभ्योव्यतिरिक्तइतितज्ज्ञानेननसर्वज्ञातंभवति। समाख्यांतरमाह।
अपिचसब्रह्मविद्यांसर्वविद्याप्रतिष्ठामितिप्लवाह्येतेअदृढायज्ञरूपाअष्टादशोक्ति। प्लवंतेगच्छंतिअस्थिराइतिप्लवाः
तेअतएवादृढाः केतेयज्ञरूपाः रूप्यतेनेनेतिरूपंयज्ञोरूपमुपाधिर्येषांतेयज्ञरूपाः तत्रषोडशर्त्विजः। ऋतुय
जनोपाधिनाऋत्विक्शब्दः प्रवृत्तइतियज्ञोपाधयऋत्विजएवंयजमानोपियज्ञोपाधिरेवएवंपत्नीपत्युर्नोयज्ञसंयोग
इतिस्मरणात्। तएतेअष्टादशयज्ञरूपायेष्ववरंकर्मयज्ञःयदाश्रयोपवरइत्यर्थः तच्चकर्मावरंस्वर्गाद्यवर
फलत्वात् अपियंतिप्राप्नुवंति। नहिदृष्टांतदार्ष्टांतिकयोरिक्तोर्स्तुभिप्रायं। विशेषणभेदव्यपदेशाभ्यांचनेतरौ। वि
शेषणंहेतुंव्याचष्टे विशिनष्टिहीति। शारीरादिसुपलक्षणंप्रधानादिलपिद्रष्टव्यंभेदव्यपदेशंव्याचष्टेतथाप्रधानात्पी
ति। स्यादेतत्किमागमिकंसांख्याभिमतंप्रधानंतथाचवह्वसमंजसंस्यादित्यतआह। नात्रप्रधानंनामकिंचिदिति।
सर्वोषन्यान्याच्चनदेनत्परमतेनाक्षेपसमाधानाभ्यांव्याख्यायस्वमतेनव्याचष्टेअन्येपुनर्मन्यंतइति। पुनःशब्दोपिपूर्व
स्माद्विशेषंद्योतयन्स्वेष्टतांसूचयति। जायमानमध्यपतितस्याग्निमूर्धादिरूपवतःसतिजायमानत्वसंभवेनाक
स्माज्जनकत्वकल्पनंयुक्तंप्रकरणंस्वत्वेनादिभूयोनेः सन्निधिश्चजायमानानांसन्निवेश्यप्रकरणंचवाधपइतिजाय ६४

मानपरित्यागेनविश्वयोनेरेवप्रकरणिनोरूपाभिधानमितिवेनानप्रकरणिनः। शरीरेंद्रियादिरहितस्यविग्रहवत्वविरोधात्।
नचैतावतामध्यादिश्रुतयःप्रकरणविरोधात्स्वार्थत्यागेनसर्वात्मतामात्रपराइतियुक्तं। श्रुतेरसंतविप्रकृष्टार्थत्वप्रकरणाद्ब
लीयस्त्वात्। सिद्धेचप्रकरणिनोसंबंधेजायमानमध्यपतितत्वंजायमानग्रहणेकारणमनुपपन्नत्वंभाष्यकृता॥तस्माद्धिरण्यग
र्भएवभगवान्प्राणात्मनासर्वभूतांतरःकार्योनिर्दिश्यतेइतिसांप्रतं॥ तत्किमिदानींसूत्रमनवधेयमेवनेत्याह॥ अस्मिन्प
क्षदतिप्रकरणात्। वैश्वानरः साधारणशब्दविशेषात्। प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलासमेत्य मीमांसांचक्रुः
कोनआत्माकिंब्रह्मेति। अत्मेत्यु केजीवात्मनिप्रत्ययोमाभूदितउक्तं। किंब्रह्मेति। तेचमीमांसमानानिश्चयमनधिगच्छं
तः। केकेयराजंवैश्वानरविद्याविदमुपसेदुः। उपसद्यचोचुः आत्मानमेवेमंवैश्वानरंसंप्रत्यध्येषितस्मरसितमेवनो
ब्रूहीत्युपक्रम्यद्युसूर्यवाय्वाकाशवारिपृथिवीनामिति। अयमर्थः। वैश्वानरस्यभगवतोमूर्द्धासुतेजाःचक्षुर्विश्व
रूपः सूर्यः प्राणोवायुःपृथग्वर्त्माआपृथग्वर्त्मयस्यवायोःसपृथग्वर्त्मासएवात्माप्राणोयस्यसपृथग्वर्त्मात्मासंदेहोदेह
स्यमध्यभागः। सआकाशोबहुलः सर्वगतत्वाद्बस्तिरेवरयिः आपःयतोन्नोन्नमन्नाच्चरयिः धनंतस्माद्यपोरयिरुक्ताः
तासांचमूत्रीभूतानांबस्तिःस्थानमितिबस्तिरेवरयिरित्युक्तंपादौपृथिवीतत्रप्रतिष्ठानात्। तदेवंवैश्वानरा वयवे
षुद्युसूर्यानिलाकाशजलावनिषुमूर्धचक्षुःप्राणसंदेहबस्तिपादेष्वेकैकस्मिन्वैश्वानरबुद्ध्याविपरीतत्वोपासकानां
प्राचीनशालादीनांमूर्धपातचक्षुरांध्यप्राणोत्क्रमणदेहशीर्णतावस्तिभेदपादश्रोणीभावदूषणैरुपासनानांनिंदयामूर्धादि
समस्तभावमुपदिश्याम्नायते। यस्त्वेतमेवंप्रादेशमात्रमभिविमानमिति। ससर्वेषुलोकेषुद्युप्रभृतिषुस्थावरजंगमेषुस
र्वेष्वात्मसुदेहेंद्रियमनोबुद्धिजीवेष्वन्नमत्तीतिसर्वसंबंधिफलमाप्नोतीत्यर्थः। अथास्यवैश्वानरस्यागोभूभोजनस्याग्निहोत्रतां

ब्र॰

६५

पिणारविषयाहश्रुतिः उरएववेदिः वेदिसारूप्यात् लोमानिबर्हिः आकीर्णबर्हिःसारूप्यात् हृदयं गार्हपत्यः हृदयानंतरं मनोन्वा
हार्यपचनः आस्यमाहवनीयः तत्रहि तदन्नं हूयते। ननु कोनआत्मा किंब्रह्मेत्युपक्रमे आत्मब्रह्मशब्दयोः परमात्मनि रूढ
त्वेन तदुपक्रमार्यविरुद्धो वैश्वानरासाधारणः शब्दास्तदनुरोधेन परमात्मनेव कथंचिन्नेतुं युक्तं तेन तु प्रथमावगतौ ब्रह्म
त्वशब्दौ चरमावगतवैश्वानरादिपदानुरोधेनान्यथा नेतुं युज्यते यद्यपि चवाजसनेयिनां वैश्वानरविद्योपक्रमे वैश्वा
नरं ह वै भगवान् संप्रति वेद तन्नो ब्रूहीत्यत्र नात्मब्रह्मशब्दौ तथापि नह्यमानार्थछांदोग्यवाक्यं तदुपक्रममिति चेन्नानि
श्चितार्थेन तद्विरोधेन वा असतोपि वाक्यार्थो निश्चीयते निश्चितार्थे नह्यनिश्चितार्थं व्यवस्थाप्यते नानिश्चितार्थेन
निश्चितार्थंकर्मविच ब्रह्मापि सर्वशाखाप्रत्ययं एकमेव तत्र द्युमूर्धत्वादिकं जाठरभूतानि देवताजीवात्मनां अन्यत
मस्यापि संभवतिनचसर्वलोकाश्रयफलभागित्वं नच सर्वपाप्मप्रदाह इति परिशेष्यात् परमात्मैव वैश्वानर इति नि
श्चिते कुतः पुनरियमाशंका शब्दादिभ्यो न्तः प्रतिष्ठानाच्च नेति चेदिति उच्यते तदेवोपक्रमानुरोधेनान्यथानीयते यन्नेतुं
शक्यो अशक्यश्च वैश्वानराग्निशब्दौ अन्यथा नेतुमिति शंकितुरभिमानः अपिच अंतः प्रतिष्ठितत्वं प्रादेशमात्रत्वं च न
सर्वव्यापिनोपरिमाणस्य ब्रह्मणः संभवतः नच प्राणाहुत्यधिकरणत्वं नान्यत्र जाठराग्नेर्युज्यते नच गार्हपत्यादिहृद
यादित्वं ब्रह्मणः संभवतीति तस्माद्यथा योगं जाठरभूताग्निदेवताजीवानामन्यतमो वैश्वानरो न तु ब्रह्म तथाच ब्रह्मात्म
शब्दानुपक्रमगतावप्यन्यथा नेतव्यौ द्युमूर्धत्वादयश्च स्तुतिमात्रं अथवा अग्निशरीरायादेवतायाऐश्वर्ययोगात् द्युमू
र्धत्वाद्यप्युपपद्येतेदृत्तिशंकितुरभिसंधिः अत्रोत्तरं कुतः तथाव्युपदेशात्। अत्राचरमभमन्यथासिद्धं प्रथमाव
गतमन्यथेति नत्वचरमस्यानन्यथासिद्धिः प्रतीकोपदेशो न वा मनो ब्रह्मेतिवत् तदुपाध्युपदेशो न वा मनोमयः प्राणश

६५

रीरो भारूप इतिवदुपपत्तेः। भुक्तस्यावा वैश्वानराग्निशब्दयोः ब्रह्मवचनत्वाद्वान्यथासिद्धिः तथाच ब्रह्माश्रयस्य प्रत्यय
स्याश्रयांतरे जाठरवैश्वानरारूपे क्षेपेण जाठरवैश्वानरोपाधिनि वा ब्रह्मण्युपास्ये वैश्वानरधर्माणां ब्रह्मधर्माणां च समा
वेशाउपपद्यते। असंभवादिति। सूत्रावयवमाचष्टे यदि चेह परमेश्वरो न विवक्ष्यते तिपुरुषमपि चैनमधीयत इति सूत्राव
यवं आचष्टे यदि केवलएवेति। न ब्रह्मोपाधितया नापि प्रतीकतयेत्यर्थः। नकेवलमंतः प्रतिष्ठं पुरुषमपीत्यप्यर्थः। अ
तएव पुरुष इति पुरुषमन्वयन वैश्वानरो विधीयते तथासति पुरुषे वैश्वानर दृष्टिरुपदिश्येत एवं च परमेश्वरदृष्टिर्हि
जाठरे वैश्वानरोपदिनियरः ह्यर्दणसंबंधः पुरुषइतितुनत्रदृष्टेरुपदेशादितियुक्तं अतएव न देवताभूतं च अत एव
वोक्तेभ्यः श्रुत्युक्तस्य व्यगतद्युमूर्धत्वादिसंबंधः सर्वलोकाश्रयफलभागित्व सर्वपाप्मप्रदाहात्मब्रह्मपदोपक्रमेभ्यो हे
तुभ्य इत्यर्थः। यो भानुनापृथिवीं द्यामुतेमामिति मंत्रवर्णोपि न केवलौष्ण्यप्रकाशविभवमात्रस्य भूताग्नेरिममीदृशं
महिमानमाह। अपितु ब्रह्मविकारतया तादृश्येणेतिभावः। साक्षादप्यविरोधं जैमिनिः। यत्प्रकृतं मूर्धादिषु चुबुकां
तेषु पुरुषावयवेषु द्युप्रभृतीन् पृथिवीपर्यंतान् त्रैलोक्यात्मनो वैश्वानरस्यावयवान् संपाद्य पुरुषविधत्वं कल्पितं तदभि
प्रायेणेदमुच्यते पुरुषविधं पुरुषेंतः प्रतिष्ठितत्वं समुदायमभ्यपतितं तज्ञरवयवानां समुदायिनां अत्रैव निदर्शनमाह। य
थावृक्षेशाखामिति। शाखा कांडमूलस्कंद समुदाये प्रतिष्ठिताः शाखा तन्मध्यपतिता भवतीत्यर्थः समाधानांतरमाह।
अथवेति। अंतः प्रतिष्ठत्वं माध्यस्थं तेन साक्षित्वं लक्ष्यते एतदुक्तं भवति वैश्वानरः परमात्मा चराचरसाक्षित्वेन द्रष्टृत्वपि
णो नु शायमुन्नूलयति निश्चितेति विश्व। अकृत्वादेश्वानरः प्रत्यगात्मा विश्वेषां वायं नरस्त्वाद्विकारत्वाद्विश्वप्रपंचस्य वि
श्वेनरपवा जीवात्मनो यस्य तादात्म्येनेति। अभिव्यक्तेरित्याश्मरथ्यः साकल्येनानुपलंभाद्दुपासकानां अनुग्रहायानंतोपि

वाच. परमेश्वरः प्रादेशमात्रमात्मानमभिमन्यत इत्याह अतिमात्रस्यापि अति अतिक्रांतो मात्रां परिमाणमतिमात्रः उपासकानां
६६ कृते उपासकार्थमितियावत्। व्याख्यांतरमाह प्रदेशेष्वपि वेति। संपत्तेरिति जैमिनिः। मूर्धानमुपक्रम्य चुबुकांतो हि कायप्रदेशः
प्रादेशमात्रः तत्रैव त्रैलोक्यात्मनो वैश्वानरस्यावयवान् संपादयन् प्रादेशमात्रं वैश्वानरं दर्शयति। अत्रैव जाबालश्रुति
संवादमाह सूत्रकारः। आमनंति चैनमस्मिन् अविमुक्ते अविद्योपाधिकल्पितावच्छेदे जीवात्मनि सर्वत्वविमुक्तः तस्मिन् प्र
तिष्ठितः परमात्मा तादात्म्यात्। अत एव श्रुतिः अनेन जीवेनात्मनेति। अविद्याकल्पितं तु भेदमाश्रित्याधाराधेयभाववर्
णाभ्रूः घ्राणमतिरोहितार्थं ॥ इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभाष्यविभागे भामत्यां प्रथमस्याध्यायस्य द्वितीयः पादः॥

॥ ॥ ॥ द्युभ्वाद्यायतनं स्वशब्दात्। इदं ज्ञेयत्वेन ब्रह्मोपक्षिप्यते ॥ ॥ ॥ ॥

ननु पारवत्त्वेन सेतुत्वाद्भेदव्यपदेशतः। द्युभ्वाद्यायतनं नाम्नं ब्रह्म कर्हिचित्। परावरमध्यगोऽपि हि सेतुस्ताभ्यामवच्छिद्यमा
नो विधारको लोके दृष्टो न तु बंधहेतुमात्रं हिंगनिगडादिषु प्रयोग प्रसंगात्। न चानवच्छिन्नं ब्रह्म सेतुभावमनुभवति। न चा
मृतस्य ब्रह्मामृतस्य सेतुरिति युज्यते न च ब्रह्मणोऽन्यदमृतमस्ति यस्य स सेतुः स्यात् न चाभेदे षष्ठ्याः प्रयोगो दृष्टः सर्वः तदि
दमुक्तममृतस्यैष सेतुरिति श्रवणादिति। अमृतस्येति श्रवणात् सेतुरिति श्रवणादिति योजना। तत्रामृतस्येति श्रवणा
दिति विशदतया न व्याख्यातं तथा च पारवत्त्वममृतव्यतिरिक्ते सेतुत्वश्रियमाणे प्रधानं वा सांख्यपरिकल्पितं भवेत्। तत्खलु
स्वकार्यपरिहितमर्यादतया पुरुषं यावद्गच्छद्भवति पारवत्। प्रकृत्यायतनत्वाच्च विकाराणां भवति चास्मादात्मशब्दस्य स्वभा
ववचनत्वात् प्रकाशात्मा प्रदीप इति न भवति चास्य ज्ञानमपवर्गोपयोगि तदभावे प्रधानादिवेकेन पुरुषस्यानवधारणात्
वर्गानुपपत्तेः यदि त्वमस्मिन्प्रमाणाभावेन न परितुष्यसि अस्तु तर्हि नामरूपबीजशक्तिभूतं अव्याकृतं भूतसूक्ष्मं द्युभ्वाद्यायतनं

६६

तस्मिन्नप्रामाणिके सर्वस्य लोकस्योपपत्तेः येतदपि प्रधानोपन्यासेन सूचितं अथ तु सांख्यपुरुषं द्युभ्वाद्यायतनमाद्रियसे तन्नो
वायुरेवास्तु वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंतीति श्रुतेः। यदि त्वमश्रद्धा
भिधेयत्वं तद्विपन्ने न प्रातिव परितुष्यसि अस्तु तर्हि शारीरः तस्य भोक्तृभोग्यात्मकप्रपंचं प्रत्यायतनत्वात् यदि पुनरस्य द्युभ्वाद्याय
तनस्य सर्वज्ञत्वश्रुतेरत्रापि न परितुष्यसि भवतु भगवान् हिरण्यगर्भ एव भगवान् सर्वज्ञः सूत्रात्मा द्युभ्वाद्यायतनं तस्य हि कार्यत्वेन पा
रवत्त्वं चामृतात् परब्रह्मणो भेदश्चेत्यादि सर्वमुपपद्यते। अयमपि वायुना वै गौतम सूत्रेणेति श्रुतिमुपन्यस्यता सूचितः
तस्माद्यथाप्रसक्ती नामायतनमिति ब्रूते प्राप्ते अभिधीयते द्युभ्वाद्यायतनं परं ब्रह्मैव न प्रधानात्मकवायुशारीरहिरण्यग
र्भाः कुतः स्वशब्दात्। धारणादमृतत्वस्य साधनाद्वास्य सेतुता। पूर्वपक्षेऽपि मुख्यार्थः सेतुशब्दो हि नेष्यते। न हि मृद्दास
द्दारुमयो मूर्तः पारावारमध्यवर्ती पाथसां विधारको लोकसिद्धः प्रधानं वा आकूतं वा वायुर्वा जीवो वा सूत्रात्मा वाभ्युपपद्यते किं
तु पारवत्तिमात्रपरो लाक्षणिकः सेतुशब्दोऽभ्युपेयः सोऽस्माकं धारकत्वाद्विधारणत्वमात्रेण योगमात्राद्भूरिं परित्यज्य व
र्त्यसेति जीवानाममृतत्वप्राप्तिसाधनत्वं वात्मज्ञानस्य पारवत्तरवस्य इति। अमृतशब्दश्च भावप्रधानो यथा द्वैक
यो द्विवचनैकवचने इत्यत्र द्वित्वैकत्वे ह्येकशब्दार्थविवक्षायां केचिदिति स्यात्तदिदमुक्तं भाष्यकृता अमृतत्वसाधनत्वा
दिति तथा चामृतस्येति सेतुरिति ब्रह्मणि द्युभ्वाद्यायतन उपवेश्यते। अत्र च स्वशब्दादिति तं न्नोचरितं आत्मशब्दादिति सहा
यतनादिति सशब्दात् ब्रह्मशब्दादिति च सूचयति सर्वत्वे स्वस्वशब्दाः स्युरेतत्। आयतनायतनवद्भावः सर्वं ब्रह्मेति
च समानाधिकरण्यं हिरण्यगर्भे तिच परमुपपद्यते। तथा च सर्वगतोऽस्यामृतस्य सेतुरित्याशंक्य श्रुतिवाक्येन साधारणेनो
त्तरमाह तत्रायतनायतनवद्भावश्रवणादिति विकाररूपेऽनृतेऽनिर्बंधेऽभिसंधानं यस्य स तथोक्तः ये इदमपञ्चं संसारमभिमन्यमानं

Dr. BHAU DAJI MEMORIAL

वा॰ ६७

इतियावत् नस्यापवादोदोषः श्रयनेम्सोरिति। सर्वं खल्विति लिंगियत्सर्वमविद्यायोपि तं सत्परमार्थतो ब्रह्मैव नतु यद्दृश्यते तत्सर्व
मित्यर्थः। अपरआहेति। नात्र द्युभ्वाद्यायतनत्वेनेति सेतुनोच्यते येनापारवत्त्वं स्यात्। किंतु जानथेति यत्र ज्ञानं प्रकीर्तितं यश्चवा
चोविमुक्तोथेति वाग्विमोकत्वसाम्यत्वस्य साधनत्वेन सेतुतोक्ते तत्त्वोभयमपि पारंवरे च नच प्राधान्यादेवमुत्तरसर्वनाम्नाद्यु
भ्वाद्यायतनमात्मैव परामृश्यते न तु तत् ज्ञानवाग्विमोचनात्मज्ञानवाग्विमोचनेनिसांभवं वाग्विमोचनोत्मज्ञानभावबोरे
वविधेयत्वेन प्राधान्यात्। आत्मनस्तु द्युभ्वाद्याधारतयाविधेयत्वात् विधेयस्याधारस्यैव पारवत्वोमतत्वसाधनत्वात् त्वेद
नेकांतिकं यस्तु साधनमेव सर्वनाम्ना परामृश्यते कश्चिद्योग्यतया प्राधान्यमुत्सृज्य योग्यतया गुणेपि परामृश्यते। मुक्तोपसृ
प्यव्यपदेशात्। द्युभ्वाद्यायतनं प्रकृत्याविद्यादिदोषमुक्तैरुपसृप्यं व्यपदिश्यते भिद्यते हृदयग्रंथिरित्यादिना। तेन तत्
द्युभ्वाद्यायतनविषयमेव ब्रह्मलक्षणममुक्तोपसृप्यत्वं यदा सर्वे प्रमुच्यंत इत्यादौ श्रुत्यंतरे प्रसिद्धं तस्मात् मुक्तोपसृप्यत्वात्।
द्युभ्वाद्यायतनं ब्रह्मेति निश्चीयते। हृदयग्रंथिश्चाविद्यारागद्वेषभयमोहाः मोहश्च विपर्ययः शोकः परं हिरण्यगर्भादिकं
यस्माद्ब्रह्म तथोक्तं तस्मिन् ब्रह्मणि यद्दृष्टे दर्शनं तस्मिन्नदर्शमित्यावत्। यथात्कर्माणि दीपिनं हंतीति भाष्यमिति
गम्यते नामरूपादिभ्य अविद्याभिप्रायं कामायेस्य हृदिश्रिता इति कामाद्यस्य विद्यामुपलक्षयति। नानुमानमतच्छब्दा
त्। ॥ नानुमानमित्यत्र लक्षणं नाप्याकृतमित्यपि द्रष्टव्यं हेतोरुभयत्रापि साम्यात्। प्राणभृच्च। चेनातच्छब्दत्वं
हेतुरनुकृष्यते स्वयं च भाष्यकृद्धेतुमाह न चोपाधिपरिछिन्नस्येति न सम्यं भवतीनां च सर्वमित्यर्थः भोग्यत्वेन द्यायतन
त्वमिति क्लिष्टं। स्यादेतत् यथा तत्पुष्यादित्यत्रापि हेतुरनुकृष्टो हंतकस्मात् पृथग्योगकरणं यावता न प्राणभृदनुमाने
इत्येक एव योगः। कस्मान्नकृत इत्यत आह पृथगिति। भेदव्यपदेशादित्यादिनाहि प्राणभृद्देव निषिध्यते न प्रधानं

६७

न चैकयोगकरणे दुर्विज्ञानं स्यादिति प्रकरणात्। न खलु हिरण्यगर्भादिषु ज्ञातेषु सर्वज्ञानं भवति किंतु ब्रह्मण्येवेति॥ ॥
स्थित्यदनाभ्यां च। यदि जीवो हिरण्यगर्भो वा द्युभ्वाद्यायतनं भवेन्नतत्प्रकृत्या चश्च नन्यो अभिचाकशीति परमात्माभि नी
धानमाकस्मिकं स्यान्नचेद्धिरण्यगर्भ उदासीनत्वस्यापि भोक्तृत्वात्क्व जीवात्मैव द्युभ्वाद्यशीति परमात्माभिधानं द्युभ्वा
द्यायतनं तथा च सप्रवात्र कथ्यते न कथयायत्र ब्रह्मापि कथ्यते अन्यथा सिद्धांतेपि जीवात्म कथनं आकस्मिकं स्या
दिति वाच्यं यतोनधिगतार्थविबोधनत्वरसेनाम्नायेन प्राणभृन्मात्रप्रसिद्धजीवात्माधिगमायात्मतानवगतात्मलौकि
कं ब्रह्मावबोधयेदिति न्यकृतं यदपि पैंगुपनिषदि कृतेन व्याख्यातेनेति। तत्र ह्युत्तमं मंत्रं अन्यो अभिचाकशीतिजी भ
वउपाधिरहितेन रूपेण ब्रह्मस्वभाव उदासीनो अभोक्ता दर्शितः। तदर्थमेवाचेनेनत्स्यद्युदित्सत्वस्यापारमार्थिकं भोक्तृ
त्वमुक्तं चेत्थमुक्तं जीवं कथयतानेन मंत्रवर्णेन द्युभ्वाद्यायतनं ब्रह्मैव कथितं भवति उपाधिवच्छिन्नजीवः प्रतिषिद्धो
भवतीति न पैंगिब्राह्मणविरोध इत्यर्थः। अयं वार्थ इति। तत्त्वमध्येनपाठितमित्युक्ताविंतये द्युभ्वाद्यमधिकरणं प्रक
रणमित्यर्थः। भूमासंप्रसादादध्युपदेशात्। ॥ नारदः खलु देवर्षिः कर्मविदनात्मवित्तयाशोच्यमात्मानं मन्यमानो
भगवंतमाजानसिद्धं महायोगिनं सनत्कुमारमुपससाद उपसद्यो वाच भगवन्नात्मज्ञताजनितशोकसागरपा
रमुत्तारयतु मां भगवानिति तदुपश्रुत्य सनत्कुमारेण नाम ब्रह्मोपास्येत्युक्ते नारदेन पृष्टं किं नाम्नोस्तिभूय इति तत्र
सनत्कुमारस्य प्रतिवचनं वाग्वाव नाम्नो भूयसीति तदेवं नारदसनत्कुमारयोर्भूयसीप्रश्नोत्तरे वागिंद्रियमुपक्रम्य म
नः संकल्पचित्तध्यानविज्ञानबलान्नतोयवायुहितेजोनभः स्मराशाप्राणेषु पर्यवसिते कर्ता आकर्ता अविवेकः।

वान०

६८ संकल्पस्तस्य कारणं पूर्वापरविषयनिमित्तप्रयोजननिरूपणं चित्तं स्मरः स्मरणं प्राणस्तु समस्तक्रियाकारकफलभेदस्य पित्राद्या
त्मके नचप्रश्नप्रतानाभिदर्शनेन सर्वप्रतिष्ठात्वेन च प्राणभूयस्त्वदर्शिनोऽतिवादित्वेन चा नामादिप्रपंचादाशांतान्भूयस्त्वमुक्त्वा
पृष्टएव नारदेन सनत्कुमार एकग्रंथे नएषतु वा अतिवदति यः सत्येनातिवदतीत्यस्यादिकं निपर्यन्तात् तु उक्तोपदिदेश
सुखं त्वेव विजिज्ञासितव्यमिति न तु पप्रच्छ स नारदेन सुखं भगवो विजिज्ञास इत्युक्ते सनत्कुमारो यो वै भूमा तत्सुखमित्यु
पक्रम्य भूमानं मुलादयांबभूव यत्र नान्यत्पश्यतीत्यादिना तदिदं विषये विवाद आरभ्यते तत्र संशयः किं प्राणो भू
मा स्यादाहो परमेश्वर इति भावभविन्नोत्साहात्स्य विप्रस्य सामानाधिकरण्यं संशयस्य बीजमुक्तं भाष्यकृता तत्र एतस्मिन्नं
थसंदर्भे यदुक्ता भूयसोन्यतः उच्यमानं तु न भूयउच्यते प्रश्नपूर्वकं नचप्राक्किं भूयइति पृष्ठ नापि भूमा स्मा भूयानि
ति प्रत्युक्तं तस्मात्प्राणभूयस्त्वाभिधानानंतरं अपृष्टेन भूमोच्यमानः प्राणस्यैव भवितुमर्हति अपिच भूमेति भावो न चावि
तारमंतरेण शक्नोति रूपयितुमिति भवितारमपेक्षमाणः प्राणसानंतर्येण बुद्धिसंनिधानमेव भवितारं प्राप्य निर्द्धेनेतिय
स्तोभयं हविरार्तिमार्छेदित्यार्तिरिवार्तं हविर्यथाहुः मच्छ्यामहे हविषा विशेषेणमिति न चालनः कारणादात्मैन बुद्धिस्थितर्
नितस्यैव भूमा स्यादिति युक्तं सनत्कुमारस्य नामब्रह्मेत्युपास्वेति प्रतिकोपदेशरूपेणोत्तरेण नारदप्रश्नस्यापि तद्विषयत्वेन
परमात्मोपदेशप्रकरणत्वानुपलानात् अतद्विषयत्वे चोभरस्य प्रश्नोत्तरयोर्वैयधिकरण्येन विप्रपत्तेरप्रामाण्यप्रसंगात्
तस्मादस्मिन्प्रकरणे प्राणस्यानंतर्यतिस्यै भूमेत्युक्तं तदेतत्संशयबीजं दर्शयति भाष्यकारेण सूचितं पूर्वपक्षसाध
नमिति। पुनरुक्तं नभूयो भूयः प्रश्नात्परमात्मैवहानारदेन जिज्ञासितं युक्तमिति। प्राणोपदेशानंतरं तस्योपरमात्तत
देवं प्राण एव भूमेति निश्चिनेयधनहिरोधिआप्यततः अतिप्रानितत्तदनुगुणनयानेयं नियंतं च भाष्यकृतास्यादेतत्। एष ६८

तुवा अतिवदतीति तुशब्देन प्राणदर्शिनोऽग्निहोत्रिणो व्यवच्छिद्य सत्येनातिवादित्वं वदन्नकथं प्राणस्य भूमानमभिदधीत लनआह।
प्राणमेवक्तिनि प्राणदर्शिनस्यातिवादित्वमिति नामाद्याशांतमतीत्यैभपरिलज्ञ [illegible] तु नारदेन तु उच्यते स्यैव प्राणस्य सत्यस्यश्रद्धा
×वदनशीलत्वमित्यर्थः एतदुक्तं भवति नायं तु शब्दः प्राणातिवादित्वाद्व्यवच्छिनत्ति अपितु तदति वादित्व × निष्टादिभिर्विज्ञा
नायति अपायसत्येनातिवदतीति प्राणव्रतमेवादित्वमुच्यते तु शब्देनामाद्यतिवादित्वादव्यवच्छिनत्ति न नामाद्याशांतवाद्यतिवा
दी अपितु सत्यप्राणवाद्यतिवादीत्यर्थः। अत्र चागमाचार्योपदेशाभ्यां सत्यस्य श्रवणं अथागमाविरोधिन्यायनिवेशनं म
ननं मत्वा च गुरुशिष्यसब्रह्मचारिभिरनुसूयभिः सह संवादयनतन्त्वं श्रद्धानंतरं च विषयांतरदोषदर्शी विरक्तः ततो
न्यावृत्तस्तत्त्वध्यानाभ्यासं करोति सेयमस्य कृतिः प्रयत्नः अथ तत्त्वध्यानाभ्यासनिष्ठो भवति यदनंतरमेव तत्त्वविज्ञान
मनुभवः प्रादुर्भवतीति देतद्दाह्या … आहुः भूतार्थभावनाप्रकर्षपर्यंतजं योगिज्ञानमिति भावनाप्रकर्षपर्यंतो निष्ठा तस्मा
न्नायुनैत त्वानुभवः तस्मात्प्राण एव भूमेति प्राप्ते अभिधीयते एषतु वा अतिवदति यः सत्येनातिवदतीत्युक्त्वा भूमोच्यते।
मत्व
तत्र सत्यं परमार्थे निरूढवृत्तिः श्रुत्या परमार्थमाह परमार्थश्च परमात्मैव ततो ह्यन्यत्सर्वं विकारजातमनृतं कयाचिदपे
क्षया कथंचित्सत्यमुच्यते तथाच एषतु वा अतिवदति यः सत्येनातिवदतीति लक्षणेनातिवादित्वं श्रुत्यान्यतिरपेक्षया लिंगा
दिभ्यो बलीयस्या बलगमितं कथमिव संनिधानमात्रात् श्रुत्याद्यपेक्षाद्दतिदुर्बलात् कथंचित्प्राणविषयत्वेन शक्यं व्याख्यातुं एवं च
प्राणादूर्ध्वं प्रलक्षणो भूमावगम्यमानो न प्राणविषयो भवितुमर्हति किंतु तत्त्वस्य परमात्मन एवं चानात्मविद आत्मानं वि
दिषोर्नारदस्य यस्ते परमात्मनमेव श्रेयस्यैव आत्मास्वामीत्यभिसंधिमान्सनत्कुमारः सोपानारोहणन्यायेन नस्थूलादीनाभ्य
नभ्रमधुराधीनं क्रमेण भूमानमिति दुर्ज्ञानत्वात्परमसूक्ष्मं मुत्पादयामास न च प्रश्नभ्रद्धेत्प्राप्राणपतितेनोत्तरेण सर्वेण प्रश्न

वान॰ संकल्पस्य कारणं पूर्वापरविषयनिमित्तप्रयोजननिरूपणं चित्तं स्मरः स्मरणं प्राणस्य च समस्तक्रियाकारकफलभेदपित्राद्या
६८ त्मत्वे न च प्रश्नानभिहितं तेन सर्वप्रतिष्ठात्वेन च प्राणभूयस्त्वदर्शिनोऽतिवादित्वेन चानामादिप्रपंचाद्याशांतानां भूयस्त्वमुक्त्वा
पृष्टएव नारदेन सनत्कुमारः एकग्रंथेन एष तु वा अतिवदति यः सत्येनातिवदतीत्यादिकृतिपर्यंतानुक्तोपदिदेश
सुखं त्वेव विजिज्ञासितव्यमिति तदुपश्रुत्य नारदेन सुखं भगवो विजिज्ञास इत्युक्ते सनत्कुमारो यो वै भूमा तत्सुखमित्यु
पक्रम्य भूमानं सुतारयांबभूव यत्र नान्यत्पश्यतीत्यादिना तद्दिदृश्यविषये विचार आरभ्यते तत्र संशयः किं प्राणो भू
मा स्यादाहो परमेश्वरेति भावः भवितोत्सादात्म्य विग्रहस्यासामानाधिकरण्यं संशयस्य बीजमुक्तं भाष्यकृता तत्र एतस्मिन्ग्रं
थसंदर्भे यदुक्ता भूयस्त्वेन ततः उच्यमानं तु तद्भूय उच्यते प्रश्नपूर्वकं न च प्राक् किं भूय इति पृष्टं नापि भूमा स्मा भूयानि
ति प्रत्युक्तं तस्मात्प्राणभूयस्त्वाभिधानानंतरं अपृष्टेन भूमोच्यमानः प्राणस्यैव भवितुमर्हति अपि च भूमेति भावो न भावि
तारमंतरेण शक्नोति रूपयितुमिति भवितारमपेक्षमाणः प्राणसान्निध्यात्तेन बुद्धिं सान्निध्यानमेव भवितारं प्राप्य निर्वर्णोतिय
स्याभयं हविरार्तिमार्छेदित्यत्रार्तिरिवार्तहविर्यथाहुः लप्स्यामहे हविषा विशेषणमिति न चात्मनः कारणादात्मैव बुद्धिस्थितइ
ति तस्यैव भूमात्वादिति युक्तं सनत्कुमारस्य नाम ब्रह्मेत्युपास्वेति प्रतिकोपदेशरूपेणोत्तरेण नारदप्रश्नस्यापि तद्विषयत्वेन
परमात्मोपदेशप्रकरणस्यानुत्थानात् अतद्विषयत्वे चोभयोः प्रश्नोत्तरयोर्वैयधिकरण्येन विप्रपत्तेरप्रामाण्यप्रसंगात्
तस्मादसति प्रकरणे प्राणस्यानंतर्यात्तस्यैव भूमेति युक्तं तदेतत्संशयबीजं दर्शयता भाष्यकारेण सूचितं पूर्वपक्षसाध
नमिति। पुनरुक्तं नव भूयो भूयः प्रश्नात्परमात्मैव हि नारदेन जिज्ञासितं युक्तमिति। प्राणोपदेशानंतरं तस्योपरमात्तु
दे च प्राण एव भूमेति स्थितेऽयं घनच्छिरोधिआपाततः प्रतिभातितत्तदनुगुणतयानेयं नियंतं च भाष्यकृता स्यादेतत्। एष
६८

तु वा अतिवदतीति तु शब्देन प्राणदर्शिनो गतिवादिनो व्यवच्छिद्य सत्येनातिवादिनं वदन्कथं प्राणस्य भूमानमभिदध्यात् तत्राह।
प्राणमेव लिति प्राणदर्शिनस्यातिवादित्वमिति नामाद्याशांतमतीत्यैमपरिलक्ष्य तु नाद्यनुरूपतस्यैव प्राणस्य सत्यस्यश्रद्धा
× वदनशीलत्वमित्यर्थः एतदुक्तं भवति नायं तु शब्दः प्राणातिवादित्वाद्व्यवच्छिनत्ति अपितु वदति वादित्वं × निष्ठाकृतिभिर्विज्ञा
नायनि श्रपापसत्येनातिवदतीति प्राणव्रतमेवादित्वमुच्यते तु शब्दो नामाद्यतिवादित्वाद्व्यवच्छिनत्ति न नामाद्याशांतवाद्यतिवा
दी अपि तु सत्यप्राणवाद्यतिवादीत्यर्थः। अत्र चागमाचार्योपदेशाभ्यां सत्यस्य श्रवणं श्रुत्यागमाविरोधिन्यायनिवेशनं म
ननं मत्वा च गुरुशिष्यसब्रह्मचारीभिरनुसूयभिः सह संशोधनत्वं श्रद्दधाने श्रद्धानंतरं च विषयांतरदोषदर्शिविरक्तात्मा
न्याब्लत्तत्वध्यानाभ्यासं करोतीति यमसक्तिः प्रयत्नः अथ तत्वध्यानाभ्यासेन निष्ठा भवति यदनंतरमेव तत्वविज्ञान
मनुभवः प्रादुर्भवतीति देतद्वा ह्यादिभ्याहुः भूतार्थभावनाप्रकर्षपर्यंतजं योगिज्ञानमिति भावनाप्रकर्षपर्यंतानिष्ठा तस्मा
न्यायनेतत्वानुभवः तस्मात् प्राण एव भूमेति प्राप्ते अभिधीयते एष तु वा अतिवदति यः सत्येनातिवदतीत्युक्त्वा भूमोच्यते।
सत्य
तत्रश सत्यः परमार्थो निरुक्तः स्वस्त्यापरमार्थमाह परमार्थश्च परमात्मैव ततो ह्यन्यत्सर्वं विकारजातमनृतं कथाविदपे
क्ष्यमथं कथं चित्सत्यमुच्यते तथा च य एष तु वा अतिवदति यः सत्येनातिवदतीति प्रत्ययेनातिवादित्वं श्रुत्यान्यतिरपेक्ष्यालिंग
दिप्योक्तीयस्याबलगमितं कथमिव संनिधानमात्रास्तु साध्यपेक्षादतिदुर्बलात्कथं चित्प्राणविषयत्वेन शक्यं व्याख्यातुं एवं च
प्राणाद्धर्वं व्यत्यणोऽभूमा वक्तं स्यमानो न प्राणविषयो भवितुमर्हति किंतु तत्त्वस्य परमात्मन एवं चानात्म विद आत्मानं ति
तीर्षोर्नारदस्याप्यते परमात्मजन्मे वस्यैवमात्मात्मसामीप्यमभिसंधिमांस्तत्कुमारः सोपानारोहणन्यायेन स्थूलादारभ्य
नरमं सुदाभीनं क्रमेण भूमानमिति दुर्ज्ञानतयापनसरूपं मुत्तारयामास न च प्रश्नपूर्वत्वाप्रवाहपतितेनोत्तरेण सर्वेण प्रश्न

पूर्वणै वप्रकरणसमासे भवितव्यमिति नियमोक्तौ त्वादिस्फिग मेन न्यायेनाप्युत्वादितं विज्ञानादिसाधनपरं परमनश्वादिः प्राणां
तेन्वानुशासने नावन्मात्रेणै वप्रकारणसमासेन्य प्राणस्य तापवोन्य तेतदभिधाने हिसापेक्षत्वेन न प्रकरणसमाप्येतन्नस्मात्रे
दं प्राणस्य प्रकरणमपि तु यदा वतः प्राणस्तस्य सर्वात्मना न एव प्रकरणं शंकते प्रकरणं तद्दति। प्राणः प्रकरणस्मासंविसर्थः।
निराकरोति निनसभग वनदति। संदंशन्यायेन हि भन्यएत प्रकरणं सर्वेन्द्र प्राणः प्राणस्यैतत्करणं भवेतन्न्वायुक्तमिखुकं नकेव
लं श्रुते भर्ग्मा प्रनापरमा अनोलिंगादपीत्याह सूत्रकारः धर्मोपपत्तेश्च यदपि पूर्व पक्षिणा कथं चिन्नीतिन दनुभाष्य भाष्यकारो
दूषयति योष्य सौ स्कृष्णुनावस्थायामिति स्थूणावस्थामामिंद्रियाद्यसंयोगात्मैव न प्राणाः परमात्मनः प्रकरणात् अन्यदात्तं
विनिश्च रमि सर्वः श्रुति रोहितः वमिनत्। अक्षरमंबरां तधृतेः। अक्षर शब्दः समुदायप्रसिध्या वर्णेषु रूढः परमात्म
नि चावयवप्रसिध्या [illegible] योगिकः अवयवप्रसिद्धेश्च समुदायप्रसिद्धिर्बलीयसीति व
र्णएवाक्षरं न च वर्णस्याकाशस्योत ऽत्यंत लेनोपपद्यते सर्वस्यैव रूपधेयस्य नामधेयात्मकत्वात्। सर्वं हि रूपधेयं नामधे
यसंभिन्नमनुभूयते गौरयं दृश्योयमिति। न चोपायत्वात्तत्संभेदसंभवः न हि धूमो पायो वह्निधीर्धूमसंभिन्नं वह्निं गृह्णाति
ते भूमोपं वह्निरिति किं तु वैयधिकरण्येन धूमाद्वह्निरिति भवति तु नामधेयं प्रत्यक्षोयं डित्थोयमिति अपि शब्दानुपाय्यी
रूपधेयप्रत्यये लिंगेंद्रियजन्मनि नामसंभेदो दृष्टः। तस्मान्नामसंभिन्नाः पृथिव्यादयो ऽपरा तासां नान्यापृथिताश्च
विद्धश्च नामानि चोंकारात्मकानि तद्व्याप्तत्वात्। तथ्या शंकुना सर्वाणि पर्णानि संतृं पानि एवमोंकारेण सर्वा वागिति श्रु
तेः। अत ओंकारात्मकाः पृथिव्यादयोंबरांतादिति वर्णाएवाधारनपरमात्मेति प्राप्त एवं प्राप्ते भिधीयते अक्षरं परमात्मैव
न तु वर्णाः कुतः अंबरांतधृतेः न खल्वंबरांतानि पृथिव्यादीनि वर्णधारयितुमर्हंति किं तु परमात्मैव तेषां परमात्मविकार

त्वाच्च नामधेयात्मकं रूपधेयमिति युक्तं स्वरूपभेदादुपायभेदार्थक्रियाभेदाच्च तथा हि शाब्दत्वसामान्यात्मकानि श्रोत्रग्राह्या
णि अभिधेयप्रत्ययार्थक्रियाणि नामधेयान्यनुभूयंते रूपधेयानि तु घटपटादीनि घटपटत्वादिसामान्यात्मकानि चक्षुरादीं
द्रियग्राह्याणि मधुधारणप्रावरणाद्यर्थक्रियाणि भेदेनानुभूयंते तदिति कुतो नामसंभेदः। न च डित्थोयमिति शब्दसामाना
धिकरण्यप्रत्ययः न खलु शब्दात्मकोयं पिंड इदं संतु भवः किं तु नानादेशकालसंयुक्तः पिंडः सोयं संनिहितदेशकाल इत्यर्थः
संज्ञा तु गृहीतसंबंधैर तं त्याभासादपि अभिनिवेशिन्येव संस्कारोद्बोधसंभवाद्याता स्मर्यते। यथाहुः यत्संज्ञा स्मरणं तत्र
मद्नम्यह तु क्वापि पुरुषवद्हिदृष्टः संस्कारं तां स्मारयितुं क्षमः संज्ञा हि स्मर्यमाणा हि प्रत्यक्षत्वे न बाधिता संज्ञिनः सा न टस्वा हि नरू
पाच्छादनक्षमेति न च वर्णातिरिक्ते स्फोटात्मन्यलौकिके स्फरपदप्रसिद्धिरस्ति लोके न चैष प्रामाणिक इत्युपरिष्टात् प्रवे
दयिष्यते निवेदितं चास्माभि स्तत्त्वबिंदौ तस्मात् श्रोत्रग्राह्याणां वर्णानां अंबरांतधृतेरनुपपत्तेः समुदायप्रसिद्धिबाध
नादवयवप्रसिध्या परमात्मैवाक्षरमिति सिद्धं पेनुप्रधानं पूर्वपक्षद्दल नेन सूत्रेण परमात्मैवाक्षरमिति सिद्धांतयं
तीनैरं बरांतधृतेरिति नेन कथं प्रधानं निराक्रियत इति वाच्यं प्रधानाधिकरणत्वमात्रं धृतिरपि तु प्रशासनाधिर
धिकारणता च श्रुतिः एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति नयाप्यंबरां तधृतेरित्यन
र्थकं एतावप्रकम्यं अक्षरं प्रशासनादिति एतावते व प्रधाननिराकरणसिद्धेः तस्मादूर्णास्थि तानि राक्रियैवास्यार्थ
न च स्थूलादीनां वर्णेष्वप्राप्तो अस्थूलमित्यादि निषेधानुपपत्तेः वर्णेषु शंकैव नास्तीति वाच्यं न ह्यवस्तुस्य प्राप्तिपूर्वकाएव
प्रतिषेधा भवंति अप्राप्तेष्वपि नित्यानुवादानां दर्शनात् यथा नांतरिक्षे न दिवीत्यग्निचयननिषेधानुवादः तस्मात्किं विदेत
त्। सा च प्रशासनात्। प्रशासनमज्ञाचेतनधर्मोनाचेतने प्रधाने व्याकृतो वा संभवति न च मुख्यार्थसंभवे कुंडपायिनामिवप्र

कृतमुचि तमितिभावः। अन्यथा वच्यात्तेभ्यश्चांवरांतविधारणसाक्षरस्येश्वराद्यन्यस्य द्गणीतप्रधानं वा आकृतं वाऽनेषामन्येषां
भावस्याभ्यंतंग्याकर्त यतिश्रुतिः तदेतदक्षरं गार्गीलादिका अनेनैव सूत्रेण जीवस्याप्यक्षरता निषिद्धेत्याह तथेति नाम्नादित्यादिकया
हिश्रुत्यात्मभेदः प्रतिषिध्यते तथाचोपाधिभेदभिन्नाजीवानिषिद्धा भवंति अनेनाभिधानादित्यर्थः। इतोपि न शारीरस्याक्षरश
ब्दतेत्याह अन्यभावव्यावृत्तेश्चेति। अक्षरस्य चक्षुराद्युपाधिं वारयंती श्रुतीरोपाधिकस्य जीवस्याक्षरतां निषेधतीत्यर्थः तस्मा
दुर्णप्रधानाव्याकृतजीवानामसंभवात्संभवाच्च परमात्मनः परमात्मैवाक्षरमिति सिद्धं ईक्षतिकर्मव्यपदेशात्सः। का
र्यब्रह्मजनत्वादिफलत्वार्थभेदः दर्शनध्यानयोर्भिन्नपरंब्रह्मगम्यते ब्रह्मवेद ब्रह्मैव भवतीति श्रुतेः सर्वगतपरब्रह्म
हृदयत्वेन चोद्यते नचेक्षणस्य लोके तत्वविषयत्वेन प्रसिद्धेः परस्यैव ब्रह्मणस्तथाभावात्। यतेश्च न समानविषयता
त्परब्रह्मविषयमेव ध्यानमिति सांप्रतं समानविषयत्वस्यैवासिद्धेः परोहि पुरुषो ध्यानविषयः परात्परस्तु दर्शनविष
यो न च तत्वविषयत्वमेव सर्वत्र दर्शनं अन्तत्वविषयस्यापि तस्य दर्शनात्। न च मननं दर्शनं तच्च तत्वविषयमेवेति सां
प्रतं मननाद्भेदेनात्र दर्शनस्य निर्देशात्। न च मननमपि तर्कापरनामा तत्वविषयं यथाहुः तर्कोप्रतिष्ठितइति
तस्मात्परमेव ब्रह्मेक्षणीयं तस्य च परत्वं शरीरापेक्षयेति एवं प्राप्तउच्यते ईक्षणध्यानयोरेकः कार्यकारणभूतयोः अ
थजौत्सर्गिकं तत्वविषयत्वं तथेक्षतेः ध्यानस्य हि साक्षात्कारः फलं साक्षात्कारश्चौत्सर्गतस्तत्वविषयः कचित्तु बा
धकोपनिपाते समारोपितगोचरो भवेन्न त्वत्र स तापवाधेशः परउत्सर्गस्त्यक्तुं तथा चास्य तत्वविषयत्वादुत्कारणस्य ध्यान
स्यापि तत्वविषयत्वं। अपि च वाक्यशेषेणैकवाक्यत्वसंभवे न वाक्यभेदो युज्यते संभवतीच परपुरुषविषयत्वेनार्थप्रत्यभि
ज्ञानात्समभिः आहाराच्चैकवाक्यतानतदनुरोधेन च परात्परइत्यत्र परादिति जीवघनविषयं द्रष्टव्यं तस्मात्परः पुरुषोध्या

तव्यश्च द्रष्टव्यश्च तमेव कथयितुं जीवघनो जीवः खिल्यभावमुपाधिवशादापन्नः स उच्यते स सामभिरुन्नीयते ब्रह्मलोकमि
त्यनंतरवाक्यनिर्दिष्टो ब्रह्मलोको वा जीवघनः स हि समस्तकारणात्मनः सूत्रात्मनो हिरण्यगर्भस्य भगवतो निवासभूमित
या करणपरिवृतानां जीवानां तत्र संघात इति भवति जीवघनः तदेवं त्रिमात्रोंकारायतनं परमेव ब्रह्मोपास्यं अत एवास
देशविशेषाधिगतिः फलं क्रमाधिमत्वात्क्रमेण च सम्यग्दर्शनोत्पत्तौ मुक्तिः ब्रह्मवेद ब्रह्मैव भवतीति निरुपाधिकब्रह्मवेद
नविषया श्रुतिः परं तु ब्रह्मैकमात्रायतनं उपास्यमिति मंतव्यं दहर उत्तरेभ्यः अथ यदिदमस्मिन्ब्रह्मपुरे दहरं सूक्ष्मं
गुहाशयं पुंडरीकं पुंडरीकसमाकारं वेश्म दहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं आगमाचार्योपदेशाभ्यां श्रवणं च
तदविरोधिना तर्केण मननं च तदन्वेषणं तत्पूर्वकेण चादरनैरंतर्यदीर्घकालासेवितध्यानाभ्यासपरिपाके साक्षात्कारो विज्ञा
नं विशिष्टं हि तद्ज्ञानेभ्यः तदेवादि जिज्ञासनं अत्र संशयमाह तत्रेति तत्र प्रथमं तावदेष संशयः किं दहराकाशाद्य
देवकिं वा परमात्मेति संशयहेतुं पृच्छति। कुत इति तद्धेतुमाह आकाशब्रह्मपुरशब्दाभ्यामिति तत्र प्रथमं तावद्भू
ताकाशपर दहर इति पूर्वपक्षः इति तत्राकाशशब्दस्य भूताकाशे रूढत्वादिति। एष तु बहुतरोत्तरसंदर्भविरोधात्तुच्छः
पूर्वपक्ष इत्यरितो पंथाः पक्षांतरमालंबते पूर्वपक्षी अथ वा जीवो दहर इति प्राप्तं युक्तमित्यर्थः तत्र आधेयत्वाद्विशेषाच्च पुरं
जीवस्य युज्यते। हेत्वनां ब्रह्मणे युक्तो हेतुरूपविशेषणतः असाधारणेन हि व्यपदेशा भवंति तद्यथा क्षितिजलपवनबीजा
दिसामग्रीसमवधानजन्मापि अंकुरः शालिबीजेन व्यपदिश्यते शाल्यंकुर इति न तु क्षित्यादिभिः तेषां कार्यांतरेष्वपि साधार
ण्यात्। न हि हरारीरं ब्रह्म विकारोपि न ब्रह्मणाप्यपदेष्टव्यं ब्रह्मणः सर्वविकारत्वेनातिसाधारण्यात्। जीवभेदस्य धर्माधर्मोपार्जि
तं तद्धि तस्साधारणकारणं तज्जीवेन व्यपदिश्यत इति युक्तं अपि च ब्रह्मपुर इति सप्तम्यधिकरणे समर्पिते तेनाधेयेनानेन
यदन्वेष्टव्यं विजिज्ञासितव्यं चउत दहराकाशइति। यद्यपि दहराकाशोन्वेष्टव्यस्तथापि किं भूताकाश आहो शारीरआत्मा किंवा प॰

वाच॰ संबंधसंनच ब्रह्मणः स्वे महिम्नि अवस्थितस्यानाधेयस्याधारसंबंधः कल्प्यते जीवस्त्वाराग्रमात्र इत्याधेयो भवतितस्मात्त्व
७१ त्पुराद्योरूढिं परित्यज्य देहादिरं हणतया जीवो यौगिकोवा भाक्तोवाश्लेयः चैतन्यं भक्तिः उपधानानुपधातु विशेषः वाच्य
त्वं गम्यत्वं स्यादेतत् जीवस्य पुरं भवतु शरीरं पुंडरीकं दहरं गोचरत्वात्तस्य सद्म भविष्यति वत्सराजस्य पुरं इत्युज्जयिन्यां मै
त्रस्य सद्मेत्यत आह पुरस्वामिन इति अयमर्थः वेश्म खलु अधिकरणमनिर्दिष्टाधेयमाधेयविशेषाकांक्षायां पुरस्वामिनः
प्रकृतत्वात्तेनैवाधेयेन संबध्यते न पुनः संनिधेयांतरेण संबंधं कल्पयति ननु तथापि शरीरमेव तस्य भोगायतनमिति को
हृदयपुंडरीकस्य विशेषो यत्तदेवास्य सद्मेत्यत आह मन उपाधिकश्च जीव इति ननु मनोपि चलतया सकलदेहव्यापि पर्याये
णेत्यत आह मनश्च प्रायेणेति । आकाशशब्दश्चारूपत्वादिना सामान्येन जीवे योक्तः अस्तु वा भूताकाश एवायमाकाशोऽ
दहरोस्मिन्नंतराकाश इति तथाप्यदोष इत्याह न चात्र दहरस्याकाशतालेशोऽपि इति एवं प्राप्त उच्यते भूताकाशस्य
तावन्न दहरत्वं यावानयमाकाशस्तावानेषोंतर्हृदय आकाश इत्युपमानविरोधात् । न च अहितेन तस्योपमेयत्वं
मरावणयुद्धवत् । अनन्यत्वेऽप्यारोप्य गतौ सत्यां न युज्यते अस्ति तु दहराकाशस्य ब्रह्मत्वेन भूताकाशाद्भेदो नोप
मानस्य न ततिः नन्वनवच्छिन्नपरिमाणमनवच्छिन्नं भवति तथा सत्येव त्वेशनुपपन्ने न भूताकाशमानत्वं ब्रह्मणोऽत्रवि
धीयते येन ज्यायानयमाकाशादिति श्रुतिविरोधः स्यात् अपि तु भूताकाशोपमाने न पुंडरीकोपाधिप्राप्तं दहरत्वं निवर्त्य
ते अपि च सर्वगोचरे हेतवो दहराकाशस्य भूताकाशत्वं व्यासेधंतीत्याह न च कल्पितभेद इति नापि दहराकाशो
जीव इत्याह यद्यप्यात्मशब्द इति । उपलब्ध्यधिष्ठानं ब्रह्मणो देह इष्यते तेनासाधारणत्वेन देहो ब्रह्मपुरं भवेत्
देहे हि ब्रह्मोपलब्धिः साधारणतया देहो ब्रह्मपुरमिति व्यपदिश्यते न तु ब्रह्मविकारतया नयाद्ब्रह्मशब्दार्थो मुख्यो ७१

भवति । अस्तु वा ब्रह्मपुरं जीवपुरं तथापि यथा वत्सराजस्य पुरे उज्जयिन्यां मैत्रस्य सद्म भवति एवं जीवस्य पुरे हृत्पुंडरीकं
ब्रह्मसद्म भविष्यति । उत्तरेभ्यो ब्रह्मलिंगेभ्यो ब्रह्मणोऽवधारणात् । ब्रह्मणो हि बाधके प्रमाणे बध्यीयसि जीवस्य च साधके प्रमा
णे सति ब्रह्मलिंगानि कथंचिदभेदविवक्षया जीवे व्याख्यायंते न त्वेवं ब्रह्मणो बाधकं प्रमाणं साधकं वास्ति जीवस्य ब्रह्मसमुख्यो
परेशाश्चोपपादितो ब्रह्मोपलब्धिस्थानतया अर्भकौकस्त्वं चोक्तं तस्मात्सति संभवे ब्रह्मणि तल्लिंगानां तावद्ब्रह्मण्याख्यानमु
चितमिति ब्रह्मैव दहराकाशो न जीवो भूताकाशो वेति । श्रवणमनननिदिध्यासनानुभूत्या चरणं चाः तेषां कामेषु चरणं भव
तीत्यर्थः स्यादेतत् दहराकाशस्यान्वेष्टव्यत्वे तत्र विचारो युज्यते न तु तदन्वेष्टव्यमपि तु तदाधारमस्य देवकिंचिदुक्त
मनुभाषणे यदस्येतदिति अनुभाषितं दूषयति अत्र ब्रूम इति यद्याकाशाधारमन्यदन्वेष्टव्यं भवेत्तदेतोपरिष्टात्
नीयं आकाशस्तु त्वादनन्तकोपयुज्यत इत्यर्थः । चोदयति तच्चेन्नदपीति आकाशकथनमपि तदंतर्वर्तिवस्तुसद्भावद
र्शनायैव । अथाकाशपरमेव कस्मान्न भवतीत्यत आह तं चेद्ब्रूयुरिति । आचार्येण दहरोस्मिन्नंतराकाश तस्मि
न्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्युपदिष्टे अंतेवासिनाक्षिप्तं किं तदत्र विद्यते यदन्वेष्टव्यं पुंडरीकमेव ता
वदल्पं ततोऽप्यल्पतरमाकाशं सूक्ष्मतमं तस्मिन् सूक्ष्मतमे किमपरमस्ति नास्त्येवेत्यर्थः । तत्र किमन्वेष्टव्यमि
ति । तदस्मिन्नाक्षेपे समासे समाधानावसर आचार्यस्याकाशोपमानोपक्रमं वचः उभे अस्मिन् द्यावापृथिवी समाहिते इ
ति तस्मात्पुंडरीकावरुद्धाकाशाश्रये द्यावापृथिव्यादेवान्वेष्टव्ये उपदिष्टे नाकाश इत्यर्थः । परिहरति नैतदेवं हीतिस्यादेतत् ।
एवमेवैतत् नो खल्वभ्युपगमाद्वदोषत्वेन चोद्यं तदित्यत आह तत्र वाक्यशेष इति । वाक्यशेषो हि दहराकाशात्मवेदन
फलवत्त्वं ब्रूते यच्च फलवत्कर्म कर्तव्यतया चोपनेयत्कर्तव्यं तदेवेष्टव्यं तद्वाव विजिज्ञासितव्यमिति दहराकाशविषयमवतिष्ठते ।

वाच०
७२ स्यादेतत् द्यावापृथिवी एवात्मनो भविष्यतस्ताभ्यामेवात्मा लक्षयिष्यते आकाशेन तस्याकाशभावो तावेव परामृश्येते इत्यत
आह। अस्मिन्कामाः प्रतिष्ठिता एष आत्मापहतपाप्मेति। अनेन हि श्रुतं द्यावापृथिवीसमाधीरमाकाशमाकाशस्य द्यावा
पृथिव्यापभिधानव्यवहितिमहीतिशेषः। ननु सत्यकामज्ञानस्यैतत्फलं तदनंतरं निर्देशात्। नतु दहराकाशवैर
नायेत्यत आह स मुख्यार्थे नचशब्देनेति अस्मिन्कामा इति च एषइति चैकवचनं नहि द्यावापृथिव्यौ परामृष्टुमर्हति।
इति दहराकाश एव परामृष्ट इति समुदायार्थः तदनेन क्रमेण तस्मिन्यदंतास्तिन्नत्रशाब्दानंतरमप्याकाशमति
लंघ्य हृत्पुंडरीकं परामृशतीत्युभ्यवति तस्मिन् हृत्पुंडरीके यदंतराकाशं तदन्वेष्टव्यमित्यर्थः। गतिशब्दाभ्यां तथाहि
दृष्टं लिंगं च। उत्तरेभ्य इत्यस्य प्रपंचः एतमेव दहराकाशं ब्रह्मकमलालोकस्तमिदं वर्ततेजं दनंतत्वावबोधविकलानां
यदेभिः स्वाधीनमपि। ब्रह्मनत्रार्थ नेन यथा चिरंतानतिरूढनिबिडमलापिहितानां कलधौतशकलानां पृथिवीत
लानां उपर्युपरि संचरद्भिरपि पांथैर्धनाभावनायाभिर्व्याविरवंडनिव हविभ्रमेणैतानि नोपादीयंत इत्यभिसंधि
मतिसाभ्भूतमिवसखेरमिव श्रुतिः प्रदर्शयति इमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंतीति स्वापका
ले हि सर्व एवाहं विद्वांश्च जीवलोके हृत्पुंडरीको हृत्पुंडरीकाश्रयं दहराकाशाख्यं ब्रह्मलोकं प्राप्तोपि अनाद्यविद्यातमः
पटलापिहितदृष्टितया ब्रह्मपदमापन्नोऽस्मीति न वेदस्मायं ब्रह्मलोकशब्दस्तऽ तस्य प्रसहं जीवलोकस्य द
हराकाशस्यैव ब्रह्मलोकरूपतामाह तुस्तदेतदाह भाष्यकारः इतश्च परमेश्वर एव दहर इति यस्मादहरहः वाक्यशेष इति।
तदनेन गतिशब्दौ व्याख्यातौ। तथाहि दृष्टमिति सूत्रावयवं व्याचष्टे तथा सुहरहजींवानामिति। वेदेषु लोकेषु दृष्टं यद्य
पि सुषुप्तस्य ब्रह्मभावे लौकिकं प्रमाणांतरमस्ति तथापि वैदिकी प्रसिद्धिर्यद्लोकेपि गीयत इति यथास्तुतं तद्यथा

७२

Dr. BHAU DAJI MEMORIAL

चलोके नयेह ब्रह्मलोके नयेह ब्रह्मलोकशब्दोपीति योजना लिंगं चेति सूत्रावयवव्याख्यानं चापमुखेनावतारयति ननु
कमलासनलोकमपीति परिहरति गमयेयदि ब्रह्मलोक इति। अत्र तावत् निषादस्थपतिन्यायेन षष्ठीसमासात्कर्मधारयो ब
लीयानिति स्थितमेव तथापि इह षष्ठीसमासनिराकरणेन कर्मधारयसमासस्थापना लिंगमभ्यधिकमस्तीति तद
प्युक्तं सूत्रकारेण। तथाहि लोकवेदप्रसिद्धा हरहर्ब्रह्मलोकगत्यभिधानमेव लिंगं कमलासनलोकप्राप्तेर्विपक्षाद
संभवात् व्यावर्तमानं षष्ठीसमासशंकां व्यावर्त्तयद्दहराकाशप्राप्तावेवतिष्ठते। न च दहराकाशो ब्रह्मणो लोकः किंतु
तद्ब्रह्मेति ब्रह्म च तल्लोकश्चेति कर्मधारयः सिद्धो भवति लोक्यत इति लोको हृत्पुंडरीकस्य खल्वयं लोक्यते य खलु पुंडरी
कस्थं अंतःकरणं तस्मिन् विशुद्धे प्रसादं नेस करणानां योगिनां निर्मल इवोदके चंद्रमसौ बिंबमिति स्वच्छ चैतन्यज्यो
तिः स्वरूपं ब्रह्मावलोक्यत इति। धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः सौत्रे धृतिशब्दोऽत्र वचनः। धृतेश्च पर
मेश्वर एव दहराकाशः कुतः असाधारणलक्षणस्य महिम्नोऽस्मिन्नेश्वर एव श्रुत्यंतरेषूपलब्धेः निगदव्या
ख्यातमस्य भाष्यं प्रसिद्धेश्च न वेयमाकाशशब्दस्य ब्रह्मणि लक्षणा लक्ष्यमाणविभुत्वादिगुणयोगाद्वृत्तिसां
प्रतिकी यथा रथांगनामचक्रवाक इति लक्षणा किं त्वनुरूढेति सूत्रार्थः इयत्ताकाशशब्दो ब्रह्मणपि मुख्य एव नभो
वदित्याचक्षते। नैरमा यथा अनेकार्थत्वमिति च अनन्यशब्दार्थ इति च मीमांसकानां मुद्राभेदः कृतः स्यात्। लभ्यते स्याकाश
शब्दादिषु नादिगुणयोगेनापि ब्रह्म ब्रह्मणे च मुख्यो न भवति तेनैव गुणयोगेन वर्त्स्यतीति वाक्यं लोकाधीनावधारणत्वेन श
ब्दार्थस्य संबंधस्य वैदिकपदार्थप्रत्ययस्य तत्पूर्वकत्वात्। ननु यावात्मा वकाशः त वान्तेषां तन्न हृदय आकाश इति श्रुतिरेक
निर्देशाच्च लक्षणा युक्ता नहि भवति गंगायाः कूलमिति विवक्षिते गंगायां घोष इति प्रयोगः तत् किमिदानीं पौर्णमास्यां पौर्ण

वा.न.
७३

मास्यायजेत अमावास्यायाममावास्ययेत्यसाधुः वैदिकप्रयोगेन च पौर्णमास्यमावास्याशब्दावाग्नेयादिपुरस्कृत्योक्तं यत्र
शब्दार्थप्रतीतिस्तत्र लक्षणा यत्र पुनरन्यतोऽर्थनिश्चिते शब्दप्रयोगस्तत्र वाचकत्वमेवेति सत्युक्तमुभयस्यापि अभिधा
रात् सोमेन यजेतेत्यत्र शब्दार्थः प्रतीयते न वात्र कस्यचिल्लक्षणीकृतमन्यतो वा कार्यतः। नन्वेवं य विद्वान्पौर्णमासीं यजेत य ए
वं विद्वानमावास्यामित्यत्र पौर्णमास्यमावास्याशब्दौ न लाक्षणिकौ न स्याताम् किंचिदेतदिति तत्परामर्शात्सिद्धमिति चेन्ना
संभवात् सम्यक्प्रसीदत्यस्मिन् जीवो विषयेन्द्रियसंयोगजनितं कालुष्यं जहातीति सुषुप्तिः संप्रसादो जीवस्यावस्थाभेदेन
ब्रह्मणः न शरीरात्समुत्थानमपि शरीराश्रयजीवस्यैव तदाश्रयस्य ब्रह्मणः कस्मात् यथा पूर्वोक्तैर्वाक्यशेषलिंगै
र्हेत्वावगम्यते न दहराकाश एवं वाक्यशेषगताभ्यामेव संप्रसादसमुत्थानाभ्यां दहराकाशो जीवः कस्मान्नावगम्यते
कस्मान्नास्ति विनिगमनेति वाच्यम्। नासंभवात् संप्रसादसमुत्थानाभ्यां दहराकाशो जीवः

परः किंतु न दहरविद्याविकरूपब्रह्मभावपरः तथा चैष एव परमशब्दलक्षण एवेति न संप्रसादास
नात्वंचषट्पदवतिवाक्येएकस्मिन्नानात्वप्रसंगः नानात्वेपिविशेषणानांविशेष्यस्यैकत्वात्तस्यचसकृच्छ्रुतस्यप्रधानभूत
स्यगुणभूतविशेषणानुरोधेनावर्तनायोगात्। प्रधानभेदेतुवाक्यभेदएवनतस्माद्विधिवाक्यादर्थवादस्यमन्यादितिवाक्य
यार्देवस्वस्ववाक्यार्थप्रत्ययावसितव्यापारयोः पश्चात्कुतश्चिद्विपेक्षायांपरस्परान्वयइतिसिद्धं अपिचेंद्रादिदेवता
नीतिदेवतामुद्दिश्यहविरुत्सृज्यत्वचनद्विषयस्यत्यागइतिहियागशरीरं नचचेतनस्यनाल्लिखितादेवतोद्देष्टुंशक्या
नचरूपरहिताचेतसिशक्यतज्ञातोरवितुमितियागविधिनैवतदुपादेयीणायादृशमन्यपरेभ्योपिमंत्रार्थवादेभ्यः स
द्रूपमवगतंतदभ्युपेयंतद्रूपांतरकल्पनायांप्रमाणाभावात्। मंत्रार्थवादयोः इत्यंतपरोक्षवृत्तित्वप्रसंगश्च यथाहिव्रा
त्योव्रात्यस्तोमेनयजेतेतिव्रात्यरूपापेक्षायांयस्यपितापितामहोवानसोमंपिबेत्सव्रात्यइतिसिद्धवदात्स्वरूपमव
गतंव्रात्यस्तोमयविध्यपेक्षितंसद्विधिप्रमाणकंभवति यथाचस्वर्गरूपमलौकिकंस्वर्गकामोयजेतेतिविधिनापेक्षि
तंसदर्थवादतोवगम्यमानंविधिप्रमाणकंतथादेवतारूपमपिनुद्देशोरूप्यमानमपेक्षितेनपुनारूपसत्तामपि
देवतायाः समारोपेणापिस्वरूपज्ञानमुपपद्यतेइतिसमारोपितमेवरूपंदेवतायामंत्रार्थवादैरुच्यतेसत्तरूपज्ञा
नमपेक्षितेनचान्यतोसंभवात् मंत्रार्थवादेभ्यएवतत्सद्रूपत्वस्यासतिबाधकेनुभवारूढेनथाभावपरिसमाप्त्यथात
मननुभूयमानमसांप्रतंकल्पयितुंतस्माद्विधापेक्षितंमंत्रार्थवादैरन्यपरैरपिदेवतारूपंबुद्धातुनिबुधीयमानंविधि ८०

प्रमाणमेवेतियुक्तंस्यादेतदविधिविपक्षेस्मारयामन्यपरादपिवाक्यादवगतोर्थः स्वीक्रियतेनतदपेक्षैवतुनास्तिशब्दरूपस्यदेवताया
भावात्तस्यचभानांतरवेयत्वारित्यत आह नचशब्दमात्रमितिनकेवलंमंत्रार्थवादतोविग्रहादिसिद्धिरपितुइतिहासपु
राणालोकस्मरणेभ्योमंत्रार्थवादमूलेभ्योवाप्रत्यक्षादिमूलेभ्योवेत्याह। इतिहासेति। श्लिष्यतेयुज्यतेनिगदमात्रव्या
ख्यातमन्यत्। नरेवंमंत्रार्थवादार्थसिद्धेदेवताविग्रहादौविग्रहांगुलीनांदिपूजावद्देवतापूजात्मकोयागोदेवताप्रसादादि
वारेणसफलोवकल्पते। अचेतनस्यपूजामप्रतिपद्यमानस्यतदानुपपत्तेः। नचैवंयज्ञकर्मणोदेवतांप्रतिगुणभावादेव
तातः फलोत्पादेयागभावनायाः श्रुतंफलवत्वंयागस्यचतांप्रतिवतत्फलांशंवाप्रतिश्रुतंकारणत्वंहोतव्यंयागभाव
नायाएवहिफलवत्वागलक्षणस्यकरणत्वांतरव्यापारत्वादेवताभोजनप्रसादादीनांकृषिकर्मणइवतत्तदेवांतर
व्यापारस्यसस्याधिगमसाधनत्वं। आग्नेयादीनामिवोत्पत्तिपूर्वावांतरव्यापाराणांभवन्मतेस्वर्गसाधनत्वंतस्मात्कर्म
णोपूर्वावांतरव्यापारस्यवादेवताप्रसादावांतरव्यापारस्यवाफलवत्वात्प्रधानत्वमुभयस्मिन्नपिपक्षेसमानंनतु
देवताविग्रहादिमत्ताः प्राधान्यमितिनधर्ममीमांसायाः सूत्रंअपि नाशब्दपूर्वत्वाद्यज्ञकर्मप्रधानंगुणत्वेदेवताश्रुति
रितिविरुध्यते। तस्मात्सिद्धोदेवतानांप्रायेणब्रह्मविद्यास्वधिकारइति शूद्रस्यतदनादरश्रवणात्तदश्रवणात्
च्यतेहि। अवांतरसंगतिं कुर्वन्निधिकारणतात्पर्यमाह। यथामनुष्याधिकारेतिशंकाबीजमाह। तत्रेति। निमृ
ष्टनिखिलदुःखानुषंगेशाश्वतिकआनंदेकस्यनामचेतनस्यार्थितानास्तियेनार्थितायाअभावतःशूद्रोनाधिक्रिये
तनाप्यस्यब्रह्मज्ञानेसामर्थ्याभावः द्विविधंहिसामर्थ्यंनिजंचागंतुकंच तत्रद्विजातीनामिवशूद्राणांश्रवणादिसामर्थ्यं
निजमप्रतिहतं। अध्ययनाधानाभावादागंतुकसामर्थ्याभावेसत्यनधिकारइतिचेत्। हंताध्यानभावेसत्यसभा

वा॰च॰ वाद्ग्निसाध्ये कर्मणि माभूदधिकारः। न च ब्रह्मविद्यायामिति साम्प्रतं यतो युक्तं यदाहवनीये जुहोतीत्याहवनीयस्य द्विजा
८८ तिसंबंधितया विधानात्साध्योऽग्निरलौकिको न शूद्रस्यास्तीति नाहवनीयादिसाध्ये कर्मणि शूद्रस्याधिकार इति न च तथा ब्रह्म
विद्यायामलौकिकमस्ति साधनं यच्छूद्रस्य न स्यात्। अध्ययननियम इति चेत् अविकलासहलानध्ययनं पुरुषार्थं चानिय
म्येत यथा धनार्जने प्रतिग्रहादिकं तदर्थं वा यथा व्रीहीनवहन्तीति अवघातः। न तावत्क्रत्वर्थं न हि स्वाध्यायोऽध्येतव्य इति किं
चित्क्रतुं प्रकृत्य पठ्यते यथा दर्शपूर्णमासौ प्रकृत्य व्रीहीनवहन्तीति न चानारभ्याधीतमप्यव्यभिचरितक्रतुसंबंधेन वाक्र
तुमुपस्थापयति येन वाक्येनैव क्रतुना संबध्येताध्ययनं न हि यथा जुह्वाव्यभिचरितक्रतुसंबंधमेवं स्वाध्याय इति तस्मा
न्न क्रत्वर्थो नियमः। नापि पुरुषार्थः पुरुषेच्छाधीनप्रवृत्तिर्हि पुरुषार्थो भवति तथा फलं तदुपायो वा तदुपायोऽपि विहितः
शास्त्रकामान्यरूपाधप्रवृत्तिः पुरुषेच्छानिबंधिनेव इति कर्तव्यतास्तु सामान्यतो विषयश्च प्रवृत्तिर्विधिपराधीनेव न ह्यनधिक
रणभेद इति कर्तव्यतास्फुटनेन स्वातन्त्र्याधीनप्रवृत्तितयाङ्गानां क्रत्वर्थता क्रतुरिति हि विधिविषयेण विधिं परामृशति विष
यं। तेनाप्यते विपर्ययः क्रियत इति क्रत्वर्थः। न चाध्ययनं वा स्वाध्यायो वा तदर्थज्ञानं वा प्राग्विधेः पुरुषेच्छाधीनप्रवृत्ति येन
पुरुषार्थः स्यात्। यदि चाध्ययनेऽनेकार्थावबोधरूपं नियम्येत तोमानान्तरविरोधः तद्रूपस्य विधानात्पुस्तकादिपा
ठेनाप्यधिगमात्। तस्मात्स्वर्णं भयमिति भवध्मानादिफलं कल्पनीयं तथा चाध्ययनविधेरनियमकत्वाच्छूद्रस्याध्ययने
न वा पुस्तकादिपाठेन वा सामर्थ्यमस्तीति सोऽपि ब्रह्मविद्यायामधिकारः संवर्गविद्यायां तु भविष्यति। अहहारे त्वा शूद्र इति
शूद्रं संबोधनसामर्थ्यात् नैष शूद्रशब्दः कदाचिदवयववृत्त्यास्तामितो माभूदध्ययनाभावः सर्वत्र ब्रह्मविद्यायामधि
शूद्रो वर्णनीयः। अवयवप्रसिद्धितः समुदायप्रसिद्धेरनपेक्षतया बलीयस्त्वात्। तस्माद्यथानधीयानस्यापि निषादस्थप ८८

तेरधिकारवचनसामर्थ्यादेवं संवर्गविद्यायां शूद्रस्याधिकारो भविष्यतीति प्राप्त एवं प्राप्ते ब्रूमः। न शूद्रस्याधिकारो वेदाध्य
यनाभावादिति। अयमभिसंधिः। यद्यपि स्वाध्यायोऽध्येतव्य इत्ययमध्ययनविधिर्न किंचित्फलवत्कर्मारभ्याम्नातो नाप्यव्यभिचरितक्र
तुसंबंधिपदार्थगतः न हि जुह्वादिवत्स्वाध्यायोऽव्यभिचरितक्रतुसंबंधस्तथापि स्वाध्यायस्याध्ययनसंस्कारविधिरध्ययनसापेक्ष
तोपायनामप्युपगमयत्। किं पिंडपितृयज्ञा स्वर्गो वा सुवर्णं भार्यमिति वदर्थवादिकं वा फलं कल्पयित्वा विनियोगभंगेन स्वाध्या
येनाधीयेत समर्थः। कल्प्यतां किं वा परंपरया याप्यन्यतोऽपेक्षितमधिगम्य निर्वर्णोतीति विषयेन दृष्टद्वारेण परंपरयापि अन्यतोऽपेक्षि
तमनिलंबे च यथाश्रुति विनियोगोपपत्तौ संभवं सांश्रुतविनियोगभंगेनाभवनादेवाश्रुतादृष्टफलकल्पनोचिता। दृष्टश्च स्वाध्या
यस्य संस्कारस्येन हि गुरुषेण स्वाध्यायेनाप्तप्रफलवत्कर्मब्रह्मावबोधमभ्युदयनिःश्रेयसप्रयोजनं जनयति न तु स्वर्णधारणादौ दृष्टद्वा
रेण परंपरायत्तापेक्षितं पुरुषस्य तस्माद्विपरीतवृत्तसाधारणादेव विनियोगभंगेन कल्पते यदा चाध्ययनसंस्कृतेन स्वाध्यायेन फलवत्
कर्मब्रह्मावबोधो भावयमानोऽभ्युदयनिःश्रेयसप्रयोजन इति स्थापितं न ह्यस्याध्ययनं तस्यैव कर्मब्रह्मावबोध अभ्युदयनिःश्रेयसप्र
योजनो न्यस्य यस्य चोपनयनसंस्कारस्तस्यैवाध्ययनं। स च द्विजातीनामेवेत्युपनयनाभावेन नाध्ययनसंस्कारास्तस्यैवाध्ययनं स च
द्विजातीनामेवेत्युपनयनभावेन नाध्ययनसंस्काराभावात्पुस्तकादिपठितस्वाध्यायजन्मोऽर्थावबोधः। शूद्राणां न फलाय कल्पत
इति शास्त्रीयसामर्थ्याभावाच्छूद्रो ब्रह्मविद्यायामधिक्रियत इति सिद्धं। यच्चोक्तं वक्ष्यत इति यत्तत्प्रकरणमुपलक्षणार्थं विद्याम
वक्ष्यत इत्यपि दृष्टव्यं सिद्धवदभिधानस्य न्यायपूर्वकत्वान्न्यायस्य चोभयत्र साम्यात्। द्वितीयं पूर्वपक्षमनुभाषते यस्तु स
र्वविद्यायामिति। दूषयति तल्लिंगं कुतः न्यायाभावात्। न तावच्छूद्रः संवर्गविद्यायां साक्षाच्चोद्यते यथैतवा निषादस्थपतिं यो

वाच॰ जयेदितिनिषादस्थपतिः। किंत्वर्थवादगतोयंशूद्रशब्दः सन्नांतः सिद्धमर्थमवयोनयतिनतुपायतीत्युत्तरमीमांसकाः। अस्मा
८९ कं त्वन्यपरादपिवाक्याद्रसतिबाधके प्रमाणांतरयोग्यगम्यमानोविधिनोपेक्षितः। स्वीक्रियतएवन्यायश्चात्सीत् अर्थेउ
क्तोबाधकः नचविध्यपेक्षासिद्धिजातस्याधिकारप्रतिलंभेनविधेः पर्यवसानात् विधुदेशगमनवलेलयंन्यायोपपद्यते। वचनबला
न्निषादस्थपतिवत् नलेपविधुदेशगवदस्तु ऊंतस्मात्रार्थवादमात्राच्छूद्राधिकारसिद्धिरितिभावः। अपिचकिमर्थवादबला
द्विद्यामात्रेधिकारः शूद्रस्य कल्प्यतसंवर्गविद्यायामेवनावच्छिन्नमात्रइत्याहकामचायमिति। नहिसंवर्गविद्यायामर्थवादः॥
श्रुतोविद्यामात्रेधिकारिणमुपस्थापयति अतिप्रसंगात्। अस्तु तर्हि संवर्गविद्यायामेव शूद्रस्याधिकार इत्यत आह। अ
र्थवादस्खलाचेति। तत्किमेन शूद्रपदंश्रमनगीतंनचैतद्युक्तं तु अंहिसांप्रदायिकमित्यत आह शकानेचायं शूद्रशब्द इ
ति। एवंकिलात्रोपाख्यायते जानश्रुतिः पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्यः त्रियातिथिर्भूवलस्वनेषु ग्रामेनगरशृंगाटकेषु
निधाग्रामन्त्रपानानांपूर्णतरिर्थ्याआवसथात्कारयामाससर्वएवमेषुनेअवसथेषु मापन्नमर्षीनि उपोस्यंत इतिअथा
स्याशोरानशौंडस्यगुणगरिमसंतोषिताः संतोदेवर्षयो हंसरूपमस्थायतदनुग्रहायतस्मिन्धासमयेदोषाहर्म्यतलस्थ
स्योपरिमालामलव्यजम्मुस्तेषामन्येसरहंसंसंबोध्योवाच होहोयि भल्लाक्ष भल्लाक्षेतिहंसः साभ्दुतममुवाच होतिभोहभोऽ
जानश्रुतेरस्यपौत्रायणस्यद्युलोकआयतंज्योतिस्तन्मात्रसंसीमैतत्त्वाधाक्षीदितितमेवमुक्तवंतमग्रगामिहंसः प्रत्युवाच कंवर
एनमेतत्संतंसयुग्वानमिवरैक्कमात्थ वरइतिसोपहासमवदमार। अथवावरोवराकोयंजानश्रुतिः। किमित्याक्षेपेयस्मादयं
वराकः तस्मात्किंत्वतसेनः संततंप्राणिमात्रंरैकमिवसयुग्वानमात्थयुग्वागंत्रीशकटीतयासवर्ततइतिसयुग्वारैक्कः तमि
वकमेनंप्राणिमात्रंजानश्रुतिमथरैक्कस्यहिज्योतिसह्यनलेनसप्राणिमात्रसनस्यहिभगवतः पुण्यज्ञानसंभारसंपन्नस्य ८९

रैक्कस्यब्रह्मविदोधर्मेत्रैलोक्योदरवर्तिप्राणभृन्मात्रधर्मोनिर्भवतिपुनरेकधर्मकलांकस्यचिदमेविगाहतेइति। अथैषसहंस
वचनादात्मनोस्तवनिः कर्षमुत्कर्षकाष्ठांचरैक्कस्योपश्रुत्यविषण्णमानसोजानश्रुतिः किंवहवाक्सपराजितःपौनः पुन्येनतिः
श्वसंश्चुभ्येकथमपिनिशीथमतिवाहयांबभूवततोनिशावसानपिसुनमभ्युतवदारवंदश्राब्धस्तुतिसहस्रसंवलितमंग
लतूर्यनिर्घोषमाकर्ण्यनिल्पतलस्थएवराजापरकपदेयंताउमाहूयादिदिशशावसरैक्कमाहूयंब्रह्मविदमेकरंतंसयुग्वानंअति
निविक्तेषुतेषुतेषुविपिनगहनगगननिकुंजनदीपुलिनादिप्रदेशेष्वन्विष्यपवनतोस्मभामाचक्षीतिसचगत्वान्विष्यकचिदति
विविक्तेदेशेशकटस्याधस्तात्पामानंकंडूयमानंब्राह्मणायनमद्राक्षीत्दृष्ट्वाचैनंकोपंभवतीतिप्रतिपावनुपविश्यंनृसविनय
मप्राक्षीत्वमसिहेभगवन्सयुग्वारैक्कइतितस्यचरैक्काभ्युपगमानुमतिंचतेः गेर्हिंगितगर्हस्थोपधनायांचोत्रीयंतारात्रे
निवेदयामाससराजानुषंनिषम्यगवांषट्शतानिनिष्कंचहरमश्वतरीरथंचादायमवरंरैक्कंप्रतिवक्रमेवगत्वाचाभ्युवादह
रैक्कगवांषट्शतानीमानिनिष्कश्चहारश्चायमश्वतरीरथएतदादत्स्वानुशाधीमांभगवंन्निति अथैवमुक्तंभवतिसादोपंचसस्य
हंतो वाचरैक्कआहहारेत्वाशूद्रतवैवसहगोभिरस्त्विति अहेतिनिपातः। साक्षेपआमंत्रणेहारेणयुक्ताइत्वांगांत्रियो
हारेत्वासगोभिः सहेतवेवास्तुकिमेतावन्मात्रेणममधनेनकल्पांतरवर्तिगार्हस्थ्यतिर्वाहानुपयोगिनेतिभावः अहरत्वेतिनुपा
दानर्थकतयाचगोभिः सहेत्यत्रप्रतिसंबद्धोनुपादानेनवाचार्यैर्दूषितः। तदस्यामाख्यायिकायांशब्दः शूद्रशब्देनजानश्रुतिरा
अन्योप्यनयवशुलस्यावयुक्तंसहिरैक्कः परोक्षज्ञतांलिप्सायदपुरालतोजानश्रुतेः शूद्रेतिशुचंसूचयामास। कथंपुनःश
ब्देनशुगुत्पन्नास्यसूच्यतइतिउच्यतेतदाद्रवणात् तद्याचष्टेशुचमभिदुद्राववजानश्रुतिः शुचिप्रापवानित्यर्थः। शुचावाजानश्रुति
दुद्रुवेशुचाप्राप्तमद्रत्यर्थः। अथवाशुचारैक्कंजानश्रुतिद्रुद्रावगतवातस्मात्तदाद्रवणादितितच्छब्देनशूद्राजानश्रुतिर्नारैक्कोवापरास्पृशतइत्युक्तं॥ ॥

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्। इतश्च न जातिशूद्रो जानश्रुतिः यत्कारणं प्रकरणनिरूपणे क्रियमाणे क्षत्रियत्वमव
जानश्रुतेरवगम्यते चैत्ररथेन लिङ्गादिति व्याचक्षाणः प्रकरणं निरूपयति। उत्तरत्र संवर्गविद्यावाक्यशेषे चैत्ररथेनाभिप्रतारि
णा निश्चितक्षत्रियत्वेन समानायां संवर्गविद्यायां समभिव्याहाराल्लिङ्गात् संदिग्धक्षत्रियभावो जानश्रुतिः क्षत्रियो निश्चीयते
अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी बिभिक्षयति। प्रसिद्धयाजकत्वेन कापेयेना
भिप्रतारिणो योगः प्रतीयते ब्रह्मचारिभिक्षया चास्याः शूद्रत्वमवगतं न हि ज्ञातब्रह्मचारी शूद्रान्भिक्षते याजकेन च का
पेयेन योगाद्याज्योऽभिप्रतारी। क्षत्रियत्वं चास्य चैत्ररथत्वात्तस्माच्चैत्ररथिर्नामैकः क्षत्रपतिरजायतेति वचनात् चैत्रर
थित्वं चास्य कापेयेन याजकेन योगात्। एतेन वै चित्ररथं कापेया अयाजयन्निति हि छन्दोगानां द्विरात्रे श्रूयते तेन चित्ररथ
स्य याजकाः कापेयाः। एषां चाभिप्रतारी चित्ररथस्य सन्नेव कापेयानां याज्यो भवति यदि चैत्ररथिः स्यात्। समानान्वयानां हि
प्रायेण समानान्वया याजका भवंति तस्माच्चैत्ररथित्वादभिप्रतारिकाक्षसेनिः क्षत्रियः तत्समभिव्याहाराच्च जानश्रुतिः क्ष
त्रियः संभाव्यत इत्यर्थः क्षत्रियो जानश्रुतिरित्यत्र हेत्वंतरमाह क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्च क्षत्तृप्रेषणं चार्थसंभारश्च तादृगैश्वर्यं प्रायेण
क्षत्रियस्य दृष्टं युधिष्ठिरादिवदिति। संस्कारपरामर्शात्तदभावाभिलापाच्च। न केवलमुपनीताध्ययनविधिपरामर्शा
न्न शूद्रस्याधिकारः किं तु तेषु तेषु विद्योपदेशप्रदेशेषूपनयनसंस्कारपरामर्शात् शूद्रस्य तदभावाभिधानात् ब्रह्मविद्याया
मनधिकार इति ननु अनुपनीतस्य ब्रह्मोपदेशः श्रूयते तान्हानुपनीयैवेति तथा शूद्रस्याप्यनुपनीतस्यैवाधिकारो भविष्यति
त्यत आह तान्हानुपनीयैवेत्यपि प्रदर्शितैवोपनयनप्राप्तिः। प्राप्तिपूर्वकत्वात्प्रतिषेधस्य येषामुपनयनं प्राप्तं तेषा
मेव तन्निषिद्धं ते च द्विजातीनामिति हि जातीय एव निषिद्धोपनयनो नाधिक्रियते न शूद्र इति। तदभावनिर्धारणे च प्रवृत्तेः॥

MEMORIAL

सत्यकामो ह जाबालोऽप्रमीतपितृकः। स्वां मातरं जबालामपृच्छत् आह मातराचार्यकुले ब्रह्मचर्यं चरिष्यामि तद्ब्रवीतु भग
वति किंगोत्रोऽहं बालोऽप्रमीतपितृक इति साब्रवीत् तव जनकपरिचरणतया नाहमज्ञासिषं गोत्रं तवेति स त्वाचार्यं गौतम
मुपससार उपसद्य चोवाच भगवन् ब्रह्मचर्यमुपेयां त्वयीति स होवाच नाविज्ञातगोत्रेऽसीति अथोवाच सत्यकामो नाहं वेद स्वं गो
त्रं स्वां मातरं जबालामपृच्छं सापि न वेदेति। तदुपश्रुत्याथ गौतमो नाद्विजन्मन आर्जवयुक्तमीदृशं वचस्तेनास्मिन्
शूद्रसंभावना नास्तीति त्वं द्विजातिजन्मानमुपनेष्ये त्वमुपनेतुमनुशासितुं च जाबालं गौतमः। प्रवृत्तस्तेनापि न शूद्रस्याधि
कार इति विज्ञायते न सत्यादगा इति। न सत्यमितिक्रान्तवानसि इति। श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च॥ निगद
व्याख्यानेन भाष्येण व्याख्यातं अतिरोहितार्थमन्यत्। कम्पनात्। प्राणवज्रः श्रुतिबलाद्वा वाक्यप्रकरणाभ्यां वायुः पंचवृ
त्तिराध्यात्मिको वात्यश्चात्र प्रतिपाद्यः। तथा हि प्राणशब्दो मुख्यो वायवाध्यात्मिके वज्रशब्दश्चाशनौ अशनिश्च वायुपरि
णामो वायुर्हि बाह्योऽयमज्योतिः सलिलसंवलितः पर्जन्यभावेन परिणतो विद्युत्स्तनयित्नुवृष्ट्यशनिभावेन निवर्तते।
यच्चापि च सर्वं जगदिदं स वायुः कम्पतीयथायथापि सर्वशब्दश्चापेक्षिकोऽपि न स्वाभिधेयं जहाति किं तु संकुचितवृत्तिर्भवति प्राणय
तशब्दो तु ब्रह्मविषयत्वे स्वार्थमेवजं तस्मात्स्वार्थत्यागाद्वरं वृत्तिसंकोचः स्वार्थलेशावकाशनात्। अमृतशब्दोऽपि मरणाभाव
वचनेन सार्वकालिकं तदभावं ब्रूते आपेक्षिकं विनापि तदुपपत्तेः। यथा अमृता देवा इति तस्मात् प्राणवज्रश्रुत्यनुरोधाद्वायु
रेवात्र विवक्षितो न ब्रह्मेति प्राप्तं एवं प्राप्त उच्यते कम्पनात्। सर्वस्य जगतः कम्पनात् परात्वैव शब्दात् प्रमित इति। मण्डूक
प्लुत्यानुषक्तं ब्रह्मणो हि बिभ्यदेतज्जगत् स्वव्यापारे नियमेन प्रवर्तते न तु मर्यादां व्यतिवर्तत एतदुक्तं भवति। न श्रुतिसंकोचमात्रं
श्रुत्यर्थपरित्यागे हेतुरपि तु पूर्वापरवाक्यैकवाक्यताप्रकरणाभ्यासं वलितः श्रुतिसंकोचः। यदिदमुक्तं पूर्वापरयोः ग्रन्थभागयोर्ब्र

वाच॰ ह्लैव निर्दिश्यमाणं उपलभामहे इहैव कथमंतराले वायुं निर्दिश्यमानं प्रतिपद्यतेमहि इति। तदनेन वाक्यैकवाक्यतादर्शिताप्रक
९३ रणादपीति भाष्ये यत्प्रकरणाकुलं यस्य तु खलु श्रुतं तदेव प्रधानं प्रतिविकल्पमिति तस्य प्रकरणं पृष्टं इदमस्मिन्नुपमाने शास्त्र
प्रमाणाभावात्। असंबद्धप्रलापत्वात् यत्तु वायुविज्ञानाच्चिदम्भत लमभिहितमापेक्षिकं तदिति अप पुनर्मृत्युं जयतीति
श्रुत्यात्मपमृत्योर्विजय उक्तो न तु परमममृत्युविजय इत्यापेक्षिकत्वं। न च तत्रैव प्रकरणांतरहेतुना नकेवलमश्रुत्या तदापेक्षित
मपि तु परमात्मानमभिधायानोन्यदर्तमिति वाहादेशार्तत्वाभिधानात् नहि आर्ताभिभासादनार्तमभिवतीति भावः॥ ज्योति
र्दर्शनात्। अत्र हि ज्योतिःशब्दस्य तेजसि मुख्यत्वात् ब्रह्मणि जघन्यत्वात् प्रकरणाच्च श्रुतेर्बलीयस्त्वात् पूर्व श्रुतिसंको
चस्य चात्राभावात् नस्तु तत्र ब्रह्मज्योतिः पक्षो काश्रुते पूर्वकालार्थायाः पीड नप्रसंगात्सुत्थानश्रुतेश्च तेजय वज्योतिः तथा हि शो मु
नत्वमुभेदमन उच्यते। ननु विविके विज्ञानं उत्क्रमनं वतेजः। पक्षौ र्चिरादिमार्गेणोपपद्यते आदित्यमर्चिरपेक्षयापरं ज्योति
र्वतीति तदुपसंपद्य समीपीभूत्वा स्वेन रूपेणाभिनिष्पद्यते कार्यब्रह्मलोकप्राप्तौ क्रमेण मुच्यते। ब्रह्मज्योतिः पक्षे तु ब्रह्मभूता
कायस्वरूपनिष्पत्तिः। न च देहादि विविक्त ब्रह्मस्वरूपसाक्षात्कारो व्यक्तिरूपोऽभिनिष्पत्तिः साहि ब्रह्मभूयात् प्राचीनानतु पराचीना
सेयमुपसंपद्येति कास्तु तिथिः। तस्मात्तिस्त्रिभिः श्रुतिभिः प्रकरणबाधनात् जए वात्र ज्योतिरिति भासंएवं नाभिधीयते परमे
ण ब्रह्म ज्योतिशब्दं कस्मादर्शनात्। न तस्य हि प्रकरणे तु विगिरस्यते। यस्तु प्रतिज्ञायते य च मभ्येपरामृश्य ते पञ्चोपसंहृत्ये
तेन देवप्रधानं प्रकरणार्थस्तदंतः पातिनस्तु सर्वे तदनुगुणतया नेतव्यान श्रुतिअनुरोधमात्रेप्रकरणस्य बाध्या इति हि लोका स्थि
तिस्तथोपांशुयाजकवाक्ये जामितादोषोपक्रमेतत्प्रतिमाधानोपसंहारे तदंतःपातिनो विष्णुरुपांशु यष्टव्य इत्यादयो विधिश्रुत्यनु
रोधेन पृथग्विधयः प्रसज्येरन् तद्धिमिदानीं तिस्रः पवसाद्योपसदः। कार्यद्वादशाहीनस्येति प्रतिकरणानुरोधात्समुदायप्रसि ९१

द्धिचलवच्चमहर्गणाभिधानं परित्यज्याहीनशब्दः कथमप्यवयवव्युत्पत्त्यासहं ज्योतिष्टोममभिधायतत्रैव द्वादशोपसत्तां विधत्तां
सहि क्रत्वन्तरविधानात्प्रकृतस्येरपि हीयते कतोरित्यहीनः शक्योवक्तुमेवं। अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति श्रुत्या प्रका
रणबाधनं च द्वादशोपसत्तामहीनस्य प्रयुक्ते ज्योतिष्टोमे प्रकरणाम्नातस्यपृथगनुमंत्रस्य लिंगबलात् प्रकरणबाधेनापकर्षत
दगत्यापौष्णादौ च कर्मणि तस्यार्थवत्वादिहत्वयकृतस्यार्चिरादिमार्गपरिशेषकल्स्योपायमार्गप्रतिपादकेति विशदपदसंप्राप्ता
दिति वाक्यस्याविशदैकदेशमात्रप्रतिपादकस्य निःप्रयोजनत्वाच्च द्वादशाहीनस्येति वचपोक्तात्स्थ्यानसाधनानुष्ठानं
लोनुमेवद्वादशाहीनस्येति तु वाक्ये स्वार्थसंसर्गतात्पर्ये प्रकरणविच्छेदस्य प्रत्यानुवादमात्रस्य वा प्रयोजनत्वमिति स्तुत्यर्थो
संप्रसाद इति पचनमविरोधार्चिरमार्गमनुवदतीति पुरुक्तं स्तुतिलक्षणयास्वाभिधेयसंसर्गतात्पर्यपरित्यागप्रसंगात्। न चैवं दो
षभयात्समुदायप्रसिद्धिः। मुख्यावयवप्रसिद्धि तु परिश्रित्य स्यान्तस्यैव द्वादशोपसत्तां विधातुमर्हति त्रि तद्वादशत्वयोर्विकल्प
प्रसंगात् न वस्तुत्वागतौ विकल्पो न्याय्यः। स्यान्ताहीनपदयोश्च प्रकृतिज्योतिष्टोमाभिधायिनोरानर्थक्यप्रसंगात्। प्रकरणदेवत
दवगतेः इह तु स्वार्थसंसर्गतात्पर्ये नोक्तदोषसंभवइति पौर्वापर्यपर्यालोचनया प्रकरणानुरोधात्। रूढिमपि पूर्वकालतामपिप
रित्यज्य प्रकरणानुगुण्येन ज्योतिः परं ब्रह्म प्रतीयते। यदुक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति नासावात्यंतिको मोक्षः। किंतु का
र्यब्रह्मलोकप्राप्तिः न च क्रममुक्तिभिप्राय स्वेन रूपेणाभिनिष्पद्यत इति वचनं न त्वेतदप्रकरणे क्रब्रह्मन त्वविदुषो गत्युक्ता
तीति तथा च श्रुतिः। न तस्मात्प्राणा उत्क्रामंति अत्रैव समवलीयंत इति न च न द्वारेण क्रममुक्तिरर्चिरादिमार्गस्यहि कार्य
ब्रह्मलोकप्रापकत्वं न तु ब्रह्मभयहेतुभावो जीवस्य तु निरुपाधिविशुद्धब्रह्मभावसाक्षात्कारहेतुकेमोक्षे कृतमर्चिरादिमा
र्गेण कार्यब्रह्मलोकप्राप्त्या अप्रब्रह्मविदस्तदुपपक्षे तस्माज्ज्योतिरादित्यमुपसंपद्य संप्रसादस्य जीवस्य स्वेन रूपेणपार

वाच॰ मार्थिकेन ब्रह्मणाभिनिष्पन्नि राजसीति श्रुतेरत्रापि कूश्राः। अपिच परंज्योतिः स उत्तमपुरुष इति इहैवोपरिष्टाद्विशेषणाने
९२ जसो आवर्तपुरुषविषयत्वेनावस्थापनाज्ज्योतिः पदस्य परमेव ब्रह्म ज्योतिर्न तु तेज इति सिद्धं। आकाशोऽर्थान्तरत्वादिव्यपदे
शात्। यद्यप्याकाशस्य लिंगादिस्य च ब्रह्मलिंगदर्शनादाकाशः परमात्मेति श्रुत्यादितं तथापि तदस्य परमात्मलिंगदर्शनाभा
वान्नामरूपनिर्वहणस्य भूताकाशेऽप्यवकाशदानेनोपपत्तेः कस्माद्रूढिपरित्यागस्यायोग्य नामरूपयोर्निर्वहिता ब्रह्म ते यदं
रंतरालं मध्यं सारमितिवाच्यत्। न तु निर्वोढृत्व ब्रह्मलअंतरालंवाति वदिश्ग्स्मात्प्रसिद्धेर्भूताकाशो न तु ब्रह्मेति प्राप्ते एवं प्राप्त उच्यते॰
परमेवाकाशं ब्रह्म कस्मादर्थान्तरत्वादिव्यपदेशात्। नामरूपमात्रनिर्वाहकमिहाकाशमुच्यते। भूताकाशं च विकारत्वेन ना
मरूपांतःपातिशक्तेर्विभाव्यान मुद्गरे न हि सुशिक्षितोऽपि विज्ञानी स्वंधेन स्कंधेनात्मानं वोढुमुत्सहेत न च नामरूपश्रुतिर्विशे
षतः। न च त्वाभूताकाशवर्ज नामरूपांतरे संकोचयितुमपि संभवेयुज्यते न च निर्वाहकत्वं निरंकुशमवगतं ब्रह्मलिंगेन कथंचि
त्क्लेशेन परतंत्रे नेतुमुचितं। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति स्रष्टृत्वमतिस्पष्टं ब्रह्मलिंगमत्र प्रतीय
ते। ब्रह्मरूपतया च जीवस्य व्याकर्तृत्वे ब्रह्मण एव व्याकर्तृत्वमुक्तं भवति निर्वहितुरेवांतराकत्वोपपत्तावतो निर्वहितान्यां
तरालमित्यर्थभेदकस्यानापि न युक्तानन्यथात्वं ते नामरूपे यदंतरा तद्ब्रह्म अर्थांतरव्यपदेशाद्यपेक्षोऽभवत्वाकाशस्य त
स्मादर्थांतरव्यपदेशात्तथा तद्ब्रह्म तदमृतमिति व्यपदेशाच्चेति सिद्धं। सुषुप्त्युत्क्रान्त्योर्भेदेन। सुषुप्त्यादिमध्यावसानेषु संसा
रित्वप्रतिपादनात्। तत्र सर्वत्र संदर्भे सर्वत्रैव योज्यते संसार्येव तावदेकात्माहंकारभ्येऽप्राणादिपरीतः सर्वजनसिद्धत्वे
न च योऽयं विज्ञानमयः प्राणेष्वित्यादिश्रुतिसंदर्भ आदिमध्यावसानेषु प्रत्यगात्मनस्तदनुवादपरो भवितुमर्हति एवं च संसार्यात्मै
व किंचिदपेक्ष्य महासंसारस्याचानादिनादित्वादतऊर्ध्वमेनत्तु तदतिरिक्तः कश्चिदत्र निरस्तु दृश्यते तु मुक्तस्वभावः प्रतिपाद्यः।
यत्तु सुषुप्त्युत्क्रान्त्योः प्राज्ञेनात्मना परिष्वक्त इति भेदमन्यसेनासौ भेदः किंतु अयमात्मा संसारी। स्वाभाविकतः तेन सुषुप्त्युत्क्रान्त्योः ९३

वस्थयाविशेषविषयाभावात्संपिंडितप्रज्ञो विशेषनात्मनात्मभावेन परिष्वक्तो न किंचिद्वेदेति भेदेऽपि भेदवदुपचारेण योजनीयं यथाहुः
संपिंडितप्राज्ञ इति। प्रसाद्यश्च शब्दः संसारिण्येव कार्यकारणसंघातात्मकस्य जगतो जीवकर्मार्जितया न भोग्यतया च
योजनीयास्तस्मात्संसार्येवानूद्यते न तु परमात्मात्र प्रतिपाद्यत इति प्राप्ते एवं प्राप्त उच्यते सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशादित्य
नुवर्तते। अयमभिसंधिः किं संसारिणोऽन्यः अपरोऽस्ति न वा त्वं संसार्यात्मपरं योऽयं विज्ञानमयः प्राणेष्विति वाक्यं आहो
स्विदिह संसारिव्यतिरेकेण परमात्मनात्संकीर्तनात्संसारिणश्चादिमध्यावसानेषु एवमर्थास्ते संसार्यात्मपरं न तावत्संसा
र्यतिरिक्तस्य तत्स्यात्स्वतत्त्वविषादिकाहिश्लसाऽऽगमाईक्षने न शिवं गतिसामान्यादित्यादिभिः सूत्रसंदर्भैः प्रतिपादिताः।
न चात्रापि संसार्यतिरिक्तपरमात्मसंकीर्तनाभावः सुषुप्त्युत्क्रान्त्योरस्ति संकीर्तनात्प्राज्ञस्य परमात्मनो जीवाभेदेन संकीर्त
नं संततिसंभवेऽपि राहोः शिर इतिवदौपचारिकं युक्तं न च प्राज्ञशब्दः प्राज्ञाप्रकर्षशालिनि रूढः कथंचिदज्ञस्य पोस्याख्यानु
मुचितो न च प्रज्ञाप्रकर्षोऽसिं कुत्रचित्तिर्विदितसमस्तवेदितव्यस्य विदोऽन्यत्र संभवति न चेत्संभवतो जीवात्मा तस्मात्सुषु
प्त्युत्क्रान्त्योर्भेदेन जीवात्मा प्राज्ञस्य परमात्मनो व्यपदेशाद्योऽयं विज्ञानमय इत्यादिना जीवात्मानं लोकसिद्धमनुद्य तस्य परमात्मभावो
नधिगतः परमात्मभावो प्रतिपाद्यते न च जीवात्मानुवादमात्रपराण्येतानि वाक्यानि अनधिगतार्थविबोधपरं हि शास्त्रं प्रमा
णं नानुवादमात्रमिति तदिष्टं भवितुमर्हति तस्मादेव च संसारिणः परमात्मभावविधानपरमादिमध्यावसानेष्वनुवाद्य तथा च सर्वमुप
पद्यते। एवं महत्त्वं विभुत्वं च सर्वगतस्य नित्यस्यात्मनः संभवतापेक्षिकं कल्पयितुमभ्युपगन्तव्यं तात्पर्यस्योपन्यासादिति
नाने नानास्थानं यत्वं विवक्षितं अपि त्ववस्थानाशपधर्मकत्वेन तदतिरिक्तमवस्थारहितं परमात्मानं विवक्षति। उपरित
नवाक्यसंदर्भपर्यालोचनादिति ॥ पत्यादिशब्देभ्यः॥ सर्वस्य वशी सर्वस्य स्वामी सर्वस्य जगतः प्रभवस्यापि महत्त्व

वाच० स्थापनायसमर्थइति। अतएवसर्वस्येशानः। सामर्थ्येनसत्तमुक्तेनसर्वस्येष्टेतदिच्छानुविधानाज्जगतः अतएवस
९३ र्वस्याधिपतिः। सर्वस्यनियंतांतर्यामीतियावत्। किंचसएवंभूतोहृदयंज्योतिःपुरुषोविज्ञानमयात्मसाधुना
कर्मणाभूयानुत्कृष्टोभवतीत्येवमाद्याः श्रुतयोसंसारिणंपरमात्मानमेवप्रतिपादयंतितस्माज्जीवात्मानंमा
नांतरसिद्धमनूद्यतस्यब्रह्मभावप्रतिपादनपरोयंविज्ञानमयइत्यादिवाक्यसंदर्भइतिसिद्धं॥ ॥
इतिश्रीआचार्यवाचस्पतिमिश्रविरचितेशारीरकभगवत्पादभाष्यविभागेभामत्यांप्रथमस्याध्यायस्यतृतीयः
पादः॥ ३ ॥ ॥ आनुमानिकमप्येकेषामितिवेत्रशरीररूपकविन्यस्तगृहीतेर्दर्शयति
चस्मादेतद्ब्रह्मजिज्ञासांप्रतिज्ञायब्रह्मणोलक्षणमुक्तंजन्माद्यस्ययतइति। नचेदंलक्षणंप्रधानादौगतंये
नव्यभिचारादलक्षणंस्यात् किंतुब्रह्मण्येवेतिश्रुतेर्यशब्दमितिप्रतिपादितंगतिसामान्यंचवेदांतवाक्यानांब्र
ह्मकारणवादंप्रतिविघटितेनप्रधानकारणवादंप्रतीतिप्रियंचिंतयतानेनसूत्रसंदर्भेणनकिमपरमवशिष्यते
यदर्थमुत्तरःसंदर्भआरभ्यतेनचमहतःपरमव्यक्तमित्यादीनांप्रधानेनसमन्वयेपिव्यभिचारः नह्येतेप्रधा
नकारणत्वंजगतआहुः अपितुप्रधानसद्भावमात्रंनचतत्सद्भावमात्रेणाजन्माद्यस्ययतइतिब्रह्मलक्षणस्यकिं
चिच्छिद्यते तस्मादनर्थकउत्तरःसंदर्भः इत्यतआह। ब्रह्मजिज्ञासोप्रतिज्ञायेतिनप्रधानसद्भावाभावंप्रतिपादयंतिम
हतःपरमव्यक्तमजामेकामित्यादयः किंतुजगत्कारणंप्रधानमितिमहतःपरमित्यत्रहिपरशब्देविप्रकृष्टपूर्वकालव
गाहतयाचकारणत्वं। अजामीमेकामित्यादीनांतुकारणत्वाभिधानमितिस्फुटमेवंचलक्षणव्यभिचारापत्तौतदव्यभि
चाराययुक्तउत्तरसंदर्भारंभइतिपूर्वपक्षयति। तत्रएवंवेति। सांख्यप्रवादरूढिमाह। तत्राव्यक्तमिति। सां ९३

ख्यस्मृतिप्रसिद्धैर्नकेवलंरूढिरेवपरप्रसिध्याप्ययमेवार्थोगम्यतइत्याहतत्राव्यक्तमितिप्रशांतघोरमूढशब्दादिहीनत्वाद्धीनिशुतिरूढास्य
निश्चसांख्यीयात्पायस्याभेदानांपरिमाणात्समन्वयात्शक्तितःप्रवृत्तेश्चकारणकार्यविभागादविभागाद्वैश्वरूप्यस्यकारणमस्त्यव्यक्त
मिति। नचमहतःपरमव्यक्तमितिप्रकरणपरिशेषाभ्यांशरीरगोचरंशरीरस्यशांतघोरमूढरूपशब्दाद्यात्मकत्वेन अव्यक्तानुप
पत्तेः तस्मात्प्रधानमेवाव्यक्तमुच्यतइतिप्राप्तउच्यते। नैतदेवंनह्येतत्कारकंवाक्यमितिलौकिकीहिप्रसिद्धिरूढीवेदार्थनिर्णय
निमित्तंनदुपायत्वात्तथाहुः यएवलौकिकाःशब्दास्तएववैदिकास्तएवचैषामर्थाइति तस्माद्रूढितस्तावन्नप्रधानंप्रतीय
तेयोगस्त्वन्यत्रापितुल्यःतदेवमव्यक्तश्रुतावन्यथासिद्धायांप्रकरणपरिशेषाभ्यांशरीरगोचरोयमव्यक्तशब्दः यथा
चास्यतद्गोचरत्वमुपपद्यतेतथाग्रेदर्शयिष्यति। तेषुशरीरादिषुमध्येविषयास्तद्गोचराविधियथाश्वोयानमालंब्यचल
त्येनमिंद्रियहयाःस्वगोचरमालंब्येति। आत्माभोक्तेत्याहुःमनीषिणःकथमिंद्रियमनोयुक्तंयोगेयथाभवतिइंद्रियार्थमनः
संनिकर्षेणह्यात्मागंधादीनांभोक्ताप्रधानस्याकांक्षावतोवचनंप्रकरणमितिगंतव्यं। विष्णोःपरमंपदंप्रधानमितितदाकांक्षाम
वतारयति। तेभ्यश्चेंद्रियादिरथंतैरितिअसंयमाभिधानंव्यतिरेकेणमुखेनसंयमादरद्यतीकारणं। परशब्दःश्रेष्ठवचनः।
नत्वांतरत्वेनयदिश्रेष्ठत्वंतदेंद्रियाणामेवचदोगंधादिभ्यःश्रेष्ठत्वंस्यादित्यतआह। अर्थायेशब्दादयइतिनांतरत्वे
नश्रेष्ठत्वंअपितुप्रधानतयातच्चविवक्षाधीनंग्रहेंद्रश्चेंद्रियेभ्योनिग्रहनपार्थानांप्राधान्यंश्रुत्याविवक्षितमिंद्रियेभ्योर्थानां
प्राधान्यात्। परत्वंभवतिघ्राणजिह्वावाक्चक्षुःश्रोत्रमनोहस्तत्वचोहींद्रियाणिश्रुत्यात्रग्रहाउक्ताः गृण्हंतीवशीकुर्वंतिखल्वे
तानिपुरुषपशुमिति नचैतानिरूपतोवशीकर्तुमुत्सहंतेयावदस्मैपुरुषपशवेगंधरसनामरूपशब्दकामकर्मस्पर्शा
नोपहरंतिअतएवगंधादयोप्यतिग्रहाःगदुपहारेणग्रहणग्रहत्वोपपत्तेः। तदिदमुक्तमिंद्रियाणांग्रहत्वंविषयाणांम

नियहत्वमितिश्रुतिप्रसिद्धेरितियहत्वेनेंद्रियैः साम्येपिमनसः स्वगतेनविशेषणार्थम्भिः परत्वमाह विषयेभ्यश्चमनसः परत्व
मिति कस्मात्पुनरर्थित्वेनोपक्षिप्तोग्रहणइत्यत्रआह। आत्मशब्दादिति नत्वस्यभिज्ञानादित्यर्थः श्रेष्ठत्वे हेतुमाह। भोक्तृ
श्चेति नरदनेनजीवात्मा स्वामितयामहानुक्तः अथवाश्रुतिस्मृतिभ्यांहैरण्यगर्भीबुद्धिरात्मशब्देनोच्यतइत्याह। अ
थवेति। पूरितिभोग्यज्ञानस्यबुद्धिरधिकरणमितिबुद्धिः पूः तदेवंसर्वासांबुद्धीनांप्रथमजाहिरण्यगर्भबुद्धिरा
त्मत्वात्। सर्वस्थिनजात्मनोऽध्यात्मनोऽश्व कनीडतयाहिरण्यगर्भबुद्धेर्महत्वंचापनाराश्चलाचरतेबुद्धिमात्राल्लयकरण
मुपपन्नंनत्वेतस्मिन्पक्षेहिरण्यगर्भबुद्धेनरधिनआत्मनोभोक्तुरत्रोपादानमितिनरथमात्रंपरिशिष्यतेअपितु
रथवानपीतिअतआह एतस्मिन्रूपकइति। यथाहिसमारोपितंप्रति बिंबविंबा जनसस्तुतोभिधते। तथानप
रमात्मनोविज्ञानात्मावस्तुतोभिद्यतइतिपरमात्मैवरथवानिहोपगःतेनरथमात्रंपरिशिष्टमिति। अथरथादि
रूपककल्पनायाःशरीरादिषुकिंप्रयोजनमित्यतआह। शरीरेंद्रियमनोबुद्धिविषयवेदनायुक्तस्येतिवेदना
सुखाद्यनुभावः। प्रत्यर्थमंचवीतिप्रत्यगात्मेहजीवोभिमतस्तस्यब्रह्मावगतिः नचजीवस्यब्रह्मसत्वनांतरसिद्धंयेना
त्रनागमोपेक्षेतेत्याह। तथाचेतिवाग्नितिच्छांदसोदितीयालोपःशेषमतिरोहितार्थंपूर्वपक्षिणोनुशययवीजानीराकार
णपरंसूत्रंसूक्ष्मंतुतदर्हत्वात्। प्रकृतेर्विकाराणामनन्यत्वात्प्रकृतेरव्यक्तत्वंविकारउपचर्यते। यथागोभिः
श्रेणीतेतिगोशब्दः स्वाद्विकारेपयसिअव्यक्तात्कारणाद्विकाराणामनन्यत्वेनाव्यक्तशब्दार्थत्वेप्रमाणमाह॥ तथा
चश्रुतिरिति।अव्याकृतमव्यक्तमित्यनर्थांतरंनन्वेवंसतिप्रधानमेवाभ्युपेतंभवतिसुखदुःखमोहात्मकंजगदव
गताद्देवकारणाद्भवितुमर्हतिकारणात्मकत्वात्कार्यस्ययत्रतस्यसुखात्मकत्वंयत्रतत्सत्वंयत्रतस्यदुःखात्मकत्वंतद्रजः।

यत्रतस्यमोहात्मकत्वंतमः तथाचाव्यक्तंप्रधानमेवाभ्युपेतमितिशंकानिराकरमितिशंकानिराकरणार्थंसूत्रं॥ तदधी
नत्वादर्थवत्। प्रभ्रांहिसांख्यानांसेश्वराणामनीश्वराणांवाईश्वराद्दक्षेत्रज्ञेभ्योवावस्तुतोभिन्नंशक्यंनिर्वक्तुंब्रह्मणस्त्वि
यमविद्याशक्तिर्मायादिशब्दवाच्यानशक्यातत्वेनान्यत्वेनवानिर्वक्तुंइदमेवास्याअव्यक्तंयदनिर्वाच्यत्वंनामसोयमपारुत
वादस्यप्रधानवादाद्भेदः॥ अविद्याशक्तेश्वेश्वराधीनत्वंतदाश्रयत्वात्प्रचरद्व्यमात्रमशक्तंकार्यायालमितिशकेरर्थवत्वंतदिद
मुक्तमर्थवदिति॥ स्यादेतत्यदिब्रह्मणोविद्यात्मासंसारः प्रजायतेहंतमुक्तानामपिपुनरुत्पत्तिप्रसंगस्त्याःप्रधानवचादवस्थ
तोदितासेवासमस्तसंसारिच्छेदस्तत्प्रत्वाविद्याशक्तेःसमुच्छेदादित्यतआह। मुक्तानांचपुनर्बंधस्यानुपपत्तिः कुतः विद्यया त
स्याबीजशक्तेर्दाहात्॥ अयमभिःसंधिः नवयंप्रधानवदविद्यांसर्वजीवेष्वेकामाचक्ष्महेयेनैवमुपालभेमहिकिंत्वियंप्रतिजी
वंभिद्यतेतेनयस्यैवजीवस्यविद्योत्पन्नातस्यैवाविद्यापनीयतेनजीवांतरस्येत्याधिकरणयोर्विद्याविद्ययोरविरोधान्नतुकुतः।सम
स्तसंसारोच्छेदप्रसंगःप्रधानवादिनांप्रधानस्यैकत्वेनतदुच्छेदेसर्वोच्छेदोनुच्छेदेवानकस्यचिदितिअनिर्मोक्षप्रसंगः॥ प्रधाना
भेदेपिचेभदविवेकख्यातिलक्षणाविद्यासद्भसत्वनिबंधनौबंधमोक्षौनर्हिकृतंप्रधानेन अविद्यासद्भावभावमेवतदु
पपत्तेः। नचाविद्योपाधिभेदाधीनोजीवभेदाधीश्चाविद्योपाधीभेदइतिपरस्पराश्रयादुभयासिद्धिरितिसांप्रतं॥ अ
नादित्वात्बीजांकुरवदुभयसिद्धेः अविद्यात्वमात्रेणचैकत्वोपचारोव्यक्तमितिचाव्याकृतमितिचनन्वेवमपियैवज
गद्बीजमितिकृतमीश्वरेणेत्यतआह॥ परमेश्वराश्रयेति। नह्यचेतनंचेतनानधिष्ठितंकार्यायपर्याप्तमितिस्व
कार्यंकर्तुंपरमेश्वरंनिमित्ततयोपादानतयावाश्रयतेप्रपंचविभ्रमस्यधीश्वराधिष्ठानतमहीविभ्रमस्येवरज्ज्वधिष्ठानत्वंत
नयथाहिविभ्रमोरज्ज्वुपादानएवंप्रपंचविभ्रमईश्वरोपादानतस्माजीवाधिकरणाप्यविद्यानिमित्ततयाविषयतया

वाच.

९५

नेश्वरमाश्रयत इतीश्वराश्रये त्वस्मिन्न बाधा तत्र यथा विद्यास्वभावे ब्रह्मणि तदनुपपत्तेरिति। अतएवाह यत्स्वरूपप्रति
बोधरहिताः शेरते संसारिणो जीवा इति यस्यामविद्यायां सत्यां शेरते जीवाः जीवानां स्वरूपं वास्तवं ब्रह्म तत्प्रबोधरहिताः शेर
त इति यदुक्तं संसारिण इति विशेषणमुक्तं। अव्यक्ताधीनत्वाज्जीवभावस्येति यद्यपि जीवविद्ययोरनादित्वेनान्योन्यं
नं पौर्वापर्यं न तथाप्यव्यक्तस्य पूर्वत्वं विवक्षितं तत्र दुःखं सत्यपि शरीरे बहिरिन्द्रियादीनामिति गोबलीवर्दवदवतद्रष्टव्यं
आचार्यदेशीयमतमाह। अन्ये त्विति। एतद्दूषयति नैतदिति प्रकरणपरिशेषाभ्यामुभयत्र तु स्वशब्दैकग्रहणनियमहे
तुरस्तीति शंकते। आम्नानस्यार्थमिति। अव्यक्तपदमेव स्थूलशरीराकृतिहेतुरव्यक्तत्वादतस्तेनेति शंकार्थः॥
निराकरोति नैकवाक्यताधीनत्वादिति प्रकृतहानाप्रकृतप्रक्रियाप्रसंगे नैकवाक्यत्वे संभवति न वाक्यभेदो युज्यते॥
न चाकांक्षाविनायैकवाक्यत्वं उभयं च प्रकृतमित्युभयं प्राप्तत्वे नेहाकांक्षितमित्येकाभिधायकमपि पदं शरीरद्वयप
रं न च मुख्यार्थात् तत्र रश्मिसौपचारिकं न भवतीति यथोपहृतमात्र निराकरणं कांक्षायां काकपदं प्रयुज्यमानं
श्वादिसर्वोपसंहृत्परं विज्ञायते यथाहुः काकेभ्यो रक्ष्यतामन्नमिति बालोपचोदितः उपघातकप्रधानत्वान्न श्वा
दिभ्यो न रक्षतीति न तु न शरीरद्वयस्यात्राकांक्षा किं तु दुःशोधनत्वात्कस्मैचित् शरीरस्यानुषक्तौ शिकस्य
स्थूलस्य तद्विरस्य विभक्तत्वात् कुत्सकरं वैराग्यविषयत्वेन शोधयितुमित्यत आह। न चैवं मन्तव्यमिति विष्णोः परमं प
दमवगमयितुं परमत्र प्रतिपाद्यत्वेन प्रस्तुतं न तु वैराग्याय शोधनमित्यर्थः। अलं वा विचारेण भवतु सूक्ष्मं शरीरं प
रिशोध्यं तत्र तथापि न सांख्याभिमतमत्र प्रधानं परिमित्याह्यपेत्याह सर्वथापीति ज्ञेयत्वावचनाच्चेत्यपि नायमव्यक्त
शब्दः। सांख्याभिमतप्रधानपरः सांख्यैर्हि गुणप्रधानविवेकेन पुरुषं निःश्रेयसाय ज्ञातुं विज्ञायते न प्रधानं ज्ञेयत्वेनोपक्षिप्य

९५.

तेन चेतज्ज्ञानीयादिति चोपासीतेति वा विधिविभक्तिः श्रुतिरस्ति। अपि त्वव्यक्तपदमात्रं न चैतावता सांख्यस्मृतिप्रत्यभिज्ञा
नं भवतीति भावः॥ ज्ञेयत्वावचनात्सांसिद्धिमाशंक्य तत्सिद्धिप्रदर्शनार्थं सूत्रं। वदतीति चेन्न प्राज्ञो हि प्रकरणात्। निग
दव्याख्यातमस्य भाष्यं। त्रयाणामेव तथा हि दश प्रधानं सांख्यैः स्मर्यते तादृशमेवास्मिन्न्यूनानतिरिक्तं भवितव्यं तेषां हि प्रधान
लक्षणा प्रकृतिर्न जायत इत्यजा वरका च लोहितशुक्लकृष्णा च यद्यपि लोहितत्वादयो वर्णा न रजःप्रभृतिषु संति तथापि लो
हितं कुसुंभादि रंजयति रजोपि रंजयतीति लोहितं एवं प्रसन्नप्रायः॥ शुक्लं सत्त्वमपि प्रसन्नमिति शुक्लं यथा वमावरकं मेघा
दि कृष्णं तमोप्यावरकमिति कृष्णं परेणापि नाव्याकृतस्य स्वरूपेण लोहितत्वादियोग आरोप्यः॥ किं तु कार्यस्य तेजोवन्न
स्य लोहितत्वादि कारणे उपचरणीयं कार्यसारूप्येण वा कारणे कल्पनीयं तदस्माकमपि तुल्यं अजो ह्येको जुषमाणोनुशेते
जहात्येनां भुक्तभोगामजोन्य इति त्वात्मभेदश्रवणात् सांख्यस्मृतेरेवात्र मंत्रवर्णे प्रत्यभिज्ञानं सांख्यकृतप्रक्रियायास्तस्यामै
कात्म्याभ्युपगमेनात्मभेदाभावात्॥ तस्मात्स्वतंत्रं प्रधानमजाशब्दमिति प्राप्तं तेषां साम्यावस्था अवयवधर्मैरिति अवयवाः
प्रधानस्यैकस्य सत्त्वरजस्तमांसि तेषां धर्मा रोहितत्वादयस्तैरिति प्रजास्त्रैगुण्यान्विता इति सुखदुःखमोहात्मिकाः॥ त
था हि मैत्रदारेषु नर्मदायां मैत्रस्य सुखं तत्कस्य हेतोस्तं प्रति सत्त्वसमुद्भवात्। तथा तत्सपत्नीनां दुःखं ततः कस्य हेतो
स्ताः प्रति रजःसमुद्भवात् तथा चैत्रस्य तामविंदतो मोहो विषादः स कस्य हेतोस्तं प्रति तमःसमुद्भवात्। तथा चैत्रस्य ताम
विंदतो मोहो विषादः स कस्य हेतोस्तं प्रति तमःसमुद्भवात् नर्मदया च सर्वे भावा व्याख्याताः॥ तदिदं त्रैगुण्यान्वितत्वं प्रजा
नां अनुशेत इति व्याचष्टे तामेवाविद्ययेति विषयाहिशास्य॥ प्रकृतिविकारत्रैगुण्येन ×३ वचैवमुपन्यासः॥ प्रश्नश्चा
वरप्रश्नोपक्रमाद्धि मृत्युनचिकेतः। संवादे वाक्यप्रवृत्तिरासमाप्तेः कठवल्लीनां दृश्यते मृत्युः किल नचिकेतसे कुपितेन

पित्राप्रहितायपुत्रस्यौद्दालकर्नचिकेतासुप्रथमेन वरेण पितुः॥ सौमनस्यं वव्रे द्वितीयेनाग्निविद्यां तृतीयेनात्मविद्यां वराणा
मेष वरस्तृतीय इति वचनात्॥ ननु न वरप्रदाने प्रधानगोचरः॥ प्रश्नप्रतिवचने॥ तस्मात्कठवल्लीष्वग्निजीवपरमात्म
परैव वाक्यवृत्तिः॥ न तत्र क्वांन प्रधानपराभवितुमर्हतीत्याह इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वमिति हंत तमिदं प्रवक्ष्या
मि गुह्यं ब्रह्म सनातनमित्यनेनव्यवहितं॥ जीवविषयं यथा च मरणं प्राप्यात्मभवति गौतमेत्यादि इति वचनमिति योजना
अत्राह चोदकः॥ किं जीवपरमात्मनोरेक एव प्रश्नः किं वान्यो जीवस्य येयं प्रेते मनुष्ये इति प्रश्नोऽन्यश्च परमात्मनोऽन्यत्र धर्मा
दित्येकत्वे सूत्रविरोधस्त्रयाणामिति भेदेपि तुः सौमनस्यावाप्त्यमात्मज्ञानविषयवरत्रयप्रदानं तर्भाविन्यत्र धर्मादित्या
देः॥ प्रश्नस्य तुरीयवरांतरकल्पनायां वाराद्धृतीय इति श्रुतिबाधप्रसंगः॥ वरप्रदानं तर्भावे प्रश्नस्य तद्वत्प्रधानाख्यान
मप्यनंतर्भूतं वरप्रदानेनेत्युक्तः॥ परमव्यक्तमित्याक्षेपः परिहरति। अत्रोच्यते नैवं वयमिह हतिवक्तुना जीवपरमा
त्मनोरभेदात्प्रश्नैकत्वाभेदेनैकएव प्रश्नोत्तरयोः प्रतिवचनमप्येकं सूत्रं त्ववास्तवभेदाभिप्रायं वास्तवश्च जीवपरमात्मनोर
भेदस्तत्रतत्र श्रुत्युपन्यासेन भगवता भाष्यकारेण दर्शितः॥ तथाजीवविषयस्यास्तित्वनास्तित्वप्रश्नस्येत्यादि येयं प्रेते इतिलिंगि
नचिकेतसः॥ प्रश्नमुक्तं सततकामविषयलोभं वास्य प्रतीत्य मृत्युर्विद्याभिप्सितं नचिकेतसं मन्यइत्यादिना नचिकेत
सं प्रशस्य प्रतिदीयं प्रशंसं नसिन्न च सैवोत्तरमुवाच तं दुर्दर्शमिति। यदि पुनर्जीवात्प्राज्ञोभिप्रेतजीवगोचरः॥
प्रश्नप्राज्ञगोचरं चोत्तरमिति किं केन संगच्छेत अपि च यद्विषयं प्रश्नमुपश्रुत्य मृत्युनैवं प्रशंसितो नचिकेतायदि तमे
व भयः। पृच्छेत्तदुत्तरेतावदवधायतः। प्रशंसायदृष्टार्थस्यात्प्रश्नांतरे वसावस्थानेप्रसारितास्य दृष्टार्थास्यादित्याह
मत्यश्चेति। यस्मिन्प्रश्नोयप्रश्नः॥ शेषमतिरोहितार्थमिहतु च अनेन सांख्यप्रसिद्धेर्वैदिकप्रसिध्याविरोधात्सांख्यप

९६

सिद्धिर्वैद आदर्शयत्युक्तं संख्यातानां महत्तत्त्वं सत्तामात्रं पुरुषार्थक्रियाक्षमं सत्तास्य भावः सत्तामात्रं महत्तत्त्वमिति यावत्पुरु
षार्थक्रियाशब्दाद्युपभोगलक्षणा सा च पुरुषान्यताख्यातिलक्षणा च सोसर्वामिह इति। बुद्धौ समाप्यते इति महत्तत्त्वं सत्तामात्रमु
च्यत इति। चमसवद्विशेषात्। अजाशब्दोयद्यपिछागायां रूढस्तथाप्यध्यात्मविद्याधिकारान्नतत्र वर्तितुमर्हतीति
तस्माद्रूढेरसंभवाद्योगेन तत्र वर्तत इत्यत्यः॥ तत्र किं स्वतंत्रं प्रधानमनेनाभिमंत्रवर्णेनानूद्यता मुतपारमेश्वरी मायाश
क्तिस्तेजोबन्नात्मक्रियाकारणमुच्यताकिंतावत्प्राप्तं प्रधानमेवेति × ९६ पत्रपृष्ठस्यशोधः॥ वोक्क ३॥ सुखदुःखमो
हात्मानइंद्रियमनोहंकारप्रणालिकया बुद्धिसत्त्वमुपसंक्रामंति तेन तद्बुद्धिसत्त्वं प्रधानविकारः सुखदुःखमोहात्मकश
ब्दादिरूपेण परिणमते चितिशक्तिस्त्वपरिणामिन्यप्रतिसंक्रमापि बुद्धिसत्त्वादात्मनो विवेकमबुध्यमाना बुद्धिवृत्त्यैव विप
र्यासेनाविद्यया बुद्धिस्थान्सुखादीन्प्रत्यभिमन्यमाना सुखादिमतीव भवति। तदिदमुक्तं। सुखी दुःखी मूढोहमिति अविवे
कितयासंसरत्येकः सत्त्वपुरुषान्यताख्यातिसमुन्मिलितनिखिलवासनाविद्यानुबंधस्तु प्रोजहात्येनांप्रकृतिं तदिदमुक्तम
न्यःपुनरितिभुक्तभोगामिति या च दृष्टा भोगापवर्गौ शब्दाद्युपलब्धिर्भोगः गुणपुरुषान्यताख्यातिरपवर्गः। अपरत्वे ने
हितया पुरुष इति एवं प्राप्तेभिधीयते न तावद्योगेनैकोनुशयाणोयुशेते जहात्येनां भुक्तभोगामजोन्यइति एतदात्मभेदप्रतिपा
दनपरमपि तु सिद्धमात्मभेदमनूद्यबंधमोक्षौ प्रतिपादयति सचानूदितोभेद एकोदेवः॥ सर्वभूतेषुगूढः॥ सर्वव्यापी स
र्वभूतांतरात्मेत्यादि श्रुतिभिरात्मैकत्वप्रतिपादनपराभिर्विरोधात्कात्स्यतिकोवनिधृते न भावनसांख्यप्रक्रियासप्रत्यभिज्ञा
नमिति। आजावाक्यं बभसवाक्यवत्परिप्लवमानं न स्वतंत्रप्रधाननिश्चयाय पर्याप्तं तदिदमुक्तं सूत्रेकृता चमसवद्विशे
षादिति। उत्तरसूत्रमवतारयितुं शंकते तत्र विदंतच्छिरइति सूत्रमवतारयति। अत्र ब्रूमः ज्योतिरुपक्रमानुत्याह

वाच० धीयते एके सर्वशाखाप्रत्ययमेकं ब्रह्मेति स्थितौ शाखान्तरोक्तरोहितादिगुणयोगिनी तेजोबन्नलक्षणा जरायुजाण्डजस्वेदजो
९७ द्भिज्जचतुर्विधभूतग्रामप्रकृतिभूता येयमजा प्रतीयते सा रोहितशुक्लकृष्णामिति रोहितादिरूपतया तस्याः प्रत्यभिज्ञानात्। न
तु सांख्यपरिकल्पिता प्रकृतिस्तस्या अप्रामाणिकतया श्रुतहानाश्रुतकल्पनाप्रसंगात्। रंजनादिना चारोहितादयुपचारस्य
मुख्यार्थसंभवे योगात्। तदिदमुक्तं रोहितादीनां शब्दानामिति अजापदस्य समुदायप्रसिद्धिपरित्यागेन न जायत इ
त्यवयवप्रसिद्ध्याश्रयणे प्रसंगात्। अत्र गुरूपकल्पनया समुदायप्रसिद्धेरेवानपेक्षायाः स्वीकारात्। अपि चायम
पि श्रुतिकलापो न स्मद्दर्शनानुगुणो न सांख्यास्मत्तनुगुण इत्याह तथेहापीति। किंकारणं ब्रह्मेत्युपक्रम्येति ब्रह्मस्वरूपं तावज्ज
गत्कारणं यस्माद्ब्रह्मणो जगदुत्पत्तौ तत्किंकारणं ब्रह्मेत्यर्थः। नैतस्य विरोधान्नयोगेनात्मानं गताः। आत्माजपश्यन्तद्धिती
योजनायोगोनिर्योनिर्मिणजविद्याशक्तिर्यानिः। सा च प्रतीयते नैतीसुक्रमगोविष्णोपपत्त्याशेषमतिरोहितार्थं सञ्चांतरम
चतारयितुं शंकते कथं पुनरिति अजाकृतिर्जातिस्तेजोबन्नेषु नास्ति न च जीवन्मायांजन्मश्रवणादजन्मनिमित्तोप्यजाश
ब्दः संभवतीत्याह न च तेजोबन्नानामिति पक्षान्तरमवतारयति अत उत्तरं पठति। कल्पनोपदेशाच्च मध्वादिवदविरोधः॥
ननु किं छागा लोहितशुक्लकृष्णैव यन्मादृशीनामपि छागानामुपलंभादित्यत आह। यदृच्छयेति। चतुर्वर्कराबहुशा
वाशेषि चिगरूआख्यातं न संख्योपसंग्रहादपि नानाभावादिति रेकाच्च अवान्तरसंगतिमाह। एवं परिहृत्यपी
ति पंचजनशब्द इति वाच्यं तथा हि पंच मनुजायितत्वात्। एवं चात्मनि पंचमनुष्याणामाकाशस्य च प्रतिष्ठानमिति
नित्यात्ययं सर्वस्येव प्रतिष्ठानात्। तस्माद्दूरसंभवात्त्यागेनात्र योग आस्थेयः। जनशब्दश्च कथंचित्तत्त्वेषु व्याख्येयः
तत्रापि किं पंचव [illegible] प्राणादयो वाक्यशेषगता ९७

विवस्यंतां जननरितिरिक्ता अस्य एव वा केचित्। तत्र पौर्वापर्यालोचनया काण्वमाध्यंदिनवाक्ययोर्विरोधादेकत्र हि ज्योतिषा पंचत्व
मन्ने नेतरत्र न च षोडशीग्रहणाग्रहणादिकल्पसंभवोनुष्ठाने हि विकल्पते न च वस्तु वस्तुन च कथाचेपं तानुष्ठान कथाविध्यभा
वात्। तस्मात्कानिचिदेव तत्त्वानीह पंच पंचकं पंचसंख्यायोगिनी पंचविंशतितत्त्वानि भवन्ति सांख्यैश्च प्रकृत्यादीनि पंच
विंशतिस्तत्त्वानि स्मर्यन्त इति तान्येवानेन मन्त्रेणोच्यन्त इति नाशब्दं प्रधानादिन चाधारत्वेनात्मनोऽव्यवस्थानात् त्वात्मनी
चाधाराधेयभावस्य विरोधादाकाशस्य चव्यतिरेचनाच्च योविंशतिर्जनाइति पंचपंचजना इति वाच्यं सप्ताकाशात्मनो
व्यर्थतिरेवनेमूलप्रकृतिभागैः सत्त्वरजस्तमोभिः पंचविंशतिसंख्योपपत्तेस्तथा सत्यात्माकाशाभ्यां सप्तविंशतिसंख्या
यां पंचविंशतितत्त्वानीति व्यसिद्धांतव्याप्तकोपइति चेत् मूलप्रकृतित्वमात्रेणैकीकृत्य सत्त्वरजस्तमांसि पंचविंशतित्वोप
पत्तेर्हि भुक्त्याचेन तु तेषां सप्तविंशतित्वाविरोधस्तस्मात्त्राशब्दीत्यां ख्यस्मृतिरिति भासंमूलप्रकृतिः प्रधानं ना सा चान्यस्य
विकृतिरपि तु प्रकृतिरेव तदिदमुक्तं मूलेति महदहंकार पंचतन्मात्राणि प्रकृतिश्च विकृतिश्च तथाहि महत्तत्त्वमहंकारस्य
तत्त्वान्तरस्य प्रकृतिर्मूलप्रकृतेस्तु विकृतिरेवमहंकारस्य विकृतिराकाशादीनां पंचानां प्रकृतिस्तदिदमुक्तं महदाद्याः प्रकृति
विकृतयः। सप्त षोडशकेशैश्च षोडशसंख्यावच्छिन्नो गणो विकारस्तत्र पंचभूतानि तन्मात्राणि एकादशेन्द्रियाणीति षोडश
को गुणः यद्यपि पृथिव्यादयो गवादीनां प्रकृतिस्तथापि न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति न प्रकृतिः तत्त्वान्तरोपादानत्वं
चेह प्रकृतित्वमभिमतं नोपादानमात्रत्वमिति न विरोधः पुरुषस्तु कूटस्थनित्योपरिणामी न कस्यचित्प्रकृतिर्नापि विकृतिरिति
एवं प्राप्तेभिधीयते न संख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्त्वाशंकाकर्तव्या कस्मान्नानाभावात् नानाह्येतानि पंचविंशतित
त्वानि नैषां पंचशः साधारणो धर्मोस्ति न खलु सत्त्वरजस्तमोमहदहंकाराणामेकः। क्रिया वा गुणो वा द्रव्यं वा जातिर्वा धर्मः

पंचतन्मात्रादिभ्यो भावतः सत्वादिषु वानुगतः क्वचिदस्ति नापि पृथिव्यप्तेजोवायुघ्राणानां नापि रसनचक्षुःत्वक्श्रोत्रवाचां
नापि पाणिपादपायूपस्थमनसां येनैकेनासाधारणेनोपगृहीताः पंचकाभवितुमर्हंतीति पूर्वपक्षैकदेशीनमुत्थापयति अथोच्य
तपंचविंशतिसंख्यैवेयमितियद्यपि परस्यां संख्यायामवांतरसंख्या द्वित्वादिका नास्ति तथापि तत्पूर्वं तस्याः संभवात्सौवपर्यल
क्षणया प्रत्यासत्या परसंख्यालक्षणार्थं पूर्वसंख्योपन्यास इति दूषयति अयमेवास्मिन्पक्षे दोष इति नच पंचशब्दो जनश
ब्देन समस्तो समस्तः शक्योवक्तुमित्याह। परस्थानपंचशब्द इति नतु भवतु समासस्तथापि किमित्यत आह समस्तत्वाच्चे
ति न वीप्सा अपि च वीप्सायां पंचकद्वयग्रहणे दशैव ननाविनिसांख्यस्मृतिश्रुत्यभिधानमित्यसमासमभ्युपेत्याह च पंचक
द्वयग्रहणं च पंचेति न चैकापंचसंख्यांतरेण शक्यावेदुं पंचशब्दस्य संख्योपसर्जनद्रव्यवचनत्वेन संख्याया उपसर्जनं
तयाविशेषणं नासंयोगादित्याह। एकस्याः पंचसंख्याया इति। तदेवं पूर्वपक्षैकदेशिनि दूषिते परमपूर्वपक्षिणमुत्थापयति नन्वा
पपन्नपंचसंख्याका जनाएवेति अत्र तावद्यौ सत्यांतयोगः संभवतीति वक्ष्यते तथापि यौगिकं पंचजनशब्दमभ्युपेत्य
दूषयति युक्तं पंचपुलीशब्दस्येति पंचपुलीषु त्रयद्यपि पृथक्त्वैकार्थः समवायिनोपंचसंख्यावच्छेदिकास्ति तथापीयं स
मुदायिनो नच्छिनत्ति न समुदायं समाप्तिपदगम्यं अनस्ति क्वाति ते समुदायाइत्यपेक्षायां परांतराभिहिता पंचसंख्या संबध्यते
पंचेति पंचजना इत्यत्र तु पंचसंख्ययोत्पत्तिसंख्यया जनानामविच्छिन्नत्वा समुदायस्य च पंचपुलीवदत्राप्रनीतेर्नपदांतरा
भिहिता संख्या संबध्यते स्यादेतत् संख्येयानां जनानां मा भूच्छदांतरवाच्यसंख्यावच्छेदः पंचसंख्यायास्तु तयावच्छेदो भ
विष्यति नहि सप्यवच्छिन्नोस्ति नत्याह। भवदिदं विशेषणमितिउक्तो त्रदोषः नह्युपसर्जने विशेषणेन युज्यते पंचशब्द एवता
वत् संख्येयोपसर्जनसंख्यामाह विशेषतस्तु पंचजन इत्यत्र समासे विशेषणापेक्षायां तु न समासः स्यादसामर्थ्यात् नहि भवति

९८

ऋद्धस्य राजपुरुष इति समासः॥ अपितु परवृत्तिरिव ऋद्धस्य राज्ञः पुरुष इति सापेक्षत्वेनासामर्थ्यादित्यर्थः॥ अतिरेकाच्चे
त्यभ्युच्चय मात्रं। यदि सत्वरजस्तमांसि प्रधानेनैकीकृत्यात्माकाशौ न तेभ्योऽतिरिच्येते नेतरासिद्धांतव्याकोपः। अथ तु सत्वर
जस्तमांसि प्रधानेनैकीकृत्यात्माकाशौ न तेभ्योऽतिरिच्येते नेतरासिद्धांतव्याकोपः॥ अथ तु सत्वरजस्तमांसि मिथो भिद्य
विवक्ष्यंते तथापि वस्तुतत्वव्यवस्थापने आधारत्वेनात्मा निरूप्यताम् आधेयांतरेभ्यश्चाकाशस्याधेयस्यातिरिक्तत्वेन
मनर्थकं इतिसमधिगंतव्यं कथं च संख्यामात्रश्रवणे सतीति रिक्तसंख्येसंशायामिति संज्ञायां समासश्रवणात् पंचजनश
ब्दस्य वक्वचिदयं निरूढः न च सत्यामवयवप्रसिद्धौ ग्रहणं सापेक्षत्वान्निरपेक्षत्वाच्च रूढेः नच विरुद्धो मुख्यार्थः प्राप्यते न तः स
एवयाहि तन्त्रोऽथ तत्सौ न वाक्यसंबंधाहः श्रवणात्परवाक्यविरोधी वा तन्नोरूपपरित्यागेनैव रत्वंतरेणार्थो नरकल्पयित्वा वाक्यमु
पपादनीयं यथा स्येनेनाभिचरन्यजेतेति श्येनशब्दस्य यवार्थयोगानपेक्षेऽप्येकस्मिन्नपि वर्तते यथा सति निर्दिष्टः क्वाक्रपिपुवि
मिश्च एकस्मिन्नसत्र ऋपिपुच्चयर्तते न चैषतत्त्वेषु रूढाः पंचविंशतिसंख्यानुरोधेन तत्त्वेषु वर्तयितव्यः रूढौ सत्यां पंचविंशत्ये
वसंख्याया अभावात् कथं तत्त्वेषु वर्तेतरवं च के ते पंचजना इत्यपेक्षायां किं वाक्यशेषगताः प्राणादयोगृह्यंताम् उत पंच
विंशतिस्तत्वानीति विषयेन तत्त्वानामप्रामाणिकत्वात्प्राणादीनां च वाक्यशेषेश्रवणात्तत्परित्यागे श्रुतिहान्यश्रुतकल्पनाप्र
संगात्तत्प्राणादय एव पंचजनाः। नच काण्वमाध्यंदिनयोर्विरोधात् प्राणादीनां वाक्यशेष[illegible] गतानां
मपि ग्रहणमिति सांप्रतं विरोधेऽपि तुल्यबलत्वेन षोडशिग्रहणवद्विकल्पोपपत्तेः नचेयं वस्तुस्वरूपकथा अपि तूपास
नानुष्ठानविधिः मनसैवानुद्रष्टव्यमिति विधिश्रवणात्। कथं पुनः प्राणादिषु जनशब्दस्य प्रयोग इति जनवाचकः शब्दो
जनशब्दः पंचजनशब्द इति यावत् तस्य कथं प्राणादिषु जनेषु प्रयोग इत्याक्षेपं अन्यथा तु प्रसक्तमितावयवार्थे

समुदायशक्त्यर्थो नास्तीति पर्यनुयोग एवरूपपरित्यागेनैव वक्तव्यं न इदं दृश्यते जनसंबन्धात्पंचजनशब्दभाजः पंचज
नशब्दभाजः न तु संख्यासमन्वयप्रसिद्धौ समुदायशक्तिकल्पनमनुपपन्नं संभवति च पंचविंशत्यां न लोके न समन्वयप्रसि
द्धिरित्यत आह समासबलाच्चेति स्यादेतत्समासबलाच्चेदुदीरावारुीयते हंत न दृष्टस्तर्हि तस्य प्रयोगाश्च सुपकर्णादि
वृक्षादिषु तथा च लोकप्रसिद्ध्यभावान्न रूढिरित्याक्षिपति कथं पुनरसीति जनेषु तावत्पंचजनशब्दस्य प्रथमप्रयोगो लो
के दृष्ट इत्यसति प्रथमप्रयोग इत्यसिद्धमिति रूढीयत्वमनभिधायाभ्युपेत्य प्रथमप्रयोगाभावं समाधत्ते शक्योऽन्यदाहि वृ
द्धिरिति आचार्यदेशीयानां मतभेदं दूषयितुं पंचविंशतितत्त्वानि सिध्यंति परमार्थत्वं पंचजनावाक्यशेषगताएवेत्याशयवा
नाह केचित्तिनिशेषमतिरोहितार्थं कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः अथ समन्वयलक्षणे के यमाकांडे विरोधा
विरोधचिंता भवितुमर्हति तस्य स्थानमविरोधलक्षणमित्यत आह। प्रदिपादितं ब्रह्मण इति। अयमर्थः नानेकशाखागतत
तद्वाक्यलोचनया वाक्यार्थविगमे पूर्वपक्षसंस्कारे सति प्रमाणांतरविरोधेन वाक्यार्थविगते रप्रमाणमाशंक्याविरोधमुखार
नेन प्रामाण्यस्थापनमविरोधलक्षणार्थः प्रासंगिकं तु तत्र सृष्टिविषयाणां वाक्यानां परस्परविरोधप्रतिपादनं न तु ल
क्षणार्थः। तत्प्रयोजनं च तत्रैव प्रतिपादयिष्यते इह तु वाक्यानां सृष्टिप्रतिपादकानां परस्परविरोधे ब्रह्मणि जगद्यो
नौ न समन्वयः सेद्धुमर्हति तथा हि न जगत्कारणत्वं ब्रह्मणो लक्षणं न च तत्र गतिसामान्यं न च तत्सिद्धये प्रधानस्याशब्दत्व
प्रतिपादनं तस्माद्वाक्यानां विरोधाविरोधाभ्यामुक्तार्थाक्षेपसमाधानाभ्यां समन्वय एवोपपाद्यत इति समन्वयलक्षणसं
गतमिदमधिकरणं वाक्यानां कारणे कार्ये परस्परविरोधः तथा हि कानिचिदसत्कर्तृकां जगदुत्पत्तिमाचक्षते।
वाक्यानि कानिचित्स्वयंकर्तृकां सृष्ट्या च कार्येण तत्कारण तथा ब्रह्मलक्षितं सृष्टिविप्रतिपत्तौ तत्कारणतायां ब्र

ह्मलक्षणे विप्रतिपत्तौ सत्यां भवति तल्लक्ष्ये ब्रह्मण्यपि विप्रतिपत्तिः तस्माद्ब्रह्मणि समन्वयाभावान्न समन्वयगम्यं ब्रह्म
वेदांतास्तु कर्त्रादिप्रतिपादने न कर्मविधिपरतया पचरित्वार्था अविवक्षितार्था वा जपादियोगिन इति प्राक्तनमादित्यग्रहणे
न क्रमो गृह्यते। एवं प्राप्ते अभिधीयते सर्गक्रमे विवादेऽपि न स्रष्टरि ति विप्रतिपत्तिस्तस्य सर्वत्र चोभयत्वानिराकार्यतया क
चित् नेतावदस्ति सृष्टिक्रमे विज्ञानं श्रुतीनामविरोधात्। तथा ह्यनेकशिल्पपर्यवदातो देवदत्तः प्रथमं चक्रदण्डादि क
रोति अथ तदुपकरणः कुंभं कुंभोपकरणस्वाहा। रज्जुदकं उदकोपकरणश्च संयवनेन गोधूमकणिकानां करोति पिंडं पिं
डोपकरणस्तु पचतिघनपूर्णं तदस्य देवदत्तस्य सर्वत्रैतस्मिन्कर्तृत्वाच्च क्रमं कुंदेवदत्तात् चक्रादिसंभवः तस्माच्च कारे कुं
भादिनिशक्यं च देवदत्तस्य साक्षात्कर्तुरनुस्यूतत्वात्। तथेहापि यद्यप्याकाशादिक्रमेणैव सृष्टिस्तथाप्याकाशानिलानला
दौ तत्र तत्र साक्षात्परमेश्वरस्य कर्तृत्वात्तदशक्यं च कुंपरमेश्वरादाकाशः संभूत इति शक्यं च वक्तुं परमेश्वरादनलः संभू
त इत्यादि यदि त्वाकाशाद्वायुर्वायोस्तेज इत्युक्ता तेजसो वायुर्वायोराकाश इति ब्रूयात् भवेद्विरोधो न त्वेतदस्ति तस्मा
दक्रमाभिवादः। श्रुतीनामेवं सद्मानलोकात्सृजनेत्यक्रमाभिधायिन्यपि श्रुतिरविरुद्धा। एषा हि स्वपारमभिधा
नमक्रमेण कुर्वति नाभिधेयानां क्रमं विरुणद्धि ते तु यथाक्रमावस्थिता एव क्रमेणोत्पद्यंते। यथाक्रमवंति जातानि जाता
नीति नदेवमविज्ञानं अभ्युपेत्य तु विज्ञानमुच्यते सृष्टाः स्वत्वे तद्विज्ञानं सृष्टा तु सर्वे वेदांतवाक्ये नुस्यूतः परमेश्वरः। प्रतीय प्र
तेनात्र श्रुतिविज्ञानं सृष्टा तु मात्रयाप्यास्ति न च सृष्टिविज्ञानं सृष्टिरिति हि दीनानिरूपेण विज्ञानमावहतीति वाच्यं न ह्युपसृष्ट
तमात्रेणोच्यते अपितु सत्यं ज्ञानमनंतं ब्रह्मेत्यादिना रूपेणोपलक्षणा स्वरूपं सर्ववेदांतवाक्यानुगतं तज्ज्ञानं च
फलवत् ब्रह्मविदाप्नोति परं तरति शोकमात्मविदित्यादिश्रुतेः सृष्टिज्ञानस्य तु न फलं श्रूयते तेन फलवत्संनिधा

वाच० संनिधावनफलंनदंगमितिसृष्टिविज्ञानंसृष्टब्रह्मविज्ञानांगंतदनुगुणंसनुब्रह्मज्ञानावतारोपायतयाव्याख्येयंतथाचश्रुतिः।
१०० अन्नेनसौम्यशुंगेनापोमूलमन्विच्छेत्यादिकाशुंगेनाद्येणकार्येणोनिर्यावतन्तस्मान्नसृष्टिविप्रतिपत्तिः सृष्टिरिविप्रतिपत्ति
मावहत्यपितुगुणत्वन्यायकल्पनेतितदनुगुणतयाव्याख्येयायत्वकारणेविगाहनमसद्वायिदमग्रआसीदितितदप्येषश्लो
कोभवतीतिप्रर्दर्प्ररूतंसद्ब्रह्माकथ्यासदेवेदमग्रआसीदित्युच्यमानंब्रह्मसन्नाभिधानेसंबंधंस्यात्।श्रुत्यंतरेणचभवनांत
रेणचविरोधः तस्मादौपचारिकंव्याख्येयंतद्धिकआहुरसदेवेदमग्रआसीदितितुनिराकार्यतयोपन्यस्तमितिनकार
णविवादइतिसूत्रेचशब्दःपूर्वपक्षंनिवर्तयति आकाशादिषुसृष्टजमानेषुक्रमविगानेपिस्रष्टरिविगानं।कुतः यथै
कस्यांश्रुतौव्यपदिष्टःपरमेश्वरःसर्वस्यकर्तातथैवश्रुत्यंतरेष्ठक्तेः केनरूपेणकारणत्वेन अपरःकल्पः यथाव्यपदि
ष्टक्रमः आकाशादिषु आत्मनःआकाशःसंभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यःपृथिवीतितथैवैव
क्रम आकाशादिषु आत्मस्यानपबाधनेनतेजोसृजनेत्यादिकाया अपिसृष्टेरुक्तेर्नसृष्टावपिविगानानंतन्वेकत्र आत्मान
आकाशकारणत्वेनाक्तिरन्यत्रतेजः कारणत्वेनतत्कथमविगानंइत्यतआह कारणत्वेनैतिहेतौतृतीयासर्वत्राकाशान
लानिलादीनांसाक्षात्कारणत्वेनात्मनःप्रपंचिततंचैतदधस्तात् आक्रियतइतिचकर्मकर्तरिकर्मणिवारूपं नचेतनव्य
तिरिक्तं कर्तारंप्रतिक्षिपतिकिंतुपस्थापयति नहिलूयतेकेदारःस्वयमेवेतिवालूयतेकेदारइतिचालवितारंदेवदत्तादिं
प्रतिक्षिपत्यपिउपस्थापयत्येवतस्मात्सर्वमेवदातंजगद्वाचिद्वात् नतुब्रह्मतेन्नब्रह्माणिवातिब्रह्माभिधानप्रकरणात्।उपसं
हारेचसर्वान्पाप्मनोपहत्यसर्वेषांचभूतानांश्रैष्ठ्यंस्वाराज्यंपर्येतिपर्येविएवंवेदेतिनिरतिशयफलश्रवणादब्रह्मवेदनाद
यत्रत्यतदसंभवात्।आदित्यचंद्रादिगतपुरुषकर्तृत्वस्यचयस्यवेदंकर्म [illegible] तिचाससवच्छेदस १००

र्वनाम्नाप्रत्यक्षसिद्धस्यजगतः परामर्शेनंजगत्कर्तृत्वस्यचब्रह्मणोन्यत्रासंभवात् कथंजीवमुख्यप्राणाशंकाउच्यते।ब्र
ह्मतेब्रवाणीतिबालाकिनागार्ग्येणब्रह्माभिधानंप्रतिज्ञायतदनन्तरादित्यादिगताब्रह्मपुरुषाभिधानेनतावद्ब्रह्मोक्तंयस्वा
जातशत्रोर्यान्वैबालाकेएतेषांपुरुषाणांकर्तायस्यचैतत्कर्मेतिवाक्यंतेनब्रह्माभिधानंप्रतिज्ञातं नचान्यदीयेनोपक्रमेणा
न्यशस्यवाक्यशेषस्यनियंतुंतस्मादजातशत्रोर्वाक्यसंदर्भपौर्वापर्यालोचनयायोस्यार्थः प्रतिभातिसएवग्राह्यः अत्रचकर्म
शब्दस्यावद्यापारेनिरूढवृत्तिः कार्यतुक्रियतइतिव्युत्पत्त्याव्यर्थेतेनचरूढौसत्यांयुक्तायुक्ताआश्रयितुंनचब्रह्मणउदा
सीनस्यापरिणामिनोव्यापारवत्तादिगतपुरुषकर्तृत्वंचप्राणस्योपपद्यते।वाक्यशेषेचाथास्मिन्प्राणएवैकधाभवतीतिश्र
वणात्परिस्पंदलक्षणस्यचकर्मणाश्रयोपपत्तिः।सएववेदितव्यतयोपदिश्यते आदित्यादिगतपुरुषकर्तृत्वंचप्राणस्योप
पद्यतेहिरण्यगर्भरूपप्राणावस्थाविशेषत्वादादित्यादिदेवतानांकतमएकोदेवः प्राणइतिश्रुतेः उपक्रमानुरोधेनचोपसं
हारेसर्वशब्दः सर्वास्यात्मनइतिचसर्वेषांचभूतानामितिचापेक्षिकवृत्तिर्बहूनांपाप्मनोबहूनांभूतानांमित्येवंपरोद्रष्टव्यः।
एकस्मिन्वाक्यउपक्रमानुरोधादुपसंहारोवर्णनीयः।यदितुदृप्तबालाकिमब्रह्मणिब्रह्माभिधायिनमपोह्याजातशत्रोर्व
चनंविषयमेवान्यथातुनदुक्तात्।विशेषंविवक्षोरब्रह्माभिधानंसंबद्धंस्यादद्गइतिमन्यतेतथापिनैतद्ब्रह्माभिधानंभवि
तुमर्हतिअपितुजीवाभिधानमेवयत्कारणंवेदितव्यतयोपन्यस्तपुरुषाणांकर्तुर्वेदनायोपेतंबालाकिंप्रतिबुबोधयि
षुरजातशत्रुःसत्यंपुरुषमामंत्र्यामंत्रणशब्दाश्रवणात्प्राणादीनामभोक्तृत्वंअस्वामित्वंप्रतिबोधयष्टिघातोत्थानात्मा
प्यादिव्यतिरिक्तंजीवंभोक्तारंस्वामिनंप्रतिबोधयतिपरस्तादपितद्यथाश्रेष्ठीस्वैर्भुंक्तेयथावास्वाः।श्रेष्ठिनंभुंजंतिएवमेवैष
प्रज्ञात्मैतैरात्मभिर्भुंक्तेएवमेवैतआत्मानएवमात्मानंभुंजंतीतिश्रवणात् यथाश्रेष्ठःप्रधानःपुरुषः स्वैःभृत्यैः करण

वाच०

१०१

भुंक्ते विषयान् भुंक्ते यथा बालान्ना श्रेष्ठिनं भुंजंति नहि श्रेष्ठिनं। अशनाच्छादनादिग्रहणेन भुंजंति एवमेवैष प्रज्ञात्माजी
वएतैरादित्यादिगतैरात्मभिर्विषयान्भुंक्ते नत्वादित्यादय आलोकवृष्ट्यादिनासाचिव्यमाचरंतो जीवात्मानं भोजयंति जी
वात्मानमपि यजमानं तदुत्सृष्टहविरादानादिना आदित्यादयो भुंजंति तस्मात्। जीवात्मैव ब्रह्मणो भेदात् ब्रह्मेह वेदितव्यतयो
पदिश्यते यस्य वै तत्कर्मेति जीवप्रयुक्तानां देहेंद्रियादीनां कर्म जीवस्य भवति कर्म जन्यत्वाद्वा धर्माधर्मयोः कर्मशब्दवा
च्यत्वं रूढ्यनुसारात्। तौ च धर्माधर्मौ जीवस्य धर्माधर्माक्षिप्तत्वाच्चादित्यादीनां भोगोपकरणानां तेषु जीवस्य कर्तृत्वमुपप
न्नं उपपन्नं च प्राणभृत्त्वात्। जीवस्य प्राणशब्दत्वं च तत्र प्रतिवचनेष्वैषएतद्धा लोकेषु पुरुषो शयिष्ट यदा सुप्तः स्वप्नं न कंचन
न पश्यति इति। अनयोरपि तस्य परं ब्रह्माभिधानमुपलभ्यते जीव व्यतिरेकश्च प्राणात्मनो हिरण्यगर्भस्याप्युपपद्यते। तस्मा
ज्जीवप्राणयोरन्यतरः इह ग्राह्यो न परमेश्वर इति प्राप्तं एवं प्राप्त उच्यते न्यायवादिनमापाद्य बालाकिं ब्रह्मवादिनं। राजा कथ
मसंबंधं मिथ्यावादं कुर्महेति यथाहि केनचिदमणिलक्षणज्ञमानिना काचो मणिरेष वदिते मद्रस्तु केपरस्य काचोयं न मणिः
ग लक्षणायोगादित्यभिधाय तत आत्मानो विशेषं जिज्ञापयिषोरत्ताभिधान संबंधं अमणौ मणणभिधानं न पूर्ववादि
नो विशेषमापादयति स्वयमपि मिथ्याभिधानात्। तस्मादनेनोत्तर वादिना पूर्ववादिनो विशेषमापादयता मणित्वमेव वक्
तव्यं एवमजातशत्रुणा दृप्तबालाकेर्ब्रह्मवादिनो विशेषमात्मनो दर्शयता जीवप्राणाभिधानेऽसंबंधमुक्तं स्यात् तयो
र्वाब्रह्मणो ब्रह्माभिधाने मिथ्याभिहितं स्यात्। तथा च न कश्चिद्विशेषो बालाकेरजातशत्रोर्भवेत्। तस्मादनेन ब्र
ह्मतत्त्वमभिधातव्यं तथा सत्यस्य न मिथ्यावादितां स्माद् ब्रह्म ते ब्रवाणीति ब्रह्मोपक्रमात्। सर्वान्पाप्मनोपहत्य स
र्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यं पर्येति य एवं वेदेति सं भवे सर्वश्रुतेः संकोच्यनिरतिशयेन फलेनोपसंहारात्। ब्रह्म वेदनाद

१०१

न्यतश्च तदनुपपत्तेरादित्यादिपुरुषकर्तृत्वस्य च स्वातंत्र्यलक्षणस्य मुख्यस्य ब्रह्मण्येव संभवात्। अन्येषां हिरण्यगर्भादीनां तस्य
तं त्र्यात् असंभेदात्कथमेतद्बालाक इत्यादेर्जीवाधिकरणभवनात् दत्रप्रश्नादनप्रश्नयदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मि
न्प्राण एवैकधा भवतीत्यादेरुत्तरस्य च ब्रह्मण्येवोपपत्तेर्ब्रह्मविषयत्वं निश्चीयते अथ कस्मात् प्रश्नः। तो हिरण्यगर्भगोचरे
प्रश्नोत्तरे तथा च नैताभ्यां ब्रह्मविषयत्वसिद्धिरित्येतन्निराचिकीर्षुः पठति एतस्मादात्मनः प्राणा यथायतनं प्रतिष्ठंत इति
एतदुक्तं भवति आत्मैव जीवप्राणादीनामधिकरणं नान्यदिति यद्यपि च जीवो नात्मनो भिद्यते तथाप्युपाध्यवच्छिन्नस्य प
रमात्मनो जीवत्वेन तदुपाधिभेदाभेदमारोप्याधाराधेयभेदाद्भावोऽवगमः। एवं च जीवभवनाधारत्वमपादानत्वं च परमा
त्मन उपपन्नं तदेवं वाक्यं जातशत्रुवाक्यसंदर्भस्य ब्रह्मपरत्वे स्थिते यस्य वै तत्कर्मेति व्यापाराभिधानेन संगच्छते इति क
र्मशब्दः कार्याभिधायी भवतीदमिति सर्वनाम परामृष्टं च तत्कार्यं सर्वनाम चेदं संनिहितपरामर्शि न चिकिंचिदिह शब्दो
क्रमस्ति संनिहितं न चादित्यादिपुरुषाः संनिहिता अपि परामर्शार्हाः बहुत्वात् पुल्लिंगत्वाच्च एतदिति चैकस्य नपुंसकस्याभि
धानात्। एतेषां पुरुषाणां कर्तेत्यनेनैव गतार्थत्वाच्च तस्माच्छब्दोपक्रममपि प्रत्यक्षसिद्धसंबंधार्हं जगदेव परामृष्टं एतदुक्तं
भवति। अत्यल्पमिदमुच्यते एतेषामादित्यादिगतानां जगदेकदेशभूतानां कर्तेति किंतु कृत्स्नमेव जगद्यस्य कार्यमिति वाशब्देन
सूच्यते जीवप्राणशब्दौ च ब्रह्मपरौ जीवशब्दस्य त्वोपलक्षणपरत्वात् न पुनर्ब्रह्मशब्दो जीवोपलक्षणपरः तथा सति हि वृ
त्तसमंजसत्वादित्युक्तं न चानधिगतार्थावबोधनस्वरसस्य शब्दस्याधिगतबोधनं युक्तं नाप्यनधिगतेनाधिगतोपलक्षणमुपपन्नं
न च संभवत्येकवाक्यत्वे वाक्यभेदो न्याय्यः वाक्यशेषानुरोधेन च जीवप्राणपरमात्मनोपासनात्रयविधाने वाक्यत्रयं भवेत्॥
ग्रामस्तेन सहावतिष्ठत इति सविज्ञानः चोदयति ननु प्राणस्तेजसीति श्रूयत इति अधिकावापो शब्दार्थ आत्मानं परिहरति नैष दोष इति। यद्य
पि प्राणस्तेजसि तेजसप्राण इति लयः प्रतीयते तथापि सर्वशरीरव्याप्तत्वेन विषयान्भुक्तं तरालोचनया विज्ञानात्मनि लयो वगम्यते न च तेजल
यापि लय इति सांप्रतं तस्याविद्याकाशक्रमेण परमात्मनि तल्लयावगमात्। तस्मात्तेजो ग्रहणे नोपलक्ष्यते तेजः सहचरितानि देहबीजभूत
सूक्ष्मपरिवाराध्यक्षो जीवात्मा तस्मिन्प्राणवृत्तिरस्येतीति चोदयति न तु चेयं श्रुतिरिति तेजः सहचरितानि भूतान्युपलक्ष्यन्तां तेजः शब्देनाध्यक्षे तु
क्रियामाणं तस्य न तत्साहचर्यादित्यर्थः। परिहरति सोध्यक्षे तद्वत्सापीति। परात्स्यं प्राणे तरालेध्यक्षं प्राप्याध्यक्षस्य संपर्कवशादेव तेजःप्र
भृतीनि भूतसूक्ष्माणि प्राप्नोति तदोपपद्यते प्राणस्तेजसीति अत्रैव दृष्टांतमाह। योपि सुघ्नादिति। सूत्रांतरमवतारयितुं पृच्छति कथं तेजः सहच
रितेष्विति नेकस्मिन्दर्शयतो हि अत्र भाष्यकारोनुमानदर्शनमाह। कार्यस्य शरीरस्येति। स्थूलशरीरानुरूपमनुमेयं सूक्ष्ममपि शरीरं पंचात्म
कमित्यर्थः दर्शयत इति सूक्ष्मावयवं व्याचष्टे दर्शयतश्चैतमन्वर्थमिति श्रुतिप्रतिवचनाभिप्रायं द्विवचनं श्रुतिस्मृत्यभिप्रायं वा जलए वो मात्राः
सूक्ष्मा दशार्धानां पंचभूतानामिति। श्रुत्यंतरविरोधं चोदयति ननु चोपसंहृते पुत्राद्यादिष्विति कथमत्रियमाणतः ततीयत्वेन भूतान्यत्रोक्तोसर्वः।
परिहरति अत्रोच्यत इति यतोऽयं इंद्रियाण्यविग्रहात्मकः क्रियाः कर्मणां प्रयोजकत्वेनाश्रयत्वं भूतानां तत्पादानत्वेनेत्यविरोधः प्रशंसाशब्दोपि
कर्मणां प्रयोजकतया प्रकृष्टमाश्रयत्वं ब्रूते सति च निकृष्ट आश्रयांतरे तदुपपत्तिरित्याह प्रशंसाशब्दादपि तत्रेति ३ समाना चासृत्युपक्रमादमृ
तत्वं चानुपोष्य अत्रास्ततत्त्वज्ञानिश्रुतेः पर्वविद्यानंतरं प्रलेत इति मन्वानस्य पूर्वपक्षः विशायाणनां सिद्धानां पुंसां चोदयति। ननु विद्याप्रकरण
इति परिहरति तस्या यादित्यादिति परविषयैवाम्नता तत्समासप्रस्थय मारब्धा तु तत्स धर्मस्थितद्विधर्मश्चामत्राप्य प्रस्थासत्त्युपगुणतया व्याख्यायंते

साधर्म्यवैधर्म्याभ्यां हि स्फुटतरः प्रतिपिपादयिषतेवस्तु नीप्रसयोपि नेतीति न तु विदुषः सकाशाद्विशेषयंतो विद्वांसो विधीयते येन विषयप्रकरण व्याख्या तोभ
वेदपि तु विद्यां प्रतिपादयितुं लोकसिद्धां गंतव्यानुगुण्ययाते यामनुवाद इति एवं प्राप्ते भिधीयते समाना चैषा क्रांतिर्विद्वन्नसी सापाविद्वनिद्वो॰
कुतः असृत्युपक्रमान्सृतिः सरणं देवयानेन पथा कर्मफलं ठोकप्राप्तिरात्मतेरा कार्यफललोकप्राप्ते अयं विद्यापक्रम आरंभ भलेय इति यावत्।
तस्मान्नयं परा विद्यायतो न मोक्षनाडीद्वार माश्रयते अपि त्वपरविषयं न चास्या गात्यंतिकः क्लेशप्रहाणेपनोस्त तत्रो क्रांतिर्भवेत् तस्मान्नेयं परा वि
द्यतो न मोक्षनाडीद्वारमाश्रयते अपि त्वपरविषया। यन चासांभोग्त स्मारपरविद्यासामर्थ्यादा क्रिके कयाभूतसंपूर्वस्थानमन्वतत्वं प्रेत्य तेपुरुषायत्तं
भवत्येष उत्क्रांतिभेद चास्त्युपक्रमो परेशाऽपपूर्वाङ्गुप्रादुद्रत्वेन तस्मादुपोष्यतिप्रयोगः। ४॥ तदापीतेः संसारव्यपदेशात् सिद्धां कुडबीजभावावशेषं
परमात्मसंपत्तिं विद्वयोप्युत्क्रांतिः समर्थिता सैवसंप्रतिचिंत्यते किमात्यंतिको तेजः प्रभृतीनां भूतसूक्ष्माणां तत्र विलय एव संपत्तिराहोस्विद्वि
भागावशेषेति यदि पूर्वपक्षः नोत्क्रांतिरथोत्तरे पुनः सह से वसंप्रतिपिंसतेकिमात्यंतिकेजमिति न चा प्रकृतौ न विकारतत्त्वप्रविलयः यथा मनसि
न वागादीनां सर्वस्य हि जनिमतः प्रकृतिपरादेवतेति तत्त्वप्रविलय एवासंति कोस्मान्नेजः प्रभृतीनामिति प्राप्ते भिधीयते योनिमन्य प्रतिपा
द्यते शरीरत्वाय देहिनः स्थाणुमन्ये नुसंयंति यथा कर्मयथाश्रुतमिति विषयाक्तः संसारमुपदिशति श्रुतिः सेयमात्यंतिकत्वप्रविला
ये नोपपद्यते भेदेनत्रयाणस्यैव हि महिमा विद्वांसमविद्वांसं च प्रगीति तां प्रवत्तमित्याह। अन्यथा सर्वप्रायणसमय एव तैतिविधिशास्त्रं ज्योतिष्टो
मादिविषयमनर्थकं प्रायणमात्रादेवात्यंतिकप्रलयेपुनर्भावात् मोक्षशास्त्रं चाप्रयत्नलभ्यात् प्रायणादेव जंतुमात्रस्य मोक्षप्राप्तेः। नकेव
लं शास्त्रानर्थक्यं अयुक्तं च प्रायणमात्रान्मोक्ष इत्याह मिथ्याज्ञानेतिनाशतितिनिदानप्रशमे प्रशमस्तद्वत्तयुक्तमित्यर्थः। अथोत्तरभूतसहितं
तेजो जीवस्याश्रय भूतमुत्क्रामदेहांतरं तत्कस्मान्न देहांतरमस्याभिर्निरीक्षते। तद्विमहाबाधाने कदन्यतानूलबहुलत्वकस्मादमूर्तोनत्तेः
प्रतिबध्यत इति। शंकामपाकर्तुं सिद्धं सूत्रं। सूक्ष्मं प्रमाणतश्च तथोपलब्धेः चकारोभिन्नक्रमः न केवलमापीतेः संसारव्यवतिष्ठते तत्त्वसूक्ष्मं

पा० ४ स्वरूपतः परिमाणतः स्वरूपमेवाहितस्य तादृशमदृश्यं यथा वा स्वरूपस्य तेजसो महतोऽप्यदृष्टत्वादनुद्भूतरूपस्पर्शत्वात् स्पर्शाहितत्परिमाणतश्च सूक्ष्मं
१० तेनोपलभ्यते। यथा त्रसरेणवो जालसूर्यमरीचिष्वेव प्रमाणतस्तु तथोपलभ्या इति निमाचष्टे। तथाहि नाडीनिष्क्रमणेति अस्थिग्रहणेन बधु
त्वा नामभौतिकान्योक्ता शरीरदेशोऽपि इति संगृहीतं अप्रतिघातहेतुमाह स्वच्छत्वादिति एतदपि सूक्ष्मत्वेन संगृहीतं यथाहि काचाभ्रपटलादि स्वच्छा
वस्थस्तेजसो न प्रतिघातकं एवं सर्वत्र न वस्तु जातमस्येति नोपमर्दनता। अत एव च स्वच्छत्वादूष्मणा लोकोद्भासस्वरूपतारतम्यं ॥ ७ ॥ ॥
अस्यैवं चोपपत्तेरुष्मा उपपत्तिर्भाष्ये एतदुक्तं भवति दृष्टश्रुताभ्यामन्वयव्यतिरेकाभ्यामस्ति स्थूलदेहादतिरिक्तं किंचिदागमात् सूक्ष्मशरी
रमिति ९ प्रतिषेधादिति चेन्न शारीरात्। अधिकरणतात्पर्यमाह अमृतत्वं चानुपोष्य इत्यतो विशेषणादिति विषयमाह अथाकामयमान इति सिद्धां
तिमतमाशंक्य तन्निराकरणेन पूर्वपक्षत्वमतमवस्थापयति। अतः परविद्याविषयात् प्रतिषेधादिति यदि हि प्राणोपेतस्य सूक्ष्मशरीरस्य
जीवात्मनः स्थूलशरीरादुत्क्रान्तिः प्रतिषेधेद्दृति तत एव दुपपद्यते न तस्मिन् स्वात्म प्राणा उत्क्रामन्तीति हि तदा सर्वगतात्मप्रधानानर्थकमित्याभ्युदय
निःश्रेयसाधिकारस्तदा हि प्रधानं परामृश्यते तथा च तस्मादिति नो प्राणाः सूक्ष्मशरीरमुत्क्रामन्त्यपि तु तत्सहितः क्षेत्रज्ञ उत्क्रामतीति किं नेन स
पुनरिति किमस्य प्रत्यगात्मसंसारमण्डलं हिरण्यगर्भप्रदेशीयं तल्लिङ्गो जीवः परस्मिन् ब्रह्मणि लीयते तस्मात् सरामपि देवतादिदुःखोत्क्रान्तिनरक
वमार्गश्रुतयः स्मृतिश्च मुमुक्षोः शुकस्यादित्यमण्डलमस्तकान्त दृश्यतीति प्राप्तं। एवं प्राप्ते ब्रूमहे। स्पष्टोऽयमेकोदेशत्वापत्तेः पादनप्रतिषेधो
पितुरेहापादानत्वस्य प्रतिषेधः तथा स्मार्तभावप्रश्नोत्तरेऽकस्मिन्नस्य संसारिणश्च जीवात्मनो नु उत्क्रान्तिपरिग्रहस्तत्तद्यथंमतः प्राणानामनुत्क्रामन्ते
रिति स्वयमाशंक्य प्राणदेहो विलयं प्रतिविज्ञापनसिध्यर्थमुत्क्रामसंबन्धेनुमभ्यस्त विदुषः संसारिणो विदुषस्तु किं किमायात मिसत्त्वाह।
तत्तामान्यादिति। ननु तदा सर्वेना भात्रभानतयादेहिपरामृष्टः तत्कथमत्र देहाविगत्योरिति तत्राह। अभेदेन पचारे हि देहिनो देहिपराम
र्शिनः सर्वनाम्नो देहे एव परामृष्टः इति पंचमीपाठो ज्ञेयः षष्ठीपाठे तु नोपचार इत्याह। येषां तु षष्ठीति अपि च स्मर्यते इति पूर्वः प्रतिषेधो भवति १०

नास्त्रातेविदुषो हि देहादुत्क्रमणं दृष्टमिति विदुषोऽपि तत्स्यामाम्नातं देहादुत्क्रमणमाहात्प्रतिषेधोऽप्यनेन तु प्राणानां जीवावधिकमविदुषः उत्क्रमणं दृ
ष्टं येन तन्निषिध्यते। अपि च द्वैतपरिभावनत्वप्रसंख्यानेन निर्मृष्टनिखिलप्रपंचावभासजातस्य गंतव्याभावादेव नास्तिगतिरिति तत्राह। न च ब्रह्मवि
द इति अपदस्य हि ब्रह्मविदां मार्गपदेऽपि पदैषिणः पदे वा इति योजना कोऽस्य तिगतिरिति रथीतिभरिहरति शरीरस्थेव वायं योगबलेनापरविद्याबलेने
ति ६ तानि परे तथा ह्याह प्रतिष्ठाप्रविलयश्रुत्योर्विप्रतिपत्तेर्विमर्शमपनेतुमुपमारंभः तानि पुनः प्राणशब्दोदितानीन्द्रियाण्येकादश सूक्ष्माणि
च भूतानि पंच ब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनीति आरंभबीजं विमर्शमाह ननु गताः कला इति प्राणमनसोरेकप्रकृतित्वं विवक्षितत्वं
वदशात्मयुक्तं अत्र श्रुत्योर्विषयव्यवस्थया विप्रतिपत्त्यभावमुपसारयन्निति व्यवहारो लौकिकः सांव्यवहारिकप्रमाणापेक्षया भेदाद्विप्रतिपत्तिः
श्रुत्योरिति विभागवचनात् निमित्तापायेनैमित्तिकस्याऽसंतिकोपायो विद्यानिमित्तश्च विभागो नाविद्याविषयास्तद्घातमपहतायां सावशेषो
भवितुमर्हति तथापि प्रलयसामान्यात् सावशेषशंकामतिमंदानामपनेतुमिदं सूत्रं। ७ ॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छे
षगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया अपरविद्याविदो विदुषश्चोत्क्रान्तिरुक्ता तत्र किं विद्वानविद्वांश्च विशेषणमूर्धन्यया उत्क्रा
मंसहो विद्वानमूर्धस्थानादिः अपरेतु स्थानांतरेभ्य इति। तत्र विद्यासामर्थ्यमपश्यतः पूर्वः पक्षः तस्योपसंहृतस्योपसंहृतवागादिकलापस्य चिक्र
मत्नो विज्ञानात्मनः ओं कआयतनं हृदयं तस्याग्रं तस्य ज्वलनं यत्प्रकाशितद्वारो विद्वान् मूर्धस्थानादेव निःस्थानादेवनिष्क्रामति नान्येभ्यश्च
क्षुरादिस्थानेभ्यः कुतः विद्यासामर्थ्यात् हार्दविद्यासामर्थ्यात्। उत्कृष्टस्थानप्रतिलंभाय हि हार्दविद्योपदेशः मूर्धस्थानान्निष्क्रमेण चोत
त्कृष्टदेशप्राप्तिः। अथ स्थानांतरेभ्योऽप्युत्क्रामन्कस्माल्लोकमुत्कृष्टं न प्राप्नोति तत आह सच्छेषगत्यनुस्मृतियोगाच्च हार्दविद्यासामर्थ्यात्।
उत्कृष्टस्थानप्रतिलंभाय हि हार्दविद्योपदेशः मूर्धस्थानान्निष्क्रमेण चोत्कृष्टदेशप्राप्तिः अथ स्थानांतरेभ्योऽप्युत्क्रामन्कस्माल्लोकमुत्कृष्टे
न प्राप्नोतीति तत आह सच्छेषगत्यनुस्मृतियोगाच्च हार्दविद्याशेषभूता हि मूर्धन्यानाडी गत्यपरिष्टात् तदनुशीलनेन च स्वयं जीवात्माहार्देन

स्यासिनेन ब्रह्मणानुगृहीतस्यानुस्मरंस्तंभावमापन्नो मूर्धन्यैव यथाधिकया नाड्या निष्क्रामति हृदयादूर्ध्वगता हि ब्रह्मनाडीमास्थायातास्ममूर्धभि
द्य भित्वा मूर्धानमेतास्ररश्मिभिरेकीभूता आदित्यमण्डलमनुप्रविष्टा तामनुशील्यतस्तयैवान्तकाले विर्गमनं भवतीति रश्म्यनुसारी रात्रावहनि वा
विशेषेण रश्म्यनुसारी रात्रावहनि वाविशेषेण रश्म्यनुसारी सन्नादित्यमण्डलं प्राप्नोतीति सिद्धान्तपक्षप्रतिज्ञा अत्र पूर्वपक्षमाशङ्कते सूत्रावयवेन
निशि नेति चेदिति सूत्रावयवान्तरेण निराकरोति न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च यावद्देहभावी हि सिराकिरणसम्पर्कः प्रमाणान्तराद
तीपितद्दर्शयति चैतमर्थं श्रुतिरप्यविशेषेण अमुष्मादादित्यात्प्रतायन्ते रश्मयः स्तास्ता नाडीषु सृप्ता भवन्ति। आभ्यो नाडीभ्यः प्रतायन्ते विस्तीर्यन्ते
ते रश्मयोऽमुष्मिन्नादित्ये सृप्ताः प्रतापादिकार्यदर्शनादिति आदित्यग्रहणेन चन्द्रातपः संग्रह्यते चन्द्रमसा रवत्वमयेन सम्बध्यमानानां सौरीणांमा
त्साचन्द्रिकात्वं तस्मादस्त्यपि निशि सौर्यरश्मिप्रचार इति पत्वाहुः यथा वाक्षिपेन्मनस्तावदादित्यं गच्छतीति निरपेक्षश्रवणाद्रात्रौ प्रयतो वाना
स्तिरश्म्यपेक्षेति तान्प्रसह्य रश्मिं वा रात्रौ प्रवर्तितेन पत्र दिशोऽभ्यधीयते ध्येनाद ये तु मन्यन्ते विद्वानपि रात्रिप्राप्तपरायनेनोर्ध्वाक्रमतीति
तान्प्रत्याह। अथ विद्वानपीति। नित्यवल्कलसम्बन्धेन हि विहिता विद्यानमात्रिकफलासुक्लेति ये तु रात्रौ सप्तम्येनैव विदुषो देहपातस्य सूर्यमण्ड
लप्राप्तिमाचक्षते तेन मतमाशङ्क्याह अथापि रात्राविति। यावद्देहसम्बन्धेनानपेक्षा गतिः श्रुता नच पक्षाशङ्का चागमोपबन्धविरोधादिति।
८॥ अतश्चायनेऽपि दक्षिणे अत एव चोक्तहेतुपरामर्श इत्याह। अतएवापेक्षानुपपत्तेरिति पूर्वपक्षबीजमाह। उत्तरायणप्राश
स्त्येति आयनोरमाह। प्राशस्त्यप्रसिद्धिः।०। परम्पराप्रत्ययहेतुबलाद विदुषां मरणे प्राशस्त्यमुत्तरायणे विदुषस्तु भयत्रापि अविशेषो विपासाम
र्थ्यादिति। विदुषोपि भीष्मस्योत्तरायणप्रतीक्षणमविदुषामाचारं ग्राहयन्ति यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इति न्यायात्। अधू
र्यमाणपक्षादित्यादिश्रुतिर्न कालविशेषप्रतिपत्त्यर्थापि त्वातिवाहिकीर्देवताः प्रतिपादयतीति वक्ष्यति। तस्मादविरोधः स्मृत्योत्तराय
तारुण्यायनोदयति नतु च यत्र काले त्विति काल एवात्र प्राधान्येनोक्तो न त्वातिवाहिकी देवतेत्यर्थः। योगिनः प्रतिस्मर्यते स्मार्ते चै ११

ते स्मार्तेमुपासनां प्रसयं स्मार्तः कालभेदविनियोगः प्रसक्तितः न तु श्रौतीं प्रतीत्यर्थः अत्र परिस्फुतो कालभेदविधिः श्रुतौ चाग्निज्योतिरादि
विधिस्तत्रास्या हि नाभि अतिवाहिकतया विषयभेदव्यवस्थया विरोधाभाव उक्तः अथ तु प्रत्यभिज्ञानं तथापि यत्र काल इत्यत्रापि कालाभिधानद्वा
रेणातिवाहिक्येव देवता उक्ता इत्यविरोध एवेति। ॥ इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां च
तुर्थाध्यायस्य द्वितीयः पादः समाप्तः॥ २॥ अर्चिरादिना तत्प्रथितेः। स्थित्वा प्रकरणस्य त्वादि द्योपासनयोगत अनपेक्षाभिधोमा
मार्गस्य गतो वक्तव्ये रपि स्यात्। अथैतैरेव रश्मिभिरित्यवधारणेनोपपद्यते पथ्यन्तरस्य विवर्तनीयस्याभावात्। तस्मादपरस्परानपेक्षा एव ते पन्था
न एकब्रह्मलोकप्राप्त्युपायाः व्रीहियवद्विकल्पेरन्निति प्राप्ते प्रत्युच्यते एकत्वेऽपि यथानेकपर्वसङ्गमसम्भवात्। गोरवाभेद नानात्वं प्रत्यभिज्ञान
लिङ्गितः सपर्वाग्निपंथा नगरादिकमेकं गन्तव्यं प्रापयति गाथागस्तत्र किमेते रश्म्यादयः पर्वाणि सन्तोऽध्वनेकेन युज्यन्तामाहो
स्विदभिन्नाध्वानमपि भिन्दन्तीति संदेहे भेदाप्यध्वनो भागभेदोपपत्तेर्न भागिभेदकल्पनोचिता गौरवप्रसङ्गात्। एकदेशप्रत्यभिज्ञानाच्च विशेषणवि
शेष्यभावोपपत्तेर्नानेकाध्वकल्पना अथैतैरेव रश्मिभिरित्यवधारणं नैतावदर्थान्तरनिवृत्त्यर्थं तत्प्रापकैरेवाध्वान्तरैर्विरोधात्। तस्मादन्या
नपेक्षा अस्या अवधारयतीति विक्रमं नचैवं वाक्यानं ब्रह्मासमधानं प्रापयति तस्य चानपेक्षतां प्रतिपादयतीत्यर्थः उपायपर्यासितस्माद्विधिसामर्थ्या
स्त्रासमयोगव्यवच्छेदमेव कारो नु वर्ततीति युक्तं त्वराव कृतं नेति। न खलु लौकिकस्मिन्नेव गन्तव्ये पथिभेदमपेक्ष्य त्वरावकल्पते किं तु गन्तव्यभेदादपि
तदुपपत्तिः। यथा काश्मीरेभ्यो मथुरां क्षिप्रं प्रयाति चैत्ररथेन तथैवेहाप्यन्तः कुतश्चिद्द्रुतमारुनेनोपायेन ब्रह्मलोकं क्षिप्रं प्रयातीति भूयांसेवार्चि
रादिश्रुतौ मार्गपर्वाणीति। अयमर्थः। एकत्वात्प्रत्यभिज्ञानस्य स ब्रह्मलोकस्याल्पपर्वणा मार्गेण तत्प्रासौ सम्भवं सांबहुपर्वमार्गोपदेशोऽनर्थः। प्रसज्ये
त तत्र चेतनस्याप्रवृत्तेः। तस्मात्प्रत्यसांपर्वणामनुरोधेनास्यानान्तरदुष्प्रवेश एव युक्त इति। १॥ वायुमब्दादविशेषविशेषाभ्यां। श्रुता
यथा नेपाद्यस्य क्रमं प्रति नियंता उर्ध्वाक्रमणमात्रे च श्रुता वायोर्निमित्तता स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन

वा०सू०४ सऊर्ध्वमाक्रमतइतिहिवायुनिमित्तमूर्ध्वाक्रमणंश्रुतं नतुवायुनिमित्तमादित्यगमनंस आदित्यमागच्छतीत्यागमनमात्रप्रतीतेः नचतेनैवानंतरश्रु
३२ तोर्ध्वक्रमणक्रियासंबंधनिराकांक्षमादित्यगमनक्रियापिसंबंद्धुमर्हति। नचादित्यगमनस्यतेनैतिविनाकाचिदनुपपत्तिर्येनान्यसंबंधमप्यनु
पपत्त्यैतत्राग्निलोकमागच्छतिसवायुलोकमित्यादिसंदर्भगतस्यपाठक्रमस्यकश्चिन्नियामकस्तेनाक्रमसामर्थ्यात्। अग्निवायुवरुणलोकक्रमनि
यामकत्वंश्रुत्यापभावादितिप्राप्तेप्रत्युच्यते। ऊर्ध्वशब्दोनलोकस्यकस्यचित्स्थितिपरः तस्यदपेक्षयायुक्तमादित्येनविशेषकंसवदेत
देवंचपूर्वशब्दात्कश्चिल्लोकभेदः प्रतीयतेसतुपरिदेशमात्रवाचीलोकभेदादिनापर्यवस्यतीकभेदवाचिनादित्यपदेनादित्येभवस्थाप्य
ते। तथाचादित्यलोकागमनमेववायुनिमित्तमितिश्रौतेक्रमनियमेपाठःपदार्थमात्रप्रदर्शनार्थोनततक्रमाद्भुनतुभवतिश्रुतिविरो
धादितिसिद्धं वाजसनेयिनांसंवत्सरोलोकोनपठ्यतेछंदोग्यानांतुदेवलोकोनपठ्यते। तत्रोभयानुरोधादुभयपाठेमाससंबंधात्संवत्स
रःपूर्वःपश्चिमोदेवलोकः नहिमासाद्देवलोकेनसंबध्यतेकिंतुसंवत्सरेणतस्मात्तयोःपरस्परसंबंधान्मासादूर्ध्वंताच्चसंवत्सरस्ममासानंत
र्यस्थितेदेवलोकः संवत्सरस्यपरस्ताद्भवतितथानंतर्यादित्यायवायोःसंवत्सरादित्यस्थानेदेवलोकाद्वायुमितिपठितव्यं वायुमब्दा
दितिसूत्रमत्रासिवाचकमेवतथापिसंवत्सरात्परोधमादित्यादर्वाक्तनायुमभिभवंतीतिधन्यप्पतिडितःपरः तत्संबंधात्तथेंद्रादित्यतेः
परद्युते। आगंतूनांनिवेशोंतेष्वनाम्नावाल्मसाधितः तथावेंद्रादिरागतुःपक्षतेचाप्यतेपरः। ३ ॥ आतिवाहिकास्तल्लिंगात्।
मार्गचिह्नस्वरूपत्वाच्चिन्हामेवार्चिरादयः। भर्तृभोगभुवोवास्युर्लोकत्वात्रातिवाहिकाः। आर्चिरादिशब्दाहिज्वरुनादित्यचेतनेषु
निरूढवत्तयोलोकेनेवैषांत्वादरश्चिकानामिवनियमवतीवस्तुसेवरूनरूपस्वतंत्रक्रियाबुद्धिपूर्वासंभवस्यचेतनानांतस्माल्लोकशब्दा
च्चत्वाद्भुक्तंजीवात्मनोभोगभूपएवेतिमन्यामहे। अपिचार्चिषइत्यस्मादपादानंप्रतीयते। नहेतुर्नागुणाद्वेतुपंचमीदृश्यतेक्वचित्।
जाड्याद्बद्धइत्यादिषुगुणवचनेषुजाड्यादिषुहेतुपंचमीदर्शनचार्चिरादिशब्दागुणवाचिनोयेनपंचम्योनेषांवर्तनंप्रतिहेतुत्वमुच्यतेपारो ३२

नत्वंचाचेतनेष्वत्यंतमप्यस्तीतिनातिवाहिकाः नचामानवस्यपुरुषस्यविद्युत्सादिषुचोशाहृत्वदर्शनादर्चिरादीनामपिवोढृत्वमुन्नेयं यावद्धुक्तं
नहिवाचनिकंनतदर्थतदर्थसिद्धाय्येसंचारस्येतुमुचितं अपिचार्चिरादीनांवोढृत्वेविद्युदादीनामप्यवाढसात्रामानवःपुरुषोवोढाश्रूयतेच
तस्युश्रूयतेनतोवगच्छामोविद्युदादिवआर्चिरादीनांवोढृत्वमिति। तस्माद्भोगभूमयएवार्चिरादयोनातिवाहिकाइतिप्राप्तेप्रत्युच्यते।
सपिंडकरणनाहिसंभ्रमदहनागतो। स्वातंत्र्यंनैवनाम्नायानेवारोचेतेनास्तुतेईदृशीहिनियमवतीगतिः स्वयंवापेक्षावतोअप्रेक्षाव
तोवाप्रेक्षावत्त्वयुक्तनावद्धिगलितस्थूलकलेवराःस्ववशरूवंतःसपिंडीतकरणग्रामाउत्क्रांतिमंतोजीवात्मनोमत्तमूर्छितवत्स्वयंप्रे
क्षावंतोमरेतेस्वातंत्र्येणगच्छेयुः यधर्चिरादयोमार्गचिह्नानिवाशमीकाडस्कारादिवभोगाभूमयोवास्यमेरुशोलैलावत्तादिवदुभययथा
प्यचेतननयानेनयंप्रत्येषामस्तिस्वातंत्र्यानवचेतेभ्योन्यस्वचेतनस्यनेतुःकल्पनाश्रुतैतांचैतन्यसंभवेनचपरमेश्वरएवास्तुनेतेतिपुक्तं
तस्यासंनसाधारणत्वपालोकपालग्रहादीनामकिंचित्करत्वप्रसंगात्। तस्माद्घनस्थितस्यैवपरमेश्वरस्यसमर्थाधिष्ठित्वेयथालोकपालादीनांस्वा
तंत्र्यमेवमिहाप्यर्चिरादीनामातिवाहिकत्वमेवदर्शनानुसाराच्चदार्थइतियुक्तं। इयमेवार्थंअमानवपुरुषातिवहनलक्षणलिंगमुपोद्बलय
तीत्युक्तं अनवस्थितत्वादर्चिरादीनामिति। अवस्थितंहिमार्गचिह्नंभवतिअव्यभिचाराच्चानवस्थितंव्यभिचारादित्यर्थः। आर्चिषइती
चहेतौपंचमीनापादानेगुणत्वंचाश्रितत्वयानतुवैशेषिकपारिभाषयानियमआस्थेयोलोकविरोधात्। अपिचोपक्रमतिर्चिरभिसंभ
वतीतिसंबंधमात्रमुक्तमितिसामान्यवचनेशब्दविशेषापेक्षिणीस्फुटंयद्विशेषपदंतेनतत्सामान्यंनियम्यते। यथाब्राह्मणमानयभोज
यितव्यइतितद्विशेषापेक्षायांपरानंतरित्रभानुपपत्तिपदंकंठरितदातेनैवनियम्यते इवमीहापीति। वैद्युतेनैवततस्तद्भुतेः। विद्युल्लो
कमागतोमानवःपुरुषोवैद्युतःतेनैवनवरुणादीनाक्स्वयमूर्ध्वंततस्तुतेः। तस्यैवस्वयंवोढत्वश्रुतेः वरुणादयस्तुतत्सहायकेवर्तमाना
वोढारोभवंतीतिवैषम्यंवोढत्वेनेतिसर्वमवदातं ४ चाद्रकेमादयंतुक्रमोवलवानितिमध्यायक्रमंपक्षंतेसूत्राणिपरजैमिनिर्मुख्यत्वात्।

वा०४ सप्रत्यासन्नब्रह्मगमयतीति विचिकित्सते किं परं ब्रह्म गमयत्याहोस्वित्परं कार्यब्रह्मेति मुख्यत्वादमृतत्वाभेः परः प्रकरणादपि गंतव्यं जैमिनिर्मन्यते पर

१२ मेवार्चिरादिना ब्रह्म गमयतीति अपरमेव ब्रह्म प्रकृतं प्रजापतिसभावेश्मप्रतिपत्त्यादेरुपमानानां परब्रह्मविषयत्वमनुमर्हति प्रकरणविरोधा

त्। नच परस्मिन् सर्वगते गमनं नोपपद्यते प्राप्तत्वादिति युक्तं प्राप्तस्यापि प्राप्तिफलगमनं दृश्यते यथैकस्मिन्न्यग्रोधपादपे मूलादग्रं यावत्

लंघकः शाखामृगस्यैकेनैव न्यग्रोधप्रदेशेन निरंतरं संयोगविभागाः संभवंति न चैते न द्रव्यवद्विषयाः ननु न्यग्रोधविषयात्वेऽसांप्रतं

तथा सति न शाखामृगो न्यग्रोधेन युज्येत न्यग्रोधावयवस्य तदवयवयोगात्। एवं च माला नामपि तदवयवानां योगः तदवयवयोगात्। व

रं नेन क्रमेण तदवयवेषु परमाणुषु अवतिष्ठेत नेचातींद्रियाद्रतिकस्मिन्नामायममनुभवः इति। मध्यस्थांसंयोगः न पश्यीत स्मात् कामेनाप्य

नुभवानुरोधिना प्राप्तस्य प्राप्तिफलगमनं निरूपितं अतश्च न ब्रह्मप्राप्तमपि प्राप्तिफलगमनं नोपचरितं विष्णि ब्रह्मलोके स्थितिबहुवचनमेक

स्मिन् अपि प्रयोगसाधुतामात्रेण गमयितव्यं लोकशब्दश्च लोक्यते प्रकाशेनेति व्युत्पत्त्या नानुसंनिवेशवति देशविशेषे तथा परब्रह्म

प्राप्त्यर्थं गत्युपदेशसामर्थ्यादिप्रयुज्यते। यथा विद्याकर्मवशादर्चिरादिना गतस्य सत्यलोकमतिक्रम्य परं ब्रह्म प्रकाशं ब्रह्मलोकमा

लोकं स्वयंप्रकाशमिति यावत्। प्राप्तस्य तत्रैव लिंगं प्रविलीयते न तु गतिमेव अभ्युतां विना लिंगं प्रविलयति। अतएव च श्रुतिः। पुरुषा

यणाः पुरुषं प्राप्यास्तं गच्छंतीति तिर तेनाभिसंधिना परब्रह्म गमयत्यमानवः इति मतं जैमिनिराचार्यः। तत्र दर्शिवादरिस्त्रे कार्यंबा

दरिरस्य गत्युपपत्तेः कार्यमप्राप्तस्वर्गलाभप्रापणी गतिः। प्राप्त्यपेक्षत्वन परं प्राप्तमत्वात् जगदात्मकं तत्त्वमसि वाक्यार्थसाक्षात्कारात्

प्राक्किल जीवात्मा अविद्याकर्मवासनायुतायवच्छेदात् स्वतोनवच्छिन्नोप्यवच्छिन्न इमिवाभिन्नोपि लोकेभ्यो भिन्न इव लानमभिमन्यमा

नः स्वरूपादन्यामप्राप्तामर्चिरादि लोकानावाप्नोतीति युज्यते। अद्वैतब्रह्मतत्त्वसाक्षात्कारवतस्तु विगलितनिखिलप्रपंचावभा

सस्य निरस्तसमस्तगंतव्यगंतृगतिगमयितादि इति किं केन संगच्छते तस्मात् निरस्तान्यग्रोधसंयोगविभागाः न्यग्रोधमनंतरतया तिरत् १३

संयोगविभागानां मिथोभेदात्। न च तत्रापि प्राप्तप्राप्तिः कर्मजनहि विभागेन विरुद्धायां पूर्वप्राप्तावप्राप्तस्यैवोत्तरप्राप्तेरुपपत्तेः एतद

पि वस्तुतो विचारासहत्वात् सत्त्वेन निर्वचनीयं विजृंभितमभितमविद्यायाः समुत्सन्नाद्वैततत्त्वसाक्षात्कारो नाविद्वानभिमन्यते विदुषोपि

देहपातात्सर्वं स्थितप्रज्ञस्य यथाभासमात्रेण सांसारिकधर्मानुवृत्तेर्मुक्तिः श्रुतिप्रामाण्यादिति चेत् परविद्यावत उत्क्रांतिप्रतिषेधात् न

तस्यैवं सन् ब्रह्माप्येति न तस्मात्प्राणा उत्क्रामंति अत्रैव समवनीयंत इति तथा विद्याप्राप्तेः समानकालत्वश्रुतेः यो ब्रह्म वेद ब्रह्मैव भवतीति

आनंदं ब्रह्मणो विद्वान्न बिभेति कदाचन तदात्मानमेवावेदहं ब्रह्मास्मीति तत्सर्वमभवत् तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्यादौ वेदाभ

वति विद्वान्न बिभेति को मोहः पश्यत इति पौर्वापर्याश्रवणात् परविद्यातो मुक्तिं प्रति नो प्रायांतरापेक्षा इति लक्ष्यते अभिसंपद्य श्रुतेः। उपपन्नं

चैतत्। न खलु ब्रह्मैवेदं विश्वमहं ब्रह्मास्मीति परिभाविना भुवा जीवात्मनो ब्रह्मभावसाक्षात्कारेणोन्मूलितायामयं वेनाविद्यायामस्ति

मंतव्यगंतृविभागो विदुषः तदभावे कथमयमर्चिरादिमार्गं प्रपद्येत न च छायामात्रेणापि सांसारिकधर्मानुवृत्तिः तत्र प्रबलसंगयादृच्छिक

प्रवृत्तेः श्रद्धाविहीनस्य दृष्टार्थानि कर्माणि फलंति न फलंति च अदृष्टार्थानां तु फलनेकान्येति उक्तं प्रथमसूत्रे न चार्चिरादिमार्गभावना

याः परब्रह्मप्राप्त्यर्थं अविदुषः स्युः प्रदेशाः तथा च कर्मांतरेष्वपि अग्निहोत्रादिषु तत्रापि श्रद्धास्पदत्वेतिरिक्ति सांप्रतं विकल्पासहत्वात्

मियं परविधानमपेक्षा वा परब्रह्मप्राप्तिसाधनं तदपेक्षा च न उपदर्शनं पेक्षावमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति प

रब्रह्मविज्ञानादन्यसाधनः साक्षात्प्रतिषेधात् परविद्यापेक्षत्वे तु मार्गभावनायाः किमियं विद्याकार्यं मार्गभावना सहायकमात्रं स्वार्थ

विपोलाहोन ताबद्विद्याकार्यं तया सह तस्याद्वैतगोचरतया मिथोविरोधेन सहासंभवात्। नापि यज्ञादिवद्विपोसादेसाहाय्यं स्वप्राप्युपाय

त्वश्रवणात्। ब्रह्मगमयतीति यज्ञादेस्तु विविदिषासंयोगेन श्रवणात् विपोसांगत्वं तस्मादुभयत्र बहुश्रुत्यनुरोधादुपपत्तेश्च ब्रह्मश

ब्दोसंभवान्मुख्यस्येति ब्रह्मसामीप्यात् परब्रह्मणि लक्षणया नेतव्यः। तथा च लोकेष्विति बहुवचनोपपत्तिः कार्यब्रह्मलोकस्यापरस्य तत्त्व

वाच-४ यवतश्चचनद्वारेणाप्यनुपपत्तेः लोकतंत्रेन्यवहारादिवल्लन्निवेशविशेषवतिशोगमार्गेनिरूढंन कथंचिद्योगेनप्रकाशो व्यारम्भानंभवति।
२४ तस्मात्साधुरशौभगवान्बादरिरसाधुर्दर्शतुर्जैमिनिरितिसिद्धं अप्रामाणिकानांत नुपंप्रलापः सर्वगतस्सद्भ्रस्यगुणः सर्वगतएवचे
तन्यानंदादयश्चगुणिनः परमात्मनोभेदाभेदंवंतोगुणांइत्यादयोतुदूषणायानुभाष्यमाणा अपिअप्रामाणिकत्वमावहंति। नन्वलमित्युपेक्षि
ताः ग्रंथयोजनातुप्रसंगात्मातान्यग्रंथतणांप्रतिपसंचगच्छतीतिप्रसक्तगतिमाबद्धानिब्रह्मतदात्मतागंतणांजीवात्मानामिति। गौणित्वंस्पये
ति। गौणि श्चपिहियोगगुणापेक्षयागौण्यवविशुद्धोपाधिसंबंधमितिमनोमयत्वादयः कार्याः कार्यत्वादविशुद्धा अपिश्रेयोहेतुत्वाद्विशुद्धाःप्र
तिसंचयोमहाप्रलयःप्र तिपत्तभिसंधिःप्रतिपत्तिःगतिःपरेगत्यर्थत्वात्। अभिसंधिस्तासर्वयस्सब्रह्मणोनामाभिधानयशद्गतिपूर्वोकामा
विच्छेदेनेतिश्रुतिवाक्येबलीयसीप्रकरणात्। सगुणेपिचब्रह्मणोतिप्रशंसार्थमित्यर्थः। चोदयतिननुगत्यापिपारमार्थिकीगंतव्यतादेशा
न्तरविशिष्टस्येति न्यग्रोधवान्दृष्टांतउपपादितंपरिहरतिनप्रतिपिंडसर्वविशेषत्वात्। ब्रह्मणइतिअयमभिप्रायः यथातथान्य
ग्रोधावयवापरिणामवादुपजनापायधर्मभिः कर्मजैःसंयोगविभागैर्युज्यन्तांयंपुनःपरमात्मानिखिलनिषिद्धभेदप्रपंचकूटस्थोनित्यो
नन्यग्रोधवत्संयोगविभागभाग्भवितुमर्हति। काल्पनीकसंयोगविभागयोगस्तुकाल्पनिकस्यैवकार्यब्रह्मलोकस्योपपद्यतेनपरस्यशंक
तेजगदुत्पत्तिस्थितिलयहेतुत्वश्रुतेरितिनप्रत्यक्षादिदृष्टान्तापरिणामिन्संभवतितस्मात्सराणामितितथाचनाविकमस्योपपद्यते
गंतव्यत्वमित्यर्थः। निराकरोतिनविशेषनिराकरणश्रुतीनामितिविशेषनिराकरणंसमस्तशोकादिदुःखशमनतयापुरुषार्थफल
वत्। फलंमूलत्वादिविधानंतस्मात्फलवतःसन्निधावाम्नायमानंतदर्थमेवोअतइत्युपपत्तिः तद्विजिज्ञासस्वेतिचश्रुतिः तस्मात्सु
सुपपत्तिभ्यांनिरस्तसमस्तविशेषब्रह्मप्रतिपादनपरोपमागमेनतुप्रत्यादिप्रतिपादनपरस्तस्माच्चगतिरतात्त्विकीअपिचेयंगतिर्नविचारसह
तद्दत्वाहगतिकल्पनायांचेतिअन्यामनन्त्वात्मावयवविकारप्रसंगान्नौचेत्संतंअथकस्मादासंतिकमनन्यत्वंविकल्पतइत्यत आह। २४

DESHBANDHU DAUJI MEMORIAL

असंततारात्म्यइतिमस्तात्मतयाहिस्वभावेनप्रयदयोभावास्तद्विकाराभासात्तदभावेनसंभवंनिशिंशयेचव्रह्मताभावइतिविका
रावयवपक्षयोश्चतद्गतःसदविकारावयवैस्स्थिरत्वादचलत्वाद्ब्रह्मणः संसारलक्षणंगमनंविकारावयवयोरनुपपन्नंनहिस्थिरात्मक
सस्थिरंभवतिअन्यानत्वेअपिचैकस्यविरोधाद्दसंभवतीदतिभावः अन्यथाजीवोब्रह्मणःतथाचब्रह्मणप्रसंसारत्वपिजीवस्यसंसारः
कल्पतइत्येतद्विकल्पेदूषयति। सोणुरिति। मध्यमपरिमाणत्वइतिमध्यमपरिमाणानांघयादीनामनित्यत्वदर्शनात्सुखैकत्वेति। भेदाभेद
योविरुद्धयोरेकत्रासंभवाद्बुद्धिव्यपदेशभेदाभेदयुक्तसिद्धतयोपचारेणभिन्नमुच्यतेइत्यसुखैकत्वइत्यर्थः। अपिचजीवानांब्रह्मावयवत्वपरिणा
मत्वेभेदपक्षेपुनातिकीसंसारितेतिमुक्तौस्वभावहानाज्जीवानांविनाशप्रसंगोअस्यविनष्टत्वेतिब्रह्मैवेषांस्वभावःप्रतिबिंबानामिवबिंबोत्यादि
नाशीतजीवविनाशइत्याहसबिंदितस्थितिमतांतरमुपन्यस्यतोदूषयितुंयत्तुकेचिज्जल्पन्तेविनैवब्रह्मज्ञानंनित्यनैमित्तिकीतितथाहिकानि
मित्ताज्वरउपात्तस्यकफस्यविशेषणादिभिः प्रक्षेपकफोत्तरोत्पत्तिनिमित्तपथ्यादिवर्जनेनोपशांतोपिनपुनर्भवतिएवंकर्मनिमित्तोबंधउपात्ता
नांकर्मणांउपभोगात्क्षयेप्रायश्चित्तिकमंतराणांचबंधहेतूनामननुष्ठानात्कारणाभावेकार्यानुत्पत्तेर्बंधाभावात्स्वभावसिद्धोमोक्षआ
रोग्यमिवोपात्तदुरितनिर्बर्हणायचनित्यनैमित्तिककर्मानुष्ठानादुरितनिमित्तःप्रत्यवायोनभवतिप्रत्यवायात्तजीवास्वरूपोतांननिषिद्धात्य
यावरश्दितिदूषयतितदसत्प्रमाणाभावादितिशास्त्रंवस्वस्मिन्प्रमाणंतच्चमोक्षमाणस्यात्मज्ञानमेवोपदिशतिननूक्तमाचारेणचात्रोप
पत्तिःप्रभवतिसंसारस्यानादित्वात्कर्माशयस्यासंख्येयस्यासंख्येयानियतविपाककालस्यभोगेनक्षेतुमशक्यत्वात्इत्याहनचैततर्कयितु
मपीतिचोद्यनीत्यादेतन्नित्येतिपरिहरतिनभविरोधाभावादित्यादिहिनित्यनैमित्तिकानिकर्माणिदुष्कृतमपिदुरितसिंचनिर्हरेयुः ततःकाम्यक
र्मपिरेशात्त्वजलांजलयःप्रसज्येरन्नहिअस्तिकश्चिच्चातुर्वर्ण्यवाचातुराश्रमेवायोननित्यनैमित्तिकानिकर्माणिकरोतितस्मान्नैषांसकृत
विरोधितेतिअभ्युच्चयमात्रमाहहिनित्यनैमित्तिकानुष्ठानादितिनचासतिसम्यग्दर्शनादितिसम्यग्दर्शीहिविरक्तःकाम्यनिषिद्धवर्जयन्नपिप्रमा

राद्धप्रतिविहितेनैव सम्यग्दर्शनेनरूप्यमतिज्ञानपरिपाकेननकरोत्येवअज्ञस्तुनिपुणोपिभ्रमाद्यत्करोतिकृतेचनरूपयितुंक्षमतइति
९५ निशेषः नचानभ्युपगम्यमानेज्ञानगम्येब्रह्मात्मत्वइतिकर्तृत्वभोक्तृत्वेसमाक्षिप्तक्रियाभोगेचेदात्मनःस्वभावावधार्येपित्वेनतोनशक्या
वपनुत्तेनहिस्वभावाभ्यावाद्धावोपरोपयितुंशक्यः भावस्यविनाशप्रसंगात्। नचभोगोपिसत्स्वभावःशक्योसत्कर्तुंनोखलुनीलमनीलंश
क्यंशक्रेणापिकर्तुंतदिदमुक्तंस्वभावस्यपरिहार्यत्वादिति। समारोपितस्यत्वनिर्वचनीयस्यातत्वभावस्यशक्यस्तत्वज्ञानेनापरोपः। क
र्तृत्वसर्पस्येवरज्जुतत्वज्ञानेनेतिभावः। गावमिवमविद्वान्परिचोदयतीतिस्यादेतत्कर्तृत्वभोक्तृत्वकार्यमित्यप्रकाशितभावोयथोक्तमेवस
माधत्तेनाअनेतिकर्तृत्वभोक्तृत्वयोर्निमित्तसंबंधस्यचशक्तिद्वारेणनित्यत्वाभ्युपगमेविप्रतिकरादिदर्भासमुदाचारायनःस्वदुःखेभोस्यतेइति
संभवनांतःकुतःकेवलानिश्चयदत्यर्थः। भयोनिरस्तमपिमतिदृष्टिसेपुनरुत्पन्नस्यदूषयतिपरस्मादनन्यत्वेपितिशेषमतिरोहितार्थं ॥५॥
अप्रतीकालंबनान्नयतीतिवादरायणउभयथाऽदोषात्तत्क्रतुश्च अब्रह्मक्रतवोपांतियथापंचाग्निविषयामब्रह्मलोकंप्रयान्तीतिप्रतीको
पासकास्तथा। संतिहिमनोब्रह्मेत्युपासीतेत्याद्याः प्रतीकविषयाविद्याः तद्वत्तोप्यर्चिरादिनामार्गेण कार्यब्रह्मोपासकारवगंतुमर्हन्त
नियमःसर्वेषामित्यविशेषेणविद्यांतरेष्वपिगतेरवधारणात्। नचैषांपरब्रह्मविदामिवगत्यसंभवइतिवच्यब्रह्मक्रतनयइवब्रह्मलो
कप्राजोनातत्क्रतवइत्यप्येकांतमतत्क्रतूनामपिपंचाग्निविदोतत्वात्। नचैतेनब्रह्मक्रतुत्वेनगोब्रह्मेत्युपासीतेत्यादोसर्वत्रब्रह्मा
नुगमेनतत्क्रतुत्वस्यापिसंभवात्। फलविशेषस्यचब्रह्मलोकप्राप्त्यात्वानुपपत्तेःतस्मात्पाउपपत्तयोत्कर्षनिकर्षसंभवादितिप्राप्त
उच्यतेउत्तरोत्तरभूयस्त्वादब्रह्मक्रतुभवतः प्रतीकोपासकान्ब्रह्मलोकंनामानवोनयेत्। भवतुपंचाग्निविद्याब्रह्मक्रतूनामपि
ब्रह्मलोकप्रापणंचनात्रकिमिवहिवचनंनकुर्यान्नास्तिवचनस्यातिभारःइहतदभावात्तेयथायथोपासतेतदेवभवंतीतिश्रुतेःऔ
त्सर्गिकान्नसतिविशेषवचनेपर्यवसायुअनेनचप्रतीकोपासकोब्रह्मोपासकोसत्यपिब्रह्मत्वेसतुमेकिंतुनामादिब्रह्मरूपतयात्मत्वरवल्वयंना ९५

मादितंचोनब्रह्मतंत्रः आश्रयानंदप्रत्ययस्याश्रयांतरप्रक्षेपः प्रतीकइतिहिब्रूमः अभ्याश्रयश्चप्रत्ययानामादिष्वक्षिप्तइतिनामादितंत्रः
तस्मान्नतदुपासकोब्रह्मक्रतुः किंतुनामादिगगनक्रतुःतस्मैनिष्पद्यतेस्वरूपावस्थानंचेदात्मनोनिष्पाद्यतेतस्यगगनक्रतुःनचब्रह्म
क्रतुत्वेनामाद्युपासकानांअविशेषादुत्तरोत्तरोत्कर्षः संभवति। नब्रह्मक्रतुत्वरवयत्क्रतुःयेनतरवयनापेक्षयोत्कर्षोवर्ण्यतेतस्मात्प्रती
कालंबनादविदुषोवर्जयित्वासर्वानन्यान्विकारालंबनान्नयत्यमानवोब्रह्मलोकंनयेवमुभयथाभावयथाखेकांश्चित्प्रतीकालंबनान
यतिविकारालंबनांश्चानयतीतिलुप्युपगमेकश्चिद्दोषोस्त्यनियमः सर्वेषामित्यस्यन्यायस्येतिसर्वमवदातं॥ ॥ ७॥ इतिश्री
वाचस्पतिमिश्रविरचितेभगवत्पादशारीरभाष्यविभागेभामत्यांचतुर्थाध्यायस्यतृतीयःपादःसमाप्तः॥ ३॥ संपत्याविर्भावः
स्वेनशब्दात्॥ प्राग्भूतस्यनिष्पत्तौकार्यत्वंनसतोयतः फलत्वेनप्रसिद्धेश्चमुक्तेरूपांतरोद्भवः आभूतस्यपदरेर्भवतिनिष्पत्तिः
नपुनरसंनंसतोसतोवा नजातुगगनंवरत्यं तसतः प्राग्सत्त्वाभावात् नचास्यबंधाभावोनिष्पद्यतेतस्यतुच्छस्वभावस्यकार्यत्वेना
तुच्छत्वप्रसंगात्। फलत्वप्रसिद्धेश्चमोक्षस्याकार्यस्यफलत्वानवकल्पनात्। आगंतुनारूपेणकेनचिदुत्पत्तौस्वेनेतिप्राप्तमनूद्यतद
तिप्राप्तेभिधीयते। संभवत्यर्थकत्वेहिनानर्थकमनुमेयते। बंधस्यसदसत्वाभ्यांरूपमेकंविशिष्यते। अनधिगताववोधनंहिप्रमाणंशा
ब्दमगत्याकथंचिदनुवादतयावर्ण्यते। सकलसंसारिकधर्मापितंतुप्रसक्तमात्मरूपप्रसंभात्तस्मादेवरूपाद्व्यक्तिमनधिगतमवबो
धयन्नानुवादोयुज्यतेनचास्यनिष्पत्त्यसंभवः सततरवयदेः सांव्यवहारिकप्रमाणेनबंधविगमस्यापिनिष्पत्तेर्लौकिकसिद्धत्वात्किवा
रासहतयात्वसिद्धिरूपयत्रापितुत्यानह्यस्तदुःखनिर्हर्तीत्यसकृदावेदितं। अंधाभवतिस्वमवरुद्धदर्शिताबाह्येंद्रियव्यापाराभावा
द्रोदितिवतिजाग्रदवस्थदुःखशोकाद्यात्मकलतद्विनाशंएवापीतइत्तिसुषुप्तिदवकाइश्चइवार्थेनिवधारणे। आत्मप्रकरणात्॥
ननुज्योतिरूपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतिपौर्वापर्यश्रवणात्स्वरूपनिष्पत्तेरन्याज्योतिरूपसंपत्तिः तथाचभौतिकत्वेपिनमोक्षव्याघातः।

बा॰च॰४ अथैवं तदैवं यदिज्योतिःरूपसंपद्यते तत्सरितज्ज्योतिश्रयेत तदध्याहारेपितत्प्रतिपादनवैयर्थ्यं तदपरित्यागेज्योतिषेत्वस्वेनरूपेणेतिगम्यते।
३६ तस्यचभूततेविकारत्वात्मधारणधर्मकत्वप्रसिद्धेरमुक्तत्वमितिप्राप्तेभिधीयते ज्योतिष्परसमुख्यत्वंभौतिकस्यपरिच्छिन्नतयापिप्रक
माद्यात्परात्मन्येवप्रयुज्यतेपरंज्योतिरितिहिपरंपदसमभिव्याहारसरत्वस्यचानपेक्षस्यब्रह्मण्येवप्रवृत्तेज्योतिषित्वावदैकिंचिदपेक्षा
परत्वात्परंज्योतिरितिनात्मदात्मैवोपक्रम्यतेप्रकरणंचोत्क्षयसंपद्यनिष्पद्यतइतिसन्मुख्यंआदायस्वपीतिचेत्। तस्माज्ज्योतिरु
पसंपन्नामुक्तइतिसिद्धं। १ अविभागेनदृष्टत्वात्। २ यद्यपिजीवात्मनोब्रह्मणोनातिभिन्नइतितत्रतत्रोपादितंतथापिसत
पर्यतिमाधरा धेयभावव्यपदेशस्यैवसमाधानार्थमाह २ ब्राह्मेणजैमिनिरुपन्यासादिभ्यः उपन्यासउद्देशो ज्ञातस्ययथास
आत्मापहतपाप्मेत्यादिः तथाज्ञातज्ञापनंविधिः। यथासतत्रपर्येतिजक्षत्क्रीडन्रममाणइतितस्यसर्वेषुलोकेषुकामचारोभवतीति।
एतदज्ञातज्ञापनंविधिः। सर्वज्ञःसर्वेश्वरइतिव्यपदेशः। नायमुद्देशोविधेयांतराभावात्। नायंविधिरप्रतिपाद्यत्वात्सिद्धव्यपदेशा
त्। तन्निर्वचनसामर्थ्यादयमर्थःप्रतीयते तदेतेउपन्यासादयःयेभ्योहेतुभ्योभावाभावात्मिकेरूपेभाविके परमेश्वरोमुक्तःसंपद्यतेसै
रिमाहस्माकिलजैमिनिः। नचचित्स्वभावस्यात्मनोपहतपाप्मत्वाद्योभावात्मानश्रुसर्वज्ञत्वादयोधर्माःस्वाद्वैतंविघ्नंति नो
खलुधर्मिणोधर्माभिन्नंतेनाभ्युदयाश्चधर्मधर्मिभावाइतिजैमिनिराचार्यउवाच चितितन्मात्रेणतदात्मकत्वादित्यौडुलोमिः ८
अनेकाकारत्वेपिवनेकत्वानेकत्वाभावेत्। आत्मरूपंवाभिधेयंतभिंतेष्वानन्यत्वान्मीलयीतदादिरूपवत्सपरविरोधेनभेदाभेदसंभ
वः। नह्येकस्यात्मनःपारमार्थिकनेकधर्मसंभवः तेनचैदात्मनोभिन्नंतद्वैतापत्तेरद्वैतश्रुतयोरव्याहन्येरन्। अथनभिन्नंतएकस्मा
दात्मनोभेदाभियोपिनभिन्नेतरत्वात्मरूपवत् नचधर्मिण्यात्मनोनभिन्नतेमिथस्तुभिन्नत्वेइतिसांप्रतं धर्मभेदेतदनन्यत्वेतेषामप्य
भेदप्रसंगात्। भेदेवाधर्मिणोपिभेदप्रसंगादित्युक्तंभेदाभेदौचपरस्परविरोधादेकत्रनसंभवतइत्युपपादितंप्रथमसूत्रे। आभावरू ३६

पाणांतेषामपिकल्पनीकत्वमितिनतात्त्विकीधर्मताश्लिष्यतेएतेनसत्यकामसर्वज्ञसर्वेश्वरत्वादयोपिसोपाधिकाव्याख्याताः तस्मान्निर
स्तशेषप्रपंचतात्त्विकीव्यपदेशेनचैतन्यमात्रात्मनानिष्पाद्यमानस्यमुक्तात्मनोर्थस्त्रैरूपेवापहतपाप्मसत्यकामादिशब्दैः अपदेशइत्यौ
डुलोमिर्मनुते। तदिदमुक्तंशब्दविकल्पजाएवैतअपहतपाप्मत्वादयोनतुसंख्याव्यवहारिकाअपीति। एवमप्युपन्यासात्पूर्वभावा
दविरोधंबादरायणः। तदेतदितिशौडीरमौडुलोमिर्नमन्यते बादरायणआचार्यस्त्विथ्थंप्रतिहितसत्यं एवमपीतिचौडुलोमिमतमनुस
रतिचौडुलोमिरंतुनसत्यत्वात्व्यवहारापेक्षेति। तदुक्तंभवतिसत्यंतात्त्विकंनंदैवतन्मात्रएवात्मापहतपाप्मत्वसत्यकामादयस्तुजोपाधि
कतयाज्ञतात्त्विका अपिव्यावहारिकप्रमाणोपनीततयालोकसिद्धानासंतायसंतोयेनतच्छब्दाशोभिरइतिवदनर्थकावास्तवार्थाइत्यर्थः ॥७॥
संकल्पादेवचतच्छ्रुतेः यज्ञानपेक्षःसंकल्पोलोकेवस्तूपसादनः नदृष्टस्तोत्रयस्तस्यसाधवादवधारितः लोकेहिकंचिदर्थंचिकीर्षुः प्र
यतते प्रयततोमानःसमीहतेसमीहमानस्तरनर्थंप्राप्नोतीतिक्रमोदृष्टः नचिछानंतरमेवास्येष्यमाणमुपतिष्ठते तेनश्रुत्यापिलोकवदत्रमनु
रुध्यमानयाविदुपस्यादराय्तवक्रमोनुमंतव्यः अवधारणंतुसंकल्पादेवेतिलौकिकंपल्लगौरवमपेक्षविषयप्रभावतोविदुषःप्रयत्नलाघवात्।
यत्कुसुमनस्संकल्पमिति। स्यादेतद्यथायमनोरथमात्रोपस्थितापित्रॄणांचरमधातुविसर्गहेतुरेवंपित्राद्योप्यस्यसंकल्पोपस्थापि
ताः कल्पिष्यंतेस्वकार्यज्ञानायेत्यतआह नचसंकल्पमात्रसमुत्थानाइतिसंगीतिहिकानिचिद्रूपसाध्यानिकार्याणियथास्त्रीवस्तुसाध्या
निदंतस्तवतमलमणिमालादीनि कानिचित्तुज्ञानसाध्यानिकार्याणियथोक्तानिचरमधातुविसर्गमिहर्षादीनितत्रमनोरथमात्रोपनीतेपि
त्रादिभिर्नंतुनज्ञानमात्रसाध्यानिकार्याणि। नतुतत्साध्यानिभवितुमर्हंति। नहित्वेणस्परोमहर्षादिवभवंतिस्त्रीवस्तुसाध्यामणि
मालादयः। तदिदमुक्तंपुष्कलंभोग्यमिति। एवंप्राप्तेत्वभिधीयते। पित्रादीनांसमुत्थानंसंकल्पादेवतच्छ्रुतेः। नत्वानुमानबाधोत्र
श्रुत्यास्यैवबाधनात्। प्रमाणांतरानपेक्षाहिश्रुतिःस्वार्थगोचरयंतिनमानांतरेणशक्याबाधितुंअनुमानमेवतुस्वोत्तरयपश्चभय

वाच-४ त्वादिवनुमानांतराबाधितविषयत्वं स्वसामग्रीमध्यनिपातेनानपेक्षमाणं सामग्र्यंतरखंडनेन तद्विरुद्धपाश्रयाबाध्यते अतएव न शिरः क
१७ पालादिशौचाचारानुमानस्यागमापबाधितविषयतया नोत्पत्तिरेतस्मादित्याग्रभावात् । विदुषः संकल्पमात्रादेव पितराद्युत्थानमिति सांप्रतं
यथाहुरागमिकोऽपि योगप्रभावाद्बलेनागस्त्यस्य समुद्रं पिबति समुद्रवदंडकारण्यं स्रजति तस्मात् सर्वमवदातं । ८ ॥ अभावं बादरिराह ह्येवं ।
अन्ययोगव्यवच्छित्त्यामनसेति विशेषणात् । देहेंद्रियवियोगः स्याद्विदुषो वारमिति । अनेकधाभावश्रुतिर्भावतु नामनोभेदाद्यस्तुतिमात्रं वाक
यं चिन्मात्रविद्यायां निर्गुणायां तदसंभवात् । असतामपि हि गुणेन स्तुतिर्भवत्येवेति । ४ ॥ भावं जैमिनिर्विकल्पामननात् । शरीरेंद्रियभेदेन नाना
भावः समंजसः नचार्थसंभवे युक्तं स्तुतिमात्रमनर्थकं । नहि मनोमात्रभेदे स्फुटतरोऽनेकधाभावो यथा शरीरेंद्रियभेदे । अतएव सौभ
रेरभिनिर्मितविविधदेहस्य तदस्मापवर्गायेण माभातकल्पाभिः पंचाशता विहाराः पौराणिकाः स्मर्यते । नचार्थसंभवे स्तुतिमात्रमनर्थक
मवकल्पते । संभवति चास्यार्थस्य यद्यपि निर्गुणायामिदं भूमविद्यायां पठ्यते तथापि तस्याः पुरस्तात्तत्र न सगुणवशायते ऐश्वर्यं निर्गु
णविद्याश्रयते । न चान्ययोगव्यवच्छेदेनैव विशेषणमयोगः व्यवच्छेदेनापि विशेषणात् । यथा चैत्रो धनुर्धर इति । तस्मान्मनः
शरीरेंद्रिययोगैश्वर्यशालिनां नियमेनेति मेने जैमिनिः । द्वादशाहवदुभयविधं बादरायणोऽतः । मनसैति केवलमनोविषयं च स
एकधाभवति त्रिधाभवतीति शरीरेंद्रियविषयं च स्तुतिमुपलभ्यानियमवादी खलु बादरायणो नियमानियमवादी पूर्वयोर्नसह
तद्विधिश्रुत्यनुरोधात् । नचायोगव्यवच्छेदे तद्विशेषणमवकल्पते कामेषु हि रूपं समनस्कं द्रियेण शरीरेण पुरुषाणां सिद्ध
मेवेति नास्ति शंका मनोयोगस्येति तद्व्यवच्छेदो व्यर्थः सिद्धस्तु मनोयोगस्य तदन्यपरिसंख्यानेनार्थवत्त्वमवकल्पते तत् स्माद्यागेना
क्षुण्णाप्रसरतीति यत्रान्ययोगव्यवच्छेद इति सांप्रतं द्वादशाहवदिति । द्वादशाहमसत्रमासनोपायिचोदने । अहीनत्वं च यदिति
चोदने सति गम्यते । द्वादशाहमृद्धिकामा उपेयुरिति उपायिचोदनेन यएवं विद्वान् सत्रमुपयंतीति च द्वादशाहस्य सत्त्वं बहुक १७

र्तृकस्य गम्यते एवं तस्यैव द्वादशाहेन प्रजाकामं याजयेदिति यजतिचोदनेन नियतकर्तृपरिमाणत्वेन च द्विरात्रेण यजेतेत्यादिवद्धी
नत्वमपि गम्यत इति संप्रति शरीरेंद्रियाभावे मनोमात्रेण विदुषः स्वप्नवत् सुखभोगो भवति तन्वभावे संध्यवदुपपत्तेः । मनसैतानिति श्रुतेः ।
यदि पुनः सुषुप्तिवत्स्तां नो भोगाभावः स्वेऽशुद्धिरूपपद्यते । नच शरीरवदुपभोगः शरीराद्युपादानवैयर्थ्यात् सशरीरस्य तु सुखभो
गदर्शनाद्युपपत्तिरित्यनुयोजनीयं तदिदमुक्तं सूत्राभ्यां तन्वभावे संध्यवदुपपत्तेः भावे जाग्रद्वदिति ५ प्रदीपवदावेशस्तथा
हि दर्शयति ६ वस्तुतः परमात्मनोऽभिन्नोऽप्ययं विज्ञानात्मा नाद्यविद्याविकल्पितप्रादेशिकांतःकरणावच्छेदेनानादिर्जीवभावमाप
न्नः प्रादेशिकः स कथं देहांतराणि स्वभावनिर्मितान्यपि नानादेशवर्तीनि सांतःकरणो युगपदाविष्टुमर्हति । नचात्मांतरं द्रष्टुमपि । सृज्य
मानस्य सृष्टुरितरेकेणात्मत्वादात्मत्वे चाकर्तृकर्मभावाभावात् अभेदाश्रयत्वादस्य नाथ तत्करणांतरं तत्र सृज्यमानस्य तदुपा
धितयाभावात् अनादिनात्मत्वं तत्करणेनावच्छेदेनादित्यवदनादिनां अनेनांतःकरणेनोपधयितयासंवक्तुमर्हति । तस्माद्यथादारु
च नत्वयुक्तो चेतनेनाधिष्ठितं सत् दिश्यमुत्पन्नएवं निर्माणशरीराण्यपि सेंद्रियाणीति प्राप्त उपलभिधीयते । शरीरत्वं न आनुभवात् भो
गाधिष्ठानताविना । सन्निधौ तु शरीरस्य मुक्तं चेतद्विभो संनिधाभावतिपंचभासतथानवद्यत्वादिकाश्रुतिविदुषो नानाभावमत्वहामा
णाभिन्नशरीरेंद्रियोपाधिसंबंधाविकल्पते । नादरूप्यतभेदेन ह्येयं त्र्यहिभिन्नाभिर्मायावाह्यन्संत्रवाहोनानात्वेनोपपद्यते । भो
गाधिष्ठानत्वं च शरीरत्वेन भोगाधिष्ठानेन मंत्रेऽपि वियुज्यते । तस्माद्देहांतराणि सृजति न चानेनाधिष्ठितानि तानि देहप्रभेदवर्तते ।
न च सर्वगतस्य वस्तुनो विगलितमायाविद्युस्य विदुषः स्वयं सृजनस्यैवोपपत्तिकांतःकरणावस्थतायेनान्तदुल्लत्तौ मंतःकरणांतरसं
बंधयत्नावस्येत् । तस्माद्विद्वान् सर्वस्य वशी सर्वस्येश्वरः सत्यसंकल्पः सेंद्रियमनांसि शरीराणि निर्माय तानि चैकरूपेण विनिविश्य तदंतरि
द्रियांतःकरणैः तेषु लोकेषु मुक्तोऽपि हरतीति सांप्रतं प्रदीपवदिति निदर्शनं दीपस्यैकस्य प्रदीपव्यक्तिषु पचयंत्ते भिन्नवर्तनी प्रदीपस्य

कीनांभेदाद्दिदंजीवात्मादेहभेदेऽप्येकइतिपरमार्थः। एकमनोनुवर्तिनीत्येकाभिप्रायःसंपन्नकेवलोमुक्तउच्यतेनचैतस्यैश्वर्याव
संभवःश्रुतिविरोधादित्युक्तमर्थंजातमाक्षिपतिकथंपुनर्मुक्तस्यैतिसलिलएकइतिसलिलमिवसलिलःसलिलस्थानीयस्यैकात्स
र्वप्रातिपदिकस्यरत्नुपमानाद्वाचारोक्षिपितेऽपचारोपितंरूपंएतदुक्तंभवतियथासलिलमंभोनिधौप्रक्षिप्तंतदैकीभावमुपयात्येवंद्र
ष्टानधिब्रह्मणेति। अत्रोत्तरंसूत्रं। स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंहि। अत्रकश्चित्सूत्रयःस्कंधुलितेमपेक्ष्यकाश्चि
त्संपत्तिंतदधिकारात्। ऐश्वर्यश्रुतयस्तुसगुणविद्याविपाकावस्थापेक्षामुक्ताभिधानंतुतदवस्थासंभ्रंशात्यानिरंकुशःस्वकार्यैश्व
राधीनसिद्धिरत्रसाधकः आप्नोतिस्वाराज्यंसर्वेऽस्मैदेवाबलिमावहन्तिसर्वेषुकामचारोभवतीत्यादिश्रुतिभ्योविदुषःपरब्रह्मणइवाना
नधीनमैश्वर्यमवगम्यते। नतुसगुणब्रह्मोपासनालब्धमैश्वर्यंकथंब्रह्माण्यधीनं सत्यमुसत्यंब्रह्माधीनंनतुस्वकार्येनहिकारणा
धीनयज्ञजन्मानोभावाःस्वकार्येस्वकारणमपेक्षन्ते। किंतुतत्रतेस्वतंत्राएवयथाहुः। मृत्पिंडदंडचक्रादिभ्योजन्मापेक्षन्तेउदका
हरणेऽन्यस्यतदपेक्षानविद्यते। नचविदुषांपरमेश्वराधीनैश्वर्यसिद्धत्वात्नमैश्वर्यंनलोकालोकिकादृश्वराजानोमहाराजाधीनाः
स्वव्यापारेविद्वांसःपरमेश्वराधीनाभवेयुःनखलुपराधीनोत्पादस्यस्वरूपंतन्नतद्रूपाद्रूपानांभवतीतिकश्चिन्नियमःतत्समानानांत
दधिकानांचदर्शनात्। तथासंतेवासीगुर्वधीनविद्यःतत्समस्ततदधिकोवादृश्यतेदुष्टसामंताश्चपार्थिवाधीनैश्वर्याःपार्थिवे
नस्पर्धमानास्तांविजयमानावादृश्यन्ते। तदिहनिरतिशयैश्वर्यतासरमेश्वरस्समाभवन्त्विद्वांसस्ततोधिकाःसमास्तुभविष्यन्ति।
तथाचनतदधीनानहिसमप्रधानभावानामस्तिमिथोऽपेक्षातदिदंतेस्वतंत्राःसंतस्तद्व्यापारेजगत्सर्जनादिप्रवर्तेरन्नितिप्राप्तेत्रअ
भिधीयते। निसतानवेक्षत्वात्तुतेषांस्वरूपमारोपितंकर्मणासत्यंविदुषांपरमेश्वरतंत्रतयाजगत्सर्जनलक्षणेहिकार्यकारणैक
स्वभावस्यैवमवतुआहोस्वित्कार्यकारणभावस्यतत्रोभयस्वभावस्यस्वसत्तामूलकारणापेक्षस्यपूर्वसिद्धःपरमेश्वरएवका १८

रणमभ्युपेतव्यमितिसएवैकोस्तुजगत्कारणंतस्यैवनित्यत्वेनस्वकारणानपेक्षस्यकृप्तसामर्थ्यत्वात्कल्प्यसामर्थ्यास्तुजगत्सर्जनेप्रतिविद्वां
सः नचजगत्स्रष्टृत्वमेषांश्रूयतेनचभवतःपरमेश्वरस्यैवतत्सर्वत्रकृप्तंसर्वासांसंसारश्रुतीनांप्रसक्तेः। अपिच समप्रधानानामनि
यमवैरेकमसंदृष्टमित्यिपदेकःसिसृक्षतितदैवनरःसंजिहीर्षतीतिपर्यायेणसृष्टिसंहारौस्यातां नवान्यतोभयोरपीश्वरत्वंव्याघाता
त्। एकस्यतुतदाधिपत्येतदभिप्रायानुरोधिनांसर्वेषामेकमत्येऽपिनकोऽपिदोषःतत्रागंतुकानांकारणाधीनमैश्वर्याणामपेक्ष्यमाणविशेष
तयासमत्वाभिमतैश्वर्यशालिनोगृह्यन्तेतथाविशेषइतिसएवतेषामधीशाइति। नस्वतंत्राविद्वांसइति। परमेश्वरव्यापारस्यसर्गसंहारस्य
नेशानतत्पूर्वपक्षिणोऽनुशयबीजमाशंक्यनिराकरोति। प्रत्यक्षोपदेशादितिचेत्। नाधिकारिकमंडलस्योक्तेः। यतःपरमेश्वराधीन
मैश्वर्यंतस्मान्नतेन्यनमणिमादिमात्रंस्वाराज्यं नतुजगत्स्रष्टृत्वमुक्तान्नायात्विकारवर्तिचतथाहिस्थितिमाहएतावानस्यमहिमे
तिविकारवर्तिरूपमुक्तं ततोज्यायांश्चपूरुषइतिनिर्विकारंदारूपंतथापादोस्यविश्वाभूतानीतिविकारवर्तिरूपंत्रिपादस्यामृतंदिवीतिनि
र्विकारमाह। रूपंदर्शयंतश्चैवंश्रुतिःस्मृतीतिनिर्विकारमेकंरूपंभगवतःएतदुक्तंभवति। यदिब्रह्मसगुणंब्रह्मोपास्यमानेय
थातद्गुणप्राप्तिस्तथातद्गुणस्यनिरवग्रहत्वमपिश्रूयतोऽस्तीतिनिरवग्रहत्वंचविदुषांप्राप्यमिति। तदनेनव्यभिचार्यतेयथासविकारं
ब्रह्मणिउपास्यमानेवस्तुतःस्थितमपितस्यनिर्विकारंरूपंनप्राप्यतेतत्कस्यहेतोःतत्क्रतुत्वादुपासकस्यतथातद्गुणोपासनायामस्तुतः
स्थितमपिनिरवग्रहत्वंनाप्यतेतत्रोपासनायांस्फुरुत्क्रतुत्वात्। उपासकस्यतदक्रतुत्वंचनिरवग्रहत्वस्योपासनाविषयगोच
रत्वात्। विश्वधीनताचोपासनास्तुपुरुषस्यातंज्ञात्वात्वातंसर्वप्रतिभत्वप्रसंगादिभोगमात्रसाम्यलिंगाच्च नकेवलंस्वाराज्य
स्येश्वराधीनतयाजगत्सर्जनवर्जंसाक्षाद्भोगमात्रेणतेनपरमेश्वरेणसाम्याभिधानादपिव्यपदेशलिंगादिति। आपःइतिसम्भ
पत्त्यानिसेतत्खलुनीयतेउपास्यंतेतेकथमिसासीलोकइतिलोकाप्रकाशितकार्यब्रह्मरूपेण्येतंतांभूतांस्ववंतिप्रीपयंदिवाजयंति

इतियावत्तुसूत्रांतरावतारणाय शंकते नन्वेवं सति सातिशयत्वादिति सह परमेश्वरस्यातिशयेन वर्तन इति विदुष ऐश्वर्यं सातिशयं यच्च सातिशयं तच्च कार्यं यथा लौकिकमैश्वर्यं तदनेन कार्यत्वमुक्तं तथा च कार्यत्वादंतवत्प्राप्तमिति न युक्तं आनंत्येन विदुषां तत्र प्रत्यस्तन उत्तरं पठति अनावृत्तिः शब्दादनावृत्तिः शब्दात् किमर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तानामैश्वर्यस्यानंत्यं तया साध्यते आहो चंद्रलोकादिवद्ब्रह्मलोकादेत्य लोकं प्राप्य भुक्तिरनंतं तत्र पूर्वस्मिन् कल्पे सिद्धसाधनं उत्तरत्र तु श्रुतिविरोधः तद्विधानां क्रममुक्तिप्रतिपादनादिति तत्त्वमसि वाक्यार्थोपासनापरास्त्वसाह सम्यग्दर्शनविध्वस्ततमसामिति द्विविधा विद्यातमः निरूपाख्यं साक्षात्कारस्तत्त्वदर्शनं तेनैव निर्वाणस्वरूपावस्थानलक्षणं कार्यं येनानित्यं स्यादित्याह । नित्यसिद्धेति । भंडः काव्याद्यसकरंदहृदमा तांस्तु मनःपः स्वार्थधुकोमत्सरः अज्ञानसागरं तीर्त्वा ब्रह्मतत्त्वमभीप्सतां ॥ नीतिनौ कर्णधारेण मया परिमनोरथः । यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिंदुभिः ॥ यन्न्यायसांख्ययोगानां वेदांतानां निबंधनैः ॥ समचैषं महापुण्यं तत्फलं पुष्कलं मया ॥ समर्पितमथैतेन प्रीयतां परमेश्वरः ॥ नृपांतराणां मनसाप्यगम्यं भ्रूक्षेपमात्रेण चकार कीर्तिः ॥ कार्तस्वरासारसुपूरितार्थसार्थः स्वयं शास्त्रविचक्षणश्च नरेश्वरा यच्चरितानुकारमिच्छंति कर्तुं न च पारयंति तस्मिन् महीपे महनीयकीर्तौ श्रीमन्नृगेऽकारि मया प्रबंधः ॥ ७ ॥ इति श्रीवाचस्पतिमिश्रविरचिते भगवत्पादशारीरकभाष्यविभागे भामत्यां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ श्रीरामचंद्रो जयतु ॥ श्रीकाशिविश्वेश्वराय नमः ॥ इति शारीरकभाष्यटीका वाचस्पतिचतुर्थाध्याय समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥ शुभं भवतु ॥ ७ ॥ ॥ ७ ॥ ॥ ॥

Dr. BHAU DAJI ... भाऊदाजीइत्यस्य पुस्तकसंग्रहः

वाच॰
२

श्रीगणेशायनमः॥ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्। वर्तिष्यमाणयोः समन्वयविरोधपरि
हारलक्षणयोः संगतिदर्शनाय सुखग्रहणाय चैतयोः संक्षेपतस्तात्पर्यार्थमाह। प्रथमेध्याय इति। अनपेक्षवेदांतवाक्यस्वरसः
सिद्धसमन्वयलक्षणस्य विरोधपरिहाराय स्मृत्याक्षेपसाधनकरणादनेन लक्षणेनास्ति विषयविषयिभावः संबंधः पूर्वलक्ष
णार्थो हि विषयः। तद्गोचरत्वादाक्षेपसमाधानयोः एष विषयी तदेवमध्यायमवतार्य तदवयवमधिकरणमवतारयति॥
तत्र प्रथमं ताव दिति। तंत्र्यते व्युत्पाद्यते मोक्षसाधनमनेनेति स्मृतयस्तदनुसारिण्यः न खल्वमूषां स्मृतीनां नास्तिस्मृ
तिवदन्योनवकाशः शक्यो वदितुमतेमोक्षसाधनप्रतंत्रं तदेवाख्यायते यस्याः सा स्मृतितंत्राख्या या परमर्षिप्रणीता कपिलेनादिवि
द्वत्प्रणीता अन्याश्च पंचशिलादिप्रणीताः। काशानादपि चेत्ताभिरभ्युपगतनवकाशः। सत्योऽप्रमाणं प्रत्येतरं तस्माद्
विरोधेन कथंचिद्वेदांतव्याख्यानमयः पूर्वपक्षमाक्षिपति। कथं पुनरि त्यक्षादिभ्यमिति। प्रसाधितं खलु धर्ममीमांसायां वि
रोधे त्वनपेक्षं स्यादसति ह्यनुमानमित्यत्र यथा श्रुतिविरुद्धानां स्मृतीनां दुर्बलतयानपेक्षणीयत्वं। तस्माद्दु
र्बलानुरोधेन बलीयसीनां श्रुतीनां युक्तमुपवर्णनं अपि तु स्वतः सिद्धप्रमाणभावाः श्रुतयो दुर्बलाः स्मृतीर्बाधितुमेवे
ति युक्तं पूर्वपक्षसमाधाने भवेद्यमिति प्रसाधितोप्यर्थः श्रद्धाजडान्प्रति पुनः प्रसाध्यत इत्यर्थः। अपातनतः समाधा
नमुक्त्वा परमसमाधानमाह पूर्वपक्षी कपिलप्रभृतीनां चार्षमिति अयमस्याभिसंधिः [illegible] सकारणमु
क्तं शास्त्रयोनित्वादिति तेनैष वेदराशिर्यत्सम्भवः स आजानसिद्धानावरणभिन्नार्थमात्रगोचरतद्बुद्धिपूर्वको
यथा तथा कपिलादीनामपि श्रुतिस्मृतिप्रथिताजानसिद्धभावानां स्मृतयो नावरणसविषयबुद्धिप्रभावा इति श्रुति
भ्यो न्यूनमस्ति कश्चिद्विशेषः। न चैतास्फुटतरं प्रधानादिप्रतिपादन परासक्यं तेस्वथापि तुल्यस्मानरनुरोधे २

न कथंचिद्युक्तमपनेतव्याः अपि च न कोपि कपिलादिस्मृतिरनुमन्यते। तस्मादयुक्तमेतदित्यत आह। तस्य समाधि
रिति। यथा हि श्रुतीनां सविगानं ब्रह्मणि गतिसामान्यात्। नैवं स्मृतीनां विगानमस्ति प्रधाने। तासां भूयसीनां प्रलीनाता
नत्त्वप्रतिपादनपराणां तत्प्रदर्शनात्तस्माद्विगानादश्रौतप्रमार्थ आरुढो न तु स्मार्ते विगानेति। न किमिदानीं परस्पर
विगानात्सर्वा एव स्मृतयो विद्यमाना इत्यत आह विप्रतिपत्तौ च स्मृतीनामिति न चानीं क्रियार्थास्विति अपरिग्रहाभिप्रायं
शक्यते शास्त्रं कपिलादीनामिति निराकरोति न च सिद्धत्वमिति। न तावत्कपिलादय ईश्वरवदाजानसिद्धाः किंतु निश्चि
तवेदप्रामाण्यानां तेषां तदर्थानुष्ठानगोचरा विशेषवदस्मिन् जन्मनि सिद्धिरत एव ते जानसिद्धा उच्यंते। यदस्मिन् जन्म
नि न ते सिद्ध्युपायोनुष्ठितः प्राग्भवीय वेदार्थानुष्ठानलब्धजन्मत्वात्सिद्धानां तथा चावधृतवेदप्रामाण्यानां
तद्विरुद्धाभिधानं तदपचाराधिनप्रामाण्यमेवाप्रमाणेन च वेदार्थाभिशंकेतुं युक्तः प्रमाणसिद्धिवात्तस्य
तदेवं वेदविरोधे सिद्धवचनप्रमाणमुक्त्वा सिद्धानामपि परस्परविरोधितद्वचनादनाश्वास इति पूर्वोक्तं स्मारय
ति सिद्धव्यपाश्रयकल्पनायामपीति सिद्धाजडान् बोधयति परतंत्रप्रज्ञस्यापीति। ननु श्रुतित्वेन कपिलादीनाम
नावरणज्ञानार्थगोचरज्ञानातिशयं बोधयति कथं तेषां वचनमप्रमाणं तदप्रामाण्ये श्रुतेरप्रामाण्यप्रसंगादिति। अत आह।
या तु श्रुतिरिति न तावत्सिद्धानां परस्परविरुद्धानि वचांसि प्रमाणमभवितुमर्हन्ति न तु च विकल्पो वस्तुनि सिद्धे तद
नुपपत्तेः अनुष्ठानमतग्नौ पार्श्वविकल्पते न सिद्धं तस्य यथाव्याख्यातानः तस्माद् न श्रुतिसामान्यमात्रेण भ्रमः सांख्य
प्रणेता कपिलः श्रौत इति स्यादेतत् कपिलः एव श्रौतो नान्ये मन्वादयः ततश्च तेषां स्मृतिः कपिलस्मृतिविरोधे त्यज
त आह। भवति चान्या मनोरिति तस्याश्चागमान्तरसंवादमाह महाभारतेपीति। न केवलं मनोः स्मृतिः स्मृत्यन्तर

वाच॰ २ संवादिनी स्मृतिः संवादिन्य प्रीत्याह स्मृतिश्चेति। उपसंहरति। अत इतिस्यादेतत्। अत एवाहेतुरविरुद्धं कपिलवचनमथाचइयोर
२ पि तुल्यबुद्धिप्रभवतया कोविनिगमयांचकारनो वेदविरुद्धं कपिलवचो नादरणीयमित्यत आह। वेदस्य हि निरपेक्ष इति अय
मभिसंधिः शास्त्रस्य योनिरीश्वरः। तथा च सतन्त्रशास्त्र क्रियायामस्ति स्वातन्त्र्यं कपिलादीनामिव सति भगवान् यथा पूर्वस्मिन्
सर्गे च कारणात्मानं तदनुसारेणास्मिन्नपि सर्गे प्रणीतवान्। एवं पूर्वतरानुसारेण च पूर्वस्मिन्नपि नानुसारेण पूर्वतरेऽप्याह
एयं शास्त्रे स्वरये कार्यकारणभावः। तेनेश्वरस्य न शास्त्रार्थज्ञानपूर्वशास्त्राक्रियायेनास्य कपिलादिवत् स्वातन्त्र्यं भवेत्। शास्त्रा
र्थज्ञानं चास्य स्वयमाविर्भवदपि न शास्त्रकारणतामुपैति योरस्मात् [illegible]
विर्भावात् शास्त्रं च स्वतो बोधकत्वात् यायुर्वस्य स्वातन्त्र्याभावेन निरस्तसमस्तदोषाशंकं सदनपेक्षं साक्षादेव स्वार्थे प्रमाणं कपिला
दिवचांसि तु स्वतन्त्रकपिलादिप्रणेतृकाणि न स्वार्थस्मृतिपूर्वकाणि न स्वार्थस्मृतयश्च तदर्थानुभवपूर्वाः तस्मात्तासामपि
श्च यां प्रामाण्यविनिश्चयादि यावत् स्मर्तुः कस्ये तावत् स्वतः सिद्धप्रमाणभाव यानपेक्षयैव श्रुतस्वार्थविनिश्चा
यितदृति सिद्धांतरस्य वचनयामुलास्मृतर्थो बाध्यत इति युक्तं इतरेषां वानुपलब्धेः प्रधानस्य तावत् क्वचिद्वेदप्रदे
शे वाक्याभासानि दृश्यं तेतद्विकाराणां तु महदादीनां तान्यपि न संति न च भूतेन्द्रियादिवन्महदादयो लोकसिद्धा
स्मादास्यंति काव्यप्रमाणान्तरसंभवात् प्रमाणमूलत्वाच्च स्मृतेर्मूलाभावाद्भावो वंध्यायाइव दौहित्रे स्मृतेः तदोषज्ञा
नमात्रमुपपद्यते। इति युक्तं तस्मात् कपिलस्मृतेः प्रधानोपादानत्वं जगत इति सिद्धं एतेन योगः प्रत्युक्तः नाते
न योगशास्त्रस्य हैरण्यगर्भपातंजलादेः सर्वथा प्रामाण्यं निराक्रियते। किं तु जगदुपादानस्वतंत्रप्रधानतद्विकारमह
दहंकारपंचतन्मात्रगोचरं प्रामाण्यं नास्तीत्युच्यते। न चैतावतैषामप्रामाण्यं भवितुमर्हति यत्राणि हितानि तत्राप्रा २

प्रामाण्येन प्रामाण्यमश्नुवीरन्। न चैतानि प्रधानादिसद्भावपराणि किं तु योगस्वरूपतत्साधनतदवान्तरफलविभूतितत्प
रमफलकैवल्यव्युत्पादनपराणि। न च किंचिदनिमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं निमित्तीकृतं पुराणेष्विव सर्ग
प्रतिसर्गवंशमन्वंतरवंशानुचरितं व्युत्पादनपरेषु न तु तद्विवक्षितं अन्यपरादपि चान्यनिमित्ततया प्रतीयमानमभ्यु
पेयेत यदि मानान्तरेण विरुध्येत अस्ति तु वेदान्तश्रुतिभिरस्य विरोध इत्युक्तं तत्प्रमाणत आह तादपि योगशास्त्रात् प्रधाना
दिसिद्धिः। अत एव योगशास्त्रं व्युत्पादयिता आह स्म भगवान् वार्षगण्यः गुणानां परमं रूपं न दृष्टिपथमृच्छति। यत्तु दृष्टिप
थं प्राप्तं तन्मायैव सुतुच्छकमिति योगं व्युत्पिपादयिता [illegible] निमित्तमात्रेणेह गुणा युक्ताः। न तु भावतः ते
षामतात्त्विकत्वादित्यर्थः। अलोकसिद्धानामपि प्रधानादीनामनादिपूर्वपक्षन्यायाभासोपक्षिप्तानामनुवादत्वमुपपन्नं
तदनेनाभिसंधिनाह एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रधानादिविषयतया प्रत्याख्याता द्रष्टव्येति।
अधिकरणान्तरारंभमाक्षिपति। ननु चैवं सति समानन्यायत्वादिति समाधत्ते। अस्त्यत्राभ्यधिकाशंकेति नाम नातः सांख्य
प्रत्याख्यानात् प्रधानसत्ताविज्ञापि योगशास्त्रात्तु प्रधानादिसत्ताविज्ञापयिष्यते। बलं योगशास्त्रस्यापि वेदेन संवादो दृ
श्यते। उपनिषत्सु हि तस्य तत्त्वज्ञानस्य योगाय तत्र शास्त्रितं च तु योगशास्त्रविहितं यमनियमादि बहिरंगमुपायम
हायां तरंगं धारणादि मंतरेणौपनिषदात् तत्त्वसाक्षात्कारहेतुर्महतीति तस्मादौपनिषदेन तत्त्वज्ञानापेक्षणात्संवा
दयादुत्ता वेदेनाष्टकादिस्मृतिवत् योगस्मृतिःप्रमाणं ततश्च प्रमाणात् प्रधानादिप्रधानादि श्रीतवतीति नाशंकनीयं
न च तदप्रमाणं प्रधानं यो प्रमाणं चयमादावितियुक्तं तत्राप्रामाण्येऽप्यप्रधानापयादुः। प्रसरं न लभन्ते हि यावत् केवल
तर्कयः नाभिद्रवंतितेतावदपि शास्त्रगोचरे इति। सेयं तत्प्रसरात् प्रधानादियोगात् प्रमाणादौपयोगात्प्रमाणतापि शास्त्रोसर्व

वाच॰ त्रैव दुर्धरा प्रवेदितस्मात् प्रसंगनिषेधनात्प्रधानादयस्तु पुनरस्मिन्नाशंक्य प्रधानमितिशंकार्थः सेयमभ्यधिकाशंका निदर्शनेन निर
३ स्यते। निवृत्ति हेतुमाह। अथैकदेशसंप्रतिपत्तावर्थ्मेतिय दि प्रधानादितत्त्वपरं योगशास्त्रं भवेत् प्रसज्येत तदान्त श्रुतिविरो
धेनाप्रमाणं तथा च तद्विहितेषु यमादिरूपनाश्वासः स्यात्। तस्मान्न प्रधानादिपरं तत् किं तु तन्निमित्तीकृत्य योगव्युत्पा दन
परमित्युक्तं न चाविषये प्रामाण्यमुपहन्ति नहि चक्षुरसाद्यप्रमाणं रूपेप्यप्रमाणं भवितुमर्हति तस्मा श्रुतिविरोधात्प्रधानादिर
स्याविषयत्वेन तत्प्रामाण्यमिति परमार्थः स्यादेतत् अध्यात्मविषयाः संति सहस्रशः स्मृतयो बौद्धार्हतकापालिकादीनां अपिक
स्मान्निराक्रियंत इत्यत आह नेतीह्यपीति। तासु खलु बहुलं वेदार्थविसंवादिनीषु शिष्टानादृतासु कैश्चिदेव पुरुषापसदैः पशुप्रायैः म्ले
च्छादिभिः परिगृहीतासु वेदमूलत्वाशंकैव नास्तीति निराकृताः। तद्विपरीतास्तु सांख्ययोगस्मृतय इति। अतः प्रधानादिपरतया
सुदस्यंत इत्यर्थः न सांख्यज्ञानेन वेदनिरपेक्षेणेति प्रधानादिविषयेणेत्यर्थः। द्वैतिनो हि ते सांख्या योगाश्च ये प्रधानादिभरतपान
शास्त्रं मानवस्तत्र इत्यर्थः। संख्या सम्यग्बुद्धिर्वैदिकी तथा वर्तन्त इति सांख्याः एव योगो ध्यानं उपायोपेययोरभेदविवक्षया। चित्तवृत्ति
निरोधो हि योगः। तस्योपायो ध्यानं प्रत्ययैकतानता। एतच्चोपलक्षणं। अन्येपि यमनियमादयो वीत्या आंतराश्च धार
णायोगाशयादयो। एतेनाभ्युपगमवेदप्रामाण्यकाणभक्षाक्षचरणादीनां सर्वाणि तर्कस्मरणानीति योजना। रूपगमसन्व
दु। न विलक्षणत्वादस्य तथात्वं च शब्दात् अवांतरसंगतिमाह। ब्रह्मास्य जगतो निमित्तकारणं प्रकृतिश्चेत्यस्य पक्षस्याति
चोदयति कुतः पुनरित्यसमानविषयत्वे हि विरोधो भवेत्। नवेहाति समानविषयतां धर्मवद्ब्रह्मण्यपि मानांतराविषयत
यागमलेनानपेक्षाश्चापैकगोचरत्वादित्यर्थः। समानविषयत्वमिति। मानांतरस्याविषयः सिद्धं तद्ग्राहिणः॥
धर्मस्तु कार्यरूपत्वाद्ब्रह्म सिद्धं तु गोचरः। तस्मात्समानविषयत्वात्प्रभवतर्कस्यावकाशः न वस्तुविरोधः। तथापि तर्कादरे को हेतु ३

रित्यत आह। यथा च श्रुतीनामिति। लब्धावकाशा बहवोपि श्रुतयोऽनवकाशैकश्रुतिविरोधे तदनुगुणतया व्याख्यायन्ते तथानवकाशैकतर्क
विरोधे तदनुगुणतया व [illegible] पि श्रुतयो गुणकल्पनादिभिर्व्याख्यानमर्हन्तीत्यर्थः। अपि च। ब्रह्मसाक्षात्कारो विरोधीविधितयानादि
मायां निवर्तयितुं दृष्टेनैव रूपेण मोक्षसाधनमिष्यते तत्र ब्रह्मसाक्षात्कारस्य मोक्षसाधनतया प्रधानस्यानुमानं दृष्टसाधर्म्येण
दृष्टविषयं विप्रकृष्टान्तरंगं वा हिरंगं त्वसंत परोक्षगोचरशब्दज्ञानं तेन प्रधानप्रत्यासन्नत्यानुमानमेव बलीय इत्याह दृष्टसा
धर्म्येण चेति। अपि च श्रुत्यापि प्रत्यक्षि तर्क आदृत इत्याह श्रुतिरपीति सोयं ब्रह्मणो जगदुपादानत्वाक्षेपः पुनः तर्केण प्रत्य
ते। प्रकृत्या सहसारूप्यं विकाराणामपस्थितं। जगन्न ब्रह्म स्वरूपं च नेति नोतस्य विक्रियां। विशुद्धं चेतनं ब्रह्म जगज्जडमशुद्धि
भाक् तेन प्रधानसारूप्यात् प्रधानस्यैव विक्रिया तथा ह्येकदेव अभ्युपायः सुखदुःखमोहात्मकतया सुखसमन्वितानां च चैत्रस्य
चस्त्रैणस्य नामविदं तोपर्यायमुखं निषादानां धनेत्विया च सर्वभावा आख्याताः तस्मात्सुखदुःखमोहात्मकतो वस्तुर्गतनरकोपाव
च प्रपंचतया जगदशुद्धमचेतनं ब्रह्म तु चेतनं विशुद्धं च निरतिशयत्वात्। तस्मात् न सारूप्याच्चेतनस्य विकारो जगत्।
न ब्रह्मण इत्युक्तं ये तु चेतनं ब्रह्म विकारतया जगच्चेतनमाहुः तान्प्रत्याह। अचेतनं चेदं जगदिति। व्यभिचारं चोदयति। ननु
चेतनमपीति। परिहरति नस्वामिभृत्ययोरपीति। ननु मानामसाक्षाच्चेतनश्चेतनांतरस्यापि न कार्यं तत्कारणबुध्यादीनियोग
द्वारेणोपकरिष्यतीत्यत आह। निरतिशया ह्युत्कर्षाश्चेतना इति। उपजनायापचयरूपं योगातिशयः। तदभावे निरति
शयित्वं अत एव निर्व्यापारत्वात् कर्तारं तस्मात्तेषां बुद्ध्यादिप्रयोगभोक्तृत्वमपि नास्तीत्यर्थः। चोदकानुशयीति बीजमुद्भा
दयति। योपीति। अभ्युपेत्यापाततः समाधानमाह तेनापि कथंचिदिति। परमसमाधानं च सूत्रावयवेन स्वयमवतारयति
न चेतनत्वमपि विलक्षणत्वमपि सूत्रावयवप्रसिद्धिमाह। अनवगम्यमानमेव हीदमितिशब्दार्थः। खलु चेनप्रत

वाच० २ तिकत्वाच्चैतन्यं पृथिव्यादीनामवगम्यमानमुपोद्बलितं मानान्तरेण साक्षाच्छ्रूयमाणमप्यचैतन्यं बाधेत। मानान्तराभावे त्वार्थिकं
४ स्तुत्यर्थेनापबाधनीयो न तु नद्यः श्रुत्यर्थान्यपरिपन्थिन इत्यर्थः। सूत्रान्तरमवतारयितुं चोदयति ननु चेतनत्वमपि कथंचिदिति।
न पृथिव्यादीनां चैतन्यमार्थमेव किं तु प्रत्यक्षश्रुतीनां साक्षादेवार्थ इत्यर्थः। सूत्रमवतारयति अत उत्तरं पठति। अभिमानि
व्यपदेशस्तु विशेषानुगतिभ्यां विभजते नैष दोष इति नैताः श्रुतयः साक्षान्मृदादीनां चैतन्यमाशङ्कनीयमिति कस्मात्पुन
रेतदेवमित्यत आह विशेषानुगतिभ्यां तत्र विशेषं व्याचष्टे विशेष इति भोक्तॄणामुपकार्यत्वाद्भूतेन्द्रियाणां चोपकारक
त्वात्साम्ये च तदनुपपत्तेः सर्वजनप्रसिद्धश्च विज्ञानं चाविज्ञानं चाभवदिति भूतेष्वविशेषश्चेतनाचेतनलक्षणः प्रागुक्तः स नो
पपद्यते। देवताशब्दकृतो वात्र विशेषो विशेषणशब्दो नान्यतरस्यात्। अपि च कौषीतकिनः प्राणसंवाद इति। अनुगतिं व्याचष्टे अनु
गताश्चेति सर्वत्र भूतेन्द्रियाणि अनुगता देवताभिमानिनीः कृत्स्नशो तिमन्त्रार्थवादेषु अपि च भूयस्यः श्रुतयोऽग्निर्वाग्भूत्वा मुखं प्राविशदि
त्युपक्रमाण्योऽन्त्यासिके प्रविशदादित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदित्याद्या इन्द्रियविशेषगता देवता दर्शयन्ति देवतात्मक्षेत्रज्ञभेदाश्चे
तनाः तस्माद्भूतेन्द्रियादीनां चैतन्यं रूपत इति। अपि च प्राणसंवादवाक्यशेषे चेति प्राणिनामस्मदादिशरीराणामिव क्षेत्रज्ञाधिष्ठि
तानां व्यवहारं दर्शयन्प्राणानां क्षेत्रज्ञाधिष्ठानेन चैतन्यं दर्शयतीत्याह प्राणसंवादवाक्यशेषे चेति। ततेऽन्यदेतत्स प्रीति।
यद्यपि प्रथमेऽध्याये सदादिशरीराणामिव क्षेत्रज्ञाधिष्ठितानां व्यवहारदर्शनात्प्राणानां भोक्तृत्वेन वर्णितं तथापि मुख्यतया कथं चि
न्नेतुं शक्यमिति द्रष्टव्यं पूर्वपक्षमुपसंहरति। तस्माद्विलक्षणत्वं इत्यतो तु प्रकृतिविकारभावहेतुं सारूप्यं विकल्पयति।
असत्त्वं तस्य रूपं चेति। प्रकृतिविकारभावाभावहेतुं वैलक्षण्यं विकल्पयते विलक्षणत्वेन च कारणेनेति ननु वर्तते प्रकृतिविका
रभावाविरोधे तदनुवर्तनेतात्पर्यमप्रकृतिविकारभावासमर्थमसत्त्वं सिद्धसत्त्वं तत्तृतीयनिदर्शनाभावादसाधारण इत्यर्थः॥ ४

अथ जगद्योनित्वाज्जगन्माद्ब्रह्मणो वागमत्वादागमत्वाधिगतविषयत्वमनुमानस्यास्य कस्मादाशङ्क्यते इत्यत आह। आगमवि
रोधस्त्विति न चास्मिन्नागमैकसमधिगमनीये ब्रह्मणि प्रमाणान्तरस्यावकाशो येन तद्द्वारागम आक्षिप्येत तथा च नाद्य
न्तूक्तं परिक्षिप्य ब्रह्मणीति यथा हि कार्यत्वाविशेषेऽपि आरोग्यकामः पथ्यमश्नीयात्स्वर्गकामः सिकतां भक्षयेदित्यादीनां मा
नान्तरापेक्षतानतु दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादीनां तत्कस्य हेतोः अस्य कार्यभेदस्य प्रमाणान्तरागोचरत्वात् ए
वं भूतत्वाविशेषे पृथिव्यादीनां प्रमाणान्तरगोचरत्वं न तु भूतस्यापि ब्रह्मणः तस्मान्नार्थैकगोचरस्याभिमतिसम्बद्धस्य मानान्त
रसीमतया ब्रह्मागमसिद्धत्वादित्यर्थः। यदि ब्रह्मागमसिद्धं ब्रह्मणस्तर्काविषयत्वं कथं तर्हि श्रवणातिरिक्तमननविधान
मित्यत आह। यदपि श्रवण व्यतिरेकेणेति तर्को हि प्रमाणविषयविवेचकतया तद्गतिकत्वाभ्युत्तरत्राश्रयोऽसति प्रमा
णे तु व्यासस्यास्य तस्याभावात्तु कृतत्वान्नाद्रियते प्रत्यगागमप्रमाणाश्रयः तद्विषयविवेकं च तद्विरोधिसमं तस्य इतिविधी
यते श्रुत्यनुगृहीत इति श्रुत्याश्रवणस्य पश्चादिति कर्तव्यत्वेन गृहीत इति। अनुभवाङ्गत्वेनेति मतो हि भावनामनोभाव
नाविषयतयानुभवतो भवतीति मननमनुभवाङ्गं आत्मनः तत्रागतत्वमिति स्वतापत्रयब्रह्मभिरसंपृक्तं वर्गमुदासीनत्वमील
र्थः। अपि च चेतनकारणवादिभिः कारणसालक्षण्येऽपि कार्यस्य कथं चिद्विचेतनताविर्भावाम्नोकल्पे प्रयोऽसमाश्रयति।
प्रसाधितार्थः [illegible]
[illegible] कथंचिद्वेतनाविर्भावानाविर्भावाभ्यां विज्ञानं चाविज्ञानं चाभवदिति जगत्कारणयोरपि तुल्यं अचेतनप्रधानकार
णवादिनां तु दुर्योजनमेतत्। नहि चेतनस्य जगत्कारणस्य विज्ञानरूपतासंभाविनी चेतनस्य जगत्कारणस्य सुषुप्त्यादिअव
स्थास्विव सतोऽपि चैतन्यस्यानाविर्भावितया शक्यमेव कथं चिद्विज्ञानत्वं योजयितुमाह। योऽपि चेतनकारणश्रवणबलेनेति

परस्यैव वचनेन तस्य प्रधानकारणवादिनः सांख्यस्य न युज्येत प्रत्युक्तत्वात् तु वैलक्षण्यस्येति वैलक्षण्ये कार्यकारणभावो नास्तीति
वात्त० अभ्युपायत्वेन तदुक्तं परमार्थ इत्यस्तु नास्माभिरेतदभ्युपेयत इत्यर्थः। असदिति चेन्न प्रतिषेधमात्रत्वात्। न कारणात्कार्यम
५ भिन्नं अभेदे कार्यत्वानुपपत्तेर्न कारणतस्थात्मनि वृत्तिविरोधात्। शुध्यशुध्यादिविरुद्धधर्मसंसर्गाच्च चिदात्मनः कारणस्य
जगतः कार्याभेदः। तथा चेयं जगत्कार्यं सत्त्वेन चिदात्मनः कारणस्य प्रागुत्पत्तेर्नास्तीति चेत्। असदुत्पद्यत इति सत्कार्यवादस्या
कोप इत्याह। यदि चेतनं शुद्धमिति नेयदोष इति। प्रतिषेधमात्रत्वादित्येतद्विभजते। प्रतिषेधमात्रमिदं हि प्रतिपादयिष्यतीत्यह
न्त्वमारंभणशब्दादिभ्य इत्यत्र यथा न कार्यं स्वरूपेण सदसत्त्वाभ्यां निर्वचनीयं अपि तु कारणरूपेण शक्यं सत्त्वेन निर्वक्तुमिति एव
च कारणसत्त्वैव कार्यस्य सत्तानमतोऽन्येति। कथं तु सत्तेः प्राक् सति कारणे भवत्सत् स्वरूपेण तदुत्पत्तेः प्रागुत्पत्त्यसत्त्वस्वास्र
सत्त्वाभावनिर्वाच्यत्वसत्त्वत्वोत्पत्तेरिति निर्विषयः सत्कार्यप्रतिषेध इत्यर्थः॥ अपीतौ तद्वत्प्रसंगादसमंजसमिति विभजते। अ
त्र हेत्वोरेकोपरिष्टोऽप्येतत्तथाहि घृतादिपुद्गदिषु सैंधवादीनामविभागलक्षणो लयः स्वगतरसादिभिः एवं पुरुषस्य अंतर्लीनशिशु
ध्यादिधर्मिणि जगल्लीयमानमविभागं गच्छत् ब्रह्म स्वधर्मैर्दूषयेन्न चान्यथा लयो लोकसिद्ध इति भावः। कल्पांतरेणासामंजस्य
माह। अपि च समस्तस्येति न हि समुद्रस्य फेनोर्मिबुद्बुदादिपरिणामेषु वारणां सर्पधारादिभ्रमवानियमो दृष्टः समुद्रो हि कदाचि
त्तु नोर्मिरूपेण परिणमते कदाचिद्बुद्बुदादिना रज्जुर्हि कश्चित्सर्प इति विपर्यस्यति कश्चिद्धारेति न च क्रमनियमः सोप [illegible] भोग्यादि
विभागनियमाकमनियमश्चासमंजस इति। कल्पांतरेणासामंजस्यमाह अपि च बलरूपाणामिति। कल्पांतरं शंकापूर्वमाह न च मिति
सिद्धांतसूत्रं न तु दृष्टांतभावात् नाविभागमात्रं लयोपि तु रकारणे कार्यस्याविभागः। तत्र च धर्मरूपेण संति सहस्रं दृष्टांताः तत्र तु
कारणे कार्यस्य लये कार्यधर्मदूषणेन दृष्टांतत्वोप्य स्तीत्यर्थः स्यादेतत्। यदि कार्यस्याविभागः कारणे कथं कार्यधर्मदूषणं का ५

रणस्येत्यत आह। अनन्यत्वेपीति। यथा रज्ज्वस्तारोपितस्य परमार्थिकं रूपं भुक्तिः न च तु कुं रजतमेव मिदमर्पत्यर्थः अपि च सुषु
प्तिप्रलयकालेपु निद्रादिपि कार्यस्य कारणादभेदमभिदधति श्रुतिरनतिशंकनीयाः सर्वैरेव वेदवादिभिः न च सुषुप्तस्य कार्य
परिहारः सप्रलयेपि समानः कार्यस्याविद्यासमारोपितत्वं नाम तत्स्यात् आपितिमात्रमनुभोज्य मित्याह। असत्यं चेदनुत्पन्नमिति
अस्ति चापर्यायो दृष्टांतः यथा स्वप्नद्रष्टैक इति लौकिकः पुरुषः एवमवस्थात्रयसाक्ष्येक इति अवस्थात्रयमुक्तानित्थं पितल्पयाः।
कल्पांतरेणासामंजस्ये कल्पांतरेण दृष्टांतभावं परिहारमाह स्वपक्षदोषाच्च कार्यकारणयोर्वैलक्षण्यं तावत्समा
नमेवोभयोः पक्षयोः प्रागुक्तेरसत्कार्यवादप्रसंगोपि तौ तद्वत्प्रसंगश्च प्रधानोपादानपक्षएव नास्मत्पक्ष इति उपरिष्टा
त्प्रतिपादयिष्यामः तथापि युक्तिकयासमानत्वापादानमिदानीमिति मंतव्यं इदं च स्वपुरुषस्य सुखदुःखोपरागो कर्म
शयादिरमस्येति सुगममन्यत्। तर्काप्रतिष्ठानादपि केवलागमगम्येर्थे स्वतंत्रतर्कविषयेन सांख्यादिवत्साधर्म्यवैधर्म्यमात्रेण त
र्कः। प्रवर्तनीयो येन प्रधानादिसिद्धिर्भवेत् शुष्कतर्को हि सत्यभवत्यप्रतिष्ठानात्। तदुक्तं यत्नेनानुमितोप्यर्थः कुशलैरनुमा
रन्यथं तृभिः अभियुक्ततरैरन्यैरेवोपपाद्यत इति न च महापुरुषपरिग्रहात् तत्वेन कस्यचित्तर्कस्य प्रतिष्ठा महापुरुषाणामपि तार्कि
काणां मिथो विप्रतिपत्तेरिति। सूत्रेण शंकते अन्यथानुमेयमिति चेत् अन्यथा वयमनुमास्यामह इति नानुमानाभासव्य
भिचारेण नानुमानव्यभिचारः शंकनीयः प्रत्यक्षादिष्वपि तदाभासव्यभिचारेण तत्प्रसंगात् तस्मात्स्वाभाविकप्रतिबंधाव
धृतलिंगानुसारेणानुमेयो न प्रमात्राभवितव्यं ततश्चाप्रत्यूहं प्रधानं सेत्स्यतीति भावः। अपि च येन तर्केण तर्काणामप्रतिष्ठामाह
स एव तर्कः प्रतिष्ठितोऽभ्युपेयः न ह्यप्रतिष्ठायामितराप्रतिष्ठानुमानाद्यादित्याह न हि प्रतिष्ठितस्तर्क एव नेति अपि च तर्काप्रतिष्ठायां
सकललोकयात्रोच्छेदप्रसंगेन वस्तुतत्वाभासनिराकरणेन तदर्थविनिश्चय इत्याह सर्वतर्काप्रतिष्ठायां चेति अपि च

वाच० २ विचारात्मकस्तर्कस्तत्पूर्वपक्षपरित्यागेन तर्कितं राद्धान्तमनुजानाति सति विपक्षे पूर्वपक्षविषयेन तर्केण तिष्ठति रहिते प्रवर्तमानस्तर्को ते तदभावे वि
चारप्रवृत्तेः तदिदमाह। अयमेव च तर्कस्यालंकार इति नाभिमानमात्रं कांस्त्रेण परिहरति एवमप्यविमोक्षप्रसंगः न वयमन्यत्र त
६ र्कमप्रमाणयामः किंतु जगत्कारणसत्त्वे स्वाभाविकप्रतिबंधं तत्र लिंगमस्ति। यत्तु साधर्म्यवैधर्म्यमात्रं तदप्रतिष्ठादोषान्न मुच्यत इति।
कल्पांतरेण। निर्दोषपरार्थमाह। अपि च सम्यक्ज्ञानान्मोक्ष इति भूतार्थगोचरत्वात् सम्यक्ज्ञानस्य व्यवस्थितवस्तुगोचरतया
व्यवस्थानं लोके दृष्टं यथा प्रत्यक्षस्य वैदिकं च दृष्टं तेन जगदुपादानविषयविज्ञानं वेदोत्थं तर्केतिकर्तव्यताकं वेदजनितं व्यवस्थि
तं। वेदानपेक्षेण तु तर्केण जगत्कारणभेदमवस्थापयतां तर्किणामन्योन्यं विप्रतिपत्तेः तत्त्वनिर्धारणकारणाभावाच्च न ततः तत्त्वं
व्यवस्थितं नतः सम्यक्ज्ञानं असम्यक्ज्ञानाच्च संसारादविमोक्ष इत्यर्थः। एतेन शिष्टापरिग्रहा अपि व्याख्याताः न कार्यकारणभि
न्नं अभेदे कारणरूपवत्तत्कार्यत्वानुपपत्तेः करोत्यर्थानुपपत्तेश्चाभेदवादः दुर्भावनां हि तद्यथा न चास्य कारणात्मत्वे किंचिदस्त
मस्ति पदार्थमयं तु उत्पाद्यते तत् अभिव्यक्त्यर्थमितिचेत् न तस्यापि कारणात्मत्वेन सत्त्वात् असत्त्वे वाभिव्यंग्यस्यापि तद्वत्संगते कारणा
त्मतया भावात्। नहि तदानीं देवास्ति वेति तु उक्तं किं वेदमणिमंत्रौषधेभ्य इंद्रजालं कार्येण सिद्धिर्न यदि दृश्यते नित्योदाय प्रव
धानमविदूरस्थानं च तस्यैव तरवस्थं द्वियादेः पुंसः कदाचित्प्रत्यक्षं परोक्षं च येनास्य कदाचन प्रत्यक्षमुपलंभनं कदाचित्तु मा
नांकदाचिदागमः कार्यति रस्यमवधिरस्य परोक्षहेतुरितिचेत् न कार्यजातस्य सदातनत्वात् अस्यापि स्यात्कार्यान्तराणि पिंडकपा
लशर्कराचूर्णकणप्रभृतीनि कुंभं व्यवदधते न तु कुंभस्य परोक्षत्वे कदाचिदिति। नन्वेतस्य कार्यजातस्य कारणात्मनः सदातनत्वेन
सर्वदा व्यवधानेन कुंभस्यात्यन्तासंतनुपलब्धिप्रसंगात्। कदाचित्कत्वे वा कार्यजातस्य न कारणात्मत्वं नित्यत्वानित्यत्वलक्षणविरु
द्धधर्मसंसर्गस्य भेदकत्वात् भेदाभेदयोश्च परस्परविरोधेनैकत्र सहासंभवदस्तु कं तस्मात्कारणात्तेन कार्यमिकां तत एवं भिन्नं च ८

भेदे गवाश्ववत् कार्यकारणभावानुपपत्तिरिति सांप्रतं अभेदेपि कारणरूपवत्तदनुपपत्तेरुक्तत्वात् अत्यंतभेदे च कुंभकुंभकारयोर्निमित्त
नैमित्तिकभावस्य दर्शनात्। तस्मादत्यंतभिन्नत्वाविशेषेपि समवायभेद एवोपादानोपादेयभावनियमहेतुः। अस्याश्रयत्वाभावात् तदुपादेयं
अवयसमवायः तदुपादानं उपादानत्वं च कारणस्य कार्यादल्पपरिमाणस्य दृष्टं यथा तंत्वादीनां पटाद्युपादानानां पटादिभ्योऽल्पपरिमाणत्वं।
चिदात्मनस्तु परममहत उपादानात् जगत्तदल्पपरिमाणमुपादेयं भवितुमर्हति तस्मात् त्र्यणुकादिक्रमेणाल्पतारतम्यतिरोधानक्षोदीयः संभवति
तज्जगतो मूलकारणं परमाणुः। क्षोदीयोंतरानंत्येनानवस्थानात्तु मेरुराजसर्षपयोः तुल्यपरिमाणत्वप्रसंगोऽनंतावयवत्वादुभयोः तथा
त्परममहतो ब्रह्मण उपादानत्वे अनुपादेयं जगत्कार्यमभिन्नं दतिश्रुतिः प्रतिष्ठितप्रामाण्यतर्कविरोधात् सहस्रसंवत्सरसत्रगतसंवत्सर
श्रुतिवत्कथंचिज्जघन्यवृत्त्या व्याख्येत्यधिकं शंकमानं प्रतिस्मरणदूषणमतिदिशति एतेनेति सूत्रेण अस्यार्थः। कारणात्कार्यस्य भेदं चारभ्य
त्वमारंभणशब्दादिभ्य इत्यत्र निषेत्स्यामः अविद्यासमारोपणेन च कार्यस्य न्यूनाधिकभावमप्यप्रयोजकत्वादुपेक्षिष्यामहे इति वैशेषिकाद्यनि
मितस्य तर्कतत्त्वस्य युक्तत्वेनाव्यवस्थितत्वेन स्पष्टमिदं सांख्यदूषणमिति दिशति यत्र कथंचिद्वेदानुसारिणो मन्वादिभिः शिष्टैः परिगृहीतस्य
सांख्यतर्कस्येयं गतिः तत्र परमाण्वादिवादस्यात्यंतवेदबाह्यस्य मन्वाद्युपेक्षितस्य च कैव कथा केनचिदंशेन गिसत्त्वादयोहि तुल्यत्वेन
किंचित् सदसद्वा पूर्वपक्षस्यापेक्षितमप्युरहस्य तुल्यत्वं न इति केनचिदंशेनेत्युक्तास्तत्रमभ्यनुज्ञात्॥ ४ ४२ भोक्त्रापत्तेरविभागश्चेत्स्या
ल्लोकवत्स्यादेतत् अतिगंभीरं जगत्कारणविषयत्वं तर्कस्य नास्तिकैः चागमम्य तदित्युक्तं तत्कथं पुनस्तर्कनिमित्तेनाक्षेप इत्यत आह यद्यपि
श्रुतिः प्रमाणमिति प्रवृत्ताहि श्रुतिरनपेक्षतया स्वतः प्रमाणत्वेन न प्रमाणांतरमपेक्षते। प्रवर्तमाना पुनः स्फुटतरप्रतिष्ठितप्रामाण्यतर्क
विरोधेन मुख्यार्थत्वात् प्रच्याव्य जघन्यवृत्तीनां नीयते। यथा मंत्रार्थवादादिरित्यर्थः। अतिरोहितार्थं भाष्यं यथा त इति यद्यतीतानागतयोः सर्वा
योरेव विभागो न भवेत्। ततस्तदेवाप्यतनस्य विभागस्य बाधकं स्यात् स्वप्नदर्शनस्येव जाग्रद्दर्शनं न चेतरस्मिन् अबाधिता ध्यानदर्शनेन नत्वयोरविन

DR. BHAU DAJI MEMORIAL

धात्वानुमानादिसिद्धः इमांशंकामपाननो विचारितलोकसिद्धदृष्टांतोपदर्शनमात्रेणनिराकरोति सद्रूकारः स्याल्लोकवत् परिहारस्तमाह तदन्य
त्वमारंभणशब्दादिभ्यः एर्वस्मादविरोधादस्यविरोधाभिधानाक्रमस्यविभागवमाह। अस्तुप्रथमेचममितिस्यादेतत्परिकारणास्परमार्थभूतारंभ
त्वमस्याकाशादेः प्रपंचकार्यस्यकुतस्तर्हिनवैशेषिकायुक्तदोषप्रपंचावनारदस्तनआह व्यतिरेकेणाभावः कार्यस्यावगम्यते नखल्वननना
सत्वमित्यभेदं ब्रूमः किंतुभेदं व्यासेधामः ततश्चनाभेदाश्रयदोषप्रसंगः किंत्वभेदं व्यासेधभिर्वैशेषिकादिभिः अस्मांस्कस्सदायकमेवाचरितंभव
तिभेदनिषेधहेतुंव्याचष्टे आरंभणशब्दस्ताधरेति एवंहिब्रह्मविज्ञानेनसर्वजगत्तत्त्वज्ञातायनयादिब्रह्मैवतत्त्वंजगतोभावेत्। यथांवरआं
ज्ञानाद्यांशुजगतत्त्वंज्ञानंभवतिसाहितस्यतत्त्वं तत्त्वज्ञानंचज्ञानमतोन्यस्यमिथ्याज्ञानमज्ञानमेव अत्रैववैदिकोदृष्टांतः यथासोम्यैकेनेति
स्यादेतत् मृदिज्ञातायांकथंमन्मयंघटादिज्ञानंभवतिनहिनन्मदात्मकमितिउपपादितमथस्यान्नत्स्यात्तत्त्वज्ञानोर्भिनंनचान्यस्मिन्नुविज्ञाते
अन्यद्विज्ञानंभवतियतआह। श्रुतिः वाचारंभणंविकारोनामधेयंवाचयाकेवलमारभ्यतेविकारजातंनतुतत्त्वतोस्तियतोनामधेयमात्रमेतत्
यथापुरुषस्यचैतन्यमितिराहोःशिरइतिविकल्पमात्रंयथाहुर्विकल्पविदः शब्दज्ञानानुपातिवस्तुशून्योविकल्पइति तथाचावस्तुतयानृतं
विकारजातंमृत्तिकेत्येवसत्यं तस्मात्परशरावोदंचनादीनांतत्त्वस्यैकतानेनचमृदिज्ञानयांतेषांसर्वेषामेवतत्त्वंज्ञानंभवतीतिसिद्धमुक्तं
नचान्यस्मैकविज्ञानेनसंपद्यतइतिनिदर्शनांतरद्वयंदर्शयितुपसंहरतितस्मात्घटाघटककाद्याकाशानामितियेहिदृष्टनष्टस्वरूपेणनतेव
स्तुसंतोयथामरुमरीचिकोदकंयानत्वास्वसर्वविकारजातंतस्मात्सत्त्ववत्तथाहितदस्तेचकनतथाविज्ञात्मानत्यसौकदाचिन्नभवतिनुकथंचिदिकिंतुस
र्वदासर्वत्रसर्वथास्तेवननास्ति। ननुचैवंविकारजातंस्यकदाचित्कथंचित्कुत्रचिदनवस्थानात् तथाहिस्वस्वभावोचेद्विकारजातंकथंकदा
चिदसत् असत्स्वभावंचेत् कथंकदाचित्सदसतोरेकत्वविरोधात् नहिरूपंकदाचित्कथंचित्कथंचिद्रूपांधोभवति आहतस्मात्सदसत्त्वधर्माभ्यामनि
र्वचनीयत्वकरणाधीनज्ञन्मनयाकदाचिदेवाभवतः नत्वहिर्विकारजातंरज्जायमानंसदात्मनमितिनविकारःकस्यचित् अथासत्त्वसमयेनास्ति

कस्यचिद्धर्मसत्त्वंनस्थिधर्मिण्याप्रयुज्यतेनह्यसत्स्थोप्रत्युपपद्युपपत्तेः अथासत्त्वधर्मः किंवर्थांतरसत्त्वंक्रियायांभावस्यनहिघटेजातेप
टस्यकिंचिन्नवतिअसत्त्वंभावविरोधितिचेत्। नाकिंचित्करस्यानुपपत्तेः किंचित्करत्वेवानर्थोप्यसत्त्वेनदनुयोगसंभवात्। अथास्यसत्त्वंनाम
नजायतेकिंतुसएवनभवेति। यथाहुः नतस्यकिंचिद्भवतिभवत्येवकेवलमिति। अथैषप्रसज्यप्रतिषेधोनिरुप्यतांकिंतत्स्वभावोभावः
उतभावस्वभावसः इति। नत्रपूर्वस्मिन्नुकल्पेभवानांतत्स्वादृशायाश्चप्रसंसज्यते। तथाचभावानुभावाभावःउत्तरस्मिंस्तुसर्वभावनिवृत
यानाभावमनन्तरःस्यात्। अस्यनामाभनिर्मितत्वेपिनिषेधस्वभावनिश्चयरवस्थैवनस्मान्निर्भ्रमस्तिकारणादिकारजातंनवस्तुसदसत्त्वोनिका
रजातमनिर्वचनीयमनन्तं। नरनेनप्रमाणेनासिद्धमभेदत्वंविकारजातस्यकर्मणस्यनिर्वाच्यतयासत्त्वंस्तनिकेत्येवसत्यमित्यादिनाभवं
धेनदृष्टांततयानुवदतिश्रुतिः यत्रलौकिकपरीक्षाणांबुद्धिसाम्यंसदृष्टांतइतिचाक्षपादिसूत्रंप्रमाणसिद्धोदृष्टांतइत्यपरंनपुनर्लौकसिद्धत्व
मत्रविवक्षितं अन्यथातेषांपरमाण्वादिर्नदृष्टांतः स्यान्नहिपरमाण्वादिनैसर्गिकत्वेनैपिकपुद्गलातिशयरहितानांलौकिकानांसिद्धइ
तिसंप्रत्ययैकांतवादिनमुत्थापयतिनत्वनेकात्मकंइति अनेकशक्तिभिर्योऽप्रवृत्तयोनानाकार्यस्वरूपस्तपुरुषोनेकंनानाचेति किमतो
यद्येवमितिअतआहतत्रैकत्वांशेनेति। यदिपुनरेकत्वमेवसमुद्भूतेनजोनानात्वाभावात् वैदिकःकर्मकांडश्चयोलौकिकव्यवहारःसम
स्तएवोविषयेन। व्ययेणतराश्रयवशमननादयःसर्वदिनअलांअलव्यप्रसज्येरनएवंचानेकात्मनेकत्वेब्रह्मणोमृदादिदृष्टांता अनुरूपाभविष्यंती
तितमिममनेकांतंवादंदूषयति नैवंस्यादिति इदंतावदत्रवक्तव्यंमृदात्मनैकत्वंघटशरावाद्यात्मनानानात्वमितिवादतः कार्यकारणयोःपरस्प
रंकिमभेदोभिमतः आहोभेदउतभेदाभेदाविति नत्रभेदएकांतिकेमृदात्मनेतिचघटशरावाद्यात्मनेतिचोल्लेखद्वयंनियमश्चोपपद्यते। भेदेचो
ल्लेखद्वयनोयमासुपपन्नावात्मभेदेतित्वसमंजसंनघमस्मात्त्वआत्मासंभवतिनचानेकांतवादः भेदाभेदकल्पेतुल्लेखद्वयंभवेदपिनि
यमस्तुयुक्तः नहिधर्मिणोःकार्यकारणयोःसंकरेतद्धर्माणांकल्पनानैनसंकीर्यतइतिनक्ष्चसंभवतीतिमृदात्मनैकत्वंसनेद् आपाति

वाच०२ यावन्नवर्तितावद्घटशरावाद्यात्मनावेस्थादेवं घटशरावाद्यात्मनानानात्वं चाद्वभावान तावन्महात्मनानानात्वं भवेन् सोयं नियमः कार्यकारणयोरैकां
तिकं भेदमुपकल्पयति अनिर्वचनीयतां वाकार्यस्य परा क्रान्तं चास्माभिः प्रथमाध्याये तदास्तां तावत् नदेनपुरूळिं उक्तिरासूत्रमनुवदंतीं श्रुतिमुदा
८ तीमनक्तिकेत्येवनस्पकर्मसहितेनज्ञानेनब्रह्मभावमधीयत इत्याह स्वयंप्रसिद्धं हीति। स्वाभाविकस्यानादेरितियदुक्तंनानात्वांशेनतु कर्मकांड
स्य लौकिकव्यवहारः सेत्स्यतीतिनत्राह वाधितेचेति यावद्वाधं हि सार्वलौकिकव्यवहारः स्वप्नदर्शावस्थावत्तदुपदिशत समिदित्यादेतत्। नब्रह्मणो
जीवभावः कल्पनपरार्थज्ञानव्यवहारः सच यथा जाग्रदवस्थायां बाधकान्निवर्तते एवं तत्त्वमस्यादिवाक्यपरिभावनाभ्यासपरिपाकभुवा
शारीरस्याब्रह्मात्मभावसाक्षात्कारेण बाधकेन निवर्तते स्यादेतत् यत्र त्वस्य सर्वमात्मैवाभूत्तत्केनकिं पश्येदित्यादिनामिथ्याज्ञानाधिनो व्यवहारः
क्रियाकारकादिलक्षणः सम्यक्ज्ञानेनापनीयतइति न ब्रूते किंत्ववस्थाभेदाश्रयो व्यवहारो वस्तुतंतव्यामोवर्तते यथा बालकस्य कालेन बालभा
दपक्षतोपनयनप्रापौनिवर्ततेनचतावतासौमिथ्याज्ञाननिबंधनोभवत्येवमत्रापीत्यत आह नचायं व्यवहाराभावइति कुतस्त्वमसीतिवत्
त्वभावस्येति नरत्वेनहाक्षमवस्थाविशेषनियतंप्रत्याख्यायमाह जीवस्यापितु नभुंजगोरज्जुरियमितिवत्तदात नतेनमवदति अपिचसत्या
नृताभिसंधानेनाप्यतद्देवमुक्तमित्याह। तस्करदृष्टांतेन चेति। नचास्मिन्दर्शनमिति। नहिजातु कस्यचिद्दंडकमंडलुकुंडलशालिनःकुंड
लीज्ञानं दंडवत्तांकमंडलुवत्तांबाबाध्यते तत्कस्य हेतोस्तेषांकुंडलादीनां तात्त्विकत्वात्तद्वदिहापि भाविकगोचरेणैकात्म्यज्ञानेन
नानात्वं भाविकमपवदनीयं नहिज्ञानेनवस्त्वपनीयतेपितु मिथ्याज्ञानेनारोपितमित्यर्थः। वादयंतीनत्वेकांतात्युपगम्यइति अवा
धितानधिगतासंदिग्धविज्ञानसाधनं प्रमाणमिति प्रमाणसामान्यलक्षणोपपत्यापत्यक्षादीनि प्रमाणानामभ्युपगमेएकांताभ्युपगमाद्
तेषां सर्वेषां भेदविषयाणां बाधितत्वादप्रमाण्यं प्रसज्जेत तथा विधिप्रतिषेधशास्त्रस्यापि भावनाभाव्यभावकरणेतिकर्तव्यताभेदापेक्षत्वात्
आहत्वे तथाच नास्ति समेकदेशासंपत्तेर्सर्वतदाशेषाद्दर्शनानामप्रमाण्यमित्यभेदैकांताभ्युपगमहानिः। न केवलं विधिनिषेधाश्रये
णास्य मोक्षशास्त्रस्यापिपः स्वरूपेणापि भेदापेक्षत्वादित्याह मोक्षशास्त्रस्यापीति अपिचास्मिन्दर्शने वर्णपदवाक्यप्रकरणप्रमाणादीनां
८

अलीकत्वात्सप्रपंचमद्वैतज्ञानं समीचीनं भवेत्। नखल्वनकाङ्कुमात्रधूमकेतनज्ञानं समीचीनमित्याह कथं चानृतेन मोक्षशास्त्रेणेति। परि
हरति अत्रोच्यत इति। यद्यपि प्रत्यक्षादीनां तात्त्विकमबाधितत्वं नास्ति पुण्यागमाभ्यां बाधनात्। तथापि व्यवहारे विसंवादने सांसारिकः कश्चित्
तस्मादनपबाधनात्प्रमाणलक्षणमिति। घतितं भवत्यादयहतिसत्त्वोपपत्तेरिति सत्वाभिमानोपपत्तेरितिग्र हणका क्रमेभेत हिसत्वे।
यावद्धि न सत्यात्मैकत्वप्रतिपत्तिरिति विकारानेव तु शरीरादीन्हिन सात्मभावेन पुत्रपश्वादीन्ममेत्यात्मीयभावेनेतिप्रजनावैदिकलौकिकर्मकांडमोक्ष
शास्त्रव्यवहारलक्षणश्च व्यवहारस्य वेतिविभजनेयथाक्रमस्यपाक्रमस्येति। कथं चानृतेन मोक्षशास्त्रेणेतियदुक्तं तदनुभाष्यपरिहरति कथं त्व
सत्येनेतिशास्त्रमत्रवर्कुं श्रवणाद्युपायज्ञात्मसाक्षात्कारपर्यंतो वेदांतसिद्धोपि ज्ञाननिश्चयो सत्यः सोपिहि न तिरक्तकार्यतथाविरोधधर्मा
यस्तु प्रत्यक्षभावः साक्षात्कारतासौ कार्यः। नत्स्वभावत्वात्तस्मादबोधमेतत्। कथमसत्यानुसत्योत्साद इतियत्तत्कुसद्यत्तनतुलयतइति
कुतःसत्यासत्यादुत्पादयत्र्योत्पद्यनेनत्वर्दमसत्यमेव सांव्यवहारिकं तु सत्यत्वं स्वरूपस्य ब्रह्म साक्षात्कारस्य नश्रवणादीनामप्यभिमंतव्या
दनुपेत्य वस्तिरूपस्य ब्रह्मसाक्षात्कारस्य परमार्थसत्त्वतांच्य भिचारोद्भावनमिति मं नचायं यपिसांसारिकस्य त्वोसेदेवभयात्सत्वेदनमरणामुत्प
द्यते। तथापिनयहेतुरहितं तत्सद्ज्ञानं चासत्यं ततो भयं सत्यं जायत इतिसत्यासत्योत्पत्तिरुक्ता यद्यपि चाहिज्ञानमपि स्वरूपेणासत्तथापितत्
ज्ञानत्वेन भयहेतुरपितु अनिर्वाच्याहिरूपितत्वेन अन्यथा रज्जुज्ञानादपि भयप्रसंगात्। ज्ञानत्वेनाविशेषात्। तस्मादनिर्वाच्याहिरूपितं ज्ञा
नमप्यनिर्वाच्यमितिसिद्धं तं मसत्यादपिसत्यस्योत्पत्तिरितिनभ्रमः। सर्वस्मादसत्यासत्यस्योत्पत्तो यतः समारोपितो धूमभावाद्धूमभल्पिया
वह्निज्ञानं सत्यं स्यात्। नहि वह्निपोत्पज्ञानं सत्यं स्यात्। सत्यमितिरस्यादिज्ञानेनापितः सत्येनसविनश्यं तोनियमो हि सत्ताहशः सत्यानांयतः
कुतश्चित्किंचिद्जायतेइति। एवमसत्यानामपिनियमो यतः कुतश्चिदसत्यात्सत्कुतश्चिदसत्यं यथा दीर्घत्वादेर्वर्णेषु समारोपितत्वाविशेषेपि
अजीनमित्यतो वाक्यादजिनविरहमवगच्छंतीसत्यं अजीनमित्यतस्तु समारोपितदीर्घभावात्। अजिनविरहमवगच्छन्तो भवंतिभ्रान्ताः। न चोभयत्र

भाच॰ दीर्घसमारोपंप्रतिकश्चिद्दसिभेदः तस्मादुपरम्भमसत्कारपिसत्त्योत्पादयतिविषयोनांतरमात्रतश्चापदर्थोनावरणात्सेतिपयाहिसांसारिकोजा
१ ग्रन्धजंगंदद्युपवायतेतश्चप्रदेशावेदनामात्रोतिविपासः सच्चिलमात्रोकपापानुंभवर्तनेनेतदासातसाध्यायमाप्यापितःस्वरूपमनुभवति। एवं
लमांतिकेपितरदवस्थंसर्वमित्यसत्यकार्यसिद्धिःशंकतेनत्कार्यमेण्यन्तमभेदेति एवमपिनासत्यंस्यासिद्धिरिकेलर्थः। परिहरतितत्रब्रूमो
यद्यपिस्वमदर्शनावस्थेस्येति लौकिकोहिस्वप्नोपितावगम्यंबाधितमन्यतेवतदवगविं तेनयद्यपिपरिक्षिकोअनिर्वाच्यस्पिनामवगमिभनिर्वा
च्यांनिश्चित्वांतितथापिलौकिकाभिप्रायेणदपिमुक्तंअत्रांतरेलोकायतिकानांमतमपाकरोतिएतेनस्वप्नदर्शावगत्यवाधनेनेति यदारवल्व
यंचैत्रस्वात्परस्यत्रीमात्मविकल्पदंद्राकरालवरनामुपवाचमन्यसत्कावनुंविलांगसामतिरोधारणध्वस्तविशाखवलोचनारोनांबलंबचोस्कु
लखीपणांस्पृष्टिकाबलभिभ्रमतिविंबितामन्यामित्रिणांतनुमात्मायत्तेप्रतिबुद्धोमानुषीमात्मनस्तनुंपश्यतितदोभयदेहानुगतमात्मानंप्र
तिसंदधानोदेहातिरिक्तमात्मानंनिश्चिनोति। ननुदेहमात्रेतन्त्यात्मत्वेदेहवत्प्रतिसंधानाभावप्रसंगात् कथंचैतदुपपद्यते। यदिस्व
प्नदर्शावगतिबाधितस्यात्तदार्थेतुप्रतिसंधानाभावइति। अत्रसत्यासत्यनीतिः श्रुतिसिद्धांतयव्यतिरेकसिद्धान्तेत्याहमिति।
नचाश्रुतिरिति। तथाकारादीतिय्यपिदेवात्तरूपंसत्यंनचापिचयथासंकेतमसत्यंनहिसंकेतदतारः संकेतयंतीदृशंनरूपाभेदेना
यंवर्णःप्रत्येतव्योपोत्वीदृशोरेखाप्पभेदोकारईदृशश्चआकारइतिनयावासमीचीनात्संकेतात्समीचीनवर्णावगतिरितिसिद्धंय
थोक्तंयेकत्वांशेनजानादमोक्षव्यवहारःसेत्स्यतिनानात्वांशेनतुकर्मकांडाश्रयोलौकिकश्चव्यवहारःसेत्स्यतइतिनाह। अपिचांत्य
मिदंप्रमाणमिति। यदित्वनेकत्वानेकत्वनिबंधनोव्यवहाराचेकस्यपुंसोपर्यायेणसंभवतःस्यादयमुभयसमन्वयःकेवलतत्वदर्शि
नस्येकत्वागतिनिबंधनःकश्चिदस्तिव्यवहारःस्यादवगतेःसर्वनित्यात्। तथाहिनतमसीसैकात्म्यावगतिःसमस्तप्रमाकमतफल
व्यवहारानपबाधमानानैवोदीयतेनैतस्याःपरस्तात्किंचिदनुकूलंप्रतिकूलंवास्ति यदिस्ति यदपेक्षेतयेनवेयंप्रतिक्षिप्येतनचानु १

कूलप्रतिकूलनिवारणंचातःपरंकिंचिदाकांक्ष्यमिति। नवेयमेवगतिर्दुःखिनोऽप्यपेयाहंनवेयमितिस्यादेतत्। अत्यंतवेयमवगतिर्निःप्रयोजना
नहितथावगतेक्षावदभिरूपादेयेनप्रयोजनवत्त्वेनात्मास्यादित्यतआह। नचेयमवगतिरनर्थिकाकुतःअविद्यानिवृत्तिफलदर्शनात्तद्धियमु
लचमत्तनीयश्चादेविद्यानिवर्तयतियेनग्रासांस्यात् किंत्वविद्याविरोधित्वभावतयातन्निवृत्त्यात्मैवोदयतेअविद्यानिवृत्तिश्चनतत्कार्यंत
त्फलमपितुदृष्टत्वयथलक्षणत्वात्फलत्वमिति। प्रतिकूलंपराचीनंनिराकर्तुमाहबाधकज्ञानांतरेतिकुतःबाधकांतरस्यादेनतद्भावः।एकत्वनिबंध
नोव्यवहारोनेकत्वनिबंधनस्त्वस्तितदेवहिसकलामुवहन्तीलोकयात्रां अतस्तदसिद्धार्थंअनेकत्वसकल्पनीयंतात्विकत्वमित्यतआ
ह। प्राक्चेति व्यवहारोहि बुद्धिपूर्वकारिणांबुद्धेःप्रयत्नेनतस्याःतात्विकत्वेनप्रत्यापितदुपपत्तेरिति।वेदितंससंवेतरद्विसंस्कारात्
अन्नतंचविचारासहतयानिर्वाच्यत्वात्। अंत्यंतसैकात्म्यज्ञानस्यानपेक्षतयाबाधकत्वमनेकत्वज्ञानस्यचप्रतियोगिग्रहापेक्षतयादु
र्बलत्वेनबाध्यत्वंवदनप्रकृतमुपसंहरतितस्मादंत्येनप्रमाणेनेतिस्यादेतत्। नचयमनेकव्यवहारमिथ्यात्वंअनेकत्वस्यतात्विकत्वं
कल्पयामः किंतुयौनमेवास्यतात्विकत्वमितिचोदयतिननुमृदादीतिपरिहरतिनो अनृतइतिमृदादिदृष्टांतेनहिकथंचित्परिणाम
दर्शयोनतथाक्वचनेतुमपिमृत्तिकेत्येवसत्यमितिकारणमात्रसत्यत्वावधारणेनकार्यस्यानृतत्वप्रतिपादनात्। साक्षात्कूट
स्थनित्यत्वंसत्यतियादिकासुसंतिसहस्रंश्रुतयइति। नपरिणामधर्मत्वाद्ब्रह्मणः अथकूटस्थस्यापिपरिणामःकस्मान्नभवतीत्यतआ
ह नस्यकस्येति शंकतेस्थितिगतिवदिति यथैकस्याणस्थितिगतिवदिति एवमेकस्मिन्ब्रह्मणिपरिणामश्चतदभावश्चकौटस्थ्यंभविष्यत
इतिनिराकरोतिनकूटस्थस्येतिविशेषणादितिकूटस्थनित्यताहिसदातनीयश्च स्वभावोत्पत्तिःसाकथंप्रसुत्वनविरुध्यते। नचध
र्मिणोव्यतिरिक्तस्तधर्मोयेननदृशनाधायिपिधर्मीकिरस्थःस्थानभेदएकांतिकेगचात्स्वबहुभावाभावात्। बाणस्यत्वपरिणामिन
स्थितागत्याचपरिणामंतइति। अपिचस्वाध्यायाध्ययनविधानाद्भिन्नार्थवत्त्वस्यावेदराशेरेकेणापिवर्णेनानर्थकेनभवितव्यं। किंपुनर

वाच॰ २ यताजगतो ब्रह्मयोनित्वमितिप्रकेन शास्त्रसंदर्भेण तत्रफलवत्प्रत्यणः तत्रज्ञानसमानविषयसंनिधानफलं जगन्मोक्षितं समाम्नायमा
१० नंतदर्थंनदुपायनयाऽवतिष्ठतेनार्थांतरार्थमित्याह नन्वयथात्वलक्षणइति अतोनपरिणामंपरत्वमस्येत्यर्थः। तदनन्यत्वंमित्यस्यसूत्रस्यप्रति
ज्ञाविरोधंश्रुतिविरोधंचवोदयति। कूटस्थब्रह्मवादिनइतिपरिहरति नाविद्यात्मकइति नामंचरूपंचतेएवबीजंतस्यव्याकरणंकार्यप्रपंचः
तदपेक्षत्वादैश्वर्यस्य एतदुक्तंभवति तात्त्विकमैश्वर्यंसार्वज्ञंचब्रह्मणः किंतुविद्योपाधिकमिति। तदाश्रयंप्रतिज्ञासूत्रं तदाश्रयंतु
तदनन्यत्वंतेनविरोधः स्यादमनस्तत्। भवेचोपलब्धेः कारणस्यभावः सत्ताचोपलंभश्चतस्मिन्नुपलब्धेःभावात्। एतदुक्तं
भवति। विषयपरंविषयविषयिपरंविकयिपरंसर्पविषविषयीपरंतेनकारणोपलंभभावयोरुभयोरपोपलंभभावादितिसूत्रार्थः संपद्यतेत
थाचतत्रभारूपानुविद्धबुद्धिबोध्येनवास्तवेनव्यभिचारोनापिवह्निभावाभावानुविधायिभावाभावेधूमभावेनेतिसिद्धंभवति। तत्रय
योक्तंतुनसहेतौ दिकदेशाभिधानेनोपक्रमतेभाष्यकारइतश्चकारणादनन्यत्वंभेदाभावः कार्यस्यतत्कारणंयस्मात्कारणभावएव
एवकारणस्येति अस्यव्यतिरेकमुखेनगमकत्वंमहानवनियमेनेति काकतालीयन्यायेनान्यभावेप्यन्यदुपलभ्यतेनतुनियमेनेत्य
र्थः हेतुविशेषणायव्यभिचारंचोदयतिनत्वन्यभावेपीति। एकदेशिमतेनपरिहरतिनेत्युच्यतइति शंकयैकदेशिपरिहारंदूषयित्वा
परमार्थपरिहारमाह। अथेतितदनेनहेतुविशेषणमुक्तंभवतिरेणदृष्टमेवसूत्रंव्याचष्टेनकेवलंशब्दादेवेतिपश्यति हिमवत्सबुध्यानं
तवउवतानवितानवत्स्थालंभंतेनतुतदतिरिक्तः पटःप्रत्यक्षमुपलभ्यतेएकत्वंतुततोनामेकमावरणलक्षणार्थक्रियाविच्छेदात्बहू
नामपियथैकदेशकालावच्छिन्नावरणादिरूपलाशारयोबहवोपिवनमितिअर्थक्रियांचप्रत्येकमसमर्थाअप्यन्योन्यमेवार्थांतरं किंचिन्मिलिताः
कुर्वंतोदृश्यंतेयथाग्रावाणउखाधारणमेकमेवनारभ्यैवार्थांतरंतंतवोमीलिताःप्रावरणमेकंकरिष्यंति नचसमवायाद्भिन्नयोरपिभेदा
नवभासइतिसांप्रतं। अन्योन्याश्रयत्वात्। भेदेसिद्धेसमवायःसमवायाच्चभेदः नभेदसाधनांतरमस्ति अर्थक्रियाव्यपदेशभेदयोरभेद
प्युपपत्तेरित्युक्तमिति तस्मात्किंचिदेतत् अनयाचदिशामृत्कारणंब्रह्मैवपरमार्थसत् अर्थांतरकारणानितत्त्वांतराणि सर्वअनिर्वाच्याएवेत्याह
१०

तथापितंतुरितिसत्वाच्चावरस्य विभज्यतेइतश्चेति नकेवलंश्रुतिरूपपत्तिश्चात्रभवतियत्तयदात्मनेति नहितैलंसिकतायामस्तियथाप्ययं
सिद्धेदिग्दात्मनाप्युपपन्नोयथेष्टदात्मनोपलभ्यते नैवंप्रत्युतभंतैलंसिकतात्मनातेनयथासिकतायास्तैलंनजायतएवमात्मनापिजगन्न
जायते नस्मादात्मनासिद्धिरितिगम्यते। उपपत्त्यंतरमाह यथाचकारणंभवतीतियथाहिघटः सर्वदासर्वत्रघटएवनजात्वसौकदाचित्क्वचित्साधोभवति।एवं
सदपिसर्वत्रसर्वदासदेवनतुक्वचित्कदाचिदसन्भवितुमर्हतीत्युपपत्तिमपलापात्। तस्मात्कार्यंत्रिष्वपिकालेषुसदेव। सत्त्वेनेति मनोपयेदित्य
तआह। एकंचपुनरिति सत्त्वमेकंकार्यकारणयोः नहिप्रतिव्यक्तिसत्त्वंभिद्यते। तत्रश्चाभिन्नसत्त्वादनन्यत्वात् अपिमिथोनभिद्यतेइति नचताभ्यामनन्य
त्वात्सत्त्वस्यैकोभेदइत्युक्तं। तथासतींहिसत्त्वस्यसमारोपितत्वप्रसंगः तत्रभेदाभेदयोरस्तनसमारोपकल्पनायांकिंतात्त्विकभेदोपादानाभेदकल्प
नान्याहोतात्त्विकंभेदोपादानभेदकल्पनेति वयंतुपश्यामः भेदग्रहस्यप्रतियोगिग्रहापेक्षत्वात्भेदग्रहमंतरेणचप्रतियोगिग्रहासंभवात् अन्यो
न्याश्रयापत्तेः अभेदग्रहस्यचनिरपेक्षत्वात्तदनुपपत्तेः एकाकाश्रयत्वाद्भेदस्यएकाभावेतदनुपपत्तिः अभेदग्रहपारानैवभेदकल्पनेतिसर्वमव
दातं। असद्व्यपदेशान्नेति चेन्नधर्मांतरेणवाक्यशेषात्। व्याकृतत्वाव्याकृतत्वेचधर्मौचनिर्वचनीयौ। सूत्रमेतत्निगदव्याख्यातेनभाष्येणव्या
ख्यातंयुक्तेःशब्दांतरएव। अतिशयवत्वाद्याग्वृत्त्यायाद्रति। अतिशयोहिधर्मोनासत्त्वतिशयवतिकार्यंभवितुमर्हतीति। ननुनकार्यस्यातिश
योनियमहेतुरितिपितुकारणस्यशक्तिभेदाः सचासत्यपिकार्येकारणस्यसत्त्वात्तनेवेत्यतआह शक्तिश्चेतिनान्याकार्यकारणाभ्यांनाप्यसतीका
र्यान्नेतियोजना अपिचकार्यकारणयोरितियपरिभावाच्चोपलब्धेरित्यर्थः। उक्तस्यापिसमवायदूषणस्यपुनावतारितः अनभ्यु
पगम्यमानेचसमवायस्यसमवायिभ्यांसंबंधविच्छेदप्रसंगोवायवाक्यविद्रवगुणादीनामिथःनस्यसंबंधः समवायेभ्योसमवायिनोसम
वायादितिशंकते। अथसमवायः स्वयमिति। यथाहिसत्त्वयोगात्द्रव्यकर्मगुणाः संतःसत्त्वंतुस्वभावतएवसदितिनसत्त्वांतरयोगमपेक्ष
तेतथासमवायःसमवायिभ्यांसंबंधनसंबंधांतरमपेक्षतेस्वयंसंबंधरूपत्वादिति तदेतस्मिन्नंतरविरोधापादनेननिराकरोतिसंयोगेपि

नहीति न संयोगस्य कार्यत्वात्कार्यस्य च समवायिकारणाधीनजन्मत्वादसमवायित्वादनुपपत्तेः समवायकल्पना संयोग इति वाच्यं अजसंयो
गेतरवाप्रसंगात्। अपि च संबंधभी न निरूपणः समवायो यथा संबंधिद्वयभेदेन भिद्यते न तन्नाशेन च नश्यति अपि तु नित्य एकश्च एवं च संयोगोपि भवेत्। ततः कोदोषः अयुतसंमभिया संयोगवत्समवायोपि प्रतिसंबंधिमिथुनं भिद्यते चानित्यश्चेति अभ्युपेयते। तथा सति
सयथैकस्माभिन्निमित्तकारणादेव जायत एवं संयोगोपि निमित्तकारणादेव जायते एवं संयोगोपि निमित्तकारणादेव अनिष्पन्न इति समानं तादात्म्य
प्रतीतेश्चेतिसंबंधावगमोहि संबंधकल्पना बीजं न तादात्म्यावगमः तस्य नानात्वैकाश्रयसंबंधविरोधादिति इति विकल्पेनावयवातिरिक्तमव
यविनं दूषयति कथं च कार्यमिति समस्तेति मध्यपरभागयोरवरभागव्यवहितत्वात्। अथ समस्तावयवव्यासंगीय किंतु प्रत्यवयवस्थानोप
हीत्यत आह नहि बहुत्वमिति। अथावयवश इति बहुत्वसंख्यावहिरूपेणैव व्यासज्य संख्येयेषु वर्तते इत्येकतमसंख्येयग्रहणेपि नगृह्य
ते समस्तव्यासंगिता तद्रूपस्य अवयवी तु न रूपेणावयवान् आप्नोति अपि त्ववयवशस्तेन यथा सत्यमवयवे कुसुमानि व्याप्नुवन् समस्तकुसुम
ग्रहणमपेक्षते कति पय कुसुमस्थानस्यापि तस्योपलब्धेः एवमवयव्यपीति भावः निराकरोति तदपि निशंकते गोत्वादिवदिति निराकरोति
नेतिय यपि नस्योपलब्धेः गोत्वस्य सामान्यस्य विशेषा अनिर्वाच्यानपरमार्थसंतः तथा च कात्स्न्येन कथं प्रति समाप्तिरिति वाच्यं प्रत्ये
कमुदितमिति मंतव्यं अकर्तृकाय गोनिरात्मिकास्यात्। कारणाभावेहि कार्यमनुत्पन्नं किंमाप भवेत्। अतो निरात्मकत्वमित्यर्थः यद्युच्ये
तां च सिध्यत्वेन कर्तृत्वमस्तीति उपपद्यते भेदोपि वर्तीति प्रयोग इत्यत आह। घटस्य चोत्पत्तिरुच्यमानेति। उत्पादनाहि सिद्धानां कपा
लकुलालादीनां व्यापारोनोत्पत्तिः नहि घोलादीनैवोत्पत्तिः प्रयोज्यप्रयोजकव्यापारयोर्भेदात्। अभेदे वा घटमुत्पादयतीति वद्घटमुत्पद्यत
इत्यन इत्यपि प्रसंगात्। ×११ तथ घटशब्दस्यावयवेषु व्यापारावच्छिन्नतया कुसुम्भकभावमापन्नेषु घटोत्पादनाभिमुखेषु तादर्थ्यनिमित्तादुपचाराल्य
युज्यते ११ तस्मात्करोतिकारयतो विघटगोचरयोः घटस्थामिस्य भवतयोः रूत्पादनयोरभिधानाभेदो भ्युपेतव्यः तत्र कपालकुलालादी

नां सिद्धानां उत्पादनाधिष्ठितानां नेत्यधिष्ठानत्वमस्तीति विशेष्यात्तद्घटेव साध्यउत्पत्तेरधिष्ठानमेष्टव्यम्। न चासावसदधिष्ठानं भवि
तुमर्हतीति सत्त्वमस्याभ्युपेयम् एवं च घटोत्पद्यतेतीति घटस्य व्यापारस्य भावतुपरत्वादत आस्य कर्तृत्वमुपपद्यते तंडुलानामिव सतां विक्लित्तौ विक्लिद्य
ति तंडुला इति शंकते अथ स्वकारणसत्तासंबंध एवोत्पत्तिरिति पूतदुक्तं भवति नोत्पत्तिर्नाम कश्चिद्व्यापारो येनासिद्धस्य कथमत्र कर्तृत्वमि
त्यनुयुज्यते। किंतु स्वकारणसमवायस्वसत्तासमवायोवासत्तासत्तोपविरुद्ध इति सोप्यसतोपि तु पपन्न इत्यत आह कथमलब्धात्मक इति। अ
पि च प्रागुत्पत्तेरसत्त्वं कार्यस्येति कार्याभावस्य भावेन मर्यादीकरणमनुपपन्नमित्याह कथमलब्धात्मक इति अपि च प्रागुत्पत्तेरसत्त्वं कार्यस्येति का
र्याभावस्य भावेन मर्यादीकरणमनुपपन्नमित्याह अथावस्येत्यादि तत् अत्यंताभावस्य संबंधासुतस्य भाव्यमर्यादानुपाख्योपि स्यद्घटः प्राग
भावस्य तु भविष्यता घटेनोपाख्येयस्यास्तीति मर्यादेत्यत आह। यदि वंध्यापुत्रः कारकव्यापारादीति उक्तमेतदध्यस्त्यालयानञा तु घटः प
दात्मवतिरएवमसदपि सत्प्रभवतीति तस्मात् सिद्धं घटस्यास्यत्वेन नासत्त्वमस्ति मेवेति अत्रासत्कार्यवादिवोदयतीनत्वेवं सतीति प्राक् नमि
द्धमपि कार्यं कदाचित्कारणेन योजयितुं व्यापारोर्थवान् भवेदित्यत आह। तदनन्यत्वाच्चेति। परिहरति नैष दोषः घटदिति। उक्तमेतद्यथा तु
अंगतत्त्वं नराः ऊर्मिपेनबुद्बुदवहित कालनिकर्मेदः। एवं वस्तुतः कार्यतत्त्वं न कारणान्निद्यते कारणस्वरूपमेव हि तत् अनिर्वाच्यं तु कार्य
रूपं मिथ्यामिथ्यानि च निर्वचावभासत इति वादिना मुक्तं सत्यत्वमिति वस्तुतः कार्यं कालं कारणं वा नियते कारणपरमार्थतो सत्त्वं न विशे
षदर्शन मात्रात्स्वविसां व्यावहारिकं तु कथंचिनत्वात्सत्वे भवतीयेत्यर्थः। अनयैव शोपसंदर्शयोज्यः। असत्कार्यवादिनं प्रति दूषणांतरमाह।
यस्य पुनरिति कार्यस्य कारणान्ने रेसविषयत्वं कारकव्यापारस्य स्यात्प्रास्य इत्यर्थः। मूलकारणं ब्रह्मशब्दो नराश्चेति सत्तावयवमव्यतार्थ
माचष्टे एवं युक्तेः कार्यस्येति अतिरोहितार्थमितिरत्यघटत्व। यथा च प्राणादीतिच सूत्रेतिगदव्याख्यानेन भाष्येण व्याख्याते ॥ इतरव्यप
देशाधिकारणादेदोषप्रसक्तिः। यद्यपि शारीरात्परमात्मनोभेदमाहुः श्रुतयः तथाप्यभेदमपि दर्शयंति श्रुतयो वस्तुः। न च भे

वाच०२ दाभेदावेकत्रसमवेतौविरोधात्। नचभेदस्त्राीक्रस्तुकंतस्मात्परमात्मनः सर्वज्ञाभ्रशरीरस्त्वतोभिद्यंते सप्रपंचविशेषधानभेदात्परस्रदक
१२ कायाकाशानुच्छेदेनभृथ्वलेउपहितंवास्मरूपंशरीरःतेनमानामजीवाःपरमात्मनात्मनोनुवत्सरमात्मानुनानात्मनोनिश्रामनुभवति। अन
तुभवेसर्वज्ञत्वंमाधानःतथाचायंजीवान्वभनात्मानमेवमभीपात्। नचेदमुक्तंनहिकश्चिदपरतंत्रोवंधनागारमात्मनःकृत्वानुप्रवि
शतीत्यादि तस्मान्नचेतनकारणंजगदितिपूर्वपक्षः। अधिकंतुभेदनिर्देशात्सत्यमयंपरमात्मासार्वज्ञादिधर्माजीवास्तुतआत्मनो
भिन्नान्पश्यतिपश्यत्वेनभावनदृष्टोसुखदुःखादिवेदनामसंयोगोस्ति। अविद्यावशात्तेषांतदभिमानइतितथाचतेषांसुखदुःखादि
वेदनांधानमप्यहंउदासीनइतिनतेषांवंधनागारनिर्वेशःपश्यतिश्रुतिःकाचिन्मेतिनहिताकरणदिदोषापत्तिरितिसिद्धांतः। तदिदमुक्तं
अपिचयदानमस्तीत्यपिचेतिवःपूर्वस्मिनिसाहित्यंयोतयतिनोपपद्यंतरतांस्यादेवतायदिब्रह्मविवर्तोजगदहंतसर्वस्यैवजीवत्
वेनत्पप्रसंगइतिअतआह। अस्मादिवच्चतदनुपपत्तेः। अतिरोहितार्थंनभाष्येणआख्यातं॥ ६२ उपसंहारदर्शनान्नेतिचेन्नक्षीरव
द्धि। ब्रह्मत्वेतिकमद्वितीयतयापरानपेक्षंक्रमेणोत्साद्यमानस्यजगतोविविधविचित्ररूपस्योपादानमुपेयते। तदनुपपन्नंह्येकरूपात्का
रणात्कार्यभेदोभवितुमर्हतितस्याकस्मिकत्वप्रसंगात्। कारणभेदोहिकार्यभेदहेतुःक्षीरबीजादिभेदाद्दध्यंकुरादिकार्यभेददर्शना
त्। नचाक्रमात्कार्यक्रमोयुज्यतेसमर्थस्यक्षेपायोगात्। अद्वितीयतयाचक्रमवत्सहकारिसमधानानुपपत्तेः। तदिदमुक्तमिहलोकइति।
एकेकस्यदात्रिकाडकंतेपितुसामग्र्यंसाधनंतथाहिकार्यंभवतीति। तस्मान्नाद्वितीयंब्रह्मजगदुपादानमितिप्राप्तउच्यते। क्षीरवद्धि इदंता
वद्भवानपृष्टोव्याचष्टां किंतात्त्विकमस्यरूपमपेक्ष्येदमुच्यतेउतानादीनामरूपबीजसहितंकाल्पनिकंसार्वज्ञंसर्वशक्तित्वं तत्रपूर्वस्मि
न्कल्पेकिंनामततोद्वितीयादसहायादुपजायतेनहितस्यशुद्धबुद्धमुक्तस्वभावस्यवस्तुसत्कार्यमस्ति। तथाचश्रुतिःनतस्यकार्यंकरणं
चविद्यतइति उत्तरस्मिंस्तुकल्पेयदिक्रमादिवत्त्वंतर्हितिरिक्तसहकारिकारणाभावात्। अनुपदानत्वंसाध्यतेततःक्षीरादिभिर्व्यभिचार
१२

डाक्टर भाऊ दाजी स्मारक ... DR. BHAU DAJI MEMORIAL

स्तोपिहिवास्यंविरंचनादिकारणानपेक्षएवकालपरिवासवशेनसतएवपरिणामांतरमासादयंति। अर्थांतरकारणानपेक्षत्वंहेतुःक्रियते। तद
सिद्धं। अनिर्वाच्यनामरूपबीजसहायत्वात्। तथाचश्रुतिः। मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरइति कार्यक्रमेणतत्परिपाकोपिक्रमवानु
नेयः। एकस्मादपिचविचित्रशक्तेःकारणादनेककार्योत्सादोदृश्यते यथैकस्मादग्नेर्दाहपाकौ। एकस्माद्वाकर्मणःसंयोगविभागसंस्कारास्य
हितुचेतनत्वेसतीतिविशेषणाच्चक्षीरादिर्व्यभिचारदृष्टान्तःहिकुलालादयोवास्तवदोषोपक्षेनतंत्रचत्वेति। तत्रेदमुपनिषद्भेदवादिवदपिलोके
तामतेनेतिलोकःशब्दस्यतस्मिन्कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवानतुभ्रश्यणस्ततःपरिणामेपिनकात्स्न्यंभावविकल्पेनक्षिप्तेन॥
अविद्याकल्पितेनतुनामरूपभेदेनभावलक्षणेनरूपात्मनातत्त्वान्याभ्यामनिर्वचनीयेनपरिणामादिव्यवहारास्पदत्वंब्रह्मप्रतिपद्यते। नचक
ल्पितरूपंवस्तुस्पृशति नहिदृश्यतीनेनिरीक्ष्यद्वित्वकल्पनाचंद्रमसोद्वित्वमावहति। तदनुपपत्त्यावाचंद्रमसोनुपपत्तिः। तस्मादवास्तवि
परिणामकल्पनानुपपद्यमानापिनपरमार्थसतोब्रह्मणोनुपपत्तिमावहति। तस्मात्सर्वपक्षाभावात्अनारभ्यमिदमधिकरणमित्यत
आहचेतनमेकमिति। यद्यपिश्रुतिशास्त्रादेकांतिकाद्वैतप्रतिपादनपरात्सपरिणामोवास्तवोनिषिद्धः। तथापिक्षीरादिदेवतादृष्टांते
नतुनत्सद्भावस्तत्वत्वप्रसंगः सर्वपक्षोपपत्तोपपाद्यसर्वथायंपक्षोनघटइत्युत्क्तनदयपवाधश्रुतेस्तुशब्दमूलत्वात्। आत्मनि
चैवंविचित्राश्चहीतितिसूत्राभ्यांविवर्तइतिदृढीकरणेनएकांतिकाद्वयलक्षणश्रुत्यर्थःपरिशोध्यतइत्यर्थः। तस्माद्दस्यविकृतंब्रह्मत
त्वतःनतुश्रद्धेनापीतिचोपनंविद्याकल्पितत्वोद्घाटनाय नहिनिरवयवत्वसावयवत्वाभ्यांविधांतरमस्तिएकनिषेधस्येतरविधिनां
तरीयकत्वात्। तेनप्रकारांतराभावात्निरवयवत्वसावयवत्वयोश्चप्रकारयोरनुपपत्तेः। यत्रस्तुतनार्थवाचोवदत्प्रमाणंशब्दःस्यादि
तिचोद्यार्थःपरिहारस्तुस्फुगमः आत्मनिचैवंविचित्राश्चहिअनेनस्फुटितोमायावादिःस्वप्नदृगात्माहिमनसैवस्वरूपानुपमर्दनर
थादिसृजति। स्वप्रसंगाच्च चोदयतितनुनैवंविविधपरिहृतिनैवंजातीयकेविषयेपिसमुदायःसावयवःतथापिन्नत्वेकृतसादयो

बाच॰ निरवयवाः नस्यक्तिसंभवः सत्रमात्रं परिणमेत्। नरजस्तमिति सर्वेषां संभवपरिणामाभ्युपगमात्प्रसेकं वानवयवानां कृत्स्नपरिणामेन लो

९२ च्छेदप्रसंगः एकदेशपरिणामित्वात्तावयवत्वमनिष्टं प्रसज्येत तथाणुवादिनोपीति वैशेषिकाणां हि अणुभ्यां संयुज्य द्व्यणुकमेकमारभ्यते तेनैव

निद्व्यणुकमेकमारभ्यते इति प्रक्रिया तत्र द्वयोरण्वोरवयवयोः संयोगस्तावण्वन्युपारभ्याणुत्वात्तत्र न वर्तते। नस्यक्तिसंभवः सएव त

दानीं तत्र वर्तेत वर्तते चेति। तथाचोपर्यधः पार्श्वस्थः षडपि परिमाणवः समानदेशत्वादतिप्रथिमानुपपत्तेरणुमात्रः पिंडः प्रसज्येत। अथा

पनेकावयवः परमाणुः स्यादिति नवयवत्वमाकोपः आशक्यं वसावयवत्वमुपेतुं तथात्वे सत्यनंतावयवत्वेन सुमेरुराजसर्षपयोः समान

परिमाणत्वप्रसंगात्। तस्मात्समानो दोषः आपातमात्रेण साम्यमुक्तं परमार्थेन तु मायादिकं परिणामं वा कार्यकारणभावं दृष्ट्वतामेव दुर्वारो

दोषः न पुनरस्माकं मायावादिनामित्याह परिहारिविविधिविचित्रशक्तित्वमुक्तं ब्रह्मणः तत्र श्रुत्युपन्यासपरं सूत्रं सर्वपि तावत्तं दृष्टस्माकं माया

वादिनामित्याह पदि नात् एनदाक्षेपसमाधानपरं सत्रं विकरणत्वान्नेति चेत्तदुक्तं। कुलालादिभ्यस्तावद्बाह्यकरणापेक्षेभ्यो देवा

दीनां बाह्यनपेक्षाणां आंतरकरणापेक्षसृष्टीनां प्रभावेन दृष्टो यथा विशेषो नापह्नोतुं शक्यः यथा तु जायत्स्वप्नं बाह्यकरणापेक्षात्वास्त

दनपेक्षांतरकारणमात्रसाध्यदृष्टात्मरथादिसृष्टिदर्शनात्पक्कोतुं स्वकर्मवशिकेः परस्मादेवतस्या आंतरकारणानपेक्षया जगत्स

र्जनं श्रूयमाणं तत्मात्मतो दृष्टमात्रेणापध्वमर्हतीति ६ ३० नप्रयोजनवत्त्वात् न तावदुन्मत्तवदसमीक्षितप्रवृत्त्या जग

त्सृष्टिक्रियाभ्यां तस्य सर्वज्ञत्वानुपपत्तेः। तस्मात्प्रेक्षापूर्वकेणैव जगत्कर्तृत्वं प्रेक्षावतश्च प्रवृत्तिः स्वपरहिताहितप्राप्तिपरिहारप्रयोज

नासतीति प्रयोजनानामाप्त्यानामपि संभवति किंतु पुनरपरिमेयानेकविध्यानेकप्रपंचजगद्धितविविधवैचित्र्यनामरूपमयसाक्षात्

नलीलापि परात्मा। अस्त्वाप्तयाससाध्यादिसमानविषयमन्यप्रयोजनात्तस्य अपि सुखमयोजनं नस्यान्नापि स्वप्रयोजनत्वाता

दृष्टैन वाप्रवृत्तीतद्भावे कृतार्थत्वानुपपत्तेः परेषां वा पाकार्याणां अभावेन दुष्कारायापि प्रवृत्त्ययोगात् एवं प्राप्तेऽभिधीयते। ९३

लोकवत्तु लीलाकैवल्यं वैरतदेवं परिप्रेक्षावप्रवृत्तिः प्रयोजनवत्तायाप्तवाभवेत न स्यात्तिन्नौनिवर्तनं तु तु प्राप्यमिव दृश्यतात्मा

नत्वेन तदस्तिप्रेक्षावतामननुसंहितप्रयोजनानामपि वादहृद्यिकं पुत्रक्रियास्त्रप्रवृत्तिदर्शनात्। अन्यथा न कुर्वीत तथा चेदामिति

धर्मसत्रकृतां प्रतिषेधो निर्विषयः प्रसज्येत न चोन्मत्तानां प्रत्येतत्स्त्रं अनर्थकं तत्। तेषां तत्त्वार्थबोधतदनुष्ठानानुपपत्तेः अपि वादहेतु

कौतुककौशलसलक्षणप्रेक्षावता क्रियाप्रयोजनानुसंधानमंतरेण दृष्टा न चास्यां चेतनस्यापि चेतनमनुपयोगित्वं प्रसादपिभा

वादिति युक्तं प्राणस्यापि चेतनस्य पुनः प्रत्यक्षशरीरे भ्वासप्रश्वासप्रवृत्तिप्रसंगात् यथा चस्वार्थपरार्थसंपदासादितसमस्तका

मानां कृतकृत्यतया नामनसामकामानामेव लीलायास्त्वस्य पन्निष्पादितिप्रयोजनेन तद्देशेन प्रवृत्तिरेवं ब्रह्मणोऽपि जगत्सर्जने।

प्रवृत्तिर्नानुपपन्नाऽदृष्टं च यरत्वबलवीर्यबुद्धिनामशक्यमतिदुष्करं वा तदन्यो भवनत्वबलवीर्यबुद्धीनां शक्यमिक्षिकरं वा

हि राजनरेन्द्रादितिप्रवृत्तिर्निगर्न बध्नन्निरुद्धिरगाधो महासत्त्वानां च वैपरार्थेन शिल्पिमुखैः न चापं नंगितः संक्षिप्य चुलुकेन हेलयैव

कलशयोनिनामहामुनिनाचाचापि तद्दृश्यं तल्लीलायाप्रविनिर्मितानि महाप्रासादप्रभृतयनाश्रीनंन्यानतेन्द्रपानन्येषां मन

सापि दुष्कराणां नरेश्वराणां तस्मादुपपन्नं यदृच्छया वा स्वभावाद्वा लीलया वा जगत्सर्जनं भगवतो महेश्वरस्यासीत्। अपि च नेयं पार

मार्थिकी सृष्टिः येनानुयुज्येत प्रयोजनं अपि त्वनाद्यविद्यानिबंधनाविद्या च स्वभावत एव कार्योन्मुखी न प्रयोजनमपेक्षते न हि

वंशालातचक्रगंधर्वनगरादिविभ्रमायः। समुद्दिश्य प्रयोजनानां भवंति न च नत्कार्या विस्मयभयकंपादयश्चोल्लतौ प्रयोजनमपेक्षंते

सा च चेतन्यस्फुरिता जगदुत्पादहेतुरिति चेतनो जगद्योनिरास्थायते इत्यादि। न चेयं परमार्थविषयेति अपि तु न च जगत्कारणमपि

न तया विक्षस्तागमोऽपितु जगतोऽभ्यात्ममाविंतपास्पष्टे विनस्यान्तदाश्रयोदोषो निर्निर्विकल्प एवेत्साशयेना हृत्ब्रह्मण

भावेति ९० ९१ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति अतिराहित्यात्प्रकृतिपक्षः उपरत्स्त्रुव्यते उच्चावचं मध्य

मकरवदुःखभेदवत्प्राणभृत्प्रपंचसुखदुःखकारणं सुधाविषादिवानेकविधं विरचयतः प्राणभृद्भेदोपात्तपापपुण्यकर्माशयापेक्षसहाय
स्याप्यभवतः परमेश्वरस्य न वैषम्यनैर्घृण्ये प्रसज्येते नहि सभ्यः सभायां युक्तवादिनं युक्तं वाद्यसीति वायुक्तवादिनन युक्तवादमयुक्तवा
द्यसीति वक्तव्यः सभापतिर्वा युक्तवादिनमनुगृह्णन् अयुक्तवादिनं च निगृह्णन् रक्तो द्विष्टो वा अपि तु मध्यस्थ इति वीतरागद्वेष
इति आख्यायते तद्वदीश्वरः पुण्यकर्माणमनुगृह्णन् अपुण्यकर्माणं च निगृह्णन् मध्यस्थ एव नाम ध्यस्थः स्याद्यत्कल्याणकारिणं
मनुगृह्णीयादकल्याणकारिणं च निगृह्णीयात् अलं तेन तदस्ति तस्माद्वैषम्यदोषः अत एव न नैर्घृण्यमपि संहरतः समस्तान्प्राणभृतः
स हि प्राणभृत्कर्माशयानां वृत्तिनिरोधसमयः तमतिलंघयन् यमयुक्तकारी स्यात्। न च कर्मापेक्षायामीश्वरस्यैश्वर्यव्या
घातः नहि सेवादिकर्मभेदापेक्षः फलभेदप्रदः प्रभुः अप्रभुर्भवति न चैष एव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनी
षते एष उ एवासाधुकर्म कारयति तं यमधो निनीषते इति श्रुतेरीश्वर एव द्वेषपक्षपाताभ्यां साध्वसाधुनि कर्माणि कारयित्वा स्वर्गं न
रकं वा लोकं नयतीति तस्माद्वैषम्यदोषप्रसंगः ईश्वरः कारणमिति वाक्यं विरोधात्। तस्मात्कर्म कारयित्वेश्वरः प्राणिनः सृजती
ति श्रुतेरभ्युपगन्तव्यं तस्मान्न सृजतीति विरुद्धमभिधीयते न च वैषम्यमात्रमत्र ब्रूमो नत्वीश्वरकारणत्वव्यासेधामइति वक्तव्यं किमतो
यद्येवं तस्मादीश्वरस्य सवासनक्लेशापरामृष्टमभिवदन्तीनामभ्यर्थीनां श्रुतीनामनुग्रहाय निषेधो अधोनिर्धेन रइसेतदपि न ज्ञा
तीपूर्वकर्माभ्यासवशात्प्राणिनां इत्येवं नयं यथाहुर्जन्मजन्मदभ्यस्तं दानमध्ययनं तपः तेनैवाभ्यासयोगेन तच्चैवाभ्यसते पुनरिति।
अभ्युपेत्य च सर्गस्यादिमत्त्वमिदमुक्तं अनिर्वाच्यतु संसार इति न सम्यक् नर्थ्यमत्र पित्तथा च। मायाकारस्येवांगुलाकल्पेवैकस्य भेदेन
विचित्राण्याणिनोदर्शयति न वैषम्यदोषः संहरतो संहरतो वा नैर्घृण्यं एवमस्यापि भगवतो विविधविचित्रप्रपंचमनिर्वाच्यं विश्वं दर्शयतः
संहरतश्च स्वभावादालीकयावान कश्चिद्दोषः इति स्थितेशंकापरिहारपरं सूत्रं न कर्माविभागादिति चेन्नानादित्वात्॥ ॥ ॥

शंकोत्तरे तिरोहितार्थे भाष्यग्रंथेन व्याख्याते। अनादित्वादिति सिद्धवदुक्तं तत्साधनार्थं सूत्रं। उपपद्यते चाप्युपलभ्यते च। अकृते
कर्मणि पुण्यापेक्षने विशेषश्च मिथ्याप्रत्ययो मोहापरनामा पुण्यापुण्यप्रवृत्तिहेतुभूतरागद्वेषनिदानानां सर्वसहरागादिभिश्च कार्यं नश
रीरं सुखदुःखभोगायतनमंतरेण संभवंति। न च कर्मांतरेण शरीरं न च रागद्वेषावंतरेण कर्म न च भोगरहितं मोहमंतरेण रागद्वेषा
न च पूर्वशरीरमंतरेण मोहादिरिति पूर्वपूर्वशरीरापेक्षो मोहादिरेवं पूर्वपूर्वमोहापेक्षं पूर्वशरीरमित्यनादित्वेनाप्रभवतीति वि
गमनाकुलयति। तदेतदाह रागादिक्लेशवासनाक्षिप्तकर्मापेक्षात्त्वविद्यावैषम्यकरी स्यादिति रागद्वेषमोहा रागादयः। तद्वत्पुरुषं संसा
रदुःखमनुभावयंत इति क्लेशाः तेषां वासनाः कर्मप्रवृत्त्यनुगुणाः ताभिराक्षिप्तानि प्रवृत्तानि कर्माणि तदपेक्षात्त्व प्रपंचविद्या
देतत्कृत्वा विषया अपि व्यपदेशो दृष्टो यथा पुरोडाशकपालेन तुषानुपवपतीत्यादौ न चावधारयिष्यतीत्यत आह। तदेवमनादित्वे सि
द्धे सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति प्राक्सृष्टेर्विभागावधारणं समुदाचरद्रूपरागादिनिषेधपरं न पुनरेतदभ्युपगमप
राकरोति। इति सर्वमवदातं सर्वधर्मोपपत्तेश्च। अत्र सर्वज्ञमिति द्रष्टव्यं तेसर्वसिद्धे तदनाधिष्ठितस्य तु लोके न दृष्टिरिति लोकानुसा
रेरदर्शिनः सर्वशक्तीति सर्वस्य जगत उपादानकारणं निमित्तकारणं चेत्युपपादितं। महामायमिति। सर्वानुपपत्तिशंकापराकरणात्मा
जगत्कारणं ब्रह्मेति सिद्धं॥ ॥ इति श्री वाचस्पतिमिश्रविरचिते भगवत्पादशारीरकभाष्यविभागे भामत्यां द्वितीयस्याध्यायस्य
प्रथमः पादः॥ १॥ ॥ रचनानुपपत्तेश्च नानुमानं॥ स्यादेतत्। इह हि प्रदेशेषु तं भावेदानपेक्षाः प्रधानादिसिद्धविषयाः सांख्या
दियुक्तयो निराकरिष्यंते तदयुक्तं मशास्त्रांगत्वात्। नहि दं शास्त्रमुत्संरवलं तर्कशास्त्रवत्प्रवृत्तमपि तु वेदांतवाक्यानि ब्रह्मपराणीति
पूर्वपक्षोत्तरपक्षाभ्यां विनिश्चेतुः तत्र कः प्रसंगः युक्तर्कबत्वयं प्रयुक्तिनिराकरणस्येत्यत आह यद्यपीदं वेदांतवाक्यानां
मिति। नहि वेदांतवेदांतवाक्यानीति वर्णयितेविंतु मोक्षसमाणनात्तत्त्वज्ञानोपादानाय यथा च वेदांतवाक्येभ्यो जगदुपादानं ब्रह्म गम्यते एवं

वाच॰ सांख्यस्यनुमानेभ्यः प्रधानादचेतनंजगदुपादानमवगम्यते। नचतदेवचेतनोपादानमचेतनोपादानंचेतिसमुच्चेतियाक्यंविरोधात्। नचव्यवस्थि
१५ तेवस्तुनिविकल्पोयुज्यते। नचागमबाधितविषयतयाऽनुमानमेवनोदीयेतइतिसांप्रतंसर्वज्ञप्रणीततयासांख्यागमस्यवेदागम
तुल्यत्वात्। नचाऽपितस्यानुमानस्यप्रवृत्तिसिंहतुल्यतयाबाध्यत्वात्। तस्मात्तद्विरोधाद्ब्रह्मणिसमन्वयोवेदांतानांसिध्यतीतिनच
तःस्वतत्त्वज्ञानेसदुःर्महति। नचैतत्त्वज्ञानादतेमोक्षइतिस्वतंत्राणामप्यनुमानानामाभासीकरणमिहशास्त्रेसंगतमेवेति। यद्येवंततः
परकीयानुमाननिरासएवकस्मात्प्रथमंनकृतइत्यतआह वेदांतार्थनिर्णयस्यचेति। ननुवीतरागकथायांतत्त्वनिर्णयमात्रमुपयुज्य
तेनपुनःपरपक्षप्रतिक्षेपः सहिसरागणामावहतीतिचोदयतिनुमुमुक्षूणामिति। परिहरति बाढमेवंतथापीति। वीतरागकथायां
तत्त्वनिर्णयावसानायचपरपक्षप्रसक्तदूषणमंतरेणतत्त्वनिर्णयः। शक्यंकर्तुमितितत्त्वनिर्णयायवीतरागेणापिपरपक्षोदूष्यते। न
नुपरपक्षेतिनवीतरागत्वयाकथातत्याहुतिरित्यर्थः। पुनरुक्ततांपरिहोषसमाधत्तेनत्वीक्षतेरितितत्रसांख्याइतियानिरूपेणरू
पेणास्थौल्यादावसौक्ष्म्यान्यमन्वयनरणानिदृष्टानियथायथादयोरुचकादयश्चास्थौल्यादाचसौक्ष्म्यान्मल्लसुवर्णान्विताःतत्कार
णाः। तथाचेदंबाह्यमाध्यात्मिकंचभावजातंसुखदुःखमोहान्वितमुपलभ्यतेतस्मादपिसामान्यकरणकंभवितुमर्हति। तत्रजगत्
कारणस्ययांसुखात्मतातेरत्नत्वंचादुःखात्मतातद्रजः यच्चमोहात्मतातत्तमइतित्रैगुण्यकारणसिद्धिस्तथाहिसत्वकं भावात्त्रैगुण
यंतांनुभूयंतेतथामैत्रदारेपुपावयतामैत्रस्यसुखंतत्कस्यहेतोःसंभवतिसत्वगुणसमुद्भवात्। यत्सपत्नीनांचदुःखंतत्कस्यहेतोः ता
प्रतिजन्यात्रजोगुणसमुद्भवात्। चैत्रस्यतुत्वेणस्यनामविंदतोमोहविषादौतत्कस्यहेतोःसंभवस्तस्यतमोगुणसमुद्भवात्। एवंभावसा
चतर्वेआख्याताः। तस्मात्सर्वंसुखदुःखमोहात्मकंजगत्कारणकंगम्यते। नचत्रिगुणंप्रधानंप्रधीयतेक्रियतेतेनजगदितिप्रधीयस्मिन्प्रलय
समयेजगदितिवाप्रधानंतच्चमल्लसुवर्णवदचेतनंचेतस्यपुरुषस्यभोगापवर्गलक्षणमर्थंसमदायितुंस्वभावतएवप्रवर्ततेतनुकेनचित्प्रवर्त्यते। १५

तथाह्याहुः उत्वार्यंकहेतुर्नकेनचित्कार्यंतकरणंइतिपरिस्पन्दादिभिरितसाद्यिहणेनशक्तिनःप्रवर्तते। कारणकार्यविभागादैश्वरूप्य
स्येत्यव्यक्तसिद्धिहेतावाख्यंते। एताश्चोपरिष्टाद्भाष्यमेवनिराकरिष्यति। तदेतत्प्रधानानुमानंदूषयतिनप्रदामइति। यदिताव
दचेतनंप्रधानमधिष्ठितंचेतनेनप्रवर्तेतस्वभावएवेतिसाध्यते। तदयुक्तंसमुत्थयादेहेतिश्चेतनानधिष्ठितत्वविरुद्धत्वेनाधिष्ठानेन
मल्लसुवर्णादिदृष्टांतधर्मिणिव्याप्तेरुपलब्धेविरुद्धत्वात्तनहिमल्लसुवर्णादयोवयाः कुलालहेमकाररथकारादिभिरनधिष्ठिताःकुंभरु
चकरथादयुपादयते। तस्मात्तत्करणकमिवनित्यत्वसाधनायप्रयुक्तंसाध्यविपर्ययेनव्याप्तंविरुद्धमेवंसमन्वयादिचेतनानधिष्ठितत्वेसाध्ये
तिरचनानुपपत्तेरितिदर्शितंयद्युपेतदृष्टांतधर्मिण्यचेतनंताव ज्जगदुपादानंदारितत्रयद्यपितच्चेतनप्रयुक्तमपिदृश्यतेतथान
प्रयुक्तंहेतोरप्रयोजकंवहिरंगत्वात्। अंतरंगंचचेतन्यमात्रमुपादानत्वंहेतोःप्रयोजकंयथाहुः दृश्यमानायाःकश्चिद्धर्मःप्रयोज
कइति। नचाहतनचदादीनिस्वभावप्रतिबंधंहिव्याप्तंआपकत्वगमयति। सचस्वभावप्रतिबंधःशंकितसमारोपितोपाधिनिरासेसतिनि
श्चीयते। तन्निश्चयनचयत्यतिरेकयोरायत्तेतेनोचास्यव्यतिरेकौतथोपादानाचेतन्येयथाचेतनप्रयुक्तत्वेनिरस्कुर्वन्ततःतत्रत्या
तरंगत्वेनेतिभावः। एवमपिचेतनप्रयुक्तत्वंचाभ्युपेयेतयदिप्रमाणांतरविरोधोनस्यात्। प्रत्युतश्रुतिरनुगुणतरात्रेत्याहनचैवंसतीति।
चकारेणसुखदुःखादिसमन्वयलक्षणस्यहेतोरसिद्धत्वंसमुच्चिनोतिइत्याहअन्वयानुपपत्तेश्चेति। आंतराःखल्वमीसुखदुःखमोह
विषादाबाह्येभ्यश्चंदनादिभ्योऽतिरिक्तप्रत्ययवेदनीयेभ्योव्यतिरिक्ताःप्रतीयन्तेयदिपुनरेतएवसुखादिस्वभावाभवेयुस्ततःस्वरूप
त्वाच्चंदनोपिचंदनःसुखःस्यात्। नहिचंदनकदाचिच्चंदनतयादमितदपिकुंकुमपंकमुखोभवन्नस्यसोकदाचित्कुंकुमपंकजइति।
एवंकटकःक्रमेलकस्यसुखनतिमनुष्यादीनामपिप्राणभृतांतदसुखःस्यात्। नह्यसौकांश्चित्प्रतिनित्यंकटकइति। तस्मात्सुखादिस्वभा
वाअपिचंदनकुंकुमादयोजातिकालावस्थायपेक्षयासुखदुःखादिहेतवोनतुस्वयंसुखादिस्वभावाइतिरमणीयंतस्मात्सुखादिरूपसमभा

वाच०२ वनामसिद्ध इतितानेन तद्रूपं कारणं मूलं कं ऽभ्युपगत इति तदिदमुक्तं शब्दादिविशेषाणां प्रविभागनाविशेषादिति भावनासंस्कारादिविशेषाकारभाजं
३६ मलकवर्तकं हि कर्मकरभोगविनाभावामति : अनन्ताश्चात्मैकं तत्कार्यव्यावर्तते एवमन्यत्रापि द्रष्टव्यं परिमाणादिति सांख्यीयं हेतुमुपन्य
स्यति तथा परिमितानां भेदानामिति संसर्गपूर्वकत्वे हि संसर्गस्यैकस्मिन्नद्वयोः संभवात् । नानात्वे कार्यसमवेतस्य नानाकारण
निसंस्पर्शानिकल्पनियानितानि च सत्त्वरजस्तमांसि चेतिभाव : तदेतत्परिमितत्वं सांख्यीपराधीनेनोचनेनानैकांतिकमिति दूषयति
सत्त्वरजस्तमसामिति । यदितावत्परिमितत्वं ऽऽपन्यासान भसोपि नास्तीत्यव्याप्यको हेतुः परिमाणादिति अथन योजनादिमितत्वं परि
माणमियत्तं न भसो ऽयम : किं तु तदव्यापितां अव्यापि च न भस्तं भावात् वीहि कार्यं करणव्यापि किं तु कारणं कार्यव्यापि इति परिमितं
न भसनमात्राप व्यापिकत्वात् । इति सत्त्वरजस्तमांस्यपि न परस्परं व्याप्नुवंति न च तत्वांतरपूर्वकत्वमेतेषामिति व्यभिचारः । न
हि प्रधानैः कार्यजाप तं ऽविश्वरूपं तानि परस्परं विशेषानिमिथः कार्यकारणभावाभावात् । परस्परं संसर्गस्त्वविशेषः विलिशकौनास्ति
नहि विलिशक्तिः कूटस्थानित्यातैः संदृश्यते तत एव तद्व्यापकात्गुणा इति परिमिताएवं विशिष्टकिरपि गुणैः संस्पृष्टेति सापि परि
मितेस्मैनेकांतिकत्वं परिमितस्यहेतोरिति तथा कारणकार्य विभागोपि समन्वयाविरुद्धत्वात् कार्यकारणभावस्यति प्रवृत्तेश्च न
केवलं रचनाभेदः न चेतनाधिष्ठानमंतरेण भवति । अपि तु साम्यावस्थायाः प्रच्युतिवैषम्यं तया च गुणानां लीयत्वं प्यत्तं च
तदनुगुणतया स्थितमंगमेवं त्रिगुणप्रधानभावे सत्त्वस्य महदादौ कार्ये प्रवृत्तिः सापि चेतनाधिष्ठानमंतरेण मृत्पिंडे प्रधाने गतावेन च
करंडे सलिलस्त्रोदये तावतिष्ठं नेतस्मात् प्रवृत्तेरपि चेतनाधिष्ठान सिद्धिरिति शंकितः प्रवृत्तेश्च त्ययमपि हेतुः सांख्यीयो विरुध्यते इत्युक्तं
वक्रोक्त्या अत्र सांख्यश्चोदयति ननु चेतनस्यापि प्रवृत्तिरिति अयमभिप्रायः तथा किलौपनिषदेनास्मद्धेतुदूषयिता केवलस्य चे
तनस्यैषामनिरपेक्षस्य जगदुपादानत्वं निमित्तत्वं समर्थनीयं तदयुक्तं केवलस्य चेतनस्य प्रवृत्तेर्दृष्टांतधर्मिण्यनुपलब्धेरिति । औ ३६

पनिषदस्तु चेतनहेतुकां तावदेव सांख्यप्रवृत्तिमभ्युपगच्छतु पश्चात्स्वपक्षमंतरावसमाधास्यामित्यभिसंधीयमानाह सत्यमेतत् । न के
वलस्य चेतनस्य प्रवृत्तिर्दृष्टेति : सांख्य आह न त्वचेतनसंयुक्तस्येति । तुशब्द औपनिषदपक्षं व्यावर्तयति । अचेतनाश्रयैव सर्वा प्रवृत्ति
र्दृश्यते न चेतनाश्रया कचिदपि तस्मादचेतनस्य जगत्सर्जने प्रवृत्तिरित्यर्थः । अत्रौपनिषदोऽभिसंधिः क्रमपूर्वकं विमृश्यति ।
किं पुनरत्रेति । अनंतरे सांख्योक्तं नेतनुपस्थितिति नावचेतनः । प्रवृत्त्याश्रयः तत्प्रयोजकतया वा प्रत्यक्षसमीक्ष्यते केवलं प्रवृ
त्तिः । तदाश्रयश्चाचेतनो देहरथादिः प्रत्यक्षेण प्रतीयते । तत्र चेतनस्य प्रवृत्तिः तन्निमित्ते वा न तु चेतनं भिन्नस्वद्भावमात्रं तु
तत्र चेतनस्य गम्यते रथादिविलक्षणा जीवदेहस्य न च सद्भावमात्रेण कारणत्वस्य सिद्धिः माभूदाकाशादेरपि तन्निमित्तत्वमित्याशंक्यो
निमित्तकारणं असिद्धिरिति सर्वत्रेति । तदनेन देहातिरिक्तेस्यापि चेतने तस्य न प्रवृत्तिं प्रति निमित्तभावोस्तीत्युक्तं यतः व्यास्य न प्रवृत्ति
हेतुभावोस्ति अत एव च प्रत्यक्षे देहे सति प्रवृत्तिदर्शनात्सति वा दर्शनात् देहस्यैव चेतनत्वं लोकायतिकाः प्रतिपन्नं तथा च न चिरा
त्मनिमित्ता प्रवृत्तिरिति सिद्धं तस्मान्न रचनायाः प्रवृत्तेर्वा चिदात्मकारणत्वसिद्धिर्जगत इति औपनिषदः परिहरतीत्यभिधी
यते न ब्रूम इति । नतावत्प्रत्यक्षानुमानागमास्सिद्धः शारीरो वा परमात्मा वास्माभिरिदानीं साधनीयः । केवलमस्य प्रवृत्तिं प्रति का
रणत्वं वक्तव्यं तत्र मृतशरीरे वा रथादौ वा अनधिष्ठिते चेतनेन प्रवृत्तेरदर्शनात्तद्विपर्यये चैवं च प्रवृत्तिदर्शनादन्वयव्यतिरेकाभ्यां चे
तनहेतुकत्वं प्रवृत्तेर्निश्चीयते तत्तु चेतनस्य भावमात्रेण यत्नेनाभिसंयोगे न वेत् अतश्चेतनिकानामपि चेतनाधिष्ठानादचेतनानां
प्रवृत्तिरित्यत्राविवादः इत्यात लोकायतिकानामपि स्याद्देतत् देहस्य चेतनः करचरणादिमानस्वपरेणप्रवृत्त्युपपत्तिरित्यु
क्तं न तु नदंति रिक्तः कूटस्थः नित्यश्चेतनो यश्चापाई हि तोज्ञाने ऽभावः प्रवृत्तस्वभावात् प्रवर्तकोयुक्त इत्यतिचोदयति ननु तवेति ।

वाच॰ परिहरति नायस्कांतवदुपसर्पितवच्चेति यथा च स्वरूपादयः इतिसांख्यानां हेत्वेदेशस्तं रूपादय इंद्रियं विकुर्वीत येन न दिंद्रियसमर्थत्वात् अयस्का
१७ रणपरिणमति इति स्थितिः संप्रति चोदकं स्वाभिप्रायं भाविकरोति एकत्वादिति येनेत्यामचेतनं चेतनं नास्ति नेप्यामे न युज्यते वक्तुं चेत
नाधिष्ठितमचेतनं प्रवर्तयति यथा योगानां ईश्वरः वादिनां येषां तु चेतनातिरिक्तं नास्त्यद्वैतवादिनां तेषां प्रवृत्त्याभावे कं प्रति प्रवर्तकं त्वं
चेतनस्येत्यर्थः परिहरति नाविद्येति कारभूतया लयलक्षणयाविद्यया प्राक्सर्गेपि चित्ते न च विक्षेपसंस्कारेण प्रत्युपस्थापितं नाम रूपं
तदेव मायात दावेशेनास्य बोधस्यासंप्रयुक्तत्वात् अनुयुञ्जे तात्कात्स्नि क्यां तुस्त्पा वस्तिकल्पनीकं द्वितीयं मध्यमयं यथा
हुः सहायास्तादृशा एव यादृशी भवितव्यतेति न चैवं ब्रह्मोपादानत्वव्याघातः ब्रह्म एव मायावेशेनोपादानत्वात् तदधिष्ठानत्वाज्ज
गद्विभ्रमस्य रजतविभ्रमस्येव शुक्तिकाधिष्ठानस्य शुक्तिकोपादानत्वमितिनिरवद्यं पयोम्बुवच्चेत्तत्रापि यथा पयोनोम्बुनो चेतना
नधिष्ठितयोः स्वत एव प्रवृत्तिरेवं प्रधानस्यापीतिशंकार्थः तत्रापि चेतनया विधिष्ठितमयात्वं साध्यं न च साध्येन व्यभिचारस्त
थासत्यनुमानमात्रोच्छेदप्रसंगात् सर्वत्रास्यस्थलभत्वात् न च साध्यं तत्रापि चेतनाधिष्ठानस्यागमसिद्धत्वात् । न च सपक्षे
ण व्यभिचार इति शंकानिराकरणस्यार्थः साध्यपक्षे तुपलक्षणं सपक्षिणी हिंसात्वादिष्वपि दृष्टव्यं न तूपसंहारदर्शनाद्दित्यान
पेक्षस्य प्रवृत्तिर्दर्शिता इह तु सर्वस्य चेतनापेक्षा प्रवृत्तिः प्रतिपाद्यत इति कुतो न विरोध इत्यत आह उपसंहारदर्शनादिति
रूपदर्शिलोकाभिप्रायानुरोधेन तदुक्तं न तु परमार्थत इत्यत आह व्यतिरेकानवस्थितेश्चानपेक्षत्वात् यद्यपि सांख्यानामपि विचित्र
कर्मवासितं प्रधानं साम्यावस्थायामपि तथापि न कर्मवासनासर्गस्य प्रवृत्तेः किं तु प्रधानमेव स्वकार्यप्रवृत्तमानमधर्मप्रतिबद्धं सत्त्वप्रत्यय
मर्यादं न स्थिरकर्तुमुत्सहते इति धर्मेण धर्मप्रतिबंधोपनीयते एवमयकर्मणेन धर्मप्रतिबंधोपनीयते दुःखमयं तस्थैः स्वयमेव प्रधान १७

त मपेक्षं स्वरूपेण वर्तते यथाहुः निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति न तस्य प्रतिबंधकस्य येन यत्साधनेन धर्मेणानेनापि साक्षिणि
तदेवांगतीत्युपेक्षणीयस्याभावात् सदेवसाम्येन परिणमेन वैषम्येण वा दनन्तपंकादिविकृतः परिणामभेद उपपद्यते इंश्वरस्त्वनुमहा
मायस्य चेतनस्य लीलया वा सहेच्छया वा स्वभाववैचित्र्याद्वा कार्यपरिणाकाद्वोपसंप्रवृत्तिनिवृत्तिरुपपद्यतेएवेति अन्यत्राभावाच्च
तृणादिवत् येनपयुक्तं हि तृणपल्लवादिस्थिया स्वभावत एव चेतनानपेक्षं क्षीरभावेन परिणमते ननु तत्र धेनुचैतन्यमपेक्षत
उपयोगमात्रेनपेक्षत्वात् एवं प्रधानमपि स्वभावत एव परिणमस्यंते क्वतमत्र चेतनेनेतिशंकार्थः धेनुप्रयुक्तस्य तृणादेः
क्षीरभावे किं निमित्तांतरमात्रं निषेध्यते उत चेतनं न तावच्चिंतावधेनुदेहस्थोसदर्शयस्य च क्वचिद्भेदस्य निमित्तांतरस्यसं
भवात् बुद्धिपूर्वकारितत्रापीश्वरएव सर्वज्ञः संभवतीति शंकानिराकरणस्यार्थः तदिदमुक्तं किंचिदेवं संपाद्यमिति अभ्युप
गमेप्यर्थाभावात् पुरुषार्थानपेक्षाभावप्रसंगात् तदिदमुक्तं एवं प्रयोजनंमपि किं चिरापेक्षेति अथ पुरुषार्थस्तावदिति योज्यं
तदिदमुक्तं तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेकख्यातिमिति न केवलं तात्त्विको भोगोनाधेयातिशयस्य कूटस्थनित्यस्य पुरुषस्यासं
भवात् अनिर्मोक्षप्रसंगश्च येनहि प्रयोजनेन प्रधानं प्रवर्तते तदनेन कर्तव्यं भोगः न चैतत् प्रवर्तितमितितमेव कुर्यात् मोसं
ते नात्प्रवर्तितत्वादित्यर्थः अपवर्गश्चेत्याग पीति चित्तेः सदा विद्युत्वांश्चेतस्यां आनुकर्मानुभववासनाः संति प्रधानं कुसुमा
दीनामाधारः तथा च प्रधानप्रवृत्तेः प्राक्कि तिर्मुक्तेवेति नापवर्गार्थमपि तत्प्रवर्तेरिति शब्दाद्यनुपलब्धिप्रसंगश्च तदर्थमप्र
वृत्तत्वात् प्रधानस्य उभयार्थताभ्युपगमेपीति न तावदपवर्गः साध्यः तस्य प्रधानाप्रवृत्तिमात्रेण सिद्धत्वात् भोगार्थं तु प्रवर्तते भो
गस्य च स्वरूपदाद्युपलंभादेव समाप्तत्वात् न तदर्थं पुनः प्रधानं प्रवर्ततेस्य यत्न साध्यो मोक्षस्यात् निःशेषशब्दाद्युपभोगस्य

समा

वाच० २ चानंत्ये नवसमास्वेऽनुपपत्तेरनिर्मोक्षप्रसंगः। कृतभोगमपि प्रधानमासत्तपुरुषान्तरार्थत्वात् क्रियानिर्हारेण भोजयतीति चेत्। अथ

९८ पुरुषार्थोपग्रहात् किमर्थं स तत्पुरुषार्थान्यता व्याप्तिं करोति अपवर्गार्थमिति चेत्। हंत भोगचरितार्थतया पुनर्भोगे स्वकृतप्रयोजनस्य तथा

नस्य निवृत्तिमात्रादेव सिध्यतीति कृतं सत्त्वासन्नताख्यातिप्रतिष्ठाणेन तथा सा स्वरूपतः पुरुषार्थत्वं तस्मात् उभयार्थं प्रतिनतथा

नस्य प्रवर्तितुमुपपद्यते इति सिद्धार्थो भावः। स्यान्मतमस्त्येवं कर्तृदृक् दृक्छक्तिः पुरुषो हि दृक्शक्तिः सा च दृश्यमंतरेणानर्थिका स्या

दिति यत्प्रधानेन शब्दादिसृज्यते तेन दृक्छक्तेः दृश्यं भवतीति तदुभयार्थत्वाय सर्जनमिति शंकार्थः। निराकरोति स्वर्ग

शास्वनुच्छेदवदिति। तथापि प्रधानस्य सर्गशक्तिरनेकपुरुषं प्रति चरितार्थापि पुरुषांतरं प्रति प्रवर्तते न अनुच्छेदवदेवं दृक्

शक्तेरपि तं पुरुषं प्रत्यर्थवत्त्वानुच्छेदात् सर्वदा प्रवर्तते। ए निर्मोक्षप्रसंगः सकृत्सद्दर्शनेन वा चरितार्थत्वे न तस्य प्रवर्तते।

सर्वदा मेकपदे निर्मोक्षप्रसक्तेरेति सा शोकेऽसौ संसारः समुच्छिद्येतेति। पुरुषाश्रयवदिति चेत्तथापि। नैव दोषात्यन्तमुक्तिरिति शेषः

ना भवत् पुरुषार्थस्य प्राक्कृर्थवत्त्वस्याप्रवर्तकत्वं पुरुषस्य दृक्शक्तिसंपन्नः पंगुरिव प्रवृत्तिशक्तिः संपन्नं प्रधानमंधमि

व प्रवर्तयिष्यतीति शंका दोषादनिर्मोक्षान्नाभ्युपेहानं तावदिति न केवलमभ्युपेतहानमयुक्तं चेतनः भवदर्शनालो

चने नेत्याहं कथं चोदासीनस्येति निःक्रियत्वे साधनं निर्गुणत्वादिति शेषमविरोहितार्थं ६ अंगित्वानुपपत्तेश्च प्रधानावस्था

कूटस्थनित्यतो न तस्याः प्रच्युतिरनित्यत्वप्रसंगात् यथाहुः नित्यमाहुर्विद्वांसो यत्स्वाभावो न तस्यं नीतितदिदमुक्तं तरू

पप्रणाशाभयादिति। अयपरिणामनित्यया यथाहुः। यथाहुः अस्मिन्विक्रियमाणेऽपि तत्त्वं न हन्यते तदपि नित्यमिति तत्राह वाग्यस्येति।

यस्मात्साम्यावस्थायाः किंचिदपर्यायेण कथं न देशासाति विलक्षणप्रलयोपनिपाते वैषम्यमुपैति अनपेक्षस्य तत्तो वा वैषम्येन कदाचित्सा

Dr. BHAU DAJI MEMORIAL

म्यं भवेदित्यर्थः। अन्यथानुमित्तेश्च चिच्छक्तिवियोगादेवमपि प्रधानस्येति अंगित्वानुपपत्तिलक्षणो दोषः तावत्प्रभवन्निःशक्यः

परिहर्तुमिति वक्ष्यामः। अभ्युपगम्यापि अस्या दोषत्वमुच्यत इत्यर्थः संप्रसंगित्वानुपपत्तिमुपपादयति वैयन्यापगमयोगाप्रा

ति विप्रतिपत्ताश्च समंजसं कचित्स्वयमेविद्यार्णानि कचित्स्रोण्यं नस्करणानि बुद्ध्यहंकारामनदाति। कचिदहंकुर्वन्निति शेषमतिरो

हितं अत्राह सांख्यः तत्त्वोपनिषदानामपीति तथ्यतापकभावस्तावदेकस्मिन्नोपपद्यते। यहिस्य परस्थितिरिव कर्तृस्थभावकः किंतु परिवक

र्मस्वभावकः प्रत्यसमवेतक्रियाफलशालिकर्म तथा चनन्येन कर्मणा तापना समवेतक्रियाफलशालिना यदन्येभवितव्यं अनन्यत्वे चैत्रस्येव

गंतुः स्वसमवेतगमनक्रियाफलनगरप्राप्तिशालिनोऽप्यवकर्मत्वप्रसंगात्। अन्यत्वे तु तप्यस्य तापकाद्वैतत्त्वमेव तया मनः क्रियाफलभाजो

गम्यस्येव नगरस्य तपत्वोपपत्तेः तस्मादभेदे न तप्यतापकभावो नोपपद्यत इति। दूषणांतरमाह। यदिचेति। नहि स्वभावोऽमियोऽपि तुंशा

श्वत इति भावः जलधेर्वीचितरंगफेनादयः स्वभावाः संतः आविर्भवतिरोभावधर्मणो नतु नैर्ज लधिः कदाचिदपि मुच्यते। न केवलं क

र्मता चात्मस्य तापकादन्यत्वमपि त्वनुभवसिद्धमेवेत्याह प्रसिद्धश्चायमिति। तथास्य यर्थोऽयर्जनरक्षणक्षयोपराग बुद्धिहिंसादोष

दर्शनादनर्थः। सत्त्वर्थितदुःखेन तिर्यग्मिनः। तापकश्चायं। नौच मोक्षो कत्रनीति भेदाव भेदे च दूषणान्युक्तानि न त्वकस्मेकस्मिन्

द्व्येऽपि तुमर्हतीत्यर्थः। तदेवमौपनिषदं मतमसमंजसमुक्त्वा सांख्याः स्वपक्षे तप्यतापकयोर्भेदमोक्षमुपपादयति आत्यंत

रभावनिति। एवं दर्शनशक्तोकिं तसंयोगकारणनिदानं तस्य हेतुरविवेकदर्शनं संस्कारोक्रियासानविवेकस्य भास विपर्यास विरोधि

त्वाद्वर्तनेनं निवर्तनं धेनुकः संयोगनिवर्तितिनिवर्तत्विसु तत्कार्यस्याप्यनिवर्तते। तदुक्तं पंचशिखाचार्येण तत्संयोगहेतुवि

सर्जनात्स्यादयमात्यंतिको दुःखप्रतीकार इति। अत्र वनंसाक्षात्पुरुषस्य परिणामिनो बंधमोक्षौ किंतु बुद्धिसत्त्वस्यैव चितिका

याप्रत्यालंब्य चैतन्यस्य तथाहि इष्टानिष्टगुणस्वरूपावधारणमविभागापन्नमस्य भोगः भोक्तृस्वरूपावधारणमपवर्गो।

१९

तेनहि बुद्धिसत्त्वमेव कल्पते न तथापि यथा जयः। पराजयो वा योधेषु वर्तमानः स्वामिन्युपदिश्यते एवं बंधमोक्षौ बुद्धिसत्त्वे व
र्तमानौ कथं चित्पुरुषेप्याप्यादिश्यते तस्य विभागस्य तत्फलस्य भोक्तेति तदेतदभिसंधायाह तस्मादपि कदाचिन्मोक्षोपपत्तिरिति।
६ तदेतद्दूषयति अत्रोच्यते। तापकत्वादेव तप्यतापकाभावानुपपत्तेः। एतएकत्वेत्र तप्यतापकभावो नोपपद्यते एकत्वादेव तस्मा
त्सांव्यवहारिकत्वेप्यस्य तप्यतापकभावोऽस्माभिरभ्युपेयः नाहि द्वयोरसांव्यवहारिक एव न पारमार्थिक इति असत्कराचे
हितं भवेदेष दोषो यद्येकात्मनयोस्तप्यतापकावन्योन्यस्य विषयविषयिभावे प्रतिपाद्येतानामित्यस्मदभ्युपगमद्गतियोघः
सांख्योपिहितेदाश्रयं तप्यतापकभावं ब्रुवाणो न पुरुषस्य तपिकर्मतामाख्यातुमर्हति तस्यापरिणामित्वया तपिक्रियाजनितफल
शालित्वानुपपत्तेः केवलमनेन सत्त्वं तप्यमभ्युपेयं तापकं च रजः इत्युभितिविषयत्वात् बुद्धिसत्त्वे तप्यमाने तदविभागापत्त्या पुरुषोनु
तप्यत इव न तु तप्यते। अपरिणामित्वादित्युक्तं तदविभागापत्तिश्चाविद्यातयाचाविद्यातत्कृततप्यतापभावस्त्वपाभ्युपेतः
सोयमस्माभिरुच्यमानः किमितिभावना पुरुषजभावाति अपिच नित्यत्वाभ्युपगमाच्च तापकस्यानिर्मोक्षप्रसंगः शंकते।
तप्यतापकयोर्नित्यत्वेपीति। सहार्थे ने निमित्तेन वर्तत इति सनिमित्तः संयोगः सहेत्वादिति। निराकरोति। नादर्शन
स्यतमस इति। न खलु रूपस्य तत्सरितत्वं केवलमियं बुद्धिसत्त्वस्य तापकरजोजनितानस्य च बुद्धिसत्त्वस्य तामसपर्यवसाना
त्मनः। पुरुषान्तरे दृश्यतः पुरुषस्तप्यत इत्यभिमानः न तु विषयपुरुषोविपर्यासतुष्टेणापि युज्यते तस्य तु बुद्धिसत्त्वस्या
तिरस्तादिविवेकस्यानादितामसीयमविवेकख्यातिनिवर्तनीया न च सती तमसी मलेशस्यात्यंतमुच्छेत्तुं न वाचोत्किन्त्रावदराव
पुनः तमसोऽभूतेन सत्त्वमभिभूय विवेकख्यातिमबोधशक्तिशिखरविद्या आविर्भाव्येतेति वक्तव्यमपवर्गकथानयुक्ति
नीरजलांजलिः प्रसज्येत अस्मत्पक्षे तु दोष इत्याह औपनिषदस्य त्विति तथा हि मुखमभ्रदानमपि मलिनादर्शन

१९

लोपाधिकल्पितप्रतिबिंबभेदं मलिनमनुपेतिमतं च वस्तुतो मलिनं न च बिंबात्प्रतिबिंबं वस्तुतो भिद्यते अथ च तस्मिन्प्रतिबिंबे मलि
नादर्शोपनिधानान्मलिनतापदं लक्ष्यते। तथा चात्मनो मलिनं मुखं पश्यन्दैवदत्तस्यापनय यदा रूपाध्ययनयावद्बिंबमेव कल्पनात्
शान्तं प्रतिबिंबं नष्टावदानमिलितत्वं न वगच्छति तदास्य तापः प्रशाम्यति न च मलिनं मे मुखमिति। एवमविद्योपधानकल्पितावच्छे
दो न जीवः परमात्मप्रतिबिंबकल्पः कल्पितैर्देवशब्दादिभिः संपर्कात्तप्यते न तु तत्त्वतः परमात्मनोस्ति तापः परान्तु तत्त्वमसीति वाक्य
श्रवणमननध्यानाभ्यासपरिपाकसकलपर्यंतं जास्य साक्षात्कार उपजायते तेन तदा जीवः शुद्धबुद्धत्वस्वभावमात्मनोनुभवन्निरस्त
निखिलवासनाक्लेशजालः केवलः स्वस्थो भवति। न चास्य पुनः संसारभयमस्ति वहेतोरववासत्त्वेन समूलकाशांकशिनत्वात्।
सांख्यस्य तु सतस्तमसो नाशासमुच्छेदत्वादिति तदिदमुक्तं विकारभेदस्य च वाचारंभणमात्रत्वश्रवणादिति प्रधानकारणवाद इति।
यथैव प्रधानकारणवादो ब्रह्मकारणवादविरोधी च परमाणुकारणवादोप्यतः सोपि निराकर्तव्यः एतेन शिष्टापरिग्रहा अपि व्या
ख्याता इत्यस्य प्रपंच आरभ्यते। तत्र वैशेषिकाः ब्रह्मकारणत्वं दूषयांचक्रुः चेतनं चेदाकाशादीनामुपादानं तदा चेतनमाकाशा
दि चेतनं स्यात्कारणगुणप्रक्रमेण हि कार्यगुणारंभो दृष्टः यथा शुक्लैस्तंतुभिरारब्धः पटः शुक्लः न जातु कृष्णो भवत्येवं चेतनेनारब्धमाका
शादि चेतनं भवेन्न चेतनं तस्मान्न चेतनोपादानमेव जगत् चाचेतनं परमाणवः सत्स्मात्खलु स्थूलस्योत्पत्तिर्दृश्यते यथा तंतुभ्यः
पटस्तेषामंशुभ्यस्तेषामेवमपकर्षपर्यंतं कारणद्रव्यमिति स समनवयवमवतिष्ठते नन्वापरमाणुस्तस्य तु सावयवत्वेभ्युपगम्यमा
ने अनंतावयवत्वेन मेरुराजसर्षपयोः समानपरिमाणत्वप्रसंग इत्युक्तं तत्र च प्रथमं तावद्द्व्यणुकं तेन संयोगात्परिमाणा
त्कर्मं तत्सापरिमाणकं तदणुसंयुक्तं द्व्यणुकमारभन्ते द्व्यणुकस्य परमाणवः संयुक्ताः सदृशा स्थूलमारंभेते परमाणुत्वे समानत्वात्
यदापरहीतपरमाणुवद्व्योर्हि पर्यायपरहीताः परमाणवो घटमारभेरन् व्यस्तेपि विभज्यमानो अशोर्के रायुपलभ्येनतेषामनारब्धत्वात्।

बाव॰२ परसैव तु तेनाद्यत्वात्तथासति तु द्वचणुकारारम्भस्य विनाशेन किंचिदुपलभ्येत न द्व्यणुकानां परमाणूनां नातीन्द्रियत्वात् सावयवत्वे च बहूनां प
२० रमाणूनां द्व्यणुकत्वे तुल्यत्वादिकारणत्वं अपि तु द्वाविव परमाणू द्व्यणुकमारभेते तस्य चाणुत्वं परिमाणं परिमाणं परिमाणात् । पारि
मंडल्यादन्यत ईश्वरबुद्धिनिरपेक्षात्मा द्वित्वसंख्यारभेते न च द्व्यणुका सांद्रत्वस्यारम्भः वैय्यर्थ्यप्रसंगात् तदपि हि द्व्यणुकमेव भवेत् ।
ननु महत्कारणबहुत्वमहत्त्वप्रचयविशेषेभ्यो हि महत्त्वस्योत्पत्तिः न च द्व्यणुकयोर्महत्त्वमस्ति यतः स्यान्मासारब्धं महत्त्वं
नापि तयोर्बहुत्वं द्वित्वादेव न च प्रचयभेदस्तूलपिंडानामिव तत्रावयवानां सावयवत्वेन प्रशिथिलावयवसंयोगभेदविरहात् तस्मा
त्तेनापि न कारणद्व्यणुकवदणुत्वेनैव भवितव्यं तथा च पुरुषोपभोगक्षियाभावादृष्टनिर्मितत्वाच्च विवक्षितनिर्माणस्य तस्य भोग्य
र्थत्वात् कारणेन त्र्यणुकादिकेन तन्निष्पन्ने तद्ग्रहणं कार्यं येन द्व्यणुकान्तरेणैवारम्भवैयर्थ्यात् । आरंभात्तत्रत्र्यवयवबहुभिर
त्र्यणुकैश्चित्तद्व्यणुकं पंचाणुकं षडणुकं वा द्रव्यं महद्दीर्घमारभ्यते कस्मिंश्चिदत्र भोगभेदः अस्ति च बहुत्वसंख्या ईश्वर
बुद्धिनिरपेक्षोत्पन्नामहत्त्वपरमाणयोनिः । अणुकादिभिरारब्धं कस्मिंश्चिदत्र भोगभेदः । अस्ति च बहुत्वसंख्या तु कार्य
द्रव्यं कारणबहुत्वात् कारणमहत्त्वभेदाद् कारणप्रचयभेदाद्वा महत्त्वं वर्तीति प्रक्रिया तदेतदेव प्रक्रियया कारणसमवायिनो
गुणाः कार्यद्रव्ये समानजातीयमेव गुणान्तरमारभन्त इति दूषणमदूषणीक्रियते व्यभिचारादित्याह महद्दीर्घत्वस्वाश्रये
स्तमंडलाभ्यां परिमाणाभ्यां द्रव्यं द्व्यणुकादिद्रव्यान्त्यणुकाज्जायते तं तु महत्त्वगुणोपजनेनाणुकगतं महत्त्वमपेक्षते । तस्य ह्रस्वत्वा
त् । २ तथा वा तत्रैव त्र्यणुकादिदीर्घत्वं हि स्वासद्व्यणुकाज्जायते न तु गतत्वं दीर्घत्वस्यापेक्षते । तदभावाद्वा शब्दस्यार्थानुक्तसमुच्चया
र्थः । यथा द्व्यणुकगतमणुत्वपरिमाणं परिमंडलात् परि॒मा॑णपरिमंडलं जायते त्र्यणुकेन तदन्तरगणेन चेतनं जगज्जनिष्यति तत्र यो
थ जना । नाप्येपरमाणुगुणाविशेषस्थितिपारिमाण्डल्यं ग्रहणमुपलक्षणं द्व्यणुके तु तन्महत्परिमाणवर्तिपरिमाण्डल्यमारभते तत्र यदि त
२०

संख्यायोनित्वादित्यपि द्रव्यं ह्रस्वपरिमंडलाभ्यामिति तिसृणां गुणिपरतः गुणपदं यदापि हि द्व्यणुके द्वित्वपतितं न्यायमाहादेकं
द्वित्वं तत्पतितं एवं तत्तदुरगुणमिलायुपपद्यते । इतरथा त्र्यणुकमेव तत्र परिमाणस्यात् । ननु महद्दीर्घमुक्तं अथ चाह द्वित्वद्वित्वे यथा
त्वेकयोर्द्विवचनैकवचने इति । अत्र हि द्वित्वैकत्वयोरित्यर्थः स्याद्वा कस्मिंश्चित्सालंकेयानां बहुत्वं तदेवं योजनीयं द्व्यणुका
धिकरणे द्वित्वे तदा बहुत्वं तदेवं योजनीयं त्र्यणुकाधिकरणे यत्त्वे तदा च तुरणुकमारभते संख्यानां बहुत्वं यणुकानां
मारंभकत्वात् । तद्बहुत्वद्वित्वसंख्येऽपि आरंभके इत्यर्थः । एवं च वक्तॄणामाचार्याणां विशेषिकप्रक्रियायां तद्दूषणं व्यभिचारादुक्तं
अथ भाष्यवक्तॄणां तथापि तद्ध्वस्तित्वं व्यभिचार इत्याह यदापि वा हस्वः परमाणुरिति । नाणु जायते नाणुत्वं ह्रस्वत्वं जायत इति
योजना चोदयति अथ मत्सरे विरोधिना परिमाणान्तरेण स्वकारणद्वारेणाक्रान्तत्वादिति । परिहरति । नैवमिति । कार
णतो गुणाः कार्ये समानजातीयं गुणान्तरमारभन्त इत्येतावता चेत्सिद्धसिद्धो न तदूर्ध्वतनुसारेण वेदनीयं न तु सर्व अपि
च सत्परिमाणान्तरमात्रमतिनासदृशं द्वित्वे च प्रकृतपरिमाणान्तरमाससीति कथमाक्रमोऽनवक्तृ । कारणमात्राक्रामतिपरिमंडि
लस्यापि समानजातीयकारणस्याक्रमणहेतोर्भावे न समानबलत्वेनोभयकार्यानुसारात्प्रसंगादित्याशयवानाह न च परि
माणान्तराक्रान्तत्वमिति । न च विजातीयपरिमाणान्तरारंभेऽप्यारतनायां परिमंडलादीनां च कारणबहुत्वादीनां संनिधान
मसंनिधानं वा परिमंडलस्येत्यारन्तव्यपरिमाणान्तरारंभ इति । अभिचारान्तरमाह संयोगश्चेति शंकते नद्युपप्रयुक्त इति । नि
राकरोति तदृष्टान्तेनेति न चास्माशंकमनियमः भवतामपीत्याह तत्र कारोतीति । संत्यक्तव्यामस्येत्यावत्प्रत्यक्षाप्रत्यक्षयोरिति
शोभमानोरोहितार्थं ६ उभयथापि न कर्मतत्त्वभावः । परमाणूनामाद्यस्य कर्मणः कारणाभ्युपगमेनाभ्युपगमे वा न कर्मान्त
रद्भावः नत्वे द्व्यणुकादिक्रमेण सर्गस्याभावः अथ भाव द्व्यणुकं समवायद्दृष्टमथ क्षेत्रज्ञसमवायिउभयथापि तस्यावे

वात्र०
२१

ततस्तेनानधिष्ठितस्याप्रवृत्तेः। कर्माभावोऽतस्तदभावः सर्गाभावः निमित्तकारणतामात्रेण त्वीश्वरस्याधिष्ठातृत्वमुपरिष्टान्निराक
रिष्यते अथवा संयोगोत्सर्गार्थं विभागो लयार्थमुभयथापि न कर्मानिः तत्सर्गहेतोः संयोगस्याभावात्प्रलयहेतोश्च विभागस्याभावा
त्। तदभावस्तयोः सर्गप्रलयोरभाव इत्यर्थः तदेतत्सूत्रं तात्पर्यतो व्याचष्टे इदानीं परमाणुकारणवादमिति निराकार्यस्वरूपमुप
पत्तिसहितमाह सत्वगादय इति स्वाश्रुतगतैस्स्वसंबंधैः संबद्धैः संबंधश्चाधाराधेयभाव इहप्रत्ययहेतुः समवायः पंचमभूत
स्यावयवाभावात् तानि मानि चत्वारि भूतानि इति तत्र परमाणुकारणवादे अभिधीयत सूत्रं तत्र प्रथमां व्याख्यामाह कर्मवत्तामिति।
अभिघातादिनाश्चिरत्वे नतोदसंस्कारगुरुत्वद्रवत्वानि गृह्यंते। नोदसंस्कारावभिघातेन समानयोगक्षेमौ गुरुत्वद्रवत्वेन
परमाति अस्मच्चक्षेत्रज्ञस्यास्मत्स्वेत्रज्ञस्यास्मच्चैतन्यस्येति अदृष्टवद्यात्मसंयुक्तेनेति संयुक्तसंयुक्तसमवेतमहृदित्युक्तं अथवा इतिक्रिलेष
भासेकयोर्द्विवचनं वायः संबंध इत्यर्थः। संबंधस्य सातत्यादारितिः यद्यपि परमाणुक्षेत्रज्ञयोः संयोगः परमाणुकर्मजः त
थापि तत्कार्यत्वस्य सातत्यमिति भावः। सर्वात्मनाचेऽवयवाभावः एकदेशेन हि संयोगे यावण्योरेकदेशौ निरंतरौ तावन्यस्य एकदेशाः
संयोगेन प्राप्ता इति प्रथमो पपद्यते। सर्वात्मना तु तदैरंतर्ये परमाणावेकस्मिन् परमाण्वंतराण्यपि संमांतीति न प्रथिमास्या
दित्यर्थः शंकते यद्यपि निः प्रदेशाः परमाणवः तथापि संयोगस्तयोरव्याप्यवृत्तिः एवं स्वभावत्वात् केशावाचोयुक्तिः निः
प्रदेशसंयोगे न व्याप्नोतीति एतेषां वाचोयुक्तिं यथा प्रतीयते न तथाप्युपेयत इति तामिमां शंकां स्फुटार्थमाह परमाणूनां क
ल्पितांशतिन ह्यस्ति संभवो निरवयवद्रव्यस्य एकत्र देवते नैव संयुक्तश्चासंयुक्तश्चेति भावाभावयोरेकस्मिन् द्रव्ये विरोधात्। अविरो
धो वा न कश्चिदपि भेदो वकाशमासादयेदिति तत्प्रदेशकल्पनयापि कल्पितत्वादित्युक्तं कल्पितो प्रदेशो इति। तथा च स
त्वद्रेयमितीतानुपहाद्युपतिकल्पितानामवस्तुत्वादिति तृतीयां व्याख्यामाह यथा वा दिखर्गइति न त्वभिघातनोदेकादयः॥ २१

प्रलयारंभसमयेकस्माच्छिष्टारंभककर्महेतवो न भवंतीत्यंत आह। नहि तत्रापि किं विनियतमितिसंभवंत्वभिघातादयः कदाचित्क
विप्रलयपर्यायेण सर्वस्मिन् नियमहेतोरभावादित्यर्थः। नत्र त्वयप्रसिद्धार्थमिति यच्छरीरादिप्रलयारंभे सिद्धः स्वभोगः तथाप्यसौ
पृथिव्यादिप्रलयेनाम्स्तीत्यभिप्रेत्येदमुदितमितिमंतव्यं समवायीभिर्युगमाद्यसामाराद्यनवस्थितेः व्याचष्टे समवायाभ्युपगमाद्योति।
नतावन्तत्वधर्मास्तीत्यभिप्रेत्येदमुदितमिति मंतव्यं। समवायाभ्युपगमाच्च साम्यवदन्यता तंत्रः समवायोस्तंतभिन्न समवायापिभ्यां
समवायिनौ घटयितुमर्हत्वंतिप्रसंगात्। तस्मात्तदाने न समवायिसंबंधेनासमता समवायिनौ घटयितौ न तथा च समवायियस्य सं
बंधांतरेण समवायिसंबंधेभ्युपगमने अनवस्थाभ्यासौ संबंधीभ्यां संबंधेन संबंधांतरमपेक्षते संबंधिसंबंधनपरमार्थत्वात्
नथाहि नासौ भिन्नोपि संबंधनिरपेक्षो निरूप्यते। न च तस्मिन् सति संबंधिनाव संबंधिनौ न वनस्मात्स्वभावादेव समवायः समवायि
नोर्न संबंधांतरेणेति नानवस्थेति चोदयति नवि इत्यत यथा स्यादिति परिहरति नेत्युच्यते न तस्मिन् सति योगिनौ भवत इति तुल्यमर्थः
यद्युच्येत गुणसंबंधः संयोगो न द्रव्यासमवेतो गुणो भवति न वा स्य समवायं विना समवेतत्वं तस्मात्संयोगस्यास्ति समवाय इति
शंकामपाकरोति न च गुणत्वादिति यथा समवायस्यागुणत्वं भवति कामं भवतु न नः कांचित्क्षतिः तदिदमुक्तं गुणपरिभाषायाश्चेति।
परमार्थतस्तु द्रव्याश्रयी त्युक्तं तच्च विनापि समवायी स्वरूपतासंयोगस्योपपद्यत एव नन्व कार्यत्वात्समवाय्यसमवायिकारणापे
क्षितया संयोगः संयोगसमवायीतियुक्तं असंयोगस्यान्यथा त्वसंगात्। अपि च समवायस्यापि संबंधाधीनसद्भावस्य संबंधीनि
श्चैकस्य द्वयोर्वाविनाशित्वं न विनाशितात्कार्यत्वं। नह्यस्ति संभवो गुणो वा गुणगुणिनौ वा अवयवी वा अवयवावयविनौ वानस्तीति
इति तस्मात्कार्यसमवायः तथा च यथैव निमित्तकारणमात्राधीनोत्पाद एवं संयोगोपि समवायसमवायकारणे अपेक्षते न तथा
च सैवानवस्थानस्मात्समवाय एव संयोगोपि न संबंधांतरमपेक्षते। यद्युच्येत संबंधीनाव तत्सोपरपतितात्मानमिति संबंधिभ्यां नात्कि

वान०२ मसावसंबंधएवसंबंधिभ्यानेवभिन्नोसंबद्। कथंसंबंधिनौसंबंधएतत्संबंधेनवाद्भिवद्भ्यावपिसंबंधयेत्। तस्मात्संयोगःसं॰योगि
२२ नोः समवायेनसंबंधइतिवक्तव्यंतदेतत्समवायस्यापिसमवायिसंबंधेसमानमस्त्राभिनिवेशयेत् तथाचानवस्थेतिभावः। नित्यमेवच
भावात्। प्रवृत्तेप्रवृत्तेर्वैतिरोधन्नतिरोहितार्थमसमाप्यं रूपादिमत्त्वाच्च विपर्ययोदर्शनात् यत्किलभूतभौतिकानांमूलकारणंतद्भूपा
दिपरमाणुःनित्यइतिभवद्भिरभ्युपेयते। तस्यचेद्रूपादिमत्त्वमभ्युपेयेतेपरमाणुत्वनित्यत्वविरुद्धस्थौल्यानित्यभेवप्रसज्येयातांप्रसंगः
एकधर्माभ्युपगमेधर्मान्तरस्यानियतावासिर्हिप्रसंगलक्षणंतदनेनप्रसंगेनजगत्कारणप्रसिद्धयेप्रवृत्तंसाधनंरूपादिमन्नित्यपरमा
णुसिद्धेः प्रत्याख्यात्मगोचरतांनीयते तदेतद्वैशेषिकाभ्युपगमोपन्यासपूर्वकमाह सावयवानांद्व्याणुमिति। परमाणुनित्यत्वसा
धनानिचतेषामुपन्यस्तदूषयतियच्चनित्यत्वेकारणमिति सादितिप्रागभावाद्यव्यास्तिनति। अकारणवदितिपदादेःयद्यद्वितीय
मिति। नत्वरूपंहिकिंचित्कनित्यत्वनिषिद्ध्यते। तेनानिमित्तमितिलौकिकेवनिषेधेनान्यत्रनित्यत्वसम्भवः कल्पनीयः तेचाले
परमाणवइति। नचान्यपिनित्यत्वोपत्तेः। अपरेशास्यप्रतीतिपूर्वकस्यतदभावेनिर्मूलत्वस्यापिदर्शनात्। यत्पेद्दवदेपक्षइमौ।
यदपितित्वेलनीयंकारणमविद्येति। यदिसतांपरमाणूनांपरिदृश्यमानस्थूलकार्याणांप्रत्यक्षेणकारणग्रहणमविद्यातया
नित्यत्वमेवंसतिद्व्यणुकस्यापिनित्यत्वं तथाद्रव्यत्वेसतितिविशेष्येतथासतिनद्व्यणुकेनव्यभिचारः तस्मानेकंद्रव्यत्वेनविद्य
मानद्रव्यत्वानुपपत्तेःतथाप्यकारणवत्त्वमेवनित्यत्वानिमित्तमापद्येतपरतो कारणद्रव्यत्वमविद्यमानकारणभूतद्रव्यत्वमुच्य
ते। तथाचपुनरुक्तंइत्याह। नत्वचेति अपिचाद्रव्यत्वेसतिसत्वादित्यएवेष्टार्थसिद्धेरविद्येतिव्यर्थं। अथाविद्यापरेनद्रव्य
विनाशकारणत्वाविद्यमानत्वमुच्यते। द्विधाहिद्रव्यविनाशहेतुःअवयवानिनाशोअवयवव्यतिषंगविनाशश्चतदुभयंपर
माणुनास्तितस्मान्नित्यःपरमाणुःनचकरस्वादिभिर्व्यभिचारः तेषामद्रव्यत्वादित्याहउभयथापीतिनिराकरोतिनाव्यस्यमिति।

यदिहसंयोगसचिवानिबहूनिद्व्याणिद्रव्यांतरमारभेरंतितित्रक्रियासिद्धद्रव्यस्यद्व्यमेतद्विनाशकारणमिति तत्वेतदस्ति
द्रव्यंस्वरूपयापरिज्ञानात्ननाववात्माधारस्ततदतिरिक्तः पटोनामास्तियःसंयोगसचिवैस्तंतुभिरारभ्यतेइत्युक्तमधस्तात्
घटपदार्थश्चद्रूपयअस्येनस्यतिकिंतुकारणमेवविशेषद्वयात्वंतरमापद्यमानंकार्यंतच्चसामान्यात्मकं तथाहिमृदा
स्वर्णंवासर्वेष्वपिघटरुचकादिषुअनुगतंसामान्यमनुभूयतेनचैतेघटरुचिकादयोमृत्स्वर्णाभ्यांव्यतिरिच्यंतइत्युक्तं
नयेचवक्ष्यामः। तस्मान्मृत्स्वर्णएवतेनतेनाकारेणपरिणममानेघटइतिरुचकइतिचकपालशरावरमितिचश
कलकणिकाचूर्णमितिचरूपायतेतेनतयोपादानयोर्मृत्स्वर्णयोःप्रत्यभिज्ञानान्नचतुघटादयोकपालादिषुरुचकादयोवाशक
लादिषुशकलादयोवारुचकादिषुप्रत्यभिज्ञायंते अत्रकारणभावोभवेत्। नचविनष्टंतमेवघटलक्षणंप्रतीत्यकपालक्षणोमुपा
दानएवोत्पद्यते तत्रिमुपादानप्रत्यभिज्ञानेनेतिवक्तव्यं एतस्याअपिवैनाशिकप्रक्रियायाउपरिष्टान्निराकरिष्यमाणत्वात् तस्मादु
पजनव्ययधर्माणोविशेषावस्थाःसामान्यस्योपादेयाः सामान्यात्मानमुपादानमेवंचावस्थितेयथासुवर्णद्रव्यंकाठिन्यावस्थानपहायद्र
वावस्थायापरिमाणंतंनचनत्ववयवविभागःसंनिधद्रवत्वेकारणंपरमाणूनांसवन्भेतेतदभावेनद्रवत्वानुपपत्तेः। तस्मात्
यापरमाणुद्रव्यमाग्नेसंयोगात्काठिन्यमपहायद्रवत्वेनयोरितिरिच्यते एवंमृदासुवर्णवासामान्यंपिंडावस्थामपहायकुलालहे
मकारादिव्यापारान्घटरुचकावस्थामापद्यते। नत्ववयवविनाशात्तत्संयोगविनाशाद्वाविनष्टमर्हतिघटरुचकादयः नहिक
पालादयोस्योपादानंतत्संयोगोवाऽसमवायिकारणंअपितुसामान्यस्यपरार्थ्यस्ततोनिर्वाअविशेषावस्थास्तदधिष्ठानाश्रजगा
दयइवरआद्युपादानादुपजननापायधर्माणइतिसांप्रतं। प्रकृतिमुपसंहरतितस्मादिति। उभयथाचदोषात्। अनुमृयतेहि
पृथिवीगंधरसरूपस्पर्शात्मिकास्थूलाआपोरूपरसस्पर्शात्मिकाःसूक्ष्माःरूपःस्पर्शौतेजस्कंतेजःसूक्ष्मतरस्पर्शात्मकोवायुःस्

श्चनम॰ पुराणेपिस्मर्यते आकाशंशब्दमात्रंतुस्पर्शमात्रंसमाविशेषादितस्ततोवायुः शब्दस्पर्शात्मकोभवेत् रूपंतथैवाविशतःशब्दस्पर्शौगुणावुभौ त्रिगुणस्तततोवन्हिःसशब्दस्पर्शवान् शब्दस्पर्शश्चरूपंचरसमात्रंसमाविशत् विशेषसंहतानांधमात्रेण नानाचस्तेम हिमिमां तस्मात्संचगुणाभूतस्थूलाभूतेषुदृश्यते। शांताघोराश्चमूढाश्चविशेषास्तेनतेस्मृताः परस्परानुप्रवेशाद्धारयंतीपरस्परात्तेनगंधादयः ॥ × तस्माच्चतुर्गुणाआपोविशेषास्तुरसात्मिकाः शब्दःस्पर्शश्चरूपंचरसश्चेत्येवसंहन्यमानाः पृथिव्यादयस्तथाचयथासंहन्यमानानामुपचयः तथातथासंधस्यस्थौल्यं यथायथावाचयस्तथातथासौक्ष्म्यंतदेतदेवमनुभवागमनाभ्यामवस्थितमर्थंवैशेषिकैरनिच्छद्भिरप्यशक्यापन्हवमाहगंधेति अस्तुतावदस्मद्वैशेषिकैःस्वस्पृथिव्यादिगुणत्वेनाभ्युपगमादितिचत्वारश्चत्वानिचतुस्त्रिद्व्येकगुणान्युसहतानि अनुभवागमसिद्धार्थविरुद्धंदूषयति तद्दृस्थूलपृथिव्यादिवत्परिमाणवोपीति उपचितगुणानाम्मूर्त्युपचयादुपचितसंहन्यमानानांसंघातोपचयात्परमाणुत्वप्रसंगःस्थूलत्वादिति। यस्तुभूतेनगंधादीसंघातःपरिमाणुरपितुगंधाद्याश्रयोद्रव्यं नचगंधादीनांतदाश्रयणामुपचयोभवितुमर्हतिन्यत्वादितितंप्रत्याहनचांतरेणापिमूर्त्युपचयंद्रव्यस्वरूपोपचयमित्यर्थः कुतःकार्येष्वभूतेषुगुणोपचयेनमूर्त्युपचयदर्शनात्। नतावत्सरमाणवोरूपतोग्रह्यंतेकिंतुकार्यद्वाराकार्यंचनगंधादीभ्योभिन्नं यतोतदनधारनयारसुत अपितुतदात्मकं तथाचतेषामुपचयेनदुपचितदृष्टमितिपरमाणुभिरपितत्कारणैरेवंभवितव्यं तथाचापरमाणुत्वंस्थूलत्वादित्यर्थः द्वितीयंविकल्पंदूषयतिअकल्प्यमानेरूपचितापचितगुणत्वइति अथसर्वेनिर्गुणाइतियपक्षेनकल्पेसर्वेषांस्थूलप्रसंगः तथाप्यतिस्फुटतयोपक्ष्यदूषणांतरमाह। ततोप्यपीति। वायोरूपवत्वेनचाक्षुषत्वप्रसंगइत्यपिद्रष्टव्यं। अपरिग्रहाचात्वंनमनपेक्षानिगदव्याख्यातेनाभाष्येणव्याख्यातं संप्रत्यसूत्रभाष्यसूद्देशोपिकंतंत्रंदूषयति। अपिचवैशि

षिकाइति। द्रव्याधीनत्वंद्रव्याधीननिरूपणत्वं नहिपथागवाश्चमहिषमातंगाःपरस्पराधीनरूपणाःस्वतंत्रानिरूप्यंतेवगुणाद्यधीनोत्ततयोवायुमारयोयथामनधिनिरूपणाःस्वतंत्रानिरूप्यंतएवंनगुणादयोद्रव्यानधीननिरूपणा अपितुयदायदानिरूप्यंतेतदातदाकारणतयैनप्रतीयंतेनतुप्रथगात्मेषामस्तिस्वातंत्र्यंतस्माव्यतिरिच्यंतेद्रव्यादपितुद्रव्यमेवसामान्यरूपंतथातथाप्रथतइत्यर्थः द्रव्यकार्यमात्रंगुणादीनांद्रव्याधीनत्वमितिनत्वादप्यस्मादप्यतिनत्वैरत्यत्याप्तिपरिहरतिभिवप्रत्स्थितेस्थितिनतदधीनोत्पाद्यत्वात्तदधीनत्वमावश्यकंकिंतुतदाकारतांतथाचनव्यभिचारइत्यर्थः शंकतेगुणानांद्रव्याधीनत्वंद्रव्यगुणयोरयुतसिद्धत्वादितियुक्त्येनअयुतसिद्धाश्चाकारिणौविभिन्नाभ्यामाकाराभ्याममगम्यमानौसंबंधावसंबंधौवाचैयधिकरण्येनप्रतिभासेतेयथेहकुंडेदधियथाचागोरश्व इति नतथागुणकर्मसामान्यविशेषसमवायास्तेषांद्रव्याकारतयाकारांतरयोगेनद्रव्यादाकारणेनत्वेनाकारितयाव्यवस्थानाभावात्स्यपयुक्तिस्त्वाचसामानाधिकरण्येनप्रथेत्यर्थः। तामिमामयुतसिद्धिंविकल्पदूषयतित्वयुतयुक्तसिद्धत्वमिति नत्वाप्रग्देशत्वंतदभ्युपगमेनविरुद्धातदत्वाह अप्रथग्देशत्वमिति यदिसंयोगिनोःकार्ययोःसंबंधिभ्यामन्यदेशत्वंयुतसिद्धिःनतोन्यायुतसिद्धिः नित्ययोस्तुसंयोगिनोर्द्वयोरन्यतरस्यवापृथग्गतिमत्वंयुतसिद्धिःनतोन्यायुतसिद्धिः तथाचाकाशपरमाण्वोश्चसंयुक्तयोःयुतसिद्धिःसिद्धाभवतिगुणगुणिनोश्चशौक्ल्यपटयोरयुतसिद्धिःसिद्धाभवति। नहितत्रशौक्ल्यपटाभ्यांसंबंधिभ्यामन्यदेशौशौक्ल्यपटौ सत्यपिपटस्यतदन्यतंतुदेशत्वेशौक्ल्यस्यसंबंधिपटदेशत्वाद्वतन्नित्ययोरात्मकारयोरत्नसंयोगेउभयस्यापियुतसिद्धेरभावान्नहितयोःपृथगाश्रयाश्रितत्वमनाश्रयत्वान्नापिद्वयोरन्यतरस्यवापृथग्गतिमत्वम्मूर्तत्वेनोभयोरपिनिष्क्रियत्वात्नचाजःसंयोगोनास्तितस्याजुत्वानांसिद्धत्वात्तथाह्याकाशमात्मसंयोगिमूर्तद्रव्यसंबंधित्वात्घटादिवदित्यनुमानंपृथगाश्रयाश्रितत्वपृथग्गतिमत्वलक्षणयुतसिद्धिरत्यायुतसिद्धिर्द्वयोरपिनायुक्तेविरोधमाहयनेतित्थापिनसामानाधिक

रणप्रधानुपपादयितुमर्हत्वेवं लक्षणेपिहिसमवायेगुणगुणिनोऽभ्युपगम्यमानेसंबंधेइतिप्रत्ययः नचप्रत्ययःसमानाधिकरणप्रत्ययः
असत्त्वोपाधानायसमवायआस्थीयतेभावभिःसचेदास्तितोपिनप्रत्ययकृतं तत्कल्पनया समवायगोचरःस्यादिरुद्धार्थतात्
गोचरत्वेहिपटेशुक्लइत्येवमाकारस्यात्रतुपटः। शुक्लइतिनचशुक्लयदस्यगुणविशिष्टगुणिपरत्वादेवंप्रत्ययोथिसांप्रतं। नहि
शब्दवृत्त्यनुसारिप्रत्यक्षं नचत्वग्निर्माणवकइत्युपचरितान्निभावोमाणवकः प्रत्यक्षेणदहमानतयाप्रथते। नचायमभे
दविभ्रमः समवायिनिबंधनोभिन्नयोरपीतिवाच्यं गुणादिशब्दानेनदुरवस्थात्तुभभेदस्यस्वरूपमात्रस्याभावात् नत्स्थांत
लेसर्वाभिन्नप्रसंगात्। तदाश्रयस्यानुभेदसाधनस्यतद्विरुद्धतयोत्पानासंभवात् नदिदमुक्तं नस्वदालनेवैप्रतीयमानत्वा
दिति अपिचायुतसिद्धिशब्दोपृथग्युत्पत्तौमुख्यः साचनभभनेद्रव्यगुणयोरसिद्धत्वस्यप्राकसिद्धेःगुणस्यचपश्चादुत्पत्तेः न
स्मात्स्थित्यादोहमित्याहयुतसिद्धयोरिति अप्रभवतुकारणस्ययुतसिद्धिकार्यस्यचयुतसिद्धिः कारणातिरकेणाभावादित्या
शंस्यान्यथादूपपत्तिएवमपीतिसंबंधिद्वयाधीनसभावोहिसंबंधोनासत्येकस्मिन्नपिसंबंधिनीभवितुमर्हतिनचसमवायेनिसः
स्वतंत्रइतिचोक्तमथस्यात् नचकारणसमवायादनन्याकार्यलतिरितिरां क्यं वक्तुमेवंहिसतिसमवायस्यानित्यत्वात्पुरुगनात्का
रणनांवैयर्थ्यप्रसंगः। उत्पत्तौवासमवायस्यसैवकार्यस्यात्तुकिंसमवायेनसिद्धयोस्तुसंबंधेयुतसिद्धिप्रसंगः नचात्वायुत
सिद्धिः संभवतीत्येतदुक्तं ततश्चप्रयुक्तंवैशेषिकैर्युत्कार्यकारणयोरविभागेननियतेनदृष्टांतदेहुरुक्तंस्याद्युतसिद्धाभावसि
द्धाभावस्यैवाभावात्। एतेनाप्राप्तसंयोगयुतसिद्धिरित्यपिलक्षणमनुपपन्नं मात्यदप्राप्तिःकार्यकारणयोःप्राप्तिस्तनयोःसंयोग
एवकस्मान्नभवति। नत्रास्याअसंयोगत्वात्मायायुतसिद्धिर्दुरूक्त्या तथाचसैवोक्तं किमनयापरस्पराश्रयदोषप्रसत्यानवा
त्यासंभवतीत्युक्तं यथुक्तेनाप्राप्तिपूर्विकाप्राप्तिरन्यतरकर्मजोभयकर्मजोवासंयोगोयथास्थाणुश्येनयोः मल्लयोर्वानतंतुपटयोः

२४

संबंधत्वभावात्समात्रस्येतिसंयोगोपिहिसंयोगोभवद्भिरभ्युपेयतेनक्रियाऽन्वेत्यर्थः नचाप्राप्तिपूर्वकैवप्राप्तिसंयोगआत्मा
काशसंयोगेनित्यत्वस्याभावात्। कार्यंचोरभमाहत्रस्यैकस्मिन्क्षणेकारणप्राप्तिविरहाच्चेति। अपिचसंबंधिरूपातिरिक्तसंबंधसि
द्वांतरभेदायलक्षणभेदानुश्रीयते सएवसंबंधव्यतिरिक्तोसिद्धाउक्तंहिपुरस्तादतिरिक्तःसंबंधिभ्यांसंबंधानसंबंधिनोपादयितुमी
दृसंबंधिसंबंधिनानवस्थितिः तस्मादुपपत्त्यनुभावाभ्यांकार्यस्यनकारणादन्यत्वमपीतुकारणस्यैवायं अनिर्वाच्यःपरिणाम
भेदइतितस्मात्कार्यस्यकारणानतिरेकात् किंतेनसंबंधसंयोगस्यसंबंधसंयोगिनिम्नं अनतिरेकात्कस्तयोःसंयोगइ
त्याहनापिसंयोगस्येति विचारसहत्वेनानिर्वाच्यतामस्यापरिभावयन्नाशंकतेसंबंधिशब्दप्रत्ययव्यतिरेकेणेतिनिराक
रोतिनैकत्वेपिस्वरूपबाह्यरूपापेक्षयेति तत्रदनिर्वचनीयानेकविशेषणस्याभेदपेक्षयैकस्मिन्नपिनानाबुद्धिव्यपदेशो
पपत्तेरिति यथैकादेवदत्तःस्वगतविशेषापेक्षयापितापुत्रापौत्रोभ्राताजामातेति निदर्शनांतरमाहयथावेकापि
सतीरेखेतिदार्ष्टांतिकयोजयति तथासंबंधिनोरिति अंगुल्योर्नैरंतर्यस्यासंयोगरचिकुंडयोरोंतरायवर्यसंयोगःकार्य
कारणयोस्तुदात्म्यपिअनिर्वाच्यस्यकार्यस्यभेदविवक्षितत्वासंबंधिनोरितियुक्तं नापिसंबंधिविषयत्वेसंबंधशब्दप्रत्य
ययोरित्यतदप्यनिर्वाच्यत्वादाभिप्रायं अपिचादृष्टवत्क्षेत्रसंयोगात्परमाणुमनसोराद्यंतकर्मकल्पयिष्यते अग्ने
रूर्ध्वज्वलनंवायोस्तिर्यग्गमनमणुमनसोश्चाद्यंकर्मत्यदृष्टकारितानितिवचनात् नचाणुमनसोरात्मनोत्रदेशो
नसंयोगःसंभवतिसंभवेचाणुमनसोरात्मव्याप्तितावत्। परममहत्त्वेचानणुत्वप्रसंगात् नचप्रसंगेदेशावृत्तिन
रयोरात्मनासंयोगोप्रदेशात्वात्मनःकल्पनायाश्चवस्तुत्वेप्यवस्थापनासहत्वादितिप्रसंगादित्याहएवात्मनस्तामिति

वाच॰ किं चान्यद्वाभ्यामणुभ्यां कारणाभ्यां सावयवस्य कार्यस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः संश्लेषः संग्रहो यत एकसंबंधात्
सेऽभिवति तस्यानुपपत्तिरिति अत एव संयोगाद्न्यः कार्यकारणद्रव्ययोराश्रयाश्रयिभावोऽन्यथा नोपपद्यत इति अवश्यं कल्प
२५ नीयः समवायि इति चेत्। निराकरोति न कृतः इतरेतराश्रयत्वात् यद्विभजते कार्यकारणयोर्हीति किं चान्यत् परमाणु
नामिति एकहि परिच्छिन्नास्ते सावयवाः यथापटादयः तथा च परमाणवः तस्मात्सावयवा नित्यास्तु अपरिच्छिन्नत्वे वा काशादि
वत्परमाणुत्वव्याघातः शंकते लक्षणमिति। निराकरोति न स्थूलं हि किंसूक्ष्मत्वपरमाणवो न विनश्यंत परिस्वयभाग
न्न पूर्वस्मिन्कल्पे इदमुक्तं वस्तुभूता करोति श्रीनिभवन्मते उक्तकल्पमाश्रयन्निरांदविनश्यंदतो द्विभागे नैवेति व्याघ्य
स सुवर्णादीनां मविभज्यमानानामपीवेनापि प्रपिंडो विनश्यद्वयवसंयोगस्य यथा नेनाश्वशफाकारतामीयमानः पुरोडाशनामा
पयनो न त्रपिंडो विनश्यति पुरोडाशश्चोत्पद्यते। नहि तत्र पिंडावयवसंयोगा विनश्यंति अपि तु संयुक्ता एव संतः परस्परं
तेननुसमाना अधिकदेशव्यापकाभवंति एवं मनग्निसंयोगे न स्वर्णद्व्यावयवाः संयुक्ता एवाभावमापद्यंते न तु मिथो
विभक्ष्यंते तस्माद्यथावयववत्संयोगविनाशाद्वंतरेणापि स्वर्णपिंडो विनश्यति संयोगांतरेणाद्यंतरेण च स्वर्णद्र
व्यं उपजायते एवमंतरेणाप्यवयवसंयोगविनाशं परमाणवो विनश्यंति। अन्ये चोपत्यं त इति सर्वमिव दातं समुप्रेत्य
य उभयहेतुकेऽपि तत्रा प्राप्तिः अवांतरसंगतिमाह वैशेषिकराद्धांत इति वैशेषिकाः नाशिकता हि परमाण्वाकाशादिका
लमनसां सामान्यविशेषसमवायानां च गुणानां च केषांचित् सत्त्वमभ्युपेत्य शेषाणां नित्यविनाशमुपयंति ते नार्धतु
वैनाशिकास्तेन तद्रूपन्यासो वैनाशिकत्वसाम्येन सर्ववैनाशिकत्वमारचयतीति तदनंतरं वैनाशिकमतनिराकरणमिति॥
अर्धवैनाशिकानां स्थिरभाववादिनां समुदायारंभ उपपद्यतामपि क्षणिकभाववादिनां तु कथमित्याह। समुदायारंभ

उपपद्यतामपि क्षणिकभाववादिनां तु असौ दूरापेत इत्युपपादयिष्याम इत्येनेनं तरामित्युक्तं तदिदं दूषणाय वैनाशिकमतमुप
न्यसितुं तत्प्रकारभेदमाह सर्वविद्वप्रकार इति वादि वैचित्र्यात् तत्र केचित्सर्वास्तित्वमेव राद्धांतं प्रतिपन्नाः केचित् ज्ञानमात्रा
स्तित्वं केचित्सर्वशून्यतां अयं तत्राभिप्रायः तासर्वज्ञानां तत्त्वप्रतिपत्तिभेदेन संभवति न त्वसौ करुणानदस्येनेद परितापेणादिवि
यभेदाद्धीनमध्यमोत्कृष्टधियो हि शिष्या भवंति न त्वयं हीनमतयः सर्वास्तित्ववादेन तदाशयानुरोधात् मध्यमतयाम्नवतार्य
तयेतु मध्यमास्ते ज्ञानमात्रास्तित्वेन स्वल्पतामवतार्य तये तु प्रकृष्टमतयस्तेभ्यः साक्षाद्वस्तुशून्यतास्तत्त्वं प्रतिपाद्यते यथोक्तं
बोधिचित्तविवरणोपदेशना। लोकनाथानां सत्त्वाशयवशानुगाः भिद्यंते बहुधा लोके उपायैर्बहुभिः पुनः गंभीरोत्तानभेदे
न क्वचिद्वोभयलक्षणा भिन्नापि देशना भिन्ना शून्यताद्वयलक्षणेति यद्यपि वैभाषिकसौत्रांतिकयोरवांतरमतभेदोऽस्ति
तथापि सर्वास्तितायामस्ति संप्रतिपत्तिरिति एकीकृत्य उपन्यासः तथा च त्रित्वमुपपत्ति पृथिवी खरस्वभावा अपस्नेहस्वभावः अग्नि
रुष्णस्वभाव वायुरीरणस्वभावः ईरणं प्रेरणं भूतभौतिकास्तु क्षितिचत्तैतिकानाद रूप्यति रूप्यंते एभिः रूपं तदिति चेति।
अत एव सविषयाणीन्द्रियाणि रूपस्कंधो यद्यपि रूप्यमाणपृथिव्यादयो बाह्यास्तथापि कायस्थित्वात् इंद्रियसंबंधाद्वाभ्यंतरा
द्ध्यात्मिकः विज्ञानस्कंधो हमित्याकारो रूपादिविषय इंद्रियादिजन्यो दृश्यमानो वेदनास्कंधो यामिमामिया तु भयविषयस्प
र्शः सुखदुःखतद्रहिताविशेषा वस्तुनि तस्याप्यते सा वेदनास्कंदः स्कंधसंज्ञास्कंधः। सविकल्पप्रत्ययः संज्ञासंसर्गयोग्यप्र
तिभासो यथा दंडिकः कुंडली गौरो ब्राह्मणो गच्छतीत्येवं जातीयकः संस्कारस्कंधो रागादयः क्लेशा उपक्लेशाश्च मदमानादयः धर्माध
र्मौ चेति तदेतेषां समुदायः पंच स्कंधी तस्मिन्नुभयहेतुकेऽपि तिबाह्यं पृथिव्याद्यणुकेषु भौतिकसमुदायरूपविज्ञानादिस्कंध
हेतुके च समुदाय आध्यात्मिके अभिप्रेयमाणे तदप्राप्तिः स्वस्य समुदायस्य प्राप्तिःकुतः समुदायिनामचेतनत्वात् चेतनो हि कुलालः

बोध०२ सर्वमिदंअणुपसंहृत्य समुदायात्मकं घटमारचयन् दृष्टो न सत्सु तेष्वदंडादिष्वापि विदुष्यि कुलालेश्वरमचेतना अमी दंडादयो आयत्त
२६ आनुघटमारचयंति नचासति कुविंदे तंतुवेमादयः पटायंते तस्मात्कार्योत्पादस्तदनुगुणकारणसमवधानं धीमत्स्तदभावेन समवाप्ति
कार्योत्पादेन गुणं च न कारणं समवधानं चेतनप्रेक्षाधीनं समस्तां चेतनप्रेक्षायां न भवितुमुत्सहंत इति कार्योत्पत्तिश्चेतनप्रेक्षा
धीनत्वव्यापकनिरुद्धोपलभ्यां चेतनानधिष्ठितेभ्यः कारणेभ्यो व्यावर्तमाना चेतनाधिष्ठितत्व एवावतिष्ठत इति प्रतिबंधसिद्धिः य
थोक्तं आह्लाचेतनाधीनैव कार्योत्पत्तिरस्ति तुविरं चेतनं तद्धि द्रियादिविषयसंस्पर्शसिद्धमिज्ञलतम कारणचक्रं यथा यथा।
कार्याय पर्याप्तं तथा तथात्र कारायदृचेतनानि कारणान्यधिष्ठाय कार्यमभिनिर्वर्तयतीति तत्राह विज्ञाभिज्ञलनस्य च समुदा
यस्यि अधीनत्वात्। न खलु बाह्याभ्यंतरसमुदायसिद्धमंतरेण चित्ताभिज्वलनं नतस्तुतामिच्छकदुरुतरमितरेतराश्रयमावि
शेदिति नच प्राग्भावीयाच्चित्ताभिज्वलिरजरसमुदायं घटयति घटनसमये तस्याश्चिरातीतत्वेन सामर्थ्यविरहात्। अस्मद्राद्यांतं
वरन्यसचेतनस्याकुः प्रशासितुर्वा स्थिरस्य संघातकर्तुरनभ्युपगमात्। कारणविन्यासभेदं च व्यतिरेकावंतरेण तद्विन्यास
भेदं वेदितुमर्हति न च क्षणिकोऽन्वयव्यतिरेककालानवस्थायी ज्ञातुमन्वयव्यतिरेकानुत्सहते अत उक्तं स्थिरस्येति विद्या
नुकर्ताभवति। यदुच्यते। असमवहितान्येन कारणानि कार्यं करिष्यंति परस्परानपेक्षाणि कृतमत्र समवधापयित्राचे
तनेनेत आह निरपेक्षत्वं च अभ्युपगमेचोति यदुच्यते नास्त्यालयविज्ञानमहंकारस्पदं पूर्वापरानुसंधातृ तदेव कारणानां प्र
तिसंधाता भविष्यतीति तत्राह अथाप्यस्यापीति तत्त्वत्वे कं यदि स्थिरमास्थीयते तदा नामांतरेणात्मैव अथ क्षणिकं उक्त
दोषापत्तिः न च नत्त्वं तानः यतस्तस्य तेनामांतरेणात्माभ्युपगमो नित्यत्वे च विज्ञानौ एवं तस्य क्षणिकमेव वस्तु उक्तो आपत्तिः।
आश्रोरतेऽस्मिन्कर्माणुशभावासनादत्याशयः आलयविज्ञानं तस्यापि च प्रवृत्तिः समुदायिनां व्यापारो न च क्षणिकानां व्यापारो
युज्यते व्यापारो हि आधारदेशाश्रयात्कारणं स्वतोऽप्रसिद्धत्वेनाधारवता भावात् पूर्वं आधारसमये च भवितव्यं अन्यथा २६

कारणत्वाश्रयत्वयोरयोगात्। न च समसमययोरस्ति कार्यकारणभावो नापि भिन्नकालयोराधाराधेयभावस्तथा च क्षणिकत्वाभ्यु
पगमो वेति क्षणिकत्वहानिरित्याह। ॥ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्। यद्यपीति अयमर्थः संक्षेपतोऽस्ति
प्रतीत्यसमुत्पादलक्षणं उक्तं बुद्धेन इदंप्रत्ययफलमिति उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता धर्मस्थिति
ताधर्मनियामकता प्रतीत्यसमुत्पादानुलोमतेति। अथ पुनरयं प्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यां भवति हेतूपनिबंधतः प्रत्य
योपनिबंधतश्च स पुनर्द्विविधो बाह्य आध्यात्मिकश्च तत्र बाह्यस्य प्रतीत्यसमुत्पादस्य हेतूपनिबंधः यदिदं बीजादंकुरोऽङ्कु
रात्पत्रं पत्रात्काण्डं काण्डान्नालो नालाद्गर्भो गर्भाच्छूकः शूकात्पुष्पं पुष्पात्फलमिति असति बीजेऽङ्कुरो न भवति यावदसति पुष्पे फलं
न भवति। असति बीजेऽङ्कुरो भवति यावत्पुष्पे सति फलमिति तत्र बीजस्य नैवं भवति ज्ञानं अहमंकुरं निर्वर्तयामीति अंकुर
स्यापि नैवं भवति ज्ञानं अहं बीजेन निर्वर्तित इति एवं यावत्पुष्पस्य नैवं भवति अहं फलं निर्वर्तयामीति फलस्यापि नैवं भवति अहं पुष्पेण
अभिनिर्वर्तितमिति नत्वास्ति च बीजे सति बीजादीनामसत्यपि चाभिन्नस्मिन्नधिष्ठातरि कार्यकारणभावनियमो दृश्यते उक्तो हेतूपनि
बंधः प्रतीत्यसमुत्पादस्योच्यते प्रत्ययो हेतूनां समवायः हेतुं हेतुं प्रत्ययंते हेत्वंतराणीति तेषां मयवानां भावः प्रत्ययः समवाय
इति यावत्षण्णां धातूनां समवायाद्बीजहेतुरंकुरो जायते तत्र पृथिवीधातुर्बीजस्य संग्रहकृत्यं करोति यतोऽङ्कुरः कठिनो भव
ति। अब्धातुर्बीजं स्नेहयति तेजोधातुर्बीजं परिपाचयति वायुधातुर्बीजमभिनिर्हरति यतोऽङ्कुरो बीजान्निर्गच्छति। आकाश
धातुर्बीजस्यानावरणकृत्यं करोति ऋतुरपि बीजस्य परिणामनां करोति तदेतेषां अविकलानां धातूनां समवाये बीजे रोहत्यंकुरो जाय
ते तत्र पृथिवीधातुर्बीजस्य संग्रहकृत्यं करोमीति यावदृतोर्नैवं भवत्यहं बीजस्य परिणामं करोमि। अंकुरस्यापि नैवं भवति अहमे
भिः प्रत्ययैर्निर्वर्तित इति तथाध्यात्मिकः प्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यां भवति हेतूपनिबंधतः प्रत्ययोपनिबंधतश्च तत्रास्य हेतूपनि

वा॰१० बंधो यदि ह्यविद्या न स्यान्नासंस्काराः एवं यावज्जातिर्न स्यान्न जरामरणादीनि अविद्यायां त्वासत्यामेव संस्कारा एवं यावज्जात्यां सत्यां जरा-
२७ भविष्यन्नैव जरामरणादय उदपत्स्यन्त तत्राविद्याया नैवं भवत्यहं संस्कारानभिनिर्वर्तयामीति संस्काराणामपि नैवं भवति वयमविद्ययाभिनि-
र्वर्तिता इति एवं यावज्जात्या अपि नैवं भवत्यहं जरामरणाद्यभिनिर्वर्तयामीति जरामरणादीनामपि नैवं भवति वयं जात्याभिनिर्वर्ती-
ता इति। अथ च सत्स्वविद्यादिषु स्वयमचेतनेषु चेतनान्तरानधिष्ठितेष्वपि संस्कारादीनामुत्पत्तिर्बीजादिष्विव सत्सु चेतनेषु चेतनान्तरा-
नधिष्ठितेष्वप्यंकुरादीनां इदं प्रतीत्य प्राप्येदमुत्पद्यत इत्येतावन्मात्रस्य दृष्टत्वाच्चेतनाधिष्ठानानुपलब्धेः सोऽयमाध्यात्मिकस्य प्रतीत्य-
समुत्पादस्य हेतूपनिबंधः अथ प्रत्ययोपनिबंधः पृथिव्यप्तेजोवाय्वाकाशविज्ञानधातूनां समवायाद्भवति तत्र कार्यस्य
पृथिवीधातुः काठिन्यं निर्वर्तयति। अब्धातुः स्नेहयति कायं तेजोधातुः कायस्याशितपीतं परिपाचयति। वायुधातुः पंचविज्ञान-
कार्यसंयुक्तं साव च मनोविज्ञानं सोऽयमनुमते विज्ञानधातुः पश्चाद्ध्यात्मिकाः पृथिव्यादीधातवोऽभवन्नविकलाः तदा सर्वेषां स-
मवायाद्भवति कायस्योत्पत्तिः तत्र पृथिव्यादिधातूनां नैवं भवति वयं कायस्य काठिन्यादि निर्वर्तयाम इति कायस्यापि नैवं भ-
वति अहमेभिः प्रत्ययैर्निर्वर्तित इति अथ च पृथिव्यादिधातुभ्योऽचेतनेभ्यश्चेतनान्तरानधिष्ठितेभ्यो भवत्येव कायस्योत्प-
त्तिः सोऽयं प्रतीत्यसोऽयं प्रतीत्यसमुत्पादः दृष्टत्वात्तथापि च यः तत्रैतेष्वेव षट्सु धातुषु या एकसंज्ञा पिंडसंज्ञा नित्यसंज्ञा सु-
खसंज्ञा सत्त्वसंज्ञा मनुजसंज्ञा मातृदुहितृसंज्ञा अहंकारममकारसंज्ञा सेयमविद्या संसारानर्थसंभारस्य मूलकारणं
तस्यामविद्यायां सत्यां संस्कारा रागद्वेषमोहा विषयेषु प्रवर्तन्ते तत्र वस्तुविषया विज्ञप्तिर्विज्ञानं विज्ञानाच्चत्वारो रूपिण उपादानस्कं-
धास्तन्मात्रास्तानुपादाय रूपमभिनिर्वर्तते तदैकध्यमभिसंक्षिप्य नामरूपमभिनिर्वर्त्यते शरीरस्यैव कललबुद्बुदाद्यवस्था नामरूपसंमि-
श्रितानीन्द्रियाणि षडायतनं नामरूपेन्द्रियाणां त्रयाणां सन्निपातः स्पर्शः स्पर्शाद्वेदना सुखादिका वेदनायां सत्यां कर्तव्यमेतत्सु- २०

ख्यं पुनर्मा भूदित्यध्यवसानं तृष्णा भवति तत उपादानं वाक्कायचेष्टा भवति ततो भवस्तस्माज्जन्मेति भवोऽधर्माधर्मौ तद्धेतुकः स्कंधप्रादुर्भा-
वो जातिर्जन्महेतुका उत्तरे जरामरणादयः जातानां स्कंधानां परिपाको जरा स्कंधानां नाशो मरणं म्रियमाणस्य मूढस्य मरणं म्रिय-
माणस्य मूढस्याभिष्वंगस्य पुत्रकलत्रादावंतर्दाहः शोकः तदुत्थं प्रलपनं हा मातः हा तात मम पुत्रकलत्रादीति परिदेवना पंचविज्ञा-
नकायसंप्रयुक्तमसाधु अनुभवनं दुःखं मानसं च दुःखं दौर्मनस्यं एवंजातीयकाश्चोपायासाश्चोपक्लेशास्त इमे परस्परहेतुका
जन्मादिहेतुका अविद्यादयोऽविद्यादिहेतुकाश्च जन्मादयो घटीयंत्रवदनिशमावर्तमानाः संगीतितदेतैरविद्यादिभिरासि-
सः संघात इति तदेतदुपपद्यते नन्वत्र कुतः उत्पत्तिमात्रनिमित्तत्वादिति अयमभिसंधिः यत्र खलु हेतूपनिबंधं कार्यं तदन्या-
नपेक्षं हेतुमात्रादेवोत्पादात्। उक्तायं नाम पंचस्कंधसमुदायस्तु प्रत्ययोपनिबद्धो न हेतुमात्राधीनोत्पत्तिरपि तु नाना-
हेतुसंबंधानुभावाच्च चेतनमन्तरेणान्यः संनिधाय पितृतां कारणतामिति युक्तं। बीजादंकुरोत्पत्तिरपि प्रत्ययोपनिबद्धा
विवादाध्यासितत्वेन पक्षनिक्षिप्तत्वाद् दृष्टेन च व्यभिचारो भावे हेत्वाभासमिति प्रसंगेन सर्वानुमानोच्छेदप्रसंगात्। स्यादेतत्।
अनपेक्षाः एवाक्षणक्षणाः क्षित्यादयोंऽकुरमारभंते। तेषां तूपसर्पणप्रत्ययशालस्य परस्परसमवधानं न चैकस्मादेव कारणा-
त्कार्यसिद्धिः किमन्यैः कारणैरिति वाच्यं कारणचक्रानन्तरं कार्योत्पादसिद्धमिति च नास्ति नन्वेकोपि तत्करणसमर्थ इति अ-
न्योदासीनतिष्ठुर्नहि ते प्रेक्षावन्तो येन च मालोचयेयुः अस्मात्कृ समर्थ एकोपि कार्ये इति चरू तेऽतः संनिमित्तेष्वसति किं तूपसर्पण-
प्रत्ययाधीनपरस्परसंन्निधानामादानासु संतु नाम संन्निधातुमीशते तांश्च सर्वकार्यात् प्रतीत्य कार्यमपि न तोलयितुमर्हति। न चैस्य
महिम्ना सर्वकार्यमुत्पादयंत्यपि नानाकार्याणि मिश्रितानि तत्रैव तु अंसामर्थ्यान्न च कारणभेदात्कार्यभेदः सामग्र्यैकत्वात् तद्देर-
स्य कार्यनानात्वहेतुत्वात् तथा दर्शनात्। न च यथांकुरक्षणमात्रापेक्षास्य कार्यं पिजनेर्हेतुतानन्तरक्रमेण ततः पूर्वसर्वदानापेक्षाः। नैष्य

वाच०२ कार्योपजननइति कुसूलस्थत्वाविशेषेपियेन वीजक्षणेन कुसूलस्थेनस्वकार्यक्षणपरंपरयांकुरोत्पत्तिसमर्थो वीजक्षणोजनयितव्यः सोनपेक्षएवबीजक्षणःस्वकार्योपजननेनएवंसर्वएवतदनंतरनंतरवर्त्तिनो बीजक्षणाअनपेक्षाइतिकुसूलनिहितवी
२८ जादवसानत्वात्ः कृषीवलः कृतमयस्यदुःखबहुलेनकृषिकर्मणा येन हिबीजक्षणेनस्वक्षणपरंपरयांकुरोजननीयस्सोस्ति
नपेक्षासौक्षयपर्यन्तमितिनाचेतनाद्धिरंपराकुसूलएवांकुरंकरिष्यतीति तस्मात्परस्परापेक्षाएवांसाकामध्यावापूर्ववृक्षणाकार्यो
पजननेइतिवक्तव्यं यथाहुः नकिंचिदेकमेकस्मात्सामग्र्याःसर्वसंभवइतियत्तेदंसमवधानंकारणानां विन्यासभेदतत्त्वयोजनाभिःप्रेक्षावत्पूर्वकंदृष्टमितिनाचेतनाग्निर्विदुमर्हतितदिदमुक्तं भवेदुपप्रत्यंसंधानः यदिसंघातस्यकिंचित्रिमितमवगम्य
तइति इतरेतरप्रत्ययत्वेपीति इतरेतरहेतुत्वेपीत्यर्थः उक्तमभिसंधिमविद्वान्परिचोदयति नत्वविद्यादिभिरर्थादाक्षि
प्यतइतिपरिहरति अत्रोच्यते यदितावदिति किमाक्षेपउत्पादनमाहोस्वित्ज्ञापनं तत्र न तावत्कारणमत्यानुपपद्यमानंका
र्यमुत्पादयति किंतुस्वसामर्थ्येनतस्माज्ज्ञापनंवक्तव्यं तथाचज्ञापितस्यान्युदुत्पादकंवक्तव्यं नचस्थिरपक्षेपिसंनिपितनो
कश्चिदिति अधिष्ठातारं चेतनमंतरेणमसंभवाति किमंगपुनःक्षणिकेपुत्पादेपुभोक्तुर्भोगेनापिकदाचिदाक्षिप्तेनसंघातः
सतुभोक्तापिनास्तीतिच्छिहरोत्पादितत्वंदर्शयितुमोकुरहितेस्विति अपिचबहुतउपकार्योपिभावेनस्थिताःकार्यजनयं
ति नतुक्षणिकपक्षउपकार्योपिकाउकभावोस्तिसर्वस्योपकारानाश्रयसदत्वात् । क्षणस्याभेपसाद् । अनुपकृतोपकृत
त्वासंभवात् । कालभेदेनवातदुपपत्तौक्षणिकत्वव्याघातात्तदिदमाह आश्रयाश्रयिभूतेष्विति । अयाश्रयिभूतेष्विति अथा
यमभिप्रायइति यद्यपिप्रत्ययोपनिबंधः तत्प्रतीत्यसमुत्पादोभवेद् तदाचेतनोधिष्ठितानपेक्षेतापिनतुप्रत्ययोपनिबंधनो
पितुहेतूपनिबंधनः तथाचकृतमत्राधिष्ठात्राहेतुःसत्तावगत्यैवकारार्थसंधानंकरिष्यतिकेवलइतिभावः अस्त्वेताबंधयाके

२८

वलाद्धेतोः कार्यनोपजायतइति अन्योन्याश्रयप्रसंगोस्मिन्पक्षइत्याशयवानाहकथंतमेवेति संप्रतिप्रत्ययोपनिबंधनंप्रतीत्यसमुत्पा
दमारुह्यचोदयति अथमन्यसेसंघातादेवेति अस्थिरावाभिहिभावःअस्त्वेताबंधयाकेवलाद्धेतोः कार्यनोपजायतइति अन्योन्या
श्रयप्रसंगोस्मिन्पक्षइत्याशयवानाहकथंतमेवेतिसंप्रतिप्रत्ययोपनिबंधनंप्रतीत्यसमुत्पादमारुह्यचोदयति अथमन्यसेस
दासंहतायेवीयंतेक्षयंतेचनपुनरितिस्थिताः केनचित्संभूतत्कायंते तथाचकृतमत्रसंहंत्राचेतनेतिभावः अनाद्यावितिपरस्प
राश्रयंनिवर्त्तयतद्वाविकल्पाद्दूषयतितदापिसंघातादिति । सखलुसंघातसंततिवर्त्तीधर्मादिरूपसंघातनिवर्त्तीधर्माधर्मादिलय
संस्कारसंतानोयथाययंसुखदुःखेजनयंनान्यथेत्युक्तं किंच नानाभासाद्यस्तदेवजनयेत् । आसाद्यवानासाद्यजननेसदैवसुखदुः
खेजनयेत्समर्थस्यानपेक्षत्वसंभवायोगात् असाद्यजननेनदासादनकारणपेक्षाबुभुत्सुपेयः ततयाचनत्रप्रतीत्यसमुत्पादः ।
तस्मादनेनागंतुकानपेक्षस्यसंघातसंतानस्यैवसदृशजननेसदृशविसदृशजननेवास्वभावआस्थेयः तथाचभाष्योक्तंदूषणमि
ति अपिचयद्भोगार्थंसंघातःस्यादिति अप्राप्तभोगस्यहिभोगार्थिभोगमुपकास्तुः तत्साधनेप्रवर्त्ततइतिप्रत्यात्मसिद्धंसेयंप्रवर्त्ति
र्भोगादन्यस्मिन्स्थितभोक्तरिभोगतत्साधनसमयव्याप्तिकल्पतेनास्थिरे नत्वभोगरतंत्यस्मिन्नहिभोग्यस्यकर्त्तरिभोगात् सा
धनसमयव्याप्तिइतिकल्पनेतापत्त्यभोगान्यान्यस्ययेवंमोक्षोपिदृष्टव्यंतत्रबुभुक्षुर्मुमुक्षुश्चेत् । स्थिरावस्थीयेप्राप्तौअनु
पेतहानंअस्थैर्यवाप्रवर्त्तितप्रसंगइत्यर्थः ननुसंघातेःसिद्धेभोक्तुरभावादितिभोक्तुरभावेनचसंप्रवृत्त्युपपत्तेः कर्त्तु
रभावः ततःकर्माभावाच्चसंघातसिद्धिरित्यर्थः । उत्तरोत्तरस्वपूर्वविरोधात् । एवंसूत्रेणसंगतिमस्याहउक्तमेतदिति ।
हेतूपनिबंधनंप्रतीत्यसमुत्पादमभ्युपेत्यप्रत्ययोपनिबंधनःप्रतीत्यसमुत्पादोनोदूषितः संप्रतिहेतुपनिबंधनमपिदूष
यतीत्यर्थः दूषणमाहइदमित्यनिमित्तनिरुध्यमानस्येति ततोभेदोपिकत्वन्निरोधाकरणेसान्निध्यंनिरुध्यमानतांवेनाशिकैःको

रणं विनाशमभ्युपगम्यमानस्येति। न नानदेशेपि कश्चिरोधाकरणं विनाशमभ्युपगमहेतिस्यानिष्टत्वात् तस्मादिनाशयस्तत्वमपि
रनिरुद्धत्वनिरुद्धमानत्वंच कथं निरुद्धत्वं च विवक्षितं तथा चोभयोरप्याभावयस्तत्वादहेतुत्वानुपपत्तिः शंकते अथ भावाभावद इति
कारणस्य हि कार्यसिद्धौ व्याकालासत्यार्थवती न का ऽर्यकालान्तरा कार्यस्य सिद्धत्वे न नत्सिद्धार्थयाः सत्तायाऽनुपयोगादिति भावः
नरेतल्लोकी कदृश्यादृपपत्तिमानस्तस्येतिभ्रान्त्याप्युपभावः। व्यपेण हि कार्यं कुर्वतो लोकदर्शने तथान्वस्थिरत्वं तदप्यनुलोक
विरोधान् पुनःशंकते अथ भानरूपेनियथाहुः भूतिर्येषां क्रिया सैव कारकं सैव चोच्यत इति भवत्वेवं कापाडः कृतातथा
पिक्षणिकस्य न कारकत्वमित्याह तथापि नैवोपपद्यते क्षणिकस्य कारणभावम् त्वर्णकारणं हि घटादय स्वरूपकारयश्च त्वद
र्णात्म नोश्च न तत्तनेयन्दितु न कार्यसमये कारणं सत्तत्कथं तेषां तदात्मानानुभवः न च कारणसादृश्यं कार्यस्य न तु तादात्म्यमिति वा
च्यं असति कस्यचिदप्यनुगमे सादृश्यस्याप्यनुपपत्तेः। अनुस्यूतमेवान्तरे च कारणं तथा च तस्य कार्यतादात्म्यमिति सिद्धमक्षणिकत्व
मित्यर्थः सर्वथा वै तु क्षण्येतु हेतुफलभावः संतुपययाचपिश्रासइतिभ्रमित्वसंगइत्याह विने वचेति न च तन्भाववाभावो नियामकः।
तस्येकस्मिन्क्षणेशक्यग्रहत्वात् कारणान्मकृतकारणत्वं चाक्षणिकत्वहानेरस्मात्यक्षयान प्रसंगाच्चेति भावः अपि चोत्पादनि
रोधयो विकल्पत्रयेपि वस्तुनः शाश्वतत्वप्रसंगइत्याह अपि चोत्पादनिरोधौ नामेति पर्यायित्वापादनेपि नित्यत्वासासानं मंतव्यं व
स्तूत्पादनिरोधाभ्यामसंस्पृष्टमिति वस्तुनः शाश्वतत्वप्रसंगः संसर्गेप्यासत्वासंसर्गानुपपत्तेः सत्वाभ्युपगमे शाश्वतत्वमित्य
पि द्रष्टव्यं शेषं निगदव्याख्यातं प्रतिज्ञोपरोधो योगपद्यमन्यथा॥ नीलाभासस्य हि चित्तस्य नीलालंबनप्रत्ययात् नीलाकारता
समानंतरप्रत्ययात्पूर्वविज्ञानाद्बोधरूपत्वात्। चक्षुषोधिपतिप्रत्ययात् रूपग्रहणप्रतिनियमः आलोकाद्धेतोः स्पष्टार्थता एवं सु
खादीनामपि चैतानां विज्ञाभिन्नहेतुजानां चत्वार्येतान्येव कारणानि स्वयं प्रतिज्ञा च दुर्विधान् हेतून् प्रतीत्य चित्तचैता उत्पद्यंत २९

इत्यभावकारणत्वउपरुध्येत अथोतरक्षणोत्पत्तिं यावत्कारणस्थितिरिति उत्पत्तिःउत्पद्यमानत्वात् भावादभिन्नात्था चक्षणिकत्वहा
निरितिप्रतिज्ञाहानिः। प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्। भावप्रतियासंख्यानबुद्धिः प्रतिसंख्यानयानिरोधः
संतमिममसंतं करोमि त्वेवमाकारतया च बुद्ध्या भावप्रतिपन्नं कृते नाप्रतिसंख्यानिरोधोपि आख्यातः संतानगोचरो वानिरोधः संतानि
क्षणगोचरो वा तत्संतानस्य निरोधः संभवति हेतुफलभावेन हि व्यवस्थिताः संतानिन एकोदयव्ययधर्माणः संतानः तत्रयोसावंत्यः
संतानीयं निरोधा संतानोच्छेदे न भवितव्यं स किं फलं किंचिदारभते न वा। आरभते चेत्तथा च न संतानोच्छेदः। अनारंभे तु अवेरं
त्यः किंतु स्यादसत्। अर्थक्रियाकारिताया सत्तालक्षणस्य विरहात्। तदसत्वे तज्जनकमप्यजनकत्वेनासदित्यनेन क्रमेणासंतः
सर्व एव संतानिन इति न संतानो निरगमसत्त्विति चरोवा न तावत्संतानस्य निरोधः संभवति हेतुफलभावेन हि व्यवस्थितानां
ना रूपादिविज्ञानोत्पत्तौ संतानोच्छेदप्रसंगः कथंचित्सारूप्याविभागप्यंततः सन्निपातदर्शनादिति संतानोच्छेदः तदेतेनाभि
नाहसर्वेष्वपि संतानेषु संतानिनाम विच्छिन्नहेतुफलभावेन संतानविच्छेदस्यासंभवादिति नापि भावगोचरो संभवतः। प्र
तिसंख्याप्रतिसंख्यानिरोधौ न त्वनाचदुत्पन्नमात्रा यत्नस्वभावस्य प्रतिसंख्याविरोधः संभवति त्यस्य पुरुषप्रयत्नापेक्षाभावा
दित्यस्येवदूषणं तथापि दोषांतरमुक्तं यस्मिन्नपि निरोधव्रते नहिंसा नामेति यतो नित्यत्वयोविनाशो न संभवतो निरूपाख्य
मपि न संभवतीति न चात्मपि नारूपेण भावस्य नष्टस्य पुनः प्रत्यभिज्ञायमानत्वात् निरन्वयविनाशाभावे हेतुमाह सर्वास्वप्यवस्थास्विति
यदनुगतरूपं तत्परमार्थसद्भावः अवस्थास्तु विशेषास्ता उपजनापायधर्माणः। तासां च तासामनिर्वचनीयतयास्वतेनापरमा
र्थसत्त्वं अत एवप्रत्युत्पन्नतासांतत्वे तस्य च सर्वत्र प्रत्यभिज्ञायमानत्वादविनाशयति। अन्यस्मात्तत्त्वो विनाश नावस्थानां
निरन्वयो विनाश इति तासांतस्माद्वस्तनमन्यास्ति यत्रयास्तनाः न परमार्थसत्त्वं अन्येप्यननुरूपं स्वभिज्ञानाभ्यस्यचंतत्वात

वाच॰२ तल्पतितनष्टस्यस्वंद्विरोः किमस्तिरूपमत्वनिश्चयमिज्ञायमानं येनास्य नभिन्निरन्वयो नाशः स्यादिति ह । अस्य प्रतिकूलिति अभि
३० ज्ञानास्त्वपीतिनत्र्यपि च नतो मंतेज सामार्तंडमंडलमेघवृत्तायनियतइत्यनुमेयं मरादीनामपिनामविच्छेददर्शनात् । शक्यं तत्रव
कुंठत्वविं दीपनाय भावानभिधेयन । विकल्पेपि तनौविंध्यवस्थितस्यात्वयौ बुधौ । तस्मात्प्रकस्थिरदृष्टिनिरन्वयो नाश इति सिद्धं उभयथा
चदोषात् । परिकरः सामग्रीसमक्षज्ञानस्य यमनियमादिश्रवण मनादिश्च मार्गः क्षणिकनैरात्म्यादिभावना । अतिरोहिता
र्थमन्यत् । आकाशविशेषादयोन्यत्र चेद्यत्रवृत्तयोमितिवद्गामाण्यविप्रतिपत्तिज्ञानविप्रतिपत्तिशब्दगुणानुमेय तथाकाश
स्य वक्तव्यं तथाहि जातिमत्वे न सामान्यविशेषसमवायेभ्यो विनिर्मुक्त शब्दस्य स्पर्शवत्वे सति बाह्यैकेंद्रियग्राह्यत्वेन गंधादि
वद्गुणत्वमनुमितं न च प्रयमात्मगुणो बाह्येंद्रियगोचरत्वात् गंधवत् अत एव न मनोगुणः न दुर्गुणानामप्रत्यक्षत्वात् न च
पृथिव्यादिगुणस्तद्दंष्ट्रादिस्थाह चर्यानुपलब्धेन स्याद्गुणत्वेनागंधादिवत्साधारणेंद्रियग्राह्यापंद्यमनुमाप यतितदा
काशं पंचमं भूतं वक्तिति । अपि च वरणाभावमाकाशमिच्छंतइति निषेधनिषेधादिकरणमाकाशं वस्तिति अतिरोहि
तमन्यत् । अनुस्मृतेश्च विभज्यते अपि च वैनाशिकः सर्वस्य वस्तुन इति यस्तु सत्यथे तस्मिन् उपलब्धस्मर्त्रोरन्यत्वे
पिसंतानायां संततौ कार्यकारणभावात्स्मृतिरुपपद्यत इति मन्यमानो न परितुष्यति तं प्रति अभिज्ञासमाज्ञानप्रत्यक्ष
विरोधमाह अपि च दर्शनस्मरणयोः कर्तरिति । तत्राह मद्राक्षीदिति प्रतीयादइति अहंस्मरामस्तद्राक्षीदित्यर्थः प्रत्यभि
ज्ञाप्रत्यक्षविरोधप्रपंचस्तु तदः अजन्मन आबाल्याद् दुःखासात् आमरणादित्यर्थः न च सादृश्यनिबंधनं प्रत्यभिज्ञानं पूर्वो
पूर्वक्षणदर्शन एकस्याभावे न वस्तुपपन्नेः शंकते न न इदं सदृशमिति प्रत्ययान्तरमेवेति अयमर्थो विकल्पप्रत्ययो यं विकल्प
श्च तत्त्वाकारं ब्राह्मतया व्यवस्यति नतु तत्तत्पूर्वपरीक्षणेन तयोः सादृश्यं ग्राहकाति न कथमेकस्यानेकदर्शिनः स्थिर
३०

स्य प्रसंग इति । निराकरोति न नेनेदमिति भिन्नपदार्थापादानादिति नानापदार्थत्वाभिन्नवाक्यार्थविभासः । तावदयं विकल्पः
प्रथमे न नेन त्वा वापूर्वा न प्रत्ययं इति ब्रुवाणः स्वसंवेद्यत्वबाधेन न चैकस्य ज्ञानस्य नानाकारणत्वं संभवति एकविरोधात् न चैतावं
स्य च ज्ञानातियुक्तं तथा सति भिन्नाकारज्ञानानां समानाकोपमस्य परस्परवार्ताज्ञानाभावाज्ञानोत्थेयं न स्यात् । एवं तावं स्यात्
तत्प्रतिक्षेपणात्सादृश्यगोचरत्वं ज्ञानस्य एकस्य व्यं न चैतत्पूर्वापरदृष्टानवस्थापितमेकांत विज्ञानार्थं विनेतिक्षणभंगभंगप्रसंगः
यद्युपेतास्ते तास्मिन् विकल्पेन तदिदं सदृशमिति पिदङ्गप्रयोगः न विहं न तदं नाल्पदो पदार्थातियावसादृश्यमिति विवक्षितं पि तेन
माकारतां ज्ञानस्य कल्पितेति तत्राह यदाहलौकप्रसिद्धः पदार्थ इति एकाधिकरणविप्रतिपत्तिद्रुकथमद्वयाभ्युपगमेपिवा
दः तत्रैकः स्वपक्षसाधनप्रत्यन्यश्च तत्साधनं दूषयति न चैतत्सर्वगसतिविकल्पानां बाह्यालंबनत्वे सति च लोकप्रसिद्धपदा
र्थकत्वभवितुमर्हति ज्ञानाकारत्वेहि विकल्पप्रतिभासिनां नित्यत्वानित्यत्वादीनां एकार्थविषयत्वाभावात् । ज्ञानानां च धर्मि
णां भेदात्र विरोधः तस्मान्नित्यं च बुध्यति सत्यं च ब्रुवाणो विप्रतिपद्येते न च सौ लौकिकार्थानानित्यशब्दग्रहणनिबिडत्वं वि
वक्षितत्वादनित्यशब्दं प्रयुंजानो लौकिकार्थनित्यशब्दमात्मनि प्रयुंजाने न विप्रतिपद्येते तस्मादनेन स्वपक्षं वदति श्राप यितुं
तापरपक्षसाधनं च निराचिकीर्षता विकल्पानां लौकिकसिद्धप्रसिद्धार्थकता च बाह्यालंबनता च वक्तव्या यदपुनरद्विविधाहि वि
कल्पानां विषयो ग्राह्यश्च व्यवसेयश्च तत्राकारो ग्राह्योध्यवसेनायस्तु बाह्यस्तथा च पक्षप्रतिपक्षपरिग्रहलक्षणा विप्रति
पत्तिः प्रसिद्धपदार्थकत्वं चोपपद्यत इत्यत आह । एवमेवार्थ इति निश्चितं यत्र दवनस्यनैतानात्स्वमानं वस्तु अपि त्वमा
त्मनः केवलं स्यापयेत् । अयमभिसंधिः कथमध्यवसेयता बाह्यस्य यदि ग्राह्यतानात्वे विभ्रं यथा न्यासान्तरं नन्व कानर
वस्त्वप्रतिभासेन तथापि विषयेनप्रवृत्तिरिति अथ विकल्पाकारस्य कोयमर्थावसायाः किं करणम हो योजनं कृतारोपयति ।

वा॰ क॰ न तावत्करणं न खलु दृश्यकर्तृशकं नहि ज्ञातुः सहस्रमपि शिल्पिनः कटं परयितुमीशा तेन वां तदभ्यासेन योजयितुमपि तत्त्वा
३३ सति युक्तं स्थिरत्वं स्यात्। न चास्ति आरोपोपि किं दृश्यमाणे बाह्ये उतादृश्यमाणे तदा किं विकल्पेनाहोतत्समयजेनाविकल्प
केन तावद्विकल्पोभिलापसंसर्गयोग्यगोचरः अर्थाभिलापानां समयं विलक्षणे देशकालानुगमं नं गोचरयितुमर्हति। यथा
हुः शाब्दसमयोप्यस्मात्कस्वादीनामनन्यथानैषां मनः स्वसंवित्तिर्नाभिलाप्या तु पंगिणि तिनवनत्समय एवाविनानिर्वि
कल्पके न दृश्यमाणे बाह्ये विकल्पेनागृहीतेन च विविक्तः स्वसंवेदनं संतं विकल्पं किं च सुसंतं स्वाकारं गृहीतापश्चाद्दास
मारोप इति अथ यदा स्वाकारं गृह्णाति तदैवारोपयति नावत्क्षणिकत्वात्क्रमविरहिणो ज्ञानस्य क्रमवर्तिनोधारणारोपणक
स्य तेन तस्मात् परं स्वाकारमनर्थं गृह्णाति तदेवार्थमारोपयति नादेवार्थमारोपयतीति कल्प्यं न चेतं युक्तं स्वाकारोहि स्वसं
वेदनप्रत्यक्षतयाति विशदो बाह्यं च सारोप्यसमूक्षणाभ्यां विशदनिभ्रुत्वादभिमुखप्रकाशितः हंत तर्हि मिलो स्वतन्त्रएवानन भेदाग्रही
तइतिय त्र कथं न्वयवर्तेनांविशेषात् एतेन ज्ञानाकारस्यैव लोकस्यापि ख्यातस्य समारोपितः तस्मात्स्फुटकृतं तोन्यद्दृश्यमानं व
हुप्रलापितमात्मनः स्थापयोहिति अपि तु सादृश्यनिबंधनः संव्यवहारस्तेन दंसदृशमित्येवमाकारबुद्धिनिबंधनोभवेत्॥
×मविपुदंसतोन्यदेवसादृश्यतुस्वाकारो समारोपितो न च भेदाग्रहणमात्रेण विधानं च पथार्थं तथाप्यत्र स्मात्कतादपि वत
ह्यनाग्रेवाद्याप्यव्यस्खल× ॥ न तु तदेव हमित्याकारबुद्धिनिबंधन इत्याह न चायं सादृश्यात्व्यवहार इति ननु आल
ह्लिसादृश्याद्भ्रान्तिं सादृश्यबुद्धौ तन्मावबोधनमनिबंधनसंव्यवहारोदृष्टस्तथा तथाप्यभिविष्यतीति पूर्वपरितोषेणाहं
अवहृष्यकदाचिद्दात्यवस्तुनीति तथाहि विविधजनसंकीर्णगोपुरेण पुरं निविश्यमानं नरां नरेभ्य आत्मनिर्धारणाया
साधारणं चित्रं स्थिरहरमुपहसंति पश्यन्ति पृथक्जना अपि ति नासतोदृष्टत्वात्। इत्यसा उपचीवे वैनाशिकत्वमवाप

३२

इति अस्थिराकार्येसिनि सिद्धं तो वैनाशिकाः अर्थाद्भावाभावोत्पत्तिमाहुः उक्रमेतदयुक्तत्वान्निरपेक्षात्कार्योत्पत्तौ रूपकर्मवैयर्थं
सापेक्षतयां च क्षणिकपक्षे ऽर्थादर्थाभावाद्वावोत्पत्तिः उपविश्य तदृश्यर्थः न केवलमर्थादापद्यते दर्शयन्निह कुतानुभपमस्थपत्रादुर्भावागिति।
एतद्विसज्जने विनष्टा विनष्टात्किलेति किलकारो अनिच्छायं कूटस्थ चेत्कारणकार्यमुत्पन्नोपि सर्वं सर्वं तदैवेनां अयमभिसंधि कूटस्थो
हि कार्यजननस्वभावो वास्यात् अतत्स्वभावो वा। सचेत्कार्यजननस्वभावः ततो यावन्ति तत्कार्यं कर्तव्यं तावन्त्सहसैव कुर्यात्तस्य स
र्थस्यक्षेपायोगात्। अतत्स्वभावत्वे तु न कदाचिदपि कुर्यात् यदुच्येत समर्थोपि क्रमवत्सहकारि सचिवः क्रमेण कार्याणि करोति
ति तदयुक्तं विकल्पासहत्वात् किमस्य सहकारिणः किंचदुपकारमारभंते वा अनाधाते तदुपकारितया सहकारिणो नापेक्षरन्
अनाधानोपि तन्निश्चमभिन्नं वोपकारमारभेयुः अभेदे तदेवाहितमिति कौटस्थ्यं हन्येत भेदे उपकारस्य तस्मिन् क्षितिकार्य
स्यभावादसति सत्यपि कूटस्थकार्यस्यानुत्पादादन्वयव्यतिरेकाभ्यामुपकारएव कार्यकारिणभाव इति नार्थक्रियाकारिभावः न
दुक्तं वर्षेतिपाभ्यां किं वोमस्य चर्मण्यस्ति तयोः फलं चर्मोपमश्चेत्सोनित्यः स तु अर्श्वेदसत्फलमिति तथा चाकिंचित्करादपि वेकूटस्थ
त्कार्यं जायते सर्वं सर्वस्मात् जायेतेति सत्कांडउपसंहरति तस्माद्भावग्यक्षोप्प इति तत्रेदमुच्यते नासतोदृष्टत्वादिति नो
भावात् कार्योत्पत्तिः कस्मात् अदृष्टत्वात् नहि शशविषाणदंकुरादीनां कार्याणामुत्पत्तिर्दृश्यते यदि भावाद्भावोत्पत्तिः स्यात
तो भावत्वाविशेषाच्छशविषाणादंकुरादीनां उत्पत्तिः न स्वभावोविशेष्यते विशेषणयोगे वा सोपि भावः स्यात्तत्वविरूपस्य इत्यर्थः।
विशेषणयोगमप्यभावस्याभ्युपेत्याहनाप्यभावः कस्यचिद्धेतुरिति अपि च यतो न तिनं न तस्य विकारो यथा घटशरावोदंचना
दयो हेम्नानन्विता न हेमविकारः अनन्विताश्चैते विकाराञ्जभावेनतस्मा आभावविकाराः विकारस्तु भावस्य तेनान्वितत्वाद्धिला
ह अभावाद्भावोत्पत्तिरिति अभावकारणवादिनो वचनमनुभाष्य दूषयति तदुक्तमिति स्थिरोपि भावः क्रमेण सहकारिसम

कथानाक्रमेण कार्याणि करोतीति न चानुपकारकाः सहकारिणः स चास्य सहकारिभिराधीयमान उपकारो न भिन्नो नाप्यभिन्नः किं त्वनि
र्वाच्य एवानिर्वाच्यं च कार्यमप्यनिर्वाच्यमेव जायते न चैतावता स्थिरस्याकारणत्वं तदुपादानत्वात्कार्यस्य रज्जूपादानत्वमिव भुजंग
स्येत्युक्तं तथा च श्रुतिः मृत्तिके त्वेव सत्यं अपि च येऽपि सर्वे तोविलक्षणानि वस्तुसंत्यास्थितत्वेषामपि विकल्पितैवाजजातीयेभ्योंऽकुर
जातीयान्येव जायंते कार्याणि न तु कमलकजातीयानि नहि बीजादीनां परस्परमेकैकस्य चास्ति तत्त्वैलक्षण्ये कश्चिद्विशेषः न च
बीजांकुरत्वे सामान्यं परमार्थसत्ययेन तयोर्भाविकः कार्यकारणभावोऽभिमतः तस्मात्कल्पितेनाकारेण स्वलक्षणोपादानादीजजाता
यातथाविधस्यांकुरजातीयस्योत्पत्तिनियम आस्थेयोऽन्यथा कार्यहेतुकानुमानोच्छेदप्रसंगः दिङ्मात्रमत्र सूचितं प्रपंच
वस्तु ब्रह्मसाक्षात्स्य मीमांसान्याय कारकयोः कृत इति नेह प्रतन्यते विस्तरभयात्। उदासीनानामपि चैवं सिद्धिः भाष्यम
प्रत्यक्षभगनानाभ्रवउपलब्धेः। प्रत्यधिकरणसंगतिमाह एवमितिमाहरेवमिति बाह्यार्थवादिभ्यो विज्ञानमात्रवादिनामपग
भिन्नेन तयाविशेषमाह केषांचित्तिलेति अथ प्रमाताप्रमाणं प्रमेयं प्रमितिरिति हि चतस्रु विधासु तत्त्वसमाप्तिरासामन्यतमा
भावेऽपि तस्याव्यवस्थानात् तस्मादनेन विज्ञानस्कंधमात्रं तत्त्वं व्यवतिष्ठाप्यविषतांचतस्रो विधाःएषितव्याः तथा च बाह्यज्ञान
स्कंधमात्रत्वं न सन्निसंभवो विज्ञानमात्रं च वस्तोऽविधा श्रेति भवता आह नास्मिंश्च विज्ञानवादे कुत्रारूढेन रूपेणेति यद्यप्य
तुभ वा गास्तौ तुभा ओ तुभ व वा तुभवनं चतथापि बुध्यारूढेन बुद्धिकल्पितेनां वस्यएवैषप्रमाणप्रमेयफलव्यवहारः अत्र
मानव्यवहारश्चेत्यपि द्रष्टव्यं न पारमार्थिक इत्यर्थः एवं च न सिद्धसाधनं नहि प्रत्यक्षवादिनो नीलाद्याकारां वित्तिमभ्युपगच्छंति
किं त्वनिर्वचनीयं विलासिति। तथाहि स्वरूपं विज्ञानस्यासत्ताकारयुक्तं प्रमेयं प्रकाशनं प्रमाणफलं तत्प्रकाशनशक्तिःप्रमाणं
बाह्यार्थवादिनोऽपि चैभाषिकसौत्रांतिकयोः कल्पनीकृतप्रमाणत्वात् नहि व्यवहारोऽभिन्ने तदृत्याह तत्त्वविदात्यभि इति।

भिन्नाधिकरणत्वे हि प्रमाणफलतयोरभावो स्वरितगोचरे परशौपलाशे द्वैधीभावो भवति तस्मादेतयोरैकाधिकरण्यं वक्तव्यं क
थं च तदभावः यदि ज्ञानस्यैव प्रमाणफले भवतः न च ज्ञानस्वलक्षणमनंशमंशाभ्यां युक्तं स्यात्तयुते तदेतज्ज्ञानमज्ञानमार
त्तिकल्पितज्ञानत्वांशफलं अशक्तिमारचितपरिकल्पितात्मानात्मनैव प्रकाशनशक्त्यंशः प्रमाणं प्रमेयत्वस्य बाह्यमेव एवं सौ
त्रांतिकसमयेऽपि ज्ञानस्यार्थसारूप्यमनीलाकारमारचितकल्पितनीलाकारत्वं प्रमाणं व्यवस्थापनहेतुत्वात्। सर्वत्राविशेषाणां तु
सारूप्यमविशात्स्वरूपवस्तुतत्त्वघटकोऽपीति प्रश्नपूर्वकं बाह्यार्थाभावमुपपादयितुमाह कथं पुनरवगम्यत इति सहि विज्ञानालंबनत्वाभि
मतो बाह्योऽर्थः परमाणुतः संभवति एकस्थूलनिराभासं हि ज्ञानं परमसूक्ष्मपरमाण्वाभासं न चान्याभासमन्यगोचरं भवितुमर्हत्य
तिप्रसंगेन सर्वगोचरतां यासर्वं सर्वज्ञत्वप्रसंगात् न च प्रतिभासधर्मेण स्थौल्यमितियुक्तं विकल्पासहत्वात् किमयं प्रतिभा
सस्य ज्ञानस्य धर्मउत प्रतिभासनकालेऽर्थसाधर्मः यदि पूर्वः कल्पो ज्ञातयासति शारवालंबनमेव विज्ञानमभ्युपेतं भवति एवं चैकः
प्रतिकूलोऽभवं स तु कूलो द्वितीयइति चेत् तपहीनसोरूपपरमाणवो वचनंनिरंतरमुत्पन्नांनैकविज्ञानोपारोहिणः स्थौल्यं न्यात्र
कस्यचिद्रांतत्वानहि न चेरूपपरमाणवो न चननिरंतरमुत्पन्नानैकविज्ञानोपरोहिणः तेनमाभूत्रिलत्वाहि स्वपरमाणुधर्मःप्र
त्येकं परमाणुःस्वभावात् प्रतिभासदशामापन्नानां तु तेषां भविष्यति बहुत्वादिवत्सांनरं तरं स्थौल्यं तथाहुः यद्येनेकस्यचैकेन किं
चिद्रूपं हि दृश्यते सांतरं प्रतिभासस्यं तदेकात्मयसंभवात् न च सद्र्शीनं भ्रांतं नानावस्तुग्रहाद्यतः सांतरं तद्ग्रहणं नास्त्येवचक्षु
ग्रहोऽभ्रमइति न भेदैरंतर्याभावभासस्य भ्रांतत्वात् गंधरसस्पर्शपरमाण्वंतरिताहि तेरूपपरमाणवो न निरंतरास्तस्मादाश्र
सांतरेषु वृक्षेष्वेकघनवनप्रत्ययवदेव स्थूलप्रत्ययः परमाणुषु सांतरेषु भ्रांत एवेति पश्यामः तस्मात्कल्पनापोढत्वेऽपि भ्रांतत्वा
त्प्रत्यक्षमत्यस्पर्शादिज्ञानवन्नप्रत्यक्षं तत्परमाणुगोचरत्वाभ्युपगमेऽतिदिरमुक्तं न तावत्परमाणवः संभाविप्रत्ययं परिच्छेद्याः

सा. च. विनुमर्हतीति नापि तत्समवायसंभवः योगविन्नत्वेषां भेदे परमाणुभः परमाणवद्वयवत्वयोः कं दूषणं भेदे गुणवास्तस्य वास्तं न वैलक्ष
३३ ण्यमिति न तादात्म्यं समवायश्च निराकृत इति एवं भेदाभेदविकल्पेन जातिगुणकर्मादीनामपि सत्त्वाद्व्यक्तीनां स्मा प्रत्यभिज्ञासते नास
सर्वस्य विचारासहत्वात् अप्रतिभासमानस्य भावे प्रमाणाभावात् न सालंबनाः प्रत्यया इति अपि च न तावदिंद्रानिंद्रियवत्तिलीनं
र्थं प्रत्यक्षयितुमर्हति न हि विषयेंद्रियमर्थं विषयं ज्ञानं जनयत्येवं विज्ञानमपरं विज्ञानं जनयितुमर्हति तत्रापि समानत्वादनुपयोगत्वान व
स्थाप्रसंगात् न चार्थाधारं ग्राहकत्वलक्षणं फलमाधातुं तुल्यहेतो अतीतानागतेषु तदसंभवात् न ह्यस्ति संभवो ग्राह्यस्य धर्मी
धर्म्यास्य प्रत्युत्पन्न इति तस्मात् ज्ञानरूपं प्रत्यक्षं नैवार्थं प्रत्यक्षत्वानुपपत्या तथा आकारं सह ज्ञानतो भेदाभावात् कथमर्थभेदं प्र
वस्थापयेदिति तद्भेदव्यवस्थापनाय आकारभेदोस्त्येव तत्र तदुक्तं न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात् तां तु सारूप्य
माविशत्सरूपयत्तं घटयेदिति एकस्यायमाकारोनुरूपने सचेदिज्ञानस्यायं संवादिकं वचनप्रमाणमस्तीति अपि चानुभवमात्रेण
साधारणात्मनो ज्ञानस्येति अपि च सहोपलंभनियमादिति यथेनातिप्रसंग सहोपलंभ नं न नगोनाभिप्रेते यथैकस्मात् चंद्रमसो द्वितीयश्चंद्र
मा इति न तत्सहोपलंभश्चार्थज्ञानेनेति ज्ञापकविरुद्धोपलब्धेः निषिद्धो हि भेदः सहोपलंभानियमेन व्याप्तो यथा भिन्नावश्विनौ नावश्यं सहोप
लभ्येते कदाचिदश्वाभिधाने स्यात्तरस्यानंतरस्यैकस्योपलब्धेः सोयमिह भेदस्यापकानियमविरुद्धो नियमः उपलभ्यमानस्तद्व्याप्यं भेदं निवर्तय
तीति तदुक्तं सहोपलंभनियमादभेदो नीलतद्धियोः भेदश्च भ्रांतिविज्ञानैर्दृश्येतेंदाविवाद्वये इति तस्मादेवं चेदं स्वरूपस्य बोधः प्रत्ययः सर्वो वा
ल्यानालंबनो यथा स्वप्नमायादिप्रत्ययः तथा चैष विवादास्पदः प्रत्यय इति स्वभावहेतुः बाह्यालंबनता हि प्रत्ययत्वमात्रानुबंधिनी सती
वशिंशपात्वमात्रानुबंधिनीत्वमात्रानुबंधिनी निरालंबनत्वे साध्ये तद्विविप्रत्ययत्वं स्वभावहेतुः अत्रांतरे सौत्रांतिकश्चोदयति कथं पुनर
सति बाह्येर्थे नीलमिदं पीतमिदमिति प्रत्ययवैचित्र्यमुपपद्यते सहि भेदे यस्मिन्सत्यपि कदाचित्काः ते सर्वे तदतिरिक्तहेतुसापेक्षाः ॥

३३

यथा विवक्षस्य जिगमिषतिमपि न गमनप्रतिभासप्रत्ययस्तेन न संतानांतरसापेक्षाः तथा च विवादाध्यासिताः सत्यप्यालयसंतान
विज्ञाने प्रवृत्तिप्रत्ययाः इति स्वभावहेतुः यश्चासावालयविज्ञानसंतानातिरिक्तः कदाचित्कप्रवृत्तिज्ञानभेदहेतुः स बाह्योर्थ इति वा
सनापरिपाकप्रत्ययकदाचित्कत्वात् कदाचिदुत्पद्येत इति चेत् नन्वेकसंततिपतितानामालयविज्ञानानां तत्प्रवृत्तिज्ञानजननशक्तिर्वा
सनाख्यास्वकार्यंप्रति जननं प्रति आभिमुख्यं परिपाकः तस्य च प्रत्ययः स्वसंतानवर्तिपूर्वक्षणः संतानांतरापेक्षानभ्युपगमात् तथा च सर्वेषा
मालयसंतानपतिताः परिपाकहेतवो भवेयुः न वा कश्चिदालयसंतानपतितत्वाविशेषात् क्षणभेदाच्छक्तिभेदः तस्य कादाचित्कत्वात् कार्यकादाचि
त्कत्वमिति चेत् ननु नैवमेकस्यैव नीलज्ञानोपजननसामर्थ्यं तत्परबोधसामर्थ्यं चेति लक्षणांतरस्य तत्र स्यात् स एवाकथं लक्षणभेदात् सामर्थ्य
भेदः आलयसंतानवर्तिनः सर्वे यामिष्यते प्रवृत्तिः सर्वे समर्था इति समर्थहेतुसद्भावे कार्यासत्वानुपपत्तेः स्वसंतानमात्राधीनत्वेपेक्ष्य
स्य कदाचित्कत्वविरुद्धं सदा तत्त्वं तस्योपलब्धा ताचित्कत्वं निर्वर्तमानं हेत्वंतरापेक्षत्वे व्यवतिष्ठत इति प्रतिबंधसिद्धिः न च ज्ञानसंता
नानंतरनिबंधनत्वं सर्वेषामिष्यते प्रवृत्तिविज्ञानानां विज्ञानवादिभिरपि तु कस्यचिदेव विच्छिन्नगमनप्रतिभासस्य प्रवृत्तिविज्ञा
नस्य अपि च संतानांतरनिमित्तत्वेनास्यापि सदा सन्निधानात् कदाचित्कत्वं न स्यात् न हि संतानांतरसंतानस्य देशतः कालतो वा विप्रक
र्षविभवः विज्ञानवादे विज्ञानातिरिक्तदेशानभ्युपगमात् अमूर्तत्वाद्विज्ञानानामदेशात्मकत्वात् संसारस्यादिमत्त्वप्रसंगेनापूर्वसत्त्व
प्रादुर्भावानभ्युपगमाच्च न कालतोपि विप्रकर्षसंभवस्तस्मात् सति बाह्येर्थे प्रत्ययवैचित्र्यानुपपत्तेरस्यानुमानिको बाह्योर्थ इति सौ
त्रांतिकाः प्रतिपेदिरे तान् निराकरोति वासनावैचित्र्यादित्यादिना हि विज्ञानवादी रमत्राकूतं एकसंतानमात्रप्रभवत्वेपि कथं कदाचिन्नील
संवेदनं प्रत्ययकदाचित्कत्वोपपत्तौ संदिग्धविपक्षव्यावृत्तिकत्वेन हेतुरनैकांतिकः तथा हि नियमेनैव कथं कदाचिन्नीलसंवेद
नं कदाचिदपि पीतसंवेदनं बाह्यं नीलपीतसंनिधानासंनिधानाभ्यामिति चेत् अथ पीतसंनिधाने किं नीलज्ञानं न
भवति पीतज्ञानं वा भवति तत्तस्य सामर्थ्यात् इति चेत् कुतः पुनरयं सामर्थ्यभेदः हेतुभेदादिति चेत् एवं तर्हि क्षणानामपि स्वकारणभे

दोभविष्यतिसंतानिनोहि क्षणाः कार्यभेदहेतवस्तेच प्रतिकार्यं भिद्यंते नचसंतानो नामकश्चिदेक उत्पादकः क्षणानां परभेदात्।
क्षणा न भिद्येरन् न तु तेन क्षणभेदाभेदाभ्यां शक्तिभेदाभेदौ भिन्नानामपि क्षणानामेकसामर्थ्योपलब्धेर्यथैव एकक्षणो निल
त्वाञ्जननसमर्थ इति न भिन्नयोनील ज्ञानमपि जायेरन् तत्समर्थस्यातीतत्वात्। क्षणान्तराणी वा सामर्थ्यात्। तस्मात्क्षणभेदेपि
न सामर्थ्यभेदः संतानभेदेतु सामर्थ्यं भिद्यत इति तन्न यदि भिन्नानां संतानानां नैकसामर्थ्यं हंत नहि नीलसंतानानामपि भिन्न
नानां नैकमस्तिनीलाकाराधानसामर्थ्यमिति संनिधानेपि नीलसंतानान्तरस्य नेतनीलज्ञानमुपजायेत तस्मात्संतानान्तराणा
मिव क्षणान्तराणामपि स्वकारणभेदाधीनोपजननानां केषांचिदेव सामर्थ्यभेदः केषांचिन्नेति वक्तव्यं तथाचैकालयज्ञानसंतान
पातिनु कस्यचिदेव ज्ञानक्षणस्य तादृशः सामर्थ्यातिशयो वासनापरिनामाख्यप्रत्ययमासादितो यतो नीलाकारं प्रवृत्तिविज्ञा
नं जायते न पीताकारं कस्यचित्तु तादृशो यतो पीताकारं ज्ञानं नीलाकारमिति वासनावैचित्र्यादेव स्वप्रत्ययासादितात् ज्ञानवैचित्र्यसि
द्धेः न तदतिरिक्तार्थसद्भावे किंचनास्ति प्रमाणमिति पश्यामः आलयविज्ञानसंतानपतितमेवानादिरिति ज्ञानं वासना तद्वैचि
त्र्यान्नीलाद्यनुभववैचित्र्यात्पूर्वं नीलाद्यनुभववैचित्र्या वासनावैचित्र्यमित्यनादित्वान्तयोर्विज्ञानवासनयोस्तस्मानपरस्परा
श्रयदोषसंभवो बीजांकुरसंतानवदिति अन्वयव्यतिरेकाभ्यामिति वासनावैचित्र्यस्यैव ज्ञानवैचित्र्ये हेतुत्वं वैचित्र्यस्येत्याह
अपि चान्वयव्यतिरेकाभ्यामिति। एवं प्राप्ते ब्रूमः नाभाव उपलब्धेरिति न खल्वेलंभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते सत्यु
पलंभाभावात्तस्य बाह्यविषयत्वाद् असत्यपि बाह्यत्वविशेषविलेवाह्यार्थबाधकप्रमाणसद्भावाद्वा न तावत्सर्वथोपलंभ न इति
प्रश्नपूर्वकमाह। कस्मादुपलब्धेरिति। नहि स्फुटतरेस्तवर्जनीनउपलंभे सति तत्स्वभावः शक्यो वक्तुमित्यर्थः द्वितीयं पक्षमालंब्य
तेन नु नाहमेवं ब्रवीमि किं निराकरोति बाढमेवं ब्रवीषि इति उपलब्धिग्राहिणा हि साक्षिणोपलब्धिर्गृह्यमाणा बाह्यविषयत्वेनैव गृह्यते

नोपलब्धिमात्रमित्यर्थः अतः श्रेन्निरक्षमाणोपपत्तिपरामर्शः तत्तीयं पक्षमालंभते ननु बाह्यस्यार्थस्यासंभवादिति निराकरोति नायं सा
धुरध्यवसाय इति इदमत्राकूतं यदयं स्थौल्याभासं ते न तु परं सूक्ष्मात्मन्नेदं नानादिग्देशव्यापित्वलक्षणं स्थौल्यं यद्यपि
ज्ञानकारणत्वेनावर्णानावर्णनालक्षणेन विरुद्धधर्मसंसर्गेण युज्यते ज्ञानोपाधेरनारंतत्वादेव न व्यापितद्देशत्वानद्देशत्वकं चक
त्वंलक्षणैर्विरुद्धधर्मसंसर्गैरस्य नानात्वं प्रसज्यमानं ज्ञानाकारत्वेपि न शक्रेणापि वारयितुं व्यतिरेकाव्यतिरेकचानिविकल्प्यौपर
माणोरंशत्वं चोपपादितानि वैशेषिकपरीक्षायां अतस्माद्बाह्यार्थवद्भ्रज्ञानेपि स्थौल्यसंभवो नंच तत्परमाण्वाभासमेकं ज्ञानमेकस्य ना
नात्वानुपपत्तेः आकाराणां च विज्ञानतादात्म्यादेकत्वप्रसंगात् न च यावंतं आकारास्तावंत्येव ज्ञानानि तावतां ज्ञानानां मिथो वार्ता
नभिज्ञानतया स्थूलानुभवाभावप्रसंगात् न चान्तरस्थभावी समस्तज्ञानाकारसंकलनात्मकः एकस्थूलविकल्पो निर्भाति इति सांप्रतं
तस्यापि साकारतया स्थौल्ययोगात् यथाह धर्मकीर्तिः तस्मान्नार्थे न विज्ञाने स्थूलाभासः तदात्मनः एकत्रप्रतिषिद्धत्वाद्बहुत्वेपि न संभ
व इति तस्मात्स्वतो नापि ज्ञानाकारं स्थौल्यं समर्थमानेन न प्रमाणप्रत्यक्षप्रवृत्तिपूर्वकौ संभवासंभवास्तेयौ तथा चेदमशक्यं ज्ञानाभिन्न
वाध्यमयेन्तोनुमिति यच्च ज्ञानस्य प्रत्यर्थो भेदरूप्ययोर्विषयसारूप्यमास्थितं। तेन विषय चाप्यहेतुंशासः असत्ययेन तत्सारूप्यस्य तद्व
वर्णाया अनुपपत्तेरित्याह न च ज्ञानस्य विषयसारूप्यादिति यश्च सहोपलंभनीयम उक्तः सोपि विकल्पं न सते यदि ज्ञानार्थयोः सा
हित्येनोपलंभस्ततो विरुद्धो हेतुः नाभेदं साधयितुमर्हति साहित्यस्य तद्विरुद्धस्य भेदव्याप्ततात् अभेदे तदनुपपत्तेः अथैकोपलं
भनीयमः न वैकत्वस्य वाचकः सहशब्दः अपि च किमेकत्वनोपलंभ आहोस्विदेक उपलंभो ज्ञानार्थयोः न तावदेकत्वेनोपलं
भ इत्याह बहिरुपलब्धेश्च विषयश्च विषयस्य अथैकोपलंभनीयस्तत्राह अतएव सहोपलंभनीयमोपि प्रसत्यविषयोरूपायोपेय
भावहेतुको नाभेदहेतुक इति अथैकोपलंभनीयस्तत्राह अत एव सहोपलंभनीयमोपि अवगंतव्यं यथाहि सर्वं चारूप्यं प्रभा

वाच० रूपानुविरुद्धं बुद्धिबोधं नियमेनमनुजैरूपलभ्यनेन चैतावनाधयादिरूपं प्रत्यात्मकं भवति किंतु प्रभोपायत्वान्नियमः एवमिहापि
३५ आलयाख्यानुभवोपायत्वादर्थस्यैकोपलंभनीयम इति अपि च यत्रैकविज्ञानगोचरौ घटपटौ न तार्थभेदं विज्ञानाभेदं बाध्यवस्तं
लिप्रतिपत्तारः नन्वेनरेकात्म्यं कल्पत इति आह अपि च घटज्ञानमिति तदर्थाभेदेऽपि विज्ञानभेददर्शनान्न विज्ञानात्मकत्वमर्थस्ये
त्याह अथ घटदर्शनं पटस्मरणमिति अपि च स्वरूपमात्रपर्यवसितं ज्ञानं ज्ञानान्तरं नागं न भिन्नमिति द्वयोर्भेदस्येदं न गृहीतेऽपि इति भेदो
पि तद्गतो न गृहीतः एवं क्षणिकत्वानात्मत्वादयोऽप्यनेकप्रतिज्ञाहेतुदृष्टान्तज्ञानभेदसाध्याः एवं स्वमसाधारणमन्यजो व्यावर्तकं लक्षणं
यस्य तदपि यस्मादावर्तते यतश्च व्यावर्तते तदनेकज्ञानसाध्यमेवं सामान्यलक्षणमपि विरुद्धधर्मव्यायोहरूपं चानेकज्ञानगम्यमेवं
चास्य वासकत्वानेकज्ञानसाध्यः एवमपि द्योपप्लववशेन यत्तदसत्यमतं यथा नीलमिति साधर्म्यान्नरविषाणमीश्वर इत्यसाधर्म्यः अ
मूर्तमितिसदसद्धर्मः शक्यं हि शशविषाणममूर्तं वक्तुं शक्यं च विज्ञानममूर्तं वक्तुं यथोक्तं अनादिवासनोद्भूतविकल्पपरिनिष्ठि
तः शब्दार्थस्त्रिविधो धर्मो भावाभावोभयाश्रय इति एवं गोरप्रतिज्ञा च योमुच्यते यतश्च मुच्यते तदनेकज्ञानसाध्यं एवं विप्रतिपन्नं
प्रतिपादयितुं प्रविशेतिय स्वतिपादयति येन प्रतिपादयति यश्च पुरुषः प्रतिपाद्यते यश्च प्रतिपादयति तदनेकज्ञानसाध्येषु सकलेषु
स्मिन्ननेकार्थज्ञानप्रतिसंधातरि नोपपद्यते विज्ञानस्य क्षणालंबनत्वेनानुपपत्तिमित्याह अपि च द्वयोर्ज्ञानयोः पूर्वोत्तरकालयोरिति
अपि च भेदाश्रयः कर्मफलभागो नाभिन्ने ज्ञाने भवितुमर्हति नानुच्छिन्नं छिद्यते किंतु दारुणापि च्छकः प्रभज्यते अपि तु तं दुलादि
ष्वपि न ज्ञानं स्वांशेन लोपमात्मनि वृत्तिविरोधः अपि तु तदतिरिक्तोऽर्थः पाक्यादवतंदुलाः पाकातिरिक्ता इति नैरमिरवतारं कृमाह
किं चान्यन्न विज्ञानं विज्ञानमित्यभ्युपगमश्चनेति चोदयति न तु विज्ञानयस्वरूपातिरिक्त इत्यात्मत्वादिति अयमर्थः स्वरूपादतिरि
क्तसमर्थं चेद्विज्ञानं गृह्णाति न तत्तस्य सत्यसंतानं व्यपदेष्टुमर्हति नहि वस्तु रिक्तं निलीनमर्थं कं च नापतिशायमादधते ये

३८

नर्थप्रत्यक्षं सत्यप्रत्यक्षं येन अपि तु न प्रत्यक्षत्वेनार्थप्रत्यक्षता यथाहुः अप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिध्यतीति नचैवं ज्ञानान्त
रेण प्रतीयेत तदप्रतीतं नार्थविषयं ज्ञानं परोक्षयितुमर्हति एवं च जगदिदं न वस्थाप्य विभ्रमावरं स्वात्मनिवृत्तिरास्थिता अपि च यथा
प्रदीपो हि भानान्तरमपेक्षते नैवं ज्ञानमपि ज्ञानान्तरमपेक्षितुमर्हतीत्यतुल्यत्वादिति तदेतत्परिहरति तदुभयमप्यसत् विज्ञानग्र
हणमात्रेण च विज्ञानसाक्षिग्रहणाकांक्षतुल्यत्वादनवस्थाशंकानुपपत्तेः अयमर्थः सत्यमप्रत्यक्षोपलंभस्य नार्थदृष्टिः सिध्य
ति न तु रूपस्थारंभतत्प्रत्यक्षत्वायोपलंभान्तरमर्थनीयं अपि तु तस्मिन्निन्द्रियार्थसन्निकर्षः अंतःकरणविकारभेदरूपलन्नमात्र
ये च प्रमातुरर्थश्चोपलंभश्च प्रत्यक्षो भवतः लीनस्वभावः प्रमातारं प्रतिस्वप्रत्यक्षवायांतःकरणविकारभेदमनुभवमपेक्षते अनु
भवस्तु जडोऽपि स्वच्छतया चैतन्यबिंबोद्ग्रहणाय नानुभवान्तरमपेक्षते येनानवस्था भवेत् न ह्यस्ति संभवो नानुभवत्वस्य प्रमा
तुः प्रत्यक्षो भवति यथा नीलादिः तस्माद्यथाच्छेत्ताच्छिंदन् छिद्यं घटवस्वादि व्याप्नोति न तु छिदाच्छिदान्तरेण नापि छिदैव छेत्तारं किंतु स्व
नवत् देवदत्तादिः एवं प्रमाता प्रमेयं नीलादि प्रमया व्याप्नोति न तु प्रमया प्रमाणान्तरेण नापि प्रमैव प्रमातारं किंतु स्वतः एव प्रथमायाः
प्रमाता व्यापकः न च प्रमातरि कूटस्थनित्यचैतन्ये प्रमापेक्षा संभवः यतः प्रमाणः प्रमात्रन्तरापेक्षायामनवस्था भेदान्न तस्मा
त्कष्टूक्तं विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणः प्रमाणतः कूटस्थनित्यचैतन्यस्य ग्रहणाकांक्षानुसारादिति यदुक्तं समत्वाद
वभास्यावभासकभावानुपपत्तेरिति तत्राह साक्षिप्रत्यययोश्च स्वभाववैषम्यादुपलब्ध्युपलभ्यभावोपपत्तेः माभूद्ज्ञानयोः साम्येन
ग्राह्यग्राहकभावो ज्ञातृज्ञानयोस्तु वैषम्यादुपपद्यते येन ग्राह्यत्वं च ज्ञानस्य न ग्राहकक्रियाजनितफलशालितया यथा बाह्यस्या
र्थस्य फलेऽफलान्तरानुपपत्तेः यथाहुः नसंविदर्थ्यते फलत्वादिति अपि तु प्रमातारं प्रतिस्वतः सिद्धः प्रकाशतया ग्राह्योऽप्यर्थः प्र
मातारं प्रति सत्यां संविदि प्रकाशस्तु संविदर्थ्यते फलत्वादिति अपि तु प्रमातारं प्रति स्वतः सिद्धा संविदः प्रकाशमाहुरन्ये नोऽसाः

कर्मभावोविघनइति स्यादेतत् यत्प्रकाशस्तेनमया ज्ञातार्थोनभावसाक्षिरनास्तित्रसयसाक्षिणोर्वैयम्यमित्यतआह स्वयंसिद्धस्वसाक्षि
णोत्रसाक्ष्यैत्वात्। नचास्यसाक्षिणः सदाऽसंदिग्धाविपरीतस्यनित्यसाक्षात्कारतानागंतुकप्रकाशकत्वेघटते तथाहिप्रमातासंदिहा
नोपि असंदिग्धोविपर्यस्यन्नप्यविपरीतः परोक्षमुत्येक्षमाणोप्यपरोक्षप्रस्तरं नप्यानुभविकः प्रणहत्यात्रस्यनचैतस्याधीनसंवेदनत्वे
घटते अनवस्थाप्रसंगश्चोक्तः तस्मात्स्वयंसिद्धतास्मानिच्छितास्यप्रत्यक्षेयप्रमाणमार्गोयातत्वादिति किंचोक्तेनक्रमेणज्ञानस्य
स्वयमेवगंतत्वाभावात्प्रमातुरनभ्युपगमेचप्रदीपवद्विज्ञानमवभासकांतरनिरपेक्षंस्वयमेवप्रथमइति ब्रुवताप्रमाणगम्यंवि
ज्ञानमनवगंतुकमित्युक्तंस्यात् शिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत् अवगंतुश्चेत्कस्यचिदपिनप्रकाशतेकृतमनगमेनस्व
यंप्रकाशेनेति विज्ञानमेवावगमच्छिनिमित्वात् शंकतेवाढमेवमनुभवरूपत्वादितिनफलस्यकर्तृत्वंकर्मत्वंवास्तीतिप्रदीप
वत्कर्तृकोतरमेपिनयं तथाचनसिद्धसाधनमिति परिहरतिनास्यसावगंतुरिति ननुसाक्षिरूपेणेरुवात्मदभिमतमेवधि
ज्ञानं तथाचगत्मेवविप्रतिपत्तिः नार्थइतिशंकतेसाक्षिणोवगंतुः स्वयंसिद्धतामुपगम्यनाभिप्रेयनास्वयंप्रथनेविज्ञानमि
त्येष्टव्येति निराकरोतिनेति भवताहिविज्ञानस्योत्पत्त्यादयोधर्माअभ्युपेत्यतथाचास्यफलतयानावगंतुत्वंकर्तृफल
भावस्यैकत्रविरोधात्। किंतुप्रदीपादितुल्यतेत्यर्थः वैधर्म्याच्चनप्रत्यादिवत् बाधोवैधर्म्यंस्वप्नप्रत्ययोबाधितोजाग्रत्प्रत्य
यस्त्वबाधितः तथापितस्यस्वं जागृतप्रत्ययस्याबाधितत्वमावश्यं तेनहिस्वप्नप्रत्ययोबाधितोमिथ्येतिअवगम्यते जागृत्प्रत्य
यस्यतुबाधत्वेस्वप्नप्रत्ययस्यासौनबाधकोभवेत् नहिबाध्यमेवबाधकंतुभवितुमर्हति तथाचस्वप्नप्रत्ययोमिथ्येतिसाध्यविक
ल्पोदृष्टांतःस्यात् स्वप्नवदिति। तस्माद्बाधाबाधाभ्यां वैधर्म्याच्चस्वप्नप्रत्ययदृष्टांतेनजाग्रत्प्रत्ययस्यशक्यंनिरालंबनत्वम
ध्यवसातुं निद्राज्ञानमतिकारणदोषाभिधानंमिथ्यात्वायवैधर्म्यांतरमाह अपिचस्मृतिरितिभेति। संस्कारमात्रंविज्ञानंस्मृतिः प्रत्यु

DR BHAU DAJI

सत्रेंद्रियलिंगशब्दसारूप्यान्यथानुपपद्यमानयोग्यप्रमाणानुपलब्धसामग्रीप्रभवंतुज्ञानमुपलब्धिः तदिहनिद्राणस्यसामग्र्य
विरहात्संस्कारःपरिशिष्यते तेनसंस्कारजत्वात्स्मृतिः सापिचनिद्रादोषाद्विपरीता आवर्तमानमपिपित्रादिवर्तमानतयाभासयति
तेनस्मृतेरेवतावदुपलब्धोर्विशेषः तस्याश्चस्मृतेश्चवैपरित्यमितिअत्यहोमहदंतरमित्यर्थः। अपिचस्वतःप्रामाण्येसिद्धेजाग्र
त्प्रत्ययानांयथार्थ्यमनुभवसिद्धं नानुमानेनान्यथयितुंशक्यमनुभवविरोधेनतदनुत्थानात् आबाधितविषयत्वाप्यनुमानो
त्थानसामग्रीनचकारणाभावेकार्यमुत्पत्तिमर्हतिहेतुत्वाशयवानाह अपिचानुभवविरोधप्रसंगादिति नचाबोनुपलब्धेः यथा
लोकदर्शनंचान्वयव्यतिरेकानुश्रियमाणा वर्षा बोपलब्धेभवतोनार्थानपेक्षायां वासनायाअप्यर्थोपलब्ध्याधीनत्वदर्शनादित्यर्थः।
अपिचाश्रयाभावादपिनलौकिकीवासनोपपद्यते नचक्षणिकमालयविज्ञानंवासनाधारोभवितुमर्हतिद्वयोर्युगपदनुपपद्यमा
नयोः सम्प्रदक्षिणस्यंगवत्ताधाराधेयभावाभावात्। प्रागुत्पन्नस्यबाध्येयोत्पादसमयेसंतत्क्षणिकत्वव्याघातइत्साशयवानाह अपिच
वासनामेति। शेषमतिरोहितार्थंस्यादेतत् यदिसाकारंविज्ञानंनसंभवति बाह्यश्चार्थःस्थूलसूक्ष्मविकल्पेननासंभवीहंतव
मर्यज्ञानेसत्येनतावदविचारंनसहेतनाप्यनुत्येनासतोभावसंयोगात्। नोभयत्वेनविरोधात्सदसतोरेकत्वानुपपत्तेः नानुभवे
नैकनिषेधस्येतरविधिनांतरीयकत्वात् तस्माद्विचारासहत्वमेवास्तुतत्त्वंस्थूलानांयथाहुः इदंवस्तुबलायातंयदंतिविपश्चितः।
यथायथार्थाश्चिंत्यंतेविविच्यंतेतथातथेति नकश्चिदपिपक्षेव्यवतिष्ठतइत्यर्थः तदेतंनिराचिकीर्षुराहनचादिपक्षस्तुसर्वप्रमा
णविप्रतिषिद्धइति तन्निराकरणायनादरःक्रियते लौकिकानिहिप्रमाणानिसदसत्वगोचराणितैरयुक्तंसदसदितिग्राह्यमाणंयथाभूत
तंविपरीतंतत्तंव्यवस्थाप्यते असत्त्वायथाभूतमविगीततत्तंव्यवस्थाप्यतेसदसत्त्वोत्यविचारासहत्वंव्यवस्थापयतिसर्वप्रमा
णविप्रतिषिद्धानेयंव्यवस्थोपपद्यते यद्युच्यते तात्त्विकंप्रामाण्यंप्रमाणानामनेनविचारेणत्वदुरस्तेनसांव्यवहारिकंतथाचभिन्न

षाच॰ विषयत्वात्सर्वप्रमाणविप्रतिषेध इत्यत आह न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोन्यतत्वमनधिगम्य शक्यते यत्नेन तु प्रमाणा
३७ नि हि स्वगोचरे प्रवर्तमानानि तत्वमिदमित्येव प्रवर्तन्ते अतात्त्विकत्वं तु लब्धोचरस्मात्तत्त्वोपाख्याव्यवहारांगत्वं न पुनः सांव्यवहा
रिकं नः प्रामाण्यं न तु तात्त्विकमित्येवं प्रवर्तन्ते बाधकं बाऽतात्त्विकत्वं तु लब्धोचरस्मात्तत्त्वविपरीतत्वोपदर्शनेन दर्शयेद् यथा
शुक्तिकेयं न रजतं मरीचयो न तोयं एकश्चंद्रो न च द्वयमित्यादि तदिहापि समस्तप्रमाणगोचरविपरीततत्वापदेशपरेन ना
तात्त्विकत्वं प्रमाणानां बाधकेन दर्शनीयं न तत्त्ववस्थिति तत्वांतरेण प्रमाणानि शक्यानि बाधितुं विचारासहत्वं च वस्तूनां अवस्थाप
यद्बाधकं मतात्त्विकत्वं प्रमाणानां दर्शयतीति चेत्। किं पुनरिदं विचारासहत्वं यत्तत्त्वमभिमतं किं तद्वस्तु परमार्थतः सदादीनामन्य
तम केवलं विचारं न सहते अथ विचारासहत्वेन निखिलमेव तत्र परमार्थतः सदादीनामन्यतमाद्विचारं न सहत इति विभति
पिहं न सहते चेन्न सदादीनामन्यतमं न्यतम चेत्कथं न विचारं सहते अथ नित्यत्वं चेत् कथमन्यतमेन तत्त्वमपव्यवस्थापयितुं शक्य
मेवं बकुं न च तत्त्वतत्वैन तत्त्व भावानां तथा सति हि तत्त्वाभावः स्यात् सोपि च विचारं न सहत इत्युक्तं भवद्भिः अपि चारोपितं
निषेधनीयं आरोपश्च तत्त्वाधीष्ठानो दृष्टो यथा शुक्तिकादिषु रजतारोपे न चेत्किंचत्सित तत्वं कस्यकस्मि न्नारोपः तस्मान्निःप्र
पंचपरमार्थसद्भूतात्तत्त्वानिर्वाच्यप्रपंचात्मनारोप्यते तच्च तत्त्वं न व्यवस्थाप्यातात्त्विकत्वेन सांव्यवहारिकत्वं प्रमाणानां बाधकेनोपप
द्यत इति युक्तमुत्पश्यामः सर्वथानुपपन्नेश्च विभजते किं बहुनोक्तेन यथा यथा ग्रंथतोर्थश्चार्यं वैनाशिकः समय इति ग्रंथ
तावत्स्यनास्तितिसिद्धनासिद्धयोर्मिलाद्यसाधुपरप्रयोगः अर्थतश्च नैरात्म्यमभ्युपेत्वात्त्वयविज्ञानं समस्त वासनाधारमभ्यु
गच्छत्सदस्मात्मन मभ्युपैति एवं क्षणिकत्वमभ्युपेत्य सादृदात्तथागतानाममनुसाधादाद्धिताद्वैषाधर्मतां धर्मस्थितिनेनित्यता
मुपैतीत्यादि बहुहितत्वमिति। नैकस्मिन्नसंभवात् निरस्तो मुक्तकस्यानां मुक्तानां समयो विवासानां समय इदानीं निरस्यतेतत्त्वम

३७

यथाह संक्षेपविस्ताराभ्यां सप्त चेवापदार्थाः समंगा इति संक्षेपतस्तु द्वावेव पदार्थाविति बोधात्मिको जीवो जडवर्गस्त्वजीव इति।
यथायोगं तयोर्जीवाजीवयोरिममपरप्रपंचमाचक्षते तमास्तिकायानामेति सर्वेषां मध्येषामवांतरप्रभेदा नीतिजीवास्तिकायस्त्रेधा
बद्धो मुक्तो नित्यसिद्धश्चेति। पुद्गलास्तिकायः षोढा पृथिव्यादीनि चत्वारि भूतानि स्थावरं जंगमं चेति धर्मास्तिकायः प्रवृत्त्यनुमेयः। अ
धर्मास्तिकायः स्थित्यनुमेयः आकाशास्तिकायो द्वेधा लोकाकाशः अलोकाकाशश्चेति तत्रोपर्युपरिस्थितानां लोकानामंतर्वर्ती
लोकाकाशः तेषामुपरि मोक्षस्थानं मालोकाकाशः तत्र हि न लोकाः संति तदेवं जीवाजीवपदार्थौ पंचधा प्रपंचितौ अस्त्रवं संवरं स
निर्जराख्यः पदार्थाः प्रवृत्तिलक्षणाः प्रपंचं सा द्विधा प्रवृत्तिः सम्यक्मिथ्या च तत्र मिथ्याप्रवृत्तिरास्रवः सम्यक्प्रवृत्तिः संवरनिर्जरौ
आस्रावयति पुरुषं विषयेष्विति इंद्रियप्रवृत्तिरास्रव इंद्रियद्वारा हि पौरुषं ज्योतिर्विषयान्स्पृशत्रूपादिज्ञानरूपेण परिणमत इति। अ
न्ये तु कर्माण्यास्रवमाहुः तानि हि कर्तारमभिव्याप्य स्रवंति कर्तारमनुगच्छंतीत्यास्रवः सेयं मिथ्याप्रवृत्तिरनर्थहेतुत्वात् संवरनिर्ज
रौ च सम्यक्प्रवृत्ति तत्र शमदमरूपा प्रवृत्तिः संवरः सा ह्यास्रवस्रोतसो द्वारं संवृणोतीति संवर उच्यते निर्जरस्त्वनादिका
लप्रवृत्तिकषायकलुषपुण्यापुण्यप्रहाणहेतुः तप्तशिलारोहणादिः स हि निःशेषं पुण्यापुण्यं सुखदुःखोपभोगेन जरयतीति निर्जरः
बंधोष्टविधं कर्म तत्र घातिकर्म चतुर्विधं तद्यथा ज्ञानावरणीयं दर्शनावरणीयं मोहनीयं अंतरायमिति। तथा चत्वार्यघातिकर्माणि तद्यथा वेद
नीयं नामिकं गोत्रिकमायुष्कं चेति तत्र सम्यक्ज्ञानं न मोक्षसाधनं न हि ज्ञानाद्वस्तुसिद्धिरिति विपर्ययो ज्ञानावरणीयं कर्मोच्यते
अर्हत्दर्शनाभ्यासान्न मोक्ष इति ज्ञानं दर्शनावरणीयं कर्म बहुषु प्रवृत्तिसिद्धेषु तीर्थकरैरुपदर्शितेषु मोक्षमार्गेषु विशेषानव
धारणं मोहनीयं कर्म सन्मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानमंतरीयं कर्म तानीमानि श्रेयोहंतृत्वाद्घातिकर्माण्युच्यंते अघा
तिकर्माणि। तद्यथा वेदनीयं कर्म शुक्लपुद्गलविपाकहेतुः तद्विबंधोपि निःश्रेयसः परिपंथितत्वज्ञानाविघातकत्वात्। शुक्लपु

वान॰२ द्गलारंभकं वेदनीयं कर्मेति कुसुमफलविपाकहेतुः तद्विबंधोपि तद्विमुक्तस्यायावस्थां कललबुद्बुदादिमाश्रयते गोत्रिकं नयादुक्तं न
३८ तोप्यचंशक्तिरूपेण वस्थितं आयुरस्यं आयुरस्यां यति कथयमुत्पादन कादेसायुक्तं तान्येतानि मुक्तमुद्गलाश्रयत्वाद्घातीति कर्माणि
तदेतत्कर्माष्टकं पुरुषं बध्नातीति बंधविगलितसमस्तक्लेशतद्वासनासानावरणज्ञानस्य स्वरूपैकतानकस्यालनउपरिदेशावस्था
नंमोक्ष इत्येके अन्ये तत्सर्वगमनशीलो हि जीवो धर्माधर्मास्तिकायेन बद्धः तद्विमोकाय दूर्ध्वं गच्छत्येव स मोक्ष इति तदेते सप्त पदार्था
जीवादयः सहावांतरप्रभेदैरप्रमत्तस्ताः तत्र सर्वत्रचैभं सप्तभंगीनयं नामन्याय्यमवतारयति स्यादस्ति स्यान्नास्ति स्यादवक्त
व्यः स्यादस्तिनास्ति च स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्य स्यादस्तिनास्ति चावक्तव्यश्च स्यात् यद्ध शब्दः खल्वयं निपातः तिङंति
प्रतिरूपकोनेकांतद्योतकावक्तव्यश्चास्यादस्ति। यथाहुः वाक्येष्वनेकांतद्योतीगम्यं प्रतिविशेषणं स्यान्निपातोर्थयोगित्वात्तिङ्
तंत्यतिरूपकइति। यदि पुनरयमेकांतद्योतकः स्याद्धदानभवेत्स्यादस्तीतिवाक्ये स्यात्पदमनर्थकं स्यात् तदिमुक्तमर्थयोगि
त्वादिति अनेकांतद्योतकत्वेन स्यादस्ति कथंचिदस्ति इति स्यात्पदात्कथंचिदर्थसिद्धेस्तिनेनानुक्तः प्रतीयतइति नानर्थक्यं। तथा
चस्याद्वादः सर्वथैकांतत्यागात्किंवृत्तविहितः सप्तभंगीनयापेक्षो हेयादेयविशेषकृत्किंवृत्तेप्रत्यये त्यागदसप्तस्वेकांते पुवत्वयुं
चिचिमाविधिना सर्वथैकांते पुयोभंगस्तत्रयोनयस्तदपेक्षः स च हेयोपादेयभेदाय स्याद्वादः कल्पते तथाहि यदिवस्त्वेकां
तेनसत्तः सर्वथा सर्वदा सर्वत्र सर्वात्मना सत्त्वेवेति न तदीप्साजिहासाभ्यां कचित्कदाचित्कयंचित्प्रवर्तते ननिवर्तेत वा
प्राप्ताप्रापणीयत्वात् हेयहानादनुपपत्तेश्च अनेकांतिकपक्षे तु कथंचित्कदाचित्कस्यचित्केनचित् सत्त्वेन हानोपादाने
स्यावतां कल्प्यतइति। तमेत्य सप्तभंगीनयं दूषयति एकस्मिन्नसंभवात् विभजते न ह्येकस्मिन् धर्मिणि परमार्थसति परमा
र्थसत्तां युगपत्सत्त्वादीनां धर्माणां परस्परपरिहारस्वरूपाणां समावेशः संभवति एतदुक्तं भवति सत्यं यदस्ति वस्तु तत्सर्वथा
सर्वदा सर्वत्र सर्वात्मना निर्वर्तनीयेन रूपेणास्त्येव न नास्ति यथा प्रत्यगात्मा यत्र कचित् कथंचित्केनचिदात्मनास्ती ३८

त्युच्यते यथा प्रपंचः न ह्यव्यवहारतो न तु परमार्थतः तस्य तद्विचारासहत्वात् प्रपंचस्य मात्रं वास्तवत्वं व्यवस्थापयति मुक्तमनुमरी
चीकादिषु रजतत्वादेरपि वास्तवत्वप्रसंगात्। लौकिकानामनुबाध्यत्वतुल्य ह्यव्यवस्थानां देहात्माभिमानस्याप्यबाधेन तत्तिक
त्वेसति लोकायतमतायातेन नास्तिकत्वप्रसंगात् पंडितरूपाणां तु देहात्माभिमानस्य विचारतो बाधनं प्रपंचस्याप्यनेकांतस्य तुल्य
मिति अपि च सदसत्त्वयोः परस्परविरुद्धत्वेन समुच्चयाभावे विकल्पः न च वस्तुनि विकल्पः संभवति तस्मात् स्थाणुर्वा पुरुषो वेति
ज्ञानवत्सप्ततत्त्वपंचत्वनिर्धारणस्य च फलत्वनिर्धारयितुश्च प्रमातृत्करणस्य च तत्प्रमेयस्य च संशयचेत्स्यस्तसत्त्वसंशये
साधुसमर्थितं तीर्थकरत्वमप्यभेण आत्मनो निर्धारणस्यैकांतसत्त्वे सर्वत्रानेकांतवादः इत्याह यदेतत्सप्तपदार्था इति शेषमति
रोहितार्थं एवं चात्माकात्स्न्यं एकं चेति समुच्चयं द्योतइति शरीरप्रमाणत्वे ह्यात्मनो कृत्स्नत्वं परिच्छिन्नत्वं तथा चानित्यं एहि परिच्छिन्ना
नां सर्वेनित्या यथा घटादयस्तथा चात्मेति तदेतदाह यथा कस्मिन् धर्मिणि तिष्ठेरं चापरमकृत्स्नत्वे नस्तत्रित्यमित्याह शरी
राणामनवस्थितपरिमाणत्वादिति मनुमाणत्वमिति तथा हस्तिशरीरं पुत्तिकायपरिमाणो जीवो न हस्तिकायं कृत्स्नं व्याप्तुमर्हति
अल्पत्वात् आत्मनः कृत्स्नशरीराव्यापकत्वात्कार्त्स्न्यं तथा च नशरीरपरित्यज्य यदा मुक्तिकाशरीरो भवति तदातत्कृत्स्नत्वः।
अंतिकाशरीरे समीयते क्षइत्यकार्त्स्न्यमात्मनः क्रमभ्यत्प्रादयतित्याहेतत्। अनंतावयवइति यथा हि प्रदीपो घटहर्म्योदरव
र्तिसंकोचविकासवानेवं जीवोपि पुत्तिकाहस्तिदेहयोरित्यर्थः तदेतद्विकल्पाद्दूषयति तेषां पुनरनंतानामिति न तावत्प्रदीपो यत्र नि
दर्शनं भवितुमर्हति अनित्यत्वप्रसंगात् विशारावो हि प्रदीपावयवाः प्रदीपश्चावयवी प्रतिक्षणमुत्पत्तिनिरोधधर्मतस्मादनित्यत्वात्।
तस्य नास्ति रोजीवस्य द्रवयवाश्चाभ्युपेतव्याः तथा च विकल्पद्वयोकं दूषणं इति यच्चजीवानावयवानामानंत्यमुक्तं तदनुपपन्नत
रमित्याह अपि च शरीरमात्रे त्रिंशांकाप्पर्युत्सृत्यांतरमवतारयति। अथ पर्यायेणेति। तत्राप्युच्यते। न च पर्यायादप्यविरोधो विकारा

द्विधः कर्माष्टकमुक्तं ज्ञानावरणीयादि किं चान्त्यस्यात्मनो नित्यत्वाभ्युपगमे आगच्छतामपगच्छतां चावयवानामिति अनि
रूपेण न चात्मज्ञानाभावान्नापवर्ग इति भावः अनएवमादिदोषप्रसंग इति आदिग्रहणसूचितदोषं ब्रूमः किं चैते जीवावयवाः
प्रत्येकं वा चेतयेरन् समूहो वा तेषां प्रत्येकं चेतनत्वे बहूनां चेतनानामैकाभिप्रायत्वनियमाभावात् कदाचित् विरुद्धक्रियत्वे
शरीरमुन्मथ्येत समूहचैतन्ये तु हस्तिशरीरस्य पुत्तिकादेहत्वे द्वित्रावयवशेषो जीवो न चेतयेत् विगलितबहुसमूहत्वाभावात्
पुत्तिकाशरीर इति अन्त्यावस्थितेश्च पूर्वसूत्रप्रसंजितानां जीवानित्यत्वबाधनसंतानानित्यत्वाभाव्याच्छंदसूत्रं नच पर्यायादप्यविरोधो
विकारादिभ्यः कर्माष्टकमुक्तं ज्ञानावरणीयादि किं चान्त्यस्यात्मनो नित्यत्वाभ्युपगमे आगच्छतामपगच्छतां चावयवानामिति अनि
रूपेण चात्मज्ञानाभावान्नापवर्ग इति भावः। अनएवमादिदोषप्रसंग इति आदिग्रहणसूचितदोषं ब्रूमः किं चैते जीवावयवाः प्रत्ये
कं वा चेतयेरन् समूहो वा तेषां प्रत्येकं नच पर्यायात्परिमाणानवस्थानेपि संतानाभ्युपगमेनात्मनो नित्यत्वाद्विरोधो बंधमोक्षयोः
कुतः परिमाणादिभ्यो दोषहेतुभ्यः संतानस्य वस्तुत्वे परिमाणमस्तज्जश्च नैवदनित्यत्वादिदोषप्रसंगः वस्तुत्वे चाद्यग्रहण
सूचितो नैरात्म्यापत्तिदोषप्रसंग इति। विशिष्टवो विवक्षताः अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः एवं हि मोक्षावस्था
भावि जीवपरिमाणं नित्यं भवेत् यद्यभूत्वा न भवेत् अभूत्वाभाविनामनित्यत्वाद् घटादीनां कथं चाभूत्वा न भवेद्यदि प्रागप्या
सीत्। न च परिमाणान्तरावरोधे प्रवर्तितुमर्हति तस्मादंत्यमेव परिमाणं पूर्वमप्यासीदित्यभेदः तथा चैकशरीरपरिमाणत्वेन
पात्रोपचितापचितशरीरप्राप्तिः। शरीरपरिमाणत्वाभ्युपगमव्याघातादिति अत्र चोभयोः परिमाणयोर्नित्यत्वप्रसंगादिति वा
जनयेकशरीरपरिमाणतेतिच दोषं द्वितीये तु व्याख्याने उभयोरवस्थयोरिति यो जनायेकशरीरपरिमाणता दोषा किं त्वेकपरि
माणमात्रमनुमर्हतेति विवेकः पत्युरसामंजस्यात् अविशेषेणेश्वरकारणवादो नेन निष्पन्न इति भ्रमनिवृत्त्यर्थमाह के ३९

वलेति सांख्ययोगव्यपाश्रया हिरण्यगर्भपतंजलिप्रभृतयः प्रधानमुक्तं दृक्शक्तिः पुरुषः प्रत्ययानुपश्यः स च नाना क्लेश
कर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः प्रधानपुरुषाभ्यामन्यः माहेश्वराः स्वतंत्रः कारणमीश्वरः कार्यं प्राधानिकं म
हदादि योगो ध्यानकारादिध्यानधारणादिर्विधिस्त्रिषवणस्नानादि ब्रह्मचर्यावसानो दुःखान्तो मोक्षः पशव आत्मनस्तेषां पाशो बंधनं
तद्विनाशो दुःखान्तः एषु तेषामभिसंधितश्चेश्वरस्य स्वत्वाधिष्ठातुः कुंभकारादेः कुम्भादिकार्ये निमित्तकारणत्वमात्रं न त्वुपादानत्व
मपि तस्माद्विरोधिष्ठिताधिष्ठानकारणानां निमित्तमेव नत्वुपादानत्वमपि एकस्याधिष्ठानं विधिष्ठेयत्वविरोधादिति प्राप्त एवं
प्राप्ते अभिधीयते पत्युरसामंजस्यादिति इदमत्राकूतं ईश्वरस्य निमित्तकारणमात्रत्वमागमाद्वा निश्चीयेत प्रमाणान्तराद्वा
प्रमाणान्तरमप्यनुमानमर्थापत्तिर्वा न तावदागमात् तस्य निमित्तकरणप्रतिपादनपरत्वादित्यसकृदावेदितं स्यात् न
नास्ति चार्थप्रमाणान्तरमारूढयन्तत्रानुमानं तावन्न संभवति तद्धि दृष्टान्तानुसारेण प्रवर्तते तदनुसारे चासामंजस्यं तदा
हरिनमध्येति एतदुक्तं भवति नामासामान्यादीश्वरस्यैतदृष्टमनुसारेण प्रवर्तते नहि स्वर्गस्वर्गदेवतादिषु त्वागमा
देवगम्यमानेषु किंचिदस्ति दृष्टं न त्वागमोदृष्टसाधर्म्ये प्रवर्तते न त्व श्रुतिरसिद्धार्थमदृष्टानि दृष्टांतविपरीतस्वभावानि
बहून्यपि कल्पयति तानि न लोहगंधिनामाचाहं प्रतिमावदंप्रतिमाणसावत्वात् यत्तु तत्र कथं विदृष्टानुसारः क्रियते स
कल्पावमात्रेण आगमानुपेक्षमनुमानं दृष्टसाधर्म्येण प्रवर्तमानं दृष्टविपर्ययेनुपादविभ्रीलतरामिति प्राणिकर्मापेक्षत्वा
न्न दोष इति चेन्न कुतः कर्मेश्वरयोर्मिथः प्रवर्त्यप्रवर्तकत्वे इतरेतराश्रयदोषप्रसंगात् अयमर्थः यदीश्वरः करुणा
पराधीनो वीतरागस्ततः प्राणिनः कं प्रत्येकं कर्मणि न प्रवर्तयेत् तच्चोत्पन्नमपि नाधितिष्ठेत् तावन्मात्रेण प्राणिनां दुःखानु
त्पादात् महेश्वराधीनात्मनः स्वातंत्र्येण कं प्रत्येकं कर्म कर्तुमर्हति तदनदस्थितं वा कं प्रत्येकं कर्म स्वफलं प्रसोतुमुत्सहते तस्मा

वाच॰ २ स्वतंत्रोपीश्वरः कर्मभिः प्रवर्त्यत इति दृष्टविपरीतं विकल्पनीयं तथाचागमप्रयोगं उत्सोपरिस्फोटइत्यतराश्रयात्कः प्रसज्येत कर्मणे
श्वरः प्रवर्तनीयः ईश्वरेण च कर्मेति शंकते नानादित्वेन चेत्। पूर्वमकर्मणेश्वरः संप्रतितने कर्मणि प्रवर्त्तते न चेश्वरेण संप्रति त
४० नं कर्मस्वकार्ये प्रवर्त्ततइति निराकारोति नवर्तमानकालत्वादिति अथ पूर्वकर्म कथमीश्वरः प्रवर्तितं ईश्वरप्रवर्तनं लक्षणं कार्यं
करोति तत्रापि प्रवर्तनमीश्वरेण पूर्वतरकर्मप्रवर्तितेन त्वयमंधपरंपरादोषः चक्षुष्मतानुअंधो नियंतेनांतरेण तथाहापि द्वाव
पि द्वापि प्रवर्त्तकाविति कः कं प्रवर्त्तयेदित्यर्थः अपि च त्वन्मत्यापि कानामीश्वरस्य निर्दोषत्वस्समयविरुद्धमित्याह अपि चेति अस्मा
कं तु नायं समय इति भावः ननु कारुण्यादिप्रवर्त्तमानो जनो दृश्यते न च कारुण्यदोष इत्यत आह स्वार्थप्रयुक्त एवेति।
कारुण्याद्धि सत्त्वस्य दुःखं भवति तेन तेन तद्धरणाय प्रवर्त्तत इति कारुण्योपि स्वार्थः प्रयुक्त एव प्रवर्त्तते नेवकामपि कोदोषइ
त्यत आह स्वार्थवत्तादीश्वरस्येति अर्थित्वादित्यर्थः पुरुषः स्वचोदीशात्वाभ्युपगमात्तथा त्वत्प्रवृत्तिरिति अपरमिति
दृष्टानुसारेण स्वरूपमाह संबंधानुपपत्तेश्च दृष्टो हि सावयवानामसर्वगतानां च संयोगः अप्राप्तिपूर्विका हि प्राप्तिः संयोगो
न सर्वगतानां संभवति अप्राप्तेरभावाच्चिरवयवत्वात् च अप्राप्तत्वान्नाहि संयोगस्य स्वभावः न च निरवयवेष्वस्याव्याप्तिता
संयोगस्य संभवतीत्युक्तं तस्माद् व्याप्यतीताया संयोगव्यापिकायाः निवृत्ते व्याप्यस्यसंयोगस्य निवृत्तिरिति भावः। नापि
समवायलक्षणः सह्ययुतसिद्धानां मध्याधारभूतानामिह प्रत्ययहेतुः संबंध इत्यभ्युपेयते न च प्रधानपुरुषेश्वराणामि
योत्स्याधारभाव इत्यर्थः नापि योग्यतालक्षणः कार्यगम्यः कार्यसंबंध इत्याह नाप्यन्य इति नहि प्रधानस्य महदहंकारादिकारण
त्वमप्यापि सिद्धमिति शंकते ब्रह्मवादिन इति। निराकारोति न कुतः स्वस्य मायोनिर्वचनीयतादात्म्यलक्षणं संबंधोपपत्तेः।अ
पि चेति आगमो हि प्रवृत्तिं प्रति निदृष्टांतमपेक्षते इत्यदृष्टपूर्वेतदिद्रद्वैप्रवर्तितुं समर्थः अनुमानं तु दृष्टानुसारि नैवं विधे

४०

प्रवर्तितुमर्हति शंकते परस्यापीति परिहरति नेति अस्माकं तु ईश्वरागमयोरनादित्वादीश्वरयोनित्वेष्यागमस्य न दोष इति
भावः। अधिष्ठानानुपपत्तेश्च यथार्थदर्शनमनुमानं प्रवर्त्तते। नालौकिकार्थविषयमितिहाविदन प्रसमर्त्तनमं रूपमस्य।
करणवतेभ्योगादिस्य रूपादिहीनमित्यनुमानं प्रवर्त्ततेत्यर्थः रूपादहीनं करणाधिष्ठानं हि पुरुषस्य स्वभोगावादसावेवदृष्ट
नान्यत्र नहि कुलालकुदालादि अपरिदृष्टं व्यापारयन् कश्चिदुपलभ्यते तस्माद्रूपादिहीनं करणं व्यापारयतरीश्वरस्य भोगादिप्र
सक्तिः यनथा चानीश्वरत्वमिति भावः कल्पांतरमशान्यथेति पूर्वमधिष्ठितिरधिष्ठानं इदानीं तु अधिष्ठानं भोगायतनं शरीरमुक्तं
तथा भोगादिप्रसंगेन नीश्वरत्वं पूर्वमापादितं संप्रति तु शरीरत्वेन भोगादिप्रसंगादनीश्वरत्वमुक्तमिति विशेषः अंतवत्वमसर्वज्ञता
वा अपि च सर्वत्रानुमानं प्रमाणं यतः प्रधानपुरुषेश्वराणामसंख्याभेदवत्त्वमंतवत्त्वं चंद्रमसंख्यान्यत्वे सति प्रमेयत्वाद्दानुमानत्वं
ततश्चांतवत्त्वमसर्वज्ञता वा अस्माकं त्वागम्येऽर्थे तद्बाधितविषयतया नानुमानं प्रभवतीति भावः स्वरूपमात्रमपि परस्याहाथ्यानपुनह
परिमाणदर्शिं स्वं चेति अर्थभेदस्य परोक्ष इत्यंतरे विकल्पः यस्यांतोस्ति तस्यांतत्वाग्रहणमसर्वज्ञतामापादयेत् यस्यत्वनंतत्वना
स्तित्स्य च तदग्रहणं नासर्वज्ञतामावहति नहि शशविषाणाज्ञानादज्ञो भवतीति भावः परिहरति आगमानपेक्षस्यानुमानप्रत
त्वमभ्युपगम्यते त्युक्तं उत्पत्त्यसंभवात् भावस्यविसंवादात् अत्रांशे विसंवादः समरस्यते तमंशमाह यत्पुनरिदमुच्यते वासुदे
वात्संकर्षणइति जीवस्य हि कारणवत्त्वे सत्यनित्यत्वं अनित्यत्वे च परिलोकिनो भावात् परलोकाभावः ततश्च स्वर्गनरकाद्यपवर्णा
भावाद्यत्ते नास्ति कर्मेत्यर्थः अनुपपत्तिश्च जीवस्योत्पत्तिरिति सूत्रे प्रतिषेधिष्यति चेति न च कर्तुः करणं यद्यप्यन्ये कश्चित्स्वय
र्थ इति नः परशुं हत्ते न पलाशांश्छिनत्ति यद्यपि च प्रत्यक्षत्वेनेंद्रियार्थत्वमनःसन्निकर्षलक्षणं ज्ञानकारणमुदाराचार्यविज्ञा
नाति तथापि संकर्षणो करणः कथं प्रद्युम्नाख्यमंतःकरणं कुर्यात् अकरणस्य वा करणसामर्थ्ये हुतं करणनिर्माणे नाकर

वाच॰ णादेव निखिलं कार्यसिद्धिरिति भावः विज्ञानादिभावे वा तदप्रतिषेधः वासुदेवादय एव संकर्षणादयो निरस्ताविद्यादिदोषर-
४१ हिताः निरधिष्ठाना निरवद्यात्मानो अनये वा निरवद्या नित्यत्वादिरहिताः तस्मादुत्पत्त्यसंभवो गुणत्वाच्च दोष इत्यर्थः अत्रोच्य-
ते। एवमपीति माभूदभ्युपगमे न दोषः प्रकारान्तरेण त्वयमेव दोषः प्रश्नपूर्वकं प्रकारान्तरमाह कथं यदिति न तावदेते प-
रस्परभिन्ना ईश्वराः परस्परस्याहेतुभावा भवितुमर्हन्ति आहतकामत्वेन कार्यानुत्पादात् अनाहतकामत्वे वान्यत्वैकमीश्वरत्वे
एकेनैव शतानायः कृतः कल्पनानर्थकी इतरेषां संभूय चैकमत्यापरिपुष्टं न कश्चिदीश्वरः स्यात् सिद्धान्तहानिश्च भगवानेको वै
वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात् तस्मात्कल्पान्तरमास्थायापि चोत्पत्त्यसंभवो दोष इत्याशयवान् कल्पान्तरमुपन्य-
स्योत्पत्त्यसंभवेनापाकरोति अथायमभिप्रायान्निगमनमन्यत् विप्रतिषेधाच्च गुणिभ्यः खल्वात्मिनो ज्ञानादीन् गुणान्भेदे-
नोक्त्वा पुनरभेदं ब्रूते आत्मन एवैते भगवन्तो वासुदेवा इति आदिग्रहणेन प्रद्युम्नानिरुद्धयोर्मनोहंकारलक्षणतयात्मनो
भेदमभिधायात्मान एवैते इति तद्विरुद्धाभेदाभिधानमपरं संगृहीतं वेदविप्रतिषेधो व्याख्यातः ॥ ॥ इति श्री
वाचस्पतिमिश्रविरचिते भगवत्पादशारीरकभाष्यविभागे भामत्यां द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ ॥
न वियदश्रुतेः पूर्वं प्रमाणान्तरविरोधः श्रुतेर्निराकृतः संप्रति तु श्रुतीनामेव परस्परविरोधो निराक्रियते तत्र श्रुतीनां परस्प-
रविरोधमाह वेदान्तेषु तत्र तत्रेति श्रुतिविप्रतिषेधाच्च परपक्षाणामनपेक्षत्वं स्थापितं तद्वत्स्वपक्षस्य श्रुतिविप्रतिषेधा-
दिति तदर्थनिर्मलतमर्थाभासनिराकरणार्थं तत्प्रतिपादनं तस्य फलं स्वपक्षस्य जगतो ब्रह्मकारणत्वस्यानपेक्षत्वात् शंकानिवृत्त्य-
र्थ इति इह हि पूर्वपक्षे श्रुतीनां मिथो विरोधः प्रतिपाद्यते सिद्धान्ते त्वविरोधः तत्र सिद्धान्तैकदेशीनो वचनं न वियदश्रुतेरिति ॥ ४१

तस्यायमभिसंधिः यद्यपि तैत्तिरीयके वियदुत्पत्तिश्रुतिरस्ति तथापि तस्याः प्रमाणान्तरविरोधाद्धेतुश्रुतिविरोधाच्च गौणत्वं तथा च वि-
यतो नित्यत्वात्तेजःप्रमुख एव सर्गस्तथा च न विरोधः श्रुतीनामिति तदिदमुक्तं प्रथमं तावदाकाशमाश्रित्य चिन्त्यते किमस्योत्पत्ति-
रस्त्युत नास्तीति यदि नास्ति न श्रुतिविरोधाशंका अथास्ति ततः न श्रुतिविरोध इति तत्परिहाराय प्रयत्नान्तरमास्थेयमित्यर्थः।
तत्र पूर्वपक्षसूत्रं अस्ति त्विति नहि सर्गप्रकरणे केवलस्याकाशस्यैव प्रथमः सर्गः श्रूयते छान्दोग्ये च केवलस्य तेजसः प्रथमः सर्गः
न च श्रुत्यन्तरानुरोधेनासहायस्याधिगतस्यापि सहायताकल्पनं युक्तं सहायत्वात् न च परस्परानपेक्षाणां व्रीहियववद्विकल्पा-
नुष्ठाने हि विकल्पो नुष्ठानं हि न कल्पते न वस्तुनि हि स्थाणुर्वा पुरुषो वा विकल्पो वस्तु न हि स्थाणुपुरुषाविकल्पो वस्तुनि प्रतिष्ठां लभते न च व-
र्णभेदेन व्यवस्थोपपद्यते सांप्रतिकसर्गविभूतपूर्वस्यापि तथात्वात्। न खल्विह सर्गे क्षीराद्दधि जायते स्वर्गान्तरं तु दध्नः क्षी-
रमिति भवति तस्मात्सर्गश्रुतयः परस्परविरोधिन्यः अत्रास्मिन्नर्थे प्रमाणं भवितुमर्हन्तीति पूर्वः पक्षः सिद्धान्तैकदेशी सूत्रेण
स्वाभिप्रायमाविष्करोति। गौण्यसंभवात्। प्रमाणान्तरविरोधेन हेतुश्रुतिविरोधेन वाकाशस्योत्पत्त्यसंभवात् गौण्याकाशोत्प-
त्तिश्रुतिरित्यविरोध इत्यर्थः प्रमाणान्तरविरोधमाह नह्याकाशस्येति समवाय्यसमवायिनिमित्तकारणेभ्यो हि कार्यस्योत्प-
त्तिर्नियता तदभावे न भवितुमर्हति धूम इव धूमध्वजाभावे तस्मादसत्कारणमाकाशं नित्यमिति अपि च यदुत्पद्यते त-
यो पौर्वापर्यमन्तरमर्थक्रियेनोपलभ्यते उभयत्र च दृश्यते यथा तेजःप्रभृतीनां न चाकाशस्य तादृशो विशेष उत्पादानुत्पा-
दयोरस्ति तस्मान्नोत्पत्तिमदित्याह उत्पत्तिमतां वेति प्रकाशनं प्रकाशो नाप्यहंप्रत्ययादिगोचरः इत्यादि वैधर्म्याच्चेति आदि-
ग्रहणेन द्रव्यत्वे सत्यस्पर्शत्वात् आत्मवन्नित्यमाकाशमिति गृहीतं आरण्यानकाशस्येति च दैर्घ्यं कस्याकाशस्यौपाधिकं
बहुत्वं तदेवं प्रमाणान्तरविरोधेन गौणत्वमुक्त्वा श्रुत्यन्तरविरोधेनापि गौणत्वमाह। शब्दाच्चेत्यागमं स्याच्चैकस्य ब्रह्मशब्दवत्।

वाच॰ २ परस्यानुषंगेन परार्थस्य तस्य कचिन्मुख्यं कचिदौपचारिकं संभवासंभवाभ्यामित्यविरोधात् चोद्यद्वयं करोति कथमिति प्रथमं
परिहरति एकमेवेतिनावदिति कुलुंम्हे अमंत्राणिपात्राणिघटशरावादीनि अपेक्ष्य कर्मप्रधारणं सर्वविषयमित्यर्थः द्विती
४२ यं चोद्यं व्याकरोति अत एव ब्रह्मविज्ञानेनेति लक्षणान्यत्वाभावेन नाकाशस्य ब्रह्मणोऽनन्यत्वादिति अपिचाव्यतिरिक्तदेशकाल
माकाशं ब्रह्मणा च ब्रह्मकार्यैश्च तस्माद्वोद्धनिमस्वभावेरतः क्षीरकुंभप्रसिद्धकतिपयपयोबिंदुवद्ब्रह्मणि तत्कार्ये च विज्ञातेऽनभ्रो
विदितं भवतीत्याह अपिच सर्वकार्याणुत्पद्यमानानामिति एवं सिद्धांतैकदेशीमतेऽभेदं इदमाह प्रतिज्ञाहनि प्रतिज्ञाहानिरव्य
तिरेकाच्छब्देभ्यः अयं विवर्तात्मनया अयतः तद्विकारस्य वस्तुतोऽब्रह्मणो भेदं ब्रह्मणि ज्ञाते ज्ञानमुत्पद्यते अविरक्वविदि
ते तु तत्स्य त्वांतरितं ब्रह्मणि विदिते विदितं भवति भिन्नयोस्तु लक्षणान्यत्वाभावेऽपि देशकालाभेदेऽपि नान्य तज्ज्ञाने नान्य
तज्ज्ञानं भवति नहि क्षीरस्य घटकुंभे क्षीरे गृह्यमाणे सत्स्वपि पयोबिंदुषु प्रायः तत्त्वं प्रतिभासनतिविशानं तस्माच्च तत्तीदोऽ
विदितं विदितमिति प्रतिज्ञा दृष्टांतयाश्वया तुपरोधायविपदउत्पत्तिरकामेनाप्युपेयति तदेवं सिद्धांतैकदेशिना दूषिते प्रदू
पक्षिः स्वपक्षविशेषमाह। सत्यंदर्शिनं अत एव विरुद्धं गाहितिसिद्धांतसारमाह नेष दोषः तेजः सर्गस्य तैत्तिरीयक इति श्रुत्या
रन्यथोपपद्यमानोपपद्यमानयोरन्यथानुपपद्यमानावलंबत्वं तेन श्रुतिश्चान्यथोपपद्यत इति दुर्बला तत्सहायं तेजः प्रथममव
गम्यमानं समहायत्वेन विरुध्यत इति उक्तमतज्जाहन हीयं श्रुतिस्तेजो जनिमतेति सर्गश्रौतमभेदत्वार्थः सच श्रुत्यंतरेण विरो
धिना वाध्यते जघन्यत्वान्न च तेजः प्रमुख सर्गवेद सहायमप्यस्य श्रौतं किंतु व्यतिरेकलभ्यं तदनचश्रुतेन तदप्यबाधतं तुच
स्य तेजः सर्गस्यानुपपद्यते तदिदमुक्तं तेजो जनिमधानेतिस्यादेतत् यद्येकं वाक्यमनेकार्थं न भवत्येकस्य व्यापारद्वयासंभवा
न्न तर्हि भोः कथमेकस्य सदुरनेकव्यापारत्वमविरुद्धमित्यत आह यद्यत्रैकोपीति वृद्धप्रयोगाधीनावधारणशब्दसामर्थ्यं न चा
४२

नाद्वृत्तस्य शब्दस्य क्रमाक्रमभ्यासनेकार्थे व्यापारो दृष्टः दृष्टेन क्रमाक्रमत्साभेकस्यापि कर्तुरनेकव्यापारत्वमित्यर्थः न चास्मिन्नर्थे
एकस्य वाक्यस्य व्यापारोपि भिन्नानां वाक्यानामित्याह न चास्माभिरेते सृगमं चोदयति ननु शमविधानार्थमिति परः शब्दः सश
ब्दार्थं चिपस्यपि परोपि तु शमपाद इत्यर्थः परिहरति नहि तेजः प्राधान्यानुरोधेनेति गुणत्वादार्थता च क्रमस्य तु तत्प्रधानपदार्थविरो
धात्स्य गौण युक्त इत्यर्थः सिंहावलोकन्यायेन विप्रदनुत्पत्तिवादिनं प्रत्याह अपिच छांदोग्य इति यत्तु नरन्यथा प्रतिज्ञोपपादनं
भ्रांतिमूलं चैतद्वचनमेकमेवाद्वितीयमिति तोयेक्षीरबुद्धिवत् औपचारिकं वा सिंहो माणवक इतिवत् तत्र न तद्युक्तमित्या
ह क्षीरोदकन्यायेनेति भ्रांतेर्विप्रलंभाभिप्रायस्य च पुरुषधर्मत्वादपौरुषेये तदसंभवादित्यर्थः नाप्यौपचारिकमित्याह सावधा
मनागपि माणवक इति वदंति लौकिकाः तस्माद्वृत्तत्वमैकांतिको जगतो विवक्षितं श्रुतं तत्तौपचारिकं आख्याते हि भूय
स्त्वमर्थस्य भवति न तत्त्व त्वमतिप्रागे त्वौपचारिकत्वमित्यर्थः न च स्वकार्यापेक्षयेति निःशेषवचनः स्वरसः सर्व
शब्दो नासति श्रुत्यंतरविरोधे एकदेशविषयो युक्त इत्यर्थः आकाशस्योत्पत्तेः प्रमाणांतरविरोधमुक्तमनुभाष्य तस्य प्र
माणांतरविरोधे न प्रमाणभूतस्य न गौणत्वापादनसामर्थ्यमित्याह यावद्विकारं तु विभागो लोकवत्। सोयं प्रयोगन्या
कारादि कालमनः परमाणवो विकाराः अनन्यत्वे सति विभक्तत्वात् घटशरावोदंचनाकरादिति सर्वं कार्यं निरात्मक इति नि
रूपणं स्यादित्यर्थः शून्यकार्यादश्च निराकृतश्च स्वयमेव शून्योऽयमस्य कथमसतः सन्त्वायतेति उपादितं चैतन्निराक
रणमयुक्तमिति आत्मवादे चोपादानत्वादेवात्मनः प्रत्यगात्मनो निराकरणशंकानुपपत्तिः एतदुक्तं भवति सोपादा

MEMORIAL

नन्वेवं कार्यं तेन आत्मैवोपादानमुक्तं तस्यैवोपादानत्वे तच्छ्रुतेरुपादानान्तरकल्पनानुपपत्तेरिति स्यादेतत् अस्त्वात्मोपादानमस
ज्जगतः तस्यानुपादानान्तरमश्रूयमाणमप्यनुपपत्त्या भविष्यति स न आह नह्यात्मागन्तुकः कस्यचिदुपादानान्तरस्योपादेयः कुतः
स्वयंसिद्धत्वात् सत्ता चाप्रकाशो वा स्वयंसिद्धौ तत्र प्रकाशात्मिकायसिद्धेस्तावदनागन्तुकत्वमाह नह्यात्मागमनइति उप
पादितमेतद् यथा संशयविपर्यासपरोक्षाज्ञानास्पदत्वादेकदापि नात्मा पराधीनप्रकाशस्तदधीनं प्रकाशास्तु प्रमाणादयो
अत एव श्रुतिः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति नचेदृशस्य निराकरणं संभवतीति निराकरण
मपीहि तदधीनात्मलाभं तद्विरुद्धं नोदेतिमर्हतीत्यर्थः सत्ताया अनागन्तुकत्वमस्याह तथा हमेवेदानीं जानामीति प्रमात्रप्रमा
णेयप्रमायाणां वर्तमानानीतानागतत्वेऽपि प्रमातुः सदा वर्तमानत्वेनानुभवादस्य नुतस्वभावस्य नागन्तुकत्वं सत्त्वं स्थापय
मादायनिवर्तत इति अन्यथाभवत्यपि ज्ञातृत्वमिति प्रकृतिप्रत्यायाभ्यां ज्ञानशब्देनोस्यथाभावो दर्शितः ननु जीवन्तुःप्र
मातुरभिन्नस्य यथाभावोऽन्यत्तस्य भविष्यतीत्यत आह तथा भस्मीभवत्यपीति यत्खलु स्वस्वभावमनुभवसिद्धं तस्यानिर्वचनी
यत्वमन्यतो बाधकाद्भवस्तात्कृत्स्नं बंधकं च घटादीनां स्वभावाद्विचलनं प्रमाणोपनीतं भस्मनि तदस्त्यात्मनो न तस्यात्म
त्वं युक्तमबाधितानुभवसिद्धस्य सत्स्वभावस्यानिर्वचनीयत्वमाणेत्वकल्पनायां प्रमाणाभावात् तदिदमुक्तं न संभाव
यितुं न शक्यमिति तदनेन प्रबंधेन प्रत्यनुमानेनाकाशानुसत्त्वानुमानं दूषयित्वा अनैकांतिकत्वेनापि दूषयति यत्तूक्तं स
मानजातीयमिति नाप्यनेकमेवोपादानमुपादेयमारभते यत्र हि क्षीरं दधिभावेन परिणमते तत्र नावयवानामनेकेषामु
पादानमभ्युपगतं किंतु रूपान्तरमेव क्षीरमेकमुपादेयदधिभावेन परिणमते यथा निरवयवपरमाण्वादीनां क्षीरपरमाणुःभा

वेने [illegible] मतिरोधम विरोधितार्थं   एतेन मातरिश्वा व्याख्यातः यच्चभ्यासेभ्यस्त्वमर्थस्य भवति नात्यन्तं दूरतरएवोपचरित
त्वं हंतभोः पवननिलत्वप्रसंगात् वायुश्चांतरिक्षमेतदमृतमितिद्वयोरमृतत्वमुक्त्वा पुनः पवनस्य विशेषेणाह सैषा नास्तमि
ता देवता यद्वायुरिति तस्मादभ्यासाच्चापेक्षिकं वायोरमृतत्वं मर्त्यलौल्यतिकमेवेतिप्राप्तं तदिदमुक्तं आप्यदेवता अत एवमयप्रतिषेधात्
अमृतत्वस्य च वणार्चवितिवेन समुच्चयार्थे नाभ्यासो दर्शितः एवंप्राप्त उच्यते एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात्तु विज्ञानवाक्य
र्थस्य प्राधान्यात् तदुपपादनार्थत्वाच्च वाक्यान्तराणां तेषामपि चाविरेण प्रतिपादकानां मातरिश्वोत्पत्तिक्रमप्रतिपादकानां बहुल
मुपलब्धेः मुख्यभूयस्त्वाभ्यासन्यायात् श्रुतीनां बलीयस्त्वादेतदनुरोधेनामृतत्वासमपप्रतिषेधावापेक्षिकत्वेन नेतव्याविति भूयसीश्रु
तिः अपिश्रुतिशब्दमात्रमुक्तेः। असंभवस्तु सतोऽनुपपत्तेः॥ ननु नन्वास्य कश्चिज्जनितेत्यात्मनः सतोऽकारणत्वश्रुतेः कथ
मुत्पत्त्याशंकानवकाशवचनमहद्भूतपूर्वः पक्ष इतियुक्तमथातो ब्रह्मजिज्ञासाधिकारादर्थानानुपपत्तेरित्यत आह वियत्पवनयोरि
ति यथा हि वियत्पवनयोरमृतत्वश्रवणान्सामयत्वश्रुतिः श्रुत्यन्तरविरोधापेक्षिकत्वेन नीतैवमकारणत्वश्रुतिरात्मनो ग्निविस्फु
लिंगदृष्टांतश्रुतिविरोधात् प्रमाणान्तरविरोधापेक्षितत्वेन व्याख्यातव्या न चात्मनकारणत्वे नवस्थालोहगंधिनामा हवत्सनो
हितात्कार्यकारणपरंपरापारतिभावः तथा विकारेभ्य इति प्रमाणान्तरविरोधो दर्शितः. एवंप्राप्त उच्यते सदेशवकस्वभाव
स्यात्मत्वसंभवः कुतः अनुपपत्तेः तथा विकारेभ्य इति सदेकस्वभावं हि ब्रह्म श्रूयते तदसति बाधकेनान्यप्राप्तिनयं उक्त
मेतद्विकारं सत्त्वेनानुभूताः अपि कतिपयकालकलातिक्रमे विनश्यन्तो दृश्यन्त इत्यनिर्वचनीयास्तेका लावच्छेदाहिति। न
चात्मा तादृशस्तस्य श्रुतेऽनुभवाद्वा वर्तमानैकस्वभावत्वेन प्रसिद्धेस्तदिदमाह सन्मात्रं हि ब्रह्मेति एतदुक्तं भवति यत्स्व
भावाद्विचलति तदनिर्वचनीयं निर्वचनीयोपादानं युक्तं न तु विपर्ययः यथा रज्जुपादानसर्पे न तु सर्पोपादाना रज्जुरिति॥

वाच॰ २ यमोस्तु स्वभावादप्रसुतिस्तमो निर्वचनीयमोर्नोपादेयोपादानभावो यथा रज्जुसुक्तिकयोरिति नचनिरधिष्ठानो विभ्रमदृष्टाह
नाप्यसत इति मलप्रकृत्यनभ्युपगमे न वस्तुत्वप्रसंगादिति पारमार्थिको हि कार्यकारणभावो ऽनादिर्नानवस्थया दुष्यति स
४४ मारोपस्तु विकारस्यनस मारोपितोपादानइत्युपपादितं भाष्यमिकनिषेधामतपरिक्षायाधिकारेनदत्र नप्रस्मर्तव्यं तस्मात्त्रा
सदधिष्ठानविभ्रमसमर्थतानादिले नोचितेत्यर्थः स्फुलिंगश्रुतिश्चौपाधिकरूपापेक्षनेतयानेनव्याशेषमतिरोहितार्थं येतु
गुणदिक्कालोत्पत्तिविषयमिदमधिकरणं वर्णयांचक्रुः तेः सतोनुपपत्तेरपिक्लेशेन व्याख्येयतां अविरोधसमर्थनत्रस्तावेचा
स्यसंगतिर्नवक्तव्या अवादिवदिकालादीनामुत्पत्तिप्रतिपादकवाक्यानवगमात्तद सांतावत्। तेजोतस्तथाह्याह ४
यद्यपिवायोरग्निरित्यपादानपंचमीकारकविभक्तिरूपपदविभक्तेर्बलीयसीति नियमानंतर्यपरामुक्तास्तथापि हुत्श्रुतिवि
रोधेन दुर्बलाप्युपपदविभक्तिरेवाश्रयितानतश्चोतनंतर्यदर्शनपरेयं वायोरग्निरितिश्रुतिः नचसाक्षाद्ब्रह्मयजत्वसं
भवेद्व संते नतज्जत्वंपरंपरयाअपितु युक्तं वाजपेयस्यपशूयूपपदितिप्रासं एवंप्राप्तउच्यते युक्तं पशुयागयोरंगांगिनो
र्नानात्वात्तत्रत्साक्षाद्वाजपेयासंबंधक्लेशेनपरंपराश्रयणं इहतु वायोरपि अविकारस्यापिवद्ब्रह्मणो वस्तुतो नन्यत्वात्
वायूपादानत्वेपि साक्षादेवब्रह्मणोपादानत्वोपपत्तेः कारकविभक्तेर्बलीयस्त्वानुरोधेनोभययोपपद्यमाना श्रुतयः कां
स्यापोत्रिन्यायेन नियम्यंत इतियुक्तमितिसिद्धांतः पारंपर्यजत्वेपीतिभेदकत्वनाभिप्रायं यतः पारमार्थिकमभेदमाह
वायुभावापन्नं ब्रह्मेति यथा तस्याग्निजमिति दृष्टांतः परंपरामात्रसामान्येनन तु सर्वथासाम्येनेति सर्वमवदातं।
आपः निगदव्याख्यातेन भाष्येण व्याख्यातं पृथिव्यधिकाररूपशब्दांतरेभ्यः अन्नशब्दोयंश्रुतस्त्वाच्चप्रसिद्धत्वाद्व्रीहि
यवादौ वर्तते दिकारश्चोदनेप्रवर्ततेश्रुतिश्चप्रकरणाद्बलीयसी सा च विशेषेणापोद्बलीयतायत्रधन्वनवर्षतीत्यननतस्मा

४४

दन्नबहुलास्यैवमोहि यवापनाभ्योजातं इतिविवक्षितं कार्यमपि हिंसंभवति कस्यचिद्द्गीयस्य न हि पृथिव्यापिरूप्णा लोहितादिरू
पापाअपिदर्शनात् न तस्य प्रसंक्तदेणाभ्यः पृथिवी पृथिव्या ओषधय इत्यादिना विरोध इति पूर्वपक्षश्रुतेर्विरोधे वस्तु निर्विकल्पा
नुपपत्तेरन्यतरानुगुण तया ऽन्यतयानेतव्या तत्र किमन्नः पृथिवीति पृथिवीशब्दोऽन्नपरतयानीयते उततान्यमन्नशब्देऽन्त्य
शब्दः पृथिवीपरतयेति विषये महाभूतविकारानुरोधान्वायिकरूपरूपानुरोधाच्च न यथांशर आसीतिचपुनःश्रुत्यनुरोधाच्च
वाक्यशेषस्य वान्यथानुपपत्तेरन्नशब्दो ऽन्नकारणे पृथिव्यामितिराद्धांतः। तदभिधानादेव तु तल्लिंगात्सः स्पष्टिक्रमेभूतानां
मविरोध उक्त इदानीमाकाशादिभूताधिष्ठानस्यादेवतः किंस्वतंत्र्याएवोत्तरोत्तरभूतस्वर्गेप्रवर्तंत उतपरमेश्वराधि
ष्ठिताः परतंत्रा इति तत्राकाशाद्वायुर्वायोरग्निरिति रवासेनिरपेक्षाणांश्रुतेः स्वयं चेतनानां वा चेतनानां तरिक्षायां प्रमाणाभावा
त्। प्रत्यावस्थचालिंगस्यपरंपर्येणापिभूतकारणस्याव्रत्वण्उपपत्तेः स्वतंत्राणामेवाकाशादीनां वाय्वादिकारणत्वमिति।
उपनोभवन्योनिलव्यापानशीलप्रासंप्रवं एवंप्राप्तेभिधीयते आकाशाद्वायुरित्यादयश्चाकाशादीनां केवलानानुपादा
नभावमाचक्षते। न पुनः स्वातंत्र्येणाधिष्ठातृत्वं न चचेतनानां स्वकार्यस्वातंत्र्यमित्येतदप्यैकांतिकं परतंत्राणामपि तेषामुपल
मुपलब्धेः भूसांतेवारिवत् तस्माल्लिंगप्रभावसामंजस्यात्स ईश्वर एव तेन आकाशादिभावेनाभावेननावतिष्ठमानः स्वयम
धिष्ठायनिमित्तकारणभूतस्तत्तद्विकारं वाय्वादिकं सृजतीति युक्तं इतरथा लिंगप्रस्तावोक्तेः सितौस्यानामिति परमेश्वरावेश
दिति परमेश्वर एवांतर्यामीति भावः विस्पष्टईक्षितानस्मात्सर्वस्य कार्यजातस्य साक्षात्परमेश्वर एवाधिष्ठातानिमित्तकारणं
ताकाशादिभावमापन्न आकाशादिभावमापन्नात्स्वरूपमुपादानमितितिसिद्धं विपर्ययेणानुक्रमोनउपपद्यते चउसतोमहाभूत
तानांक्रमश्रुतो नाप्यये आप्ययमात्रस्यश्रुतत्वात्तत्रनियमेसंभवति नानियमोऽव्यवस्थाराहिताहिसः नचव्यवस्थायां

वाच॰२ सत्यामवस्थायांयुज्यतेतत्रक्रमभेदापेक्षायांकिंदृष्टोप्यक्रमोघटादीनांमहाभूतानामप्यक्रमनियमकोस्त्वाहोश्वोनउत्पत्तिक्रम
४५ इतिविषयेश्रौतस्यश्रौतांतरमभ्यर्हितंसमानजातीयतयातस्यैवबुद्धिसान्निध्यान्नदृष्टंविजानीयत्वात्तस्माच्छ्रौतेनैवोत्पत्तिक्र
मेणाप्यक्रमोनियम्यतइतिप्राप्तएवंप्राप्तउच्यते अथयस्यक्रमापेक्षायांखलूत्पत्तिक्रमोनियामकोभवेत् नतस्यक्रमापे
क्षाहस्त्रोनुमानोपनीतेनक्रमभेदेनश्रुत्यनुसारिणाप्यक्रमस्यबाध्यमानत्वात् तस्मिन्नुत्पत्तिउपादानेपरमेणुप्रादेयमत्रो
तिसाचचैदृप्ति तस्मात्तद्विरुद्धदृष्टक्रमावरोधादाकांक्षैवनास्तिक्रमांतरंप्रत्ययोग्यत्वात्तस्यतदिदमुक्तंसूत्रकृतोपप्यनेवेति
भाष्यकारोप्याह नचासावयोग्यत्वादप्ययेनाकांक्षितश्चेति तस्मादुत्पत्तिक्रमाद्विपरीतःक्रमइति एतत्सापमल्पस्यनिरुक्तं।
अंतराविज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाविशेषात् ॥ तदेवंभावनोपयोगिनोभूतानामुत्पत्तिप्रलयक्रमौविचार्य
तद्बुद्धींद्रियमनःसांक्रमंविचारयति अत्रचविज्ञायतेनेनेतिव्युत्पत्त्याविज्ञानशब्देनेंद्रियाणिबुद्धिश्चोच्यते तत्रैवतेषां
क्रमापेक्षायांआत्मानंचभूतानांचसमाम्नानात्तेनैवपाठेनक्रमोनियम्यते यस्मात्तदुत्पत्तिक्रमभंगप्रसंगः अत्रआ
त्मनःकरणानिकरणेभ्यःप्रभृतानीतिप्रतीयते तस्मादात्मनआकाशइतिभज्येत अत्रमयासितिवृत्त्ययत्नंस्य
।अग्निरितिमन्त्रविकारार्थइतिप्राग्भिधीयते।विभक्तत्वात्तावन्मनःप्रभृतीनांकारणापेक्षायामन्नमयंहिमनइत्यादिलिंगश्र
वणात्प्रेक्षितार्थइतिविदश्चप्राणुर्मनःसंभवती एवंचभूतविकारामनआदयोभूतानांपुरस्तादुत्पद्यन्तइतियुक्तंपौष्ठत्वादिनिया
पेक्षाह अयत्नभौतिकानीति भवत्यात्मनएवकारणीभूतानि नखल्वेनानिवपिताभूतेरात्मनोनोत्पत्तव्यं तथाचनोत्क्रम
भंगप्रसंगः विशेषनेक्षितनेप्रज्ञनइतिभावनं चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात् ॥ ॥देवदत्तादि ४५

नामधेयंतावज्जीवात्मनोनशरीरस्यतस्मात्शरीरायश्रुद्धादिकरणानुपपत्तेः नत्वात्मनोदेवदत्तोजातोदेवदत्तइतिव्यपदेश
स्यमुख्यत्वंभ्रान्तानस्यपूर्वपक्षः मुख्यत्वेपारलौकिकामुष्मिकस्वर्गादिफलसंबंधानुपपत्तेः शास्त्रविरोधात् लौकिकोपदे
शोभाक्तोव्याख्येयः भक्तिश्चशरीरस्योत्पादविनाशौतत्संयोगइति जातकर्मादिवगर्भबीजसमुद्भवजीवयात्रप्र
याणंनहुजीवमन्यापत्यपार्थं अतएवस्मरंतियेनमेनःशर्मयातिबीजगर्भसमुद्भवंइति तस्मात्शरीरोत्पत्तिवि
नाशाभ्यांजीवजन्मविनाशावितिसिद्धं एतच्चलौकिकव्यपदेशस्याभ्रांतिमूलमभ्युपेत्याविकरणं उक्तस्यसाध्यापत्या
श्चभ्रांतिमूलतेति मामहतामस्यशरीरोपदर्शयाभ्यांरूढांबुद्धिनाशौआकाशादेरिवनुमहाभूतादौगदंतेचोत्पत्तिविना
शौजीवस्यभविष्यतइतिशंकांतरमपनेतुमारभते। नात्माश्रुतेर्नित्यत्वाच्चताभ्यः। विचारमूलस्यसंशयस्यबीजमाह।
श्रुतिविप्रतिपत्तेरिति तामेवदर्शयति कासुचिच्छ्रुतिष्वित्यादिपूर्वपक्षंगृण्हाति तत्रप्राप्तमिति परमात्मनस्तावद्विरुद्धध
स्यापि देहाश्रयत्वात् नुपपत्तेरात्मैवाभ्युपेतव्य इति वैधर्म्यादित्यमाह। देहधर्माश्चेति स्वपरप्रत्यक्षादि देहधर्मा दृष्टा यथा रूपा
दय इच्छादयस्तु स्वप्रत्यक्षा एवेति देहधर्मवैधर्म्यं तस्मादपि देहातिरिक्तधर्मा इति। तत्र यद्यपि चैतन्यमपि भूतविशेषगुणः
यावद्भूतमनुवर्तते न च भस्मदशायामव्यभिचारः सामर्थ्यस्य सामान्यगुणत्वात्। अपि च मदशक्तिः प्रतिमद्यावयवमात्रया व
तिष्ठते। तद्वद्देहेपि चैतन्यं तदवयवेष्वपि मात्रेण भवेत्। तथा चैकस्मिन्देहे बहवः चेतयेरन्। नच बहूनां चेतनानां अन्यो
४३

न्याभिप्रायानुविधानसंभवत्। लोकपाशवद्धा इव बहवो विहंगमा विरुद्धदिक्क्रियामुखसामर्थ्या अपि न हस्तमात्रमपि देशमतिपतितु
मुत्सहंते एवं शरीरमपि न किंचित्कर्तुमुत्सहते अपि च नालधामात्राद्धर्मिधर्मभावः शक्यो विनिश्चेतुं। ७। माभूदाकाशस्य सर्व
धर्मः सर्वत्रैवत्वात् अपि तन्वय्यतिरिक्तमांसंगंधस्यात्रव्यतिरेकः तथा च न साधकत्वमन्वयमात्रस्येत्याह अपि च सति नावदि
ति। दूषणांतरं विनष्टराशिपतिकिमात्मकं चेति। स एवैकग्रंथेनाहन्नहीति नास्तिक आहयदनुभवनमिति यथास्थिभूतपरिणाम
भेदो रूपादिः न तु भूतत्वचतुष्टयार्थांतरं एवंभूतपरिणामभेद एव चैतन्यं न तु भूतेभ्योर्थांतरं येन पृथिव्यापस्तेजो वायुरिति तत्वा
नीति प्रतिज्ञातव्याघातः स्यादित्यर्थः एतदुक्तं भवति च तुर्णमेव भूतानां समस्तं जगत्परिणामो न त्वात्मेन त्वांतरं तदयस्य परिणामो
रूपादयो ऽन्यदप्यपरिणामांतरमिति। अत्रोक्तमिति तावदुपपत्तिभिर्देहधर्मत्वं निरस्तं तमाप्युपजपत्वं तयाभिधीत्स्यमाहतज्जहीति
भूतधर्मा रूपादयो जडत्वाद्विषया एव दृष्टा न तु विषयिणः नच केशांचिद्विषयिणामपि विषयित्वं भविष्यतीति वाच्यं स्वात्मनि वृ
त्तिविरोधात्तच्चोपलब्धानेषप्रसंगः। तस्मात् जडाया स्वयंप्रकाशत्वाभ्युपगमात्। कृतोपपादनं चैतत्पुरस्तात्। उपलब्धिवरिति
सूत्रावयवं योजयति। यथैवास्यादिति। उपलब्धिभावग्रहण एव प्रमाणत्व अस्तु तर्हि व्यतिरिक्तोपलब्धिर्धर्मस्तेभ्यः स्वतंत्रा तथा
प्यात्मनि प्रमाणाभावदित्यत आह उपलब्धिस्वरूपं च नः आत्मेति। आजन्मनस्तावदुपलब्धिभेदो नानुभूयत इति विषयभेदादभ्यु
पेयः। नचोपलब्धिव्यतिरेकिणां विषयाणां प्रथासंभवतीत्युपपादितं न च विषयभेदे ग्राह्यप्रमाणमस्तीति चोपपादितं ब्रह्म
तत्वसमीक्षायामस्माभिः एवं च सति विषयरूपतन्मेदाचैव सुदुर्भावितिदूरनिरस्ताविषयभेदादुपलब्धिभेदसंबंधकथा तेनो
पलब्धत्वमपि न जातिकं किंत्वविद्याकल्पितं तत्राविद्यादशायामपि उपलब्धरभेद इत्याह अहमिदमद्राक्षमिति चेतितिनकेवलं ता
त्कालिकाद्भेदात्त्रिपत्वमतात्कालिकादपि नित्यत्वमेवेति स्यार्थः। स्मृत्साधुपपत्तेश्च नानात्वेहि नान्योनान्योपलब्धे इत्यन्यस्य पुरुषस्य स्मरिदृष्टाद् इति

वा॰च॰३ स्मृतिर्नोपपद्यते। इत्यर्थः निराकृतमप्यर्थं नियतकरणान्तरायानुभाववैयर्थ्यमिति। यो हि देहमारोढुं स्थिरसंकल्पेनेतेन देहधर्मा इति
मन्यते देहं प्रतीदं दूषणं न चासंततं देहस्यैवेतिस्मृतमुपसंहरति। तस्मादनवद्यमिति ॥ ३२ ॥ अंगावबद्धास्तु न शाखासु हि प्रतिवेदं ॥
४४ ॥ स्वरादिभेदात्प्रतिवेदमुद्गीथादयो भिद्यन्ते तदनुबद्धास्तु प्रत्ययाः प्रतिशाखं विहिताभेदेन तत्र संशयः किं यस्मिन्वेदे यदुद्गी
थादयो विहितास्तेष्वेव तद्विहिताः प्रत्यया उतान्यवेदविहितानामप्युद्गीथानां प्रत्ययाः किं तावत्प्राप्तं ओमित्येतदक्षरमुद्
गीथमुपासीतेत्युद्गीथश्रवणादुद्गीथसामान्यमवगम्यते निर्देशश्च तस्यानुपपत्तेर्विशेषाकांक्षायां स्वशाखाविहितस्य विशेषस्य संनिधा
नात्तेनैवाकांक्षादिनिवृत्तेर्न शाखान्तरीयमुद्गीथमुपसंभिहितं लक्षितौ सामान्यविशेषौ बाधितौ स्वशाखागतयोस्तयोः स्वीकरणात् शाखां
तरीयास्वीकारोऽपि यथाहुः जातिव्यक्तिर्न हीत्येवं वयं तु श्रुतिलक्षिते कृष्णादिपदमुचामः। का श्रुतिस्तत्रपीडा न इत्येवं प्राप्तेऽभिधीयते
उच्यते उद्गीथाद्यवयवबद्धास्तु समानाशाखासु प्रतिवेदमनुवर्तेरन् प्रतिशाखं भवतिष्ठेरन् उद्गीथमसादिसामान्यश्रुतेरविशेषात्।
एतदुक्तं भवति युक्तं यदेष्वनुमानये त्वादौ श्रुतिमविशेषप्रवृत्तामपि संनिधानात्। श्रुतिः श्रुतिर्बाधते इति विशिष्टार्थप्रत्यायनप्र
वृत्तत्वात्पदानां समभिव्याहारस्य च यथा तदनुपपत्तिः न च स्वार्थमात्रत्वाविशिष्टार्थप्रत्यायनप्रदानामिति विशिष्टार्थप्रयुक्तं
स्वार्थस्मरणं न स्वप्रयोजकमपबाधितुमुत्सहते मा च बाधितप्रयोजकाभावेन स्वार्थस्मारकमपीति युक्तं अविशेषप्रवृत्तायाश्चापि श्रुते
रेकस्मिन्नेव विशेषे अवस्थानं इह तु उद्गीथश्रुतेरविशेषणविशिष्टार्थप्रत्यायकत्वात्संकोचे प्रमाणं किंचिन्नास्ति। न च संनिधिमात्र ए
वाधितुमर्हति। श्रुतिसामान्यद्वारेण च सर्वविशेषगामिन्याः श्रुतेरेकस्मिन्नवस्थानं पीडैव तस्मात्सर्वोद्गीथादिविषयः प्रत्यया
इति। मंत्रादिवद्वाविरोधः। विरुद्धमिति नः क्वसे प्रत्ययाय प्रमाणेनोपलभ्यते उपलभ्यं च मंत्रादिषु शाखान्तरीयेषु शाखान्तरगत
कर्मसंबंधितं न द्वादिहापि निदर्शनादि विरोधः तच्च दर्शितमाचार्येण स्वात्मनेनेति। भिन्नक्रतुन्यायस्तत्तथा च दर्शयति ॥ ३२ ॥

४४

वैश्वानरविद्यायां दोषे किं व्यस्तोपासनं समस्तोपासनं च उत समस्तोपासनं च उत समस्तोपासनमेवेति। तत्रादिवमेव भगवो राजन्निति
होवाचेति प्रत्येकमुपासनाश्रुतेः प्रत्येकफलव्यपदेशाच्च समस्तोपासनमेवेति। तत्रादिवमेव भगवो राजन्निति होवाचेति प्रत्येकमुपासनाश्रु
तेः उभयथाप्युपासनं न च यथा वैश्वानरीयेष्टौ पद्धाकपालोऽष्टवतीत्यादीनामवयुस्तकारिणां प्रत्येकं फलश्रवणेऽपि अर्थवादमात्रत्वं वैश्वा
नरं द्वादशकपालं निर्वपेदिति तस्यैव तु फलवत्त्वम एवम् अत्रापि भवितुमर्हति। अत्र हि द्वादशकपालं निर्वपेदिति विधिविभक्तिश्रुतिर्यदष्टाक
पालोऽष्टवतीत्यादिषु च वर्तमानापदेशाः न च तच्चनानि चतुर्वेदाविति विधिकल्पना। अव युज्यवादेन स्तुत्या प्युपपत्तेः इह तु समस्तव्यस्तो
वर्तमानापदेशस्याविशेषात् अगत्या प्रमाणविशेषतया उभयत्रापि विधिकल्पनायाः फलकल्पनायाश्चाभेदात् निंदायाश्च समस्तो
पासनाभेऽन्यस्तोपासनेष्वप्युपपत्तेः। श्यामश्वाहुतिमप्यवहरतिवत्। उभयविधमप्युपासनमिति प्राप्त उच्यते समस्तोपासनस्यैव स्यात्परत्वं
न व्यस्तोपासनस्य यद्यपि वर्तमानापदेशत्वमुभयत्राप्यविशिष्टं तथापि पौर्वापर्यालोचनया समस्तोपासनपरत्वस्यावगमः। गलदंग
वाक्यन्तरस्यार्थः यथाहि प्राचीनशालप्रभृतयो वैश्वानरचिंतायां निर्णयायाश्वपतिं कैकेयमाजग्मुः तं च जगदेकदेशोपासनमुपन्य
स्यंतः तत्र कैकेयस्तदुपासनं निंदापूर्वं तन्निवारणेन समस्तोपासनमुपसंजहार। तथा चैकवाक्यता लाभाय वाक्यभेदपरिहारा
य समस्तोपासनपरत्वे तत्संदर्भस्य लक्ष्यते तस्माद्धुतफलसंकीर्तनं प्रधानत्वेनायसमस्तोपासनस्यैव तु फलत्वमिति सिद्धं इदमुक्तं
शिष्याख्यानमुपन्यस्यद्वयपतिके चित्वत्रे तिसंभवत्येकवाक्यत्वेभेदस्याऽन्याय्यत्वात् नेदंशास्त्रं व्याख्यानं समंजसमिति अर्थः। नानाश
ब्दादिभेदात् सिद्धं कृत्वा विद्याभेदमभ्यसनविचारजातमभिनिवर्तितं संप्रति सर्वासामभिन्नगोचराणि विद्यानां किमभेदो भेदो वा। एवं प्राप्ये
गोचरास्तितिविचारयितव्यं ननु यथा प्रत्ययाभिधेया अपूर्वभावनाया आज्ञानतो भेदात्सा वैपिध्यात्वर्थेन रूप्यमाणत्वात् तस्य च यागादेर्भे
दात् प्रकृतार्थयागादित्वर्थानुबंधभेदात् भेदः नरदु रत्नायाऽवतस्याः प्रतीयमानत्वात् एवं विद्यानामपि तो वेद्यस्येश्वरस्याभेदे पि तत्तत्

वा॰३ सत्यसंकल्पत्वादिगुणोपधानभेदात्। विद्याभेद इति नास्त्यभेदाशंकामुच्यते उक्तमनुबंधभेदात् कार्यरूपाणामपूर्वभावनाभेद इति
४५ ब्रह्मणः सिद्धरूपत्वाद्गुणानामपि सत्यसंकल्पत्वादीनां तदाश्रयाणां सिद्धरूपत्वात्सर्वत्राभेदोऽपि विद्यासु। नहि विशालत्व तुच्छत्वकोरेण
सत्त्रिपद्युपाद्युत्ववत्प्रधर्मे सिकल्पो परिष्टोऽत्र सिंहास्यो दपस्कंभः स एवोपदिश्यमानः कौरेण त्वाप प्रजहाति। नखलु प्रत्युपदेशं
वस्तुभिद्यते। तस्य सर्वत्र नानैरैस्यात्। अनादवस्थे तावदेवं नभवेत् नहि वस्तु विकल्प इति तस्माद्विद्याभेदानां नामभेद इति प्राप्तं
एवं प्राप्ते उच्यते। भवेदेतदेवं यदि वस्तुनिष्ठानि उपासनावाक्यानि किंतु तद्विषया मुपासनानामानां विदधति साच कार्यरूपाय
यपि चोपासनस्य वेनोपासनाधीननिरूपणा उपासनं चोपास्याधीननिरूपणं। उपास्यं चेश्वरादि तत्त्वमवस्थितरूपं तथाप्युपास
नाविषयाभावोऽस्य करान्विन्न कस्यचिद् केनचिद् रूपेण दसपरिनिष्ठित एव यथैकः स्त्रीकामः केनचिद्रूपस्तयाकेनचिदुपयंतस्य
तयाकेनचिद्रूपत्तया केनचिन्मात्रतयाकेनचिदुपेक्षणीयतया विपर्यक्रियमाणः पुरुषेच्छातंत्र एवमिहाप्युपासनानि पुरु
षेच्छातंत्रत्वपावविधेयतामतिक्रामंति चनतंत्र गुणतपो फसनामिगुणभेदाच्च भिद्यंते नचाग्निहोत्रेमिवोपासनानां विभा
पदधिनंडुलादिगुण वदिव सत्यसंकल्पादिगुणविधिर्येनैक शास्त्रत्वं स्यात्। अपितु सतां वेवोपासनानां तद्गुणाविशिष्टा
नाम वगते गच्छमाण विरोपत यास वसांभेद स्तुतः नचसमस्त शास्त्रविहितः सर्वगुणोपसंहारः शक्यानुष्ठानः तस्माद्भेदः
नचाग्निवत् क्षेसमानाः संतः सत्यकामात्वादयस्तिष्ठंति केचित् खलु गुणाः कस्मिंश्चिद्यास्त समानास्तेनैक विद्यात्वे आवर्तयित
व्याः अनुक्तानामप्याप्तेइति। विकल्पोऽविशिष्टफलत्वात् २४ अग्निहोत्रदर्शपौर्णमासादिवत्पुरस्य पृथग्विधिकरणानामपि
समुच्चयोऽदृष्टोऽनियमवान्। तेषां नित्यत्वात्। उपासनानां तु काम्यतया यनित्यात्तस्मांचासां समुच्चयनियमः तेन समानफला
नां दर्शपौर्णमासज्योतिष्टोमादीनामिव ननियमकाथन्विकल्पः फलं भस्माथिनिः। समुच्चयस्यापि संभवादिति पूर्वपक्षः ॥ ४५

उपासनानामप्युपास्यसाक्षात्कारणसाधनत्वात् फलभेदस्य एकेन चोपास्य सनेन साक्षात्करणे च तदेव फलमिति लभ्युक्ता
मुपासनांतरेण नचसाक्षात्कारणस्यातिशय संभवः तस्योपायसहस्रैरपि तादवस्थ्यात् तन्मात्रसाध्यत्वाच्च फलवासेः उपा
सनांतराभ्यासे चित्तैकाग्र्यता व्याघातेन न कस्यचिदुपासनानिष्पत्तेरिह विकल्प एवनियमतवानिराधांतः काम्यास्तु यथाकामं समुच्ची
येरन्न वा पूर्वहेत्वभावात्। २५ ॥ याः खलूपासनाविनोपास्यसाक्षात्करणमदृष्टेनैव काम्यसाधनं तासां काम्यदर्शपौर्णमासादिवत्
पुरुषेच्छावशेन विकल्पसमुच्चयाविति सांप्रतं। अन्येषु पुष्यथाश्रयभावः। तत्रिक्रतुरत्नानियमसदृष्टे पृथग्भावप्रतिबंधः फलमित
चोपासनास्फलस्श्रुतेः पर्णमयीनापेनार्थवाद योपासनानां क्रत्वर्थत्वेन समुच्चयनियममाशंक्य पुरुषार्थत्वे कप्रयोगवचनग्र
हणाभावेन समुच्चयनियमो निरस्तः इह तु सत्यपि पुरुषार्थत्वे कस्माच्चैकप्रयोगवचनग्रहणं भवतीति पूर्वोक्तिमर्थमाक्षिपत्प्रस
वतिष्ठते। यद्यपि हि काम्या एता उपासना स्तथापि नस्वतंत्रा भवितुमर्हंति तथा सति हि क्रत्वर्थनाश्रितत्वयाक्रतुप्रयोगात् बहिरथ
प्रयोगः प्रसज्येत नचात्र पुरुषत्वे तत्फलहेतोः क्रत्वर्थाश्रितानामेव तासां तत्फलोद्देशेन विधानादिति एवंचाश्रयतंत्रत्वा
श्रितानां प्रयोगवचनेनाश्रयाणां समुच्चयनियमेनाश्रितानामपि समुच्चयनियमो युक्तः। इतरथा तदाश्रितत्वानुपपत्तेः सचप्रयोग
वचनमुपासनाः समुच्चिन्वन्तत्फलकामनानामवश्यंभावमाक्षिपति तदभावेतासां समुच्चयनियमाभावादिति मन्वानस्य पूर्वः
पक्षः राद्धांतस्तु। यथाविहितोऽदृष्टपदार्थानुरोधी प्रयोगवचनेन यथाऽर्थस्वभावमन्यथयितुमर्हतिकिंतु तदविरोधेनावतिष्ठते। तत्र
क्रत्वर्थानां नित्यवदाम्नानात् तथाभावस्य च संभवात् नियमेनैतानु समुच्चितानुकामावच्छिन्नस्तूपासनाः कामानामनित्यत्वात्
नचसमुच्चयेन नियंतुमर्हति नहि कामाविधीयते येन समुच्चीयेत अपितु द्दिश्यंते मानांतरानुसारी चोद्देशेन तद्विरोधं नोद्दे
शमन्यथयति तथा सत्युद्देशानुपपत्तेः तस्मात्तत्कामानामनित्यत्वात्। तदवरुद्धानामुपासनानामप्यनित्यत्वं नित्यानित्यसंयोगविरोधा

वाच॰ ३ सत्यपि तदाश्रयाणां नित्यत्वे इदमेव वाश्रयत्वं तत्त्वमाश्रितानां पराश्रयेसत्येन वृत्तिर्नास्तीति न तु तत्र वृत्तिरेव नास्तीति। तदिदमुक्तं
४६ आश्रयतंत्राण्यपि हि तिस्र माहारात्। हौत्रपदनाडेवापि दुरुद्गीतमनुसमाहरतीति। अपि च तत्रक्रमोद्गुरुद्गीतक्रमपीति। वेदांतरो
दितप्राणबोद्गीथैकत्वत्रसक्सामर्थ्यात् हौत्रपदेनाडौत्रकर्मणः शंसनात् उनात्र तिस्मादधाति किं तदित्यत आह। दुरुद्गीत
मपि वेदांतरोदितेनोद्गात्रकर्मण्युत्यन्नं कृतं एवं भवनू वेदांतरोदितस्यात्र प्रत्ययस्येत्वाद्दियोजनीयं गुणसाधारण्यश्रुतेश्च।
अत्र सूत्रस्याप्यन्यमुखेन व्यतिरेकमुखेन व्याख्याशेषमतिरोहितार्थं। ॥ इति वाचस्पतिमिश्रविरचितायां शारीरकभ
गवत्पादभाष्यविभागेभामत्यां तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः ७ पुरुषार्थोऽतः शब्दादिति बादरायणः॥
स्थितं कृत्वोपनिषदामपवर्गरूपपुरुषार्थसाधना [illegible] त्वमथत्वनविचारजातमभिनिर्भिर्वर्तितं। संप्रति
तु किमौपनिषदात्मतत्त्वज्ञानमपवर्गसाधनतया पुरुषार्थमाहोस्वित् नु प्रयोगापेक्षितकर्तृप्रतिपादकतया क्रत्वर्थमिति मीमां
सामहे। यदा च क्रत्वर्थं तदा यावन्मात्रं क्रतुप्रयोगविधिनापेक्षितं कर्तृत्वमामुष्मिकफलोपभोक्तृत्वं च तन्नैन दनित्यत्वे धर्मेकत्वविन्
णाशाकृताभ्यागमप्रसंगात् अतो नित्यत्वमपि तावन्मात्रं मुपनिषत्सु विवक्षितं इतोन्यत्वमनपेक्षितमपेक्षितविपरीतं चनोपनि
षदार्थः स्यात्। यथा शुद्धबुद्धत्वादि। यद्यपि च जीवानुवादेन तस्य ब्रह्मात्मप्रतिपादनपरत्वमुपनिषदामिति महता प्रबंधेन तत्र
प्रतिपादितं तथापि तत्र केषांचित् पूर्वपक्षशंकाबीजानां निराकरणेन तदेव स्थूणानिखनन्यायेन निश्चलीकृतं इत्यस्ति। विचारप्र
योजनं तत्र यद्यपि प्रेक्षणादिवत्। आत्मज्ञानं न किंचित् क्रतुमारभ्याधीतं यद्यपि च कर्तृमात्रं मामभिचारितक्रतुसंबंधकर्तृमा
त्रस्य लौकिकेष्वपि कर्मसु दर्शनात्। येन जपणादिवदनारभ्याधीतमप्यव्यभिचरितक्रतुसंबंधं जुह्वादिवाक्येनैव क्रत्वर्थमापद्येत
यादृशा आत्मा कर्ता आमुष्मिकस्वर्गादिफलभोगभागी देहातिरिक्तो वेदांतैः प्रतिपाद्यते न तादृशस्यास्ति लौकिकेषु कर्मसूपयोगः ते
४६

षामैहिकफलानां तु वैदिकानां कर्मणां तमंतरेणासंभवात् तत्संबंध एवायमौपनिषदः कर्तेति तदव्यभिचारात् तानुसनुस्मारय
तजुह्वादिवद्वाक्येनैव ततस्तानं पर्णतावदक्रत्वैकंदमर्थ्यमापद्यत इति फलश्रुतिरर्थवादः। तदुक्तं। द्रव्यसंस्कारकर्मसु प
रार्थत्वात् फलश्रुतिरर्थवादः स्यादिति औपनिषदज्ञानसंस्कृतो हि कर्ता पारलौकिकफलोपभोगयोग्योस्मीति विद्वान् श्रद्धावान् क्रतुप्रयोगा
गः नान्यथा प्रेक्षितादेव नीहम्यः कृत्वं गमिति प्रियादिरिक्तं बितस्य संसारिण एवात्मनो द्वष्टव्यत्वेन प्रतिज्ञानात् आपहतपाप्मत्वादयस्तु तद्वि
शेषणानि तस्यैव स्तुत्यर्थं न तु तत्परत्वमुपनिषदां तस्मात् क्रत्वर्थमेवात्मज्ञानं कर्तृसंस्कारद्वारा न पुनः पुरुषार्थमिति एतदुपो
द्बलनार्थं च ब्रह्मविदामाचारादि सु सर्वगतहपन्यस्तः न केवलं वाक्यादात्मज्ञानस्य क्रत्वर्थत्वं तृतीयश्रुतेश्च न केवलं तत्र क्रोडी
य विद्याविषयं पदे वविषये तिसर्वनामावधारणास्यांभ्यासेऽधिगमाद् यथा पदेवधूमवान् देशाः स एव हिमानिति समन्वारंभवचनं
च फलारंभे विद्याकर्मणोः साहित्यं दर्शयति। न च यथा येषामिष्टियागवद्धवत्सममप्रधानत्वेनापि भवति तथाप्युक्तया युक्त्या विद्यायाः
कर्मप्रत्यंगभावेनैव ने तद्व्यंवेदार्थज्ञानवतः कर्मविधानात् उपनिषदर्थोपि वेदार्थ इति तद् ज्ञानमपि कर्मांगमिति नियमात्कास्त
गमं सिद्धांत इति। अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्। यदि शारीरात्व्यतिरिक्तः कर्ता भोक्तात्मेत्येतावन्मात्रे उपनिषदः
पर्यवसिताः स्यात् एवं तत्तदस्तिनास्त्वेवंभूतजीवानुवादेन तस्य शुद्धबुद्धोदासीनब्रह्मरूपताप्रतिपादनपराः इति तत्र तत्रासकृदा
वेदितं आह नधिगतार्थबोधनस्वरसफलत्वाद्धि शास्त्रस्य प्रमाणांतरसिद्धानुवादेन तथा चौपनिषदात्मज्ञानस्य क्रत्वनुष्ठानविरोधिनः क्र
तुसंबंधं एव नास्ति किमंगपुनः तदव्यभिचारः सतश्च क्रतुशेषत्वात्तथा चापवर्गफलश्रुतेरर्थवादमात्रत्वमपि तु फलपरमेवं भू
तं एव प्रतिपादितस्य सूचितेन संसारिणात्मनोपक्रमतस्यैवात्मनो धिको पदिष्टायां परमात्मनोस्यैतादृशोपदिश्यते यथा समारोपितस्य भु
जगस्य रज्जुरूपाद्वस्तुतो भेदः। प्रतिपाद्यते। योयं सर्पः। सा रज्जुरिति यथा विद्यायाः कर्मांगत्वे दर्शितमुपन्यस्तमेवं कर्मांगत्वे दर्शन

Dr. BHAU DAJI MEMORIAL

सा०च०३ मुक्तं तत्र कर्मांगत्वदर्शनानामन्यथासिद्धिरुक्ता केवलविद्यादर्शनानां तु नान्यथासिद्धिः सार्वत्रिकी व्याप्तिरुत्तीय विद्यापेक्ष
यात्सा एव अश्रुतत्वात् नाच यथोषामपेक्षया यथा सर्वत्र लक्षणभोजनं तामिति निमंत्रितापेक्षिया तेषामेव अश्रुतत्वात्। विभागः श
४७ तवत्। स्मृतं। अविभागेपि न दोष इत्याह। नचेदं समन्तारभवचनमिदं संस्कारविषयं विद्या विहितायथोक्तीयविद्यानविद्याभाव
यथासख्यास्त्राधिगमनलक्षणमध्ययनमात्रवत एव कर्मविधिः न तु रूपनिषदध्ययनवतः एतदुक्तं भवति। यदध्ययनमर्थावबोधपर्यं
तं कर्मस्स प्रयुज्यते यथाकर्मविधिवाक्यानां तन्मात्रवत एवाधिकारः कर्मसु नोपनिषदध्ययनवतः तदध्ययनस्य कर्मस्वरूपयोगादिति
अध्ययनमात्रवत एवेति मात्रग्रहणं नार्थज्ञानं व्यवच्छिनत्ति किं तु विद्याभ्यासं तच्चोदयति नन्वेवं सतीति स्वाभिप्रायमुद्घाटयति समा
धत्ते न वयमिह उपनिषदध्ययनापेक्षं मात्रग्रहणं नार्थावबोधापेक्षमित्यर्थः। नाविशेषात्। कुर्वन्नेवेह कर्माणीत्यविद्यावद्विषयमित्यर्थः।
विद्यावद्विषयत्वे अविरोधे विद्यास्तुत्यर्थत्वादित्याह स्तुतये नुमतिर्वा। अपि च विद्याफलं त्वत्यर्थं दर्शयतीति श्रुतिः ऊर्ध्वरेतःसु च श
ब्दे हि। परामर्शं जैमिनिरचोदना चापवदति हि। सिद्धऊर्ध्वरेतसामाश्रमित्वेन हि यानामकर्मांगतयापवर्गार्थिथ्यासात्र
आश्रमित्वमेव तेषामन्यार्थपरामर्शमात्रान्न सिध्यति विध्यभावात्। स्मृत्याचारप्रसिद्धिश्च तेषां प्रत्यक्षश्रुतिविरोधादप्रमाणमिति दर्शितं
उपसंहरेच अधिकोपदेशादित्यनेन नान्यपरत्वे शुद्धबुद्धोदासीनत्वादुक्तं इह तु समस्तक्रियाकारक... कालांतरभाविफलक
र्मांगत्वं विद्याया निराकरोतीत्याह। कामकारेण चैके। कामकार×:: फलविभागो यमर्थ इति॥ १ स्वनस्यश्रुतिराश्रमांतरं वीरहा वा
एष देवानामित्यादिका प्रत्यक्षश्रुतिविरोधे च स्मृत्याचारयोरप्रामाण्यमुक्तं विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति। तदेतत्सर्वमाह
त्रयो धर्मस्कंधा इत्यादिना अनधिकृतविषयत्वेति अथवा स्यादपि ये नित्यनैमित्तिककर्मानधिकृतास्तेषामाश्रमांतरविधिरिति। अ
पि चापवदति हि। न केवलमन्यपरत्वात्परामर्शस्यापि त्वाश्रमांतरं नोपलभ्यते अपि चाश्रमांतरे निंदाद्वारेणापवादादपीत्यर्थः। स्यादेतत्। ४७

भवत्वेव परामर्शोऽन्यार्थः। ये च मे अरण्य इत्यादिस्यस्याश्रमांतरं सत्त्वेतीसन आह। ये चेमेऽरण्य इति अस्यापि देवपथोपदेशपरत्वान्नैतत्प
रत्वमित्यर्थः। न चान्यपरात्स्वरूपतः आश्रमांतरमसदित्याह संदिग्धं चेति न हि तत्पदं वक्ष्यते इत्यन्याश्रमांतराभिधायी कश्चिदस्ति
शब्द इति तत्त्वेन ये चेति वचनादाश्रमांतरं संदिग्धमित्यत आह। अथ नमेवेति। एतदपि लोकसंस्तवनपरमिति अधिकरणारंभमाक्षिप्य नास्ति
प्रत्यक्षं वचनमिति कृत्वा चिंतयमिति समाधत्ते ननु अप्यनुष्ठेयं बादरायणः साम्यश्रुतेः अवश्यमन्यार्थः परामर्शः तथापि
तस्मादाश्रमांतराणि प्रतीयमानानि न व्यापाकरणमर्हति एवं हि त्याज्यपरीक्षेरन् यस्मात्प्रतीयेरन्। प्रतीयमानानि वा सावधेरन्।
न तावत्प्रतीयंते तथा हि त्रयो धर्मस्कंधा इति स्कंधत्वप्रतिज्ञानं तत्र स्कंधशब्दो यथाश्रमपरो न स्यादपि तु समस्तवचनः। तत्रोध
र्माणां यज्ञादीनामतिरिक्तकोऽसंकीर्णानां किमपेक्षं त्रित्वसंख्या सुखवर्ण्यते। एके काश्रमोपसंगृहीतास्त्वाश्रमाणां त्रित्वाशक्य
त्रित्वमनुपपत्तित्वमित्याश्रमप्रतिकोपपत्तिः। तत्र यज्ञादिलिंगान् गृहस्थाश्रम एको धर्मस्कंधो ब्रह्मचारीति च द्वितीयः तप इति
च तपः प्रधानाद्वानप्रस्थः श्रमानान्यः ब्रह्मसंस्थ इति च पारिशेष्यात्परिव्राडिति वक्ष्यते तस्मादन्यपरामर्शादाश्रमांतराणि प्र
तीयमानानि दृष्टाधिकरणन्यायेन शक्यते पाकर्तुं न च प्रत्यक्षश्रुतिविरोधः वीरहा वेत्यादेः प्रतिपन्नगार्हस्थ्यस्यानादरेणाग्निमु
द्वासयितुं प्रवर्तं प्रत्युपपत्तेः एवं चाविरुद्धसिद्धपरामर्शादाश्रमांतराणां शास्त्रांतरसिद्धिं कल्पयिष्यामो यथा पूर्वीतविधिपरेवा
क्य उपव्ययते देवलक्ष्मं तत्कुरुत तदलक्ष्म निवीतं मनुष्याणां प्राचीनावीतं पितॄणामिति शास्त्रांतरसिद्धयोर्निवीतप्राचीनावीतयोः
परामर्श इति। विधिर्वा धारणवत्। यद्यपि ब्रह्मसंस्थत्वस्तुतिपरतया समस्तसंदर्भे सैकवाक्यतागम्यते संभवत्यां चैकवाक्यतायां वाक्य
भेदो न्याय्यः तथाप्याश्रमांतराणां स्वर्गसिद्धत्वाभावात् परामर्शानुपपत्तेः। अपरामर्शे स्तुत्यर्थसंभवेन किंपरतयैकवाक्यता अस्ति तिलां
भं स्वाधारणवदध्यवसायः विधिर्वा स्तुत्यर्थत्वमिति धारणं ननु अन्येषु रिहि देवेभ्यो धारयतीत्यत्र समर्थ धारणेनका

वाच॰३ स्तावतीतौ विधीयतइत्योपरिधारणमपूर्वत्वात् यथोक्तं विधिस्तु धारणेऽपूर्वत्वादिति तयोरेहाप्याश्रमांतरपरामर्शश्रुतिर्विधिरेवे
तिकल्प्यते। संप्रतिपरामर्शेपीतरेषामाश्रमाणां ब्रह्मसंस्थतासंस्तवसामर्थ्यादेवसन्निधानत्वानस्त्वविधेयसंस्तूयते तदर्थतालसंस
४८ वस्येत्याह। यदापीति। अत्रावांतरविचारमारभते। सा च किं चतुर्ष्वपीति विचारप्रयोजनमाह। यदि चेति तत्त्वनाश्रमे वब्रह्मसंस्थो
भविष्यतीत्यत आह अनाश्रमित्वेति। अत्र पूर्वपक्षमाह। तत्र तपःशब्देनेति। अयमभिसंधिः। न तावद्ब्रह्मसंस्थोपि ब्रह्मलग्नि
तावयवार्थपरो ब्रह्मत्र कृष्णकर्णादिवदयं तदाश्रमत्राप्तिपात्रेणयात्रमृतत्वभाव इति। न तस्माद्व्याय ब्रह्मज्ञानमपेक्षत तथाचनान्यः
पंथा विद्यतेऽयनायेति विरोधात् न च संभवत्यवयवार्थसमुदायशक्तिकल्पनात्स्मात् ब्रह्मणि संस्थः एव चतुर्थाश्रमे भूयस्त्वेन ब्रह्मनि
ष्ठत्वमाश्रमिणः स ब्रह्मसंस्थोमृतत्वमेतीति युक्तं तत्र तावत्। ब्रह्मचारिगृहस्थौ स्वशब्दाभिहितौ तपःपदेन च तपःप्रधानत्वाद्भिक्षु
वानप्रस्थादयस्थापितौ भिक्षुरपि हि समधिकशौचाद्यासीत्भोजननियमात्। भवति वानप्रस्थस्तपःप्रधानः न च गृहस्थादेः कर्मि
णो ब्रह्मनिष्ठत्वासंभवः यदि तावत्कर्मयोगः कर्मित्वं साभिक्षोरपि कायवाङ्मनोभिरस्ति अध्ययने ब्रह्मार्पणेन कर्म कुर्वीति किंतु काम्यार्थि
तया तेकर्मिणः तथा सति गृहस्थादयोपि ब्रह्मार्पणेनापि कर्म कुर्वाणाकर्मिणः तथा सति गृहस्थादयोपि ब्रह्मार्पणे तस्माद्ब्रह्मतात्पर्यं ब्रह्म
निष्ठता न तु कर्मत्यागः प्रमाणविरोधात्। तपसा च द्वयोराश्रमयोरेकीकरणेन त्रयमित्यनतिरिक्तमुपपद्यते। एते च त्रयोप्याश्रमा ब्रह्मसं
स्थाः संतः पुण्यलोकभाजो भवंतिये पुनरेतेषु ब्रह्मसंस्थः सोमृतत्वभागीति न च येषां पुण्यलोकभागित्वं तेषामेवामृतत्वमितिवि
रोधः यथा देवदत्तयज्ञदत्तौ मंदप्रज्ञावभूतां संप्रति तयोर्यज्ञदत्तस्तु शास्त्राभ्यासात्पटुप्रज्ञो वर्तत इति तथेहापि ये एवाब्रह्मसंस्थाः पु
ण्यलोकभाजः त एव ब्रह्मसंस्थाः अमृतत्वभाज इत्यवस्थाभेदादविरोधः तथा च ब्रह्मसंस्थ इति यौगिकं पदं प्रकृतविषयं भविष्यति यथाग्नेया
ग्नीषोमीयमुपतिष्ठत इत्यत्र विनियुक्तोपि प्रकृतौ आग्नेयीगृह्यते न च विनियुक्तविनियोगविरोधः यदिसत्राग्नेयी दिश्यत इतो यथा प्रतीतानयो ४८

दिश्यते विनियुक्ता च प्रतीते विनियुक्तविनियोगविरोधः इह त्वाग्नीध्रोपस्थाने साविधेयत्वेन विनियुज्यते न तु उद्दिश्यते विधेयत्वेन च
विनियोगे अनन्यपदाभिधेयत्वं न। प्रकृतानि तानि प्रमाणाभावात् आज्ञानवशाच्च शास्त्रोपपत्तेर्न प्रकृतानामपि ग्रहणसंभवः। न च पात
तया विनियोगः प्रत्यक्षोमे सर्वेषामेव मंत्राणां विनियोगात् तत्राविनियोगप्रसंगात्। तथेहापीश्रकृतानएवाश्रमा बुद्धिस्थपरीवर्तिनः
परामृश्यंते नानुक्तः परिव्राडेवेति पूर्वपक्षः। राद्धांतमुपक्रमते तदुक्तं नहि सत्यागिनो वानप्रस्थविशेषणेनेति यथोपक्रांतं तथैव प
रिसमापनमुचितं यत्संख्याकाश्रयप्रसिद्धा तेन तत्संख्याका एव कीर्त्यंत इति चोचितं न तु सत्यागनोऽत्सर्गस्यापवादो युज्यते असा
धारणेन चैकैकेन लक्षणेनैकैकआश्रमो वक्तुमुपक्रांतमिति तथैव समापनमुचितं न त्वसाधारण्याभ्यामुपक्रमसमाप्तिः श्लिष्यते। न
च तपो नामसाधारणं वानप्रस्थानामित्याह। तपश्चासाधारणमिति न खलु पापकारिभिः कायक्लेशप्रधाययथा वानप्रस्थस्तथा भिक्षुः सत्य
प्यष्टग्रासादिनियमेन च शौचसंतोषशमदमादयः तपः पक्षे वर्तंते तत्र रूढानां तपः प्रसिद्धेरसिनोद्धेः अत एव रूढा तपसो भेदेन शौ
चादीनामवस्थानेषां च संतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति सिद्ध संख्याभेदे पुनः संख्यांतरासिद्ध्या न मान्स्थिष्ट मित्याह न तु ह
न चेति। अपि च व्यपदेशोत्रेति त्रय एत इति किं भिक्षुरपि परामृश्यते किं वा भिक्षुवर्जं त्रय एव न तावत्त्रय इति भिक्षुसंग्रहे तद्वर्जमेते
त्रय इत्यत्र चतुर्ष्वपि तत्र इति प्रकृतानां स्वकल्पेन परामर्शात्। भिक्षुसंग्रहेन च तस्य पुण्यश्लोकत्वम ब्रह्मसंस्थत्वाभावात् भिक्षोः तेन
तस्यैव ब्रह्मसंस्थत्वाभावात् भिक्षोः तेन तस्यैव ब्रह्मसंस्थस्य सदा पुण्यलोकत्वममृतत्वं चेति विरोधः त्रिषु च ब्रह्मसंस्थपदेति
संबंधनीयभिक्षोश्च सदेति वैषम्यं तदिदमुक्तं पृथक्त्वेन चेति पूर्वपक्षाभासं स्मारयति कथं पुनर्ब्रह्मसंस्थशब्दो योगादिति
[illegible] तं निराकरोति। अत्रोच्यत इति। अ
यमभिसंधिः संस्थयोतिकः शब्दः सतिप्रकृतसंभवे न तादितिप्रसाप्रकृते वर्तितुमर्हति असति तु संभवे मा भूदप्रमादपाठ इत्यप्र

अस्तेवर्तयितव्यः। दर्शितश्चात्रासंभवोपस्मादिति एवंहिब्रह्मसंस्थतालक्षणोधर्मोभिक्षोरसाधारणः। आश्रमांतराणितत्संस्थान्यत
संस्थानिच। भिक्षुसुगतसंस्थारत्वेवदसंस्थताहिस्वभावंबच्छिदेतिविरोधात् यतसंस्थंएवतत्रांजसीत्यान्यत्रशमदमादिस्तुतदीयइति
स्वांगमंअवधायकमित्यर्थः। ब्रह्मसंस्थत्वमसाधारणंपरिव्राजकधर्मंश्रुतिरादर्शयतीत्याह तथाचस्मान्यइतिब्रह्मेति सर्वसंगपरि
त्यागेहिन्यासः सब्रह्माकुतइत्यतआह। ब्रह्माहिपरः अतः परोन्यासोब्रह्मेतिकिंपरेक्षपरः सन्यासइत्यतआह तानिवाएतानिब्र
तानिवराणितपांसिन्यासएवासरेचयदितिएतदुक्तंभवति ब्रह्मपरतयासर्वेषांपरित्यागलक्षणोन्यासोब्रह्मेतितथाचेदृशंन्यासलक्ष
णंब्रह्मसंस्थत्वंभिक्षोरेवासाधारणंनेतरेषामाश्रमिणांब्रह्मज्ञानस्यशब्दजनितस्यपरिपाकः साक्षात्कारोपवर्गसाधनं तदंगत
यापारिव्राज्यंविहितंनत्वनधिकृतंप्रतीत्यर्थः। स्तुतिमात्रमुपादानादितिचेन्नापूर्वत्वात्। यद्यत्रसन्निहितउपासनविधिर्नास्तितत
प्रदेशांतरस्थितोपिविधिव्यभिचरिततद्विधिसंबंधनोद्गीथेनोपरूप्यतेतः सएषरसनांरसतमइत्यादिनापदसंदर्भेणैकवाक्यभावमुप
गतः स्तुत्यर्थेनहिसमभिव्याहृतैरेवैकवाक्यतांभवतीतिकश्चिन्नियमहेतुरस्ति अनुषंगातिदेशलब्धैरपिविध्यसमभिव्याहृतैरर्थवादैरे
कवाक्यतामुपगमात् यदिवउद्गीथमुपासीतेत्यासोपासीतेत्यादिविधिसमभिव्याहारःश्रुतस्तथापितस्यैवविधेःस्तुत्येतिनरूपासनाविषयस
मर्पणपरःमित्येतदक्षरमुद्गीथमित्यनेनैवउपासनाविषयसमर्पणादितिन्यासेभिधीयतेनतावद्दूरस्थेनकर्मविधिनास्येनैकवाक्यता
संभवः प्रतीतसमभिव्याहृतानांविधिनैकवाक्यतयास्तुत्यर्थत्वमर्थवादानांरूपन्यायेनसंभवति। ननुस्तुत्याभिकाचिदनुपपत्तिर्विधिः
यथाहुः। अस्तितुतद्धितिरेकपरिहारइतिअतएवविधेरपेक्षाभावात् भवतंनालकस्यअनुषंगातिदेशादिरर्थवादस्याभिधानंप्रस
मंजसं नहिकर्तव्येक्षितोपायतायमिवमितायांप्राशस्त्यप्रत्ययस्यास्तिकश्चिदुपयोगस्तस्माद्दूरस्थस्यकर्मविधेःस्तुत्यानर्थक्यंतत्रै
कवाक्यतानुपपत्तेःसंनिहितस्योपासनाविधेःकिंविषयसमर्पणेनोपयुक्तत्वात्स्तुत्येतविषयेविषयसमर्पणेनयथार्थवत्वंनैवस्तुत्या ४९

वहिरंगत्वात् अगत्याहिंसातस्मात् उपासनार्थाइतिसिद्धं कुर्यात्क्रियेतेकर्तव्यंभवेत्स्यादितिपंचमं एतत्स्यात्सर्ववेदेषुनियतंविधि
लक्षणंभावनायाःखलुकर्तृसमीहितायाःमुकुलत्वंविधिः। निषेधश्चकर्तुरहितानुरूलत्वंयथाहुःकर्तृश्रंश्चस्वफलोकर्तव्यादुःखफ
लइतिएतच्चास्माभिरुपपादितंमानकणिकायांक्रियाचभावनातद्वचनाश्चकारोत्सादयः यथाहुःकृत्वस्तयः क्रियासामान्यवचनाइति अग
एवकुर्यात्तानुदाहृतवान् सामान्योक्तौतद्विशेषाः पचेदित्यादयोपिगम्यंत इतितत्रकुर्यादित्याक्षिप्तकर्तृकाभावनाक्रियतेतित्वाक्षिप्ताक्षित
कर्मिकाभावनाकर्तव्यमितितुभवतेरप्युपसर्जनभावनाएवंभवत्दंडीभवेतदंडिनाभवितव्यंदंडिनेत्यत्रस्यतेत्येकार्थत्वं क्रियाविधुप
हिताभावनाऽदाहाणभवतिश्चैवप्रजन्मानियथाकुलालव्यापारात्घटोभवतिबीजादंकुरोभवतीतिप्रयुंजतेनचबीजादंकुरस्तीतिप्रयुंजते
तस्मादस्तिःसत्तायांनजन्मनीति पारिप्लवार्थाइतिचेत् नविशेषितत्वात्॥ ४॥ यद्यपिउपनिषदाख्यानानिविद्यासंनिधौश्रुतानि
तथापिसर्वाणिव्याख्यानिपारिप्लवइतिसर्वश्रुत्याःविशेषार्थयावदुर्बलस्यसंनिधेर्बाधितत्वात्पारिप्लवार्थान्येवाख्यानानिनवसकदाशात
योरनुब्रूयादितिविनियोगोपिदाशतयीनांप्रात्यक्षिकविनियोगस्तत्रतत्रकर्मणियथाविनियोगेनविरुध्यतेतथेहापिसत्यपिपारिप्लव
विनियोगेसंनिधानात्विद्यांगत्वमपिभविष्यतीतिवाच्यं दाशतयीषुप्रात्यक्षिकानांविनियोगानांसमुदायविनियोगस्यचतुर्स्त्रवलता
दिहतुसंनिधानात्श्रुतेर्बलीयस्त्वात्तस्मात्पारिप्लवार्थान्याख्यानानीतिनिषामेवतत्रविनियोगस्तान्येवहिपारिप्लवेनविशेषितानिइ
तरथापारिप्लवेसर्वाण्याख्यानानीत्येतावन्तैवगतत्वात्। पारिप्लवमाचक्षीतेत्यनर्थकंस्यादाख्यानविशेषकत्वंतथ्यवत्। तस्माद्विशेषणा
नुरोधात् सर्वशब्दस्तदपेक्षोनत्वशेषवचनः यथासर्वब्राह्मणाभोजयितव्याइत्यत्रनिमंत्रितापेक्षाःसर्वशब्दस्तथाचोपनिषदाख्या
नानांसंनिधासंनिधिरप्रतिद्वंद्वाविद्यैकवाक्यतांसारोदीहित्यादीनामिवविद्यैकवाक्यत्वंगमयतीतिसिद्धं प्रतिपत्तिसौकर्याच्चेति।
उपाख्यानेनहिविद्याअर्थविधीयतेयथानंत्राख्यायिकयेति। अतएवचाग्नीधनाद्यनपेक्षाः। विद्यायाःक्रतवर्थेसतिनयाक्रतुप्रकरणा

यत्स्वकार्ये कर्त्रनुपेक्षितस्तद्भावेकस्य कारणविषयमिति वदतानुरूपार्थान्तरानन्तराऽनुपेक्षितः स्वकार्येऽपि पेक्ष्यत्वात्तस्य ज्ञानस्यापि
अग्नीधनादिना चाश्रमकर्मणामुपलक्षणं तेनाह। अग्नीधनादीनां श्रमकर्माणि विधाय स्वार्थसिद्धौ नापेक्षितत्वादाविनेतुरस्य सिद्धावि
ति एतत्राधिकमुपरिष्टाद्वक्ष्यते तद्विवक्षया चेत्तत्तत्पयोजनं पूर्वेणैव साधिकरणस्योक्तं अधिकमिति यदपि। यदुक्तं तदधिकमाह। सर्वापे
क्षा च यज्ञादिश्रुतेरश्ववदिति यथा स्वार्थसिद्धौ नापेक्ष्यन्ते आश्रमकर्माणि तु सत्त्वशुद्धिद्वारापेक्ष्यन्त इति शंकास्यात्। न च विधिरिति। यत्नेनेत्या
दिविरोधः न स्वयं विधिः अपि तु वर्तमानापदेशः स च सुतरामुपपद्यते। अपि च वक्तव्यः प्रतिबन्धः ब्रह्मणि प्रथमा तावदुपनिषद्वाक्यश्रवण
मिति। मात्रा भवतीयां किल विस्तरेण श्रवणमिति द्वितीया मीमांसासहितात्तस्मादेवोपनिषद्वाक्याच्चार्थमवसाय मननमिति तृतीयाचि
न्तासन्ततिमयी यामाचक्षते निदिध्यासनमिति। चतुर्थी तु साक्षात्कारवती वृत्तिरूपाणां तत्रीयकं हि दस्याः केवलमिति। तत्राद्यं तावत्प्रति
निविदितपदार्थस्य विदितवाक्यगतिगोचरमायस्य च पुंस उपलभ्यते एवेति न तत्र कर्मापेक्षा वदेकत्व चिंतामपीं हतीयां प्रतिपत्तिं प्रसुवा
ने [illegible] इति न तत्राप्यस्ति कर्मापेक्षा साचास्यानैरन्तर्यदीर्घकालसेविता साक्षात्कारवतीमाधत्त एवं प्रतिपत्तिचतुष्टयमि
ति न तत्राप्यस्ति कर्मापेक्षा तन्नान्तरीयकं च केवलमिति न तस्या कर्मापेक्षानदेवं प्रमाणवस्तु प्रमेयवस्तु उत्पन्नौ च कार्यं च न ज्ञानस्य कर्मा
पेक्षेति बीजशंकायां एवं प्राप्त उच्यते उत्पन्नो ज्ञानस्य कर्मापेक्षा विधुनोति विविदिषोत्पादद्वारा विविदिषन्ति यज्ञेनेति श्रुतेः न चेदं व
र्तमानापदेशः अनुवादानुपपत्तेः तस्मादुत्पन्नो विद्यायाः शमादिकर्माण्यपेक्ष्य तत्राप्यन्तरङ्गविविदिषास्वरूपसंयोगादन्तरङ्गाणि विद्यो
त्पादेशमादीनि बहिरङ्गाणि विविदिषासंयोगात् तथा ह्याश्रमविहितनित्यकर्मानुष्ठानाद्धर्मसमुत्पादस्ततः पापापविलीयते। सहितत्वतो
अनित्याशुचिदुःखात्मनि संसारे नित्यशुचिसुखात्मविलक्षणेन विभागमकृत्वा पतितिविस्तरं अधर्मबंधनत्वाद्विद्याणाञ्जलः प्रापना
प्रत्यये ब्रह्मसोपपत्ति बन्धनिद्धाराभवद्वेणे स्वप्रस्तोपपत्ति प्रपंसंसारस्यतात्त्विकानित्यादशुचिदुःखस्वरूपता मयं प्रत्यहं विनिश्चिनोति ॥

ततोऽस्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते। ततः तज्जिहासा सोपावर्तते। ततो हानोपायं पर्येषते पर्येषिस्वात्मतत्त्वज्ञानमस्योपाय इति
शास्त्रादाचार्यवचनाच्चोपश्रुत्य तज्जिज्ञासते इति विविदिषोपहारमुखेन आत्मज्ञानोत्पत्तावस्ति कर्मणामुपयोगः विविदिषुः खलु युक्त एकाग्र
या श्रवणमनने कर्तुमुत्सहते। ततोऽस्य तत्त्वमसीति वाक्यात्। नैविकि समुत्पद्यते ज्ञानं न च निर्विचिकित्सं तत्त्वमसीति वाक्यार्थमवधार
यतः कर्मण्यधिकारोऽस्ति एतद्भावनायां वासनाकार्ये वा साक्षात्कारे कर्मणामुपयोगः एतेन वृत्तिरूपसाक्षात्कारकार्ये ऽपवर्गे कर्मणामुपयोगे दूरनिर
स्तो वेदितव्यः तस्माद्यथैव शमदमादयो यावज्जीवमनुवर्तन्ते एवमाश्रमकर्माण्यपि समीक्षिताभिमानं निर्हृत्य तत्रानधिकारादित्युक्तं। दृष्टा
र्थेषु तु कर्मसु प्रतिषिद्धवर्जनमधिकारेऽपि असक्तस्य संसारसिकी प्रवृत्तिरूपपद्यत एव न हि तत्रान्यत्र व्यतिरेकेण समधिगमनीयफले ऽस्ति विष
पेक्षा अनन्त्रभ्रांसा वै लौकिकं कर्म वैदिकं च तथा तु तद् विप्रलापः शमदमादीनां तु विद्योत्पादायोपात्तानामुपरिष्टादवस्थानस्याभावादनपेक्षि
तानामप्यनुवृत्तिः उपपादितं चैतदस्माभिः प्रथमसूत्र इति नेह पुनः प्रतीयते। तस्माद्विविदिषोत्पादद्वारा आश्रमकर्मणां विद्योत्पत्तावुप
योगो न विद्याकार्ये इति सिद्धं शेषमतिरोहितार्थं सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्। प्राणसंवादे सर्वेन्द्रियाणां श्रेष्ठतेऽपि किल विद्या
रविषयः सर्वाणि खलु वागादीन्यङ्गिरसं प्राणो मुख्य उवाच तानि किं मे ऽन्नं भविष्यतीति तानि होचुः यदिदं लोके आश्वभ्य आश्वभ्यः शकुनिभ्यः
सर्वप्राणिनां प्रदत्तं तस्यान्नमिति तदनेन संदर्शितं प्राणस्य सर्वमन्नमित्युक्तं चिंतनं विभाषाहश्रुतिः नहवा एवं विदि किंचनान्नं भवतीति
सर्वं प्राणस्यान्नमित्येवं विदितिनकिंचनान्नं भवतीति। तत्र संशयः किमेतत्सर्वान्नानुज्ञानं शमादिवदेतद्विद्यांगतया विधीयते उत स्तुत्यर्थं संकी
र्त्यत इति तत्र यद्यपि प्रवर्तते वर्तमानोपदेशान्न विधिः प्रतीयते तथापि यथा यस्य पर्णमयी जुहुर्भवतीति वर्तमानापदेशादपि प्रकाशमपौ विधि
प्रतिपत्तिः पंचमलकारापत्या तथेहापि प्रवृत्तिविशेषकरत्वादाभेविधिप्रतिपत्तिस्तुतौ हि वादमात्रं न तथार्थवत्। यथाविधौ भक्ष्याभक्ष्यारास्ते
च सामान्यतः प्रवृत्तमनेन विशेषशास्त्रेण बाध्यते गम्यागम्यविवेकशास्त्रमिव सामान्यतः प्रवृत्तं वामदेव्यविद्यांगभूतसमस्तस्य परिहारशा

वान०२ स्त्रेणक्षेपविषयेणेतिप्राप्तउच्यते अशक्तेः कल्पनीयत्वानुपपत्त्यंतरविरोधतः प्राणस्यात्ययमिदं सर्वमिति विनिवर्त्तकः नतावत्कौषीतक
५१ मयदिमभं मनुष्यजातिनायुगपत् पर्यायेण वाशक्यमत्तुं इभकरभादीनाम् अस्पृश्यमीकरीदकंटक वदकाश्चादेरेकस्यापि अशक्यत्वात्
नत्वात्। नचात्रलिङ्ग इदस्फुटतराविधिप्रतिपत्तिरस्तिनच कल्पनीयो विधिरपूर्वत्वात्, स्तुत्यापि चसदुपपत्तेः नुचसत्यां गतौ सामान्यतः
प्रवृत्तस्य शास्त्रस्य विषयसंकोचो युक्तस्तस्मात्सर्वं प्राणस्यान्नमिति स्तुतिं सविधानात्स्तुतिरिति सांप्रतं। शक्यत्वेचप्रवृत्ति विशेषकरतो
पयुज्यनेनाशक्यविधानत्वे। प्राणात्यय इति चावधारणं परं प्राणात्यय एव सर्वान्नत्वं तत्रोपाख्यानांचास्फुटतर विधिस्थलेष्वर्थवाद
जंगिह्याननुसमर्थितंप्रतिविधानात् नतन्त्रेति इत्येन हस्तिपकेन समिवादिताननर्थभक्षितान्संहिताचायणो हस्तिपकोच्छिष्टान्कु
ल्माषानभुंजानो हस्तिपकेनोक्तः कुल्माषाश्च यवदुच्छिष्टमुदकं कस्मान्नानुपिबसीतीति। एवमुक्तस्तदुदकमुच्छिष्टदोषात्प्रत्या
चख्या कारणं चाभोवाच। नवा अजीविष्यमिमानखादन् कामो मउदकपानमिति। स्वातंत्र्यं मे उदकपाने नदीतडागकूप
प्रणादिषु यथाकामं प्राप्नोमीति तोच्छिष्टोदकाभावे प्राणात्यय इति तत्राप्युच्छिष्टभक्षणदोषइति। मटचीहतेषुकुरुषुस्तायनश्चाक्रायण
मुनिर्निरपत्रय इत्यनेन इभ्यात्सामिखादितान् कुल्माषान्खादयामास विहितत्वाच्चाश्रमकर्मापि नित्यानित्याश्रमकर्मणि यावज्जीवश्रुते
र्नियमितो पापदयावश्यं कर्त्तव्याविविदिषंतीतिच विद्यासंयोगात् विद्यायाश्चावश्यं भाविनियमाभावादनित्यता प्राप्नोतिनित्या
नित्यसंयोगश्चैकस्यनसंभवत्यवश्यानवश्यंभावयोरेकत्रविरोधात् नचवाच्यभेदात् न्यायनत्वो विरोधः शक्योपनेतुं तस्मात्तनध्यवसाय
एवात्रेति प्राप्ते एतनैकस्यात्रप्रयत्ने संयोगपृथक्त्वमित्यादिना विहितं एवं प्राप्ते अभिधीयते। सिद्धं हि स्यादविरोधोऽयं नतुसाध्येकथंचन। विध
धीनास्तलाभेऽस्मिन्यथाविधिमतांस्थितिः। सिद्धं हि वस्तु विरुद्धधर्मयोगेन बाध्यते नतुसाध्यरूपं यथा षोडशीनएकस्य ग्रहणाग्रह
णे हि विध्यधीनत्वाद् विकल्पेनैव नपुनः सिद्धविकल्पसंभवः। तदिहैकमेवाग्निहोत्रात्मकं कर्म यावज्जीवश्रुतेननिमित्तेनयुज्यमानं ५१

नित्यं विहितोपात्तदुरितक्षयप्रयोजनमवश्यकर्तव्यं विद्यांगतयाच विधानात् कदाचित्कतयानवश्यंभावे पि काम्योवा नैमित्तिको वा नित्यम
र्थवित्कस्यविविदिशंनरइतिन्यायात् नित्याधिकारेण विद्यमानमपि नित्यमनित्यमपि ते नापि तत्सिद्धिरिति संयोगपृथक्त्वान्नित्यानि
त्यसंयोगविरोधएकस्यकार्यस्येतिसिद्धं। सहकारित्वं च कर्मणां कार्येन विद्यायाः किंतु सतौ कोर्योविद्यासहकारिणी कर्माणीतित्रय
मर्थः। सत्यं कर्मस्त्वविद्यैवस्वकार्यवाप्रियते। यथा सहैव दशभिः पुत्रैर्भारं वहति गर्दभीति सत्यं सत्यैव दशपुत्रेषु सैव भारस्य वाहिके
ति अविधिलक्षणत्वादिति। विहितं हि दर्शपूर्णमासाद्यंगैर्युज्यते नत्वविहितं ग्राहकग्रहणपूर्वकत्वादंगभावस्य विधेश्च ग्राहकत्वादवि
हितेचतदनुपपत्तेः। चतसृणामपि च प्रतिपत्तीनां अंलक्षणविधानानुपपत्तेरित्युक्तं प्रथमसूत्रे दृष्टश्चो निदध्यासितव्य इति च विधि
सरूपं न विधिरित्यप्युक्तं। उत्पत्तिं प्रति हेतुभावस्तु सत्यभ्युदयादि विशेषजनकत्वादेवसत्यस्त्वादुपचरितं असाध्यत्वाच्च विद्याफल
स्यापवर्गस्य स्वरूपावस्थानलक्षणोहिसः नचस्वरूपं लक्षणसाध्यं नित्यत्वात्। शेषमतिरोहितार्थं सर्वथापितएवोभयलिंगात्।
यथानाम अग्निहोत्रं जुहोतीति प्रकरणांतरात् कर्मभेदएवमिहापि नित्यतं वेदानुवचनेन ब्राह्मणाविविदिषंतीति यज्ञेनेति क्रतुप्रक
रणमतिक्रम्य श्रवणात्। प्रकरणांतरात् बुद्धिव्यवच्छेदसन्निकर्मांतरमिति भाष्यमुच्यते सत्यपि प्रकरणांतरे तदेवकर्मश्रुतेः
स्थलेश्च संयोगभेदः पृथगग्निहोत्रं जुहुयात्स्वर्गकामः यावज्जीवमग्निहोत्रं जुहुयादिति तदेवाग्निहोत्रमुभयसंयुक्तं नहि प्रकर
णांतरं साक्षाद्भेदकं किंतुज्ञापनः स्वरसोविधिः। प्रकरणेष्वस्फुटतरः प्रत्यभिज्ञाबलेन स्वरसं जह्यात् प्रकरणांतरेण तु विघटित
प्रत्यभिज्ञातः स्वरसमजहत्कर्मभिन्नति इह तु सिद्धवद्गुणरूपाण्येव यज्ञादीनि विविदिषायां विनियुंजानो नजुहोतीत्यादिवत् पू
र्वमेधारूपमुत्पादयितुमर्हति। नच तत्रापि नैयमिकाग्निहोत्रे मासविधिना पर्वाग्निहोत्रे मासविधिर्नास्तीति सांप्रतं। होमे एवसाक्षा
द्विधिश्रुतेः। कालस्यचानुपादेयस्याविधेयत्वात्। कालेहि कर्मणि कालइत्युक्तं। इह तु विविदिषायां विधिश्रुतिर्नयज्ञादिषु नातिदु

सिद्धान्तेवानुमन्तव्यंन एवैककर्मणः संयोगपृथक्त्वं सिद्धं। स्मृतिरुक्ता लिंगदर्शनमुक्तं। अंतराचापितुतद्दृष्टेः। यदि विद्यासहकारि
ण्याश्रमकर्माणि तर्हि तदभावे विधुरादीनामनाश्रमिणामनधिकारो विद्यायां अप्राप्तः सहकारिणामाश्रमकर्मणामिति प्राप्त उच्यते नास्त्या
श्रमकर्माणि विधुरत्वाच्च केषांचित् भवन्त्ययं संनिहितेषामनाश्रमित्वेपि जप्योपवासदेवताराधनादीनि कर्माणि प्राप्त उच्यते। नात्यंतमकर्म
( ) चसहकारित्वमुक्तं आश्रमकर्मणामुपलक्षणत्वादितिनतेषामनाश्रमित्वेपि जप्योपवासदेवताराधनादीनिकर्माणि कर्मणां च सहकारि
त्वमुक्तं आश्रमकर्मणामुपलक्षणत्वादिति न तेषामनधिकारो विद्यायां। जन्मान्तरानुष्ठितैरपि चेति। न खलु विद्याकार्ये कर्मणामपेक्षा
अपितूत्पादे उत्पादश्चैतिविविदिषोपहारेणकर्माणि विद्यां उत्पत्त्यर्थं विविदिषाणां पुरुषधौरेयाणां विदुरसंवर्तप्रभृतीनां कृतं कर्मभिः यद्यपि
चेहजन्मनि कर्माण्यननुष्ठितानि तथापि विविदिषातिशयदर्शनात् प्राग्भवेनुष्ठितानि तैरिति गम्यत इति ननु पृथाधीतवेद एव धर्मजि
ज्ञासायामधिक्रियते नानधीतवेद इहजन्मनि। तथेहजन्मन्याश्रमकर्मोत्पादित विविदिष एव विद्यायामधिक्रियते नेतरइत्यनाश्रमिणा
मनधिकारो विधुरप्रभृतीनामित्यत आह दृष्टार्था चेति। अविद्यानिवृत्तिर्विद्यायाः दृष्टोर्थः स चान्वयव्यतिरेकसिद्धो न नियमपेक्षत
इत्यर्थः। प्रतिषेधोविद्यातत्स्याभावइत्यर्थः। यद्यनाश्रमिणामप्यधिकारो विद्यायां कृतं तर्ह्याश्रमैरतिबहुलायासैरित्याशंक्याह।
अतस्त्वितरज्ज्यायो लिंगाच्च। स्वस्थेनाश्रमित्वमास्थेयं दैवात्तुनः पत्न्यादिवियोगतः सत्यनाश्रमित्वेभवेदधिकारो विद्यायामिति
श्रुतिस्मृतिसंदर्शितविविदिषितिपज्ञेनेत्यादिभ्यः ज्यायस्त्वावगतेः श्रुतिलिंगात्स्मृतिलिंगाच्चावगम्यते तेनेतिपुण्यकृदिति श्रुतिलिंगम
नाश्रमीनतिष्ठेतेत्यादिचस्मृतिलिंगं तद्भूतस्यतु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः। आरोहवत् प्रत्यारोहोपि कदाचिदूर्ध्व
रेतसां स्यादिति मंदाशंकानिराकरणार्थमिदमधिकरणं। सूर्वधर्मपुण्यहोमादिपुरागतो वानृहस्थोहं पत्न्यादिपरिवृतः स्यामिति॥
नियमं व्याचष्टे नचाह्यमंतमात्मानमिति। अतद्रूपतामारोहतुल्यताभावं व्याचष्टे यथाच ब्रह्मचर्यं समाप्येति। अभावं शिष्टाचाराभावं
५३

विभज्यते नचैवमाचाराः शिष्टाइति अतिरोहितार्थमन्यत्। नचाधिकारिकमपि पतनानुमानात्तदयोगात्। प्रायश्चित्तं न पश्या
मीति नैष्ठिकं प्रति प्रायश्चित्ताभावस्मरणात्। नैर्ऋतगार्दभालंभः प्रायश्चित्तमुपकुर्वाणं प्रति तस्मात् छिन्नशिरस इव पुंसः क्रि
याभाव इति पूर्वः पक्षः। सत्र योजनानुनचाधिकारिकमधिकारलक्षणे प्रथमकांडे निर्णीतं। अवकीर्णिपशुश्च तद्धाधानस्या
प्राप्तकालत्वादित्यनेन यत्प्रायश्चित्तं तन्नैष्ठिकोप्यपितुमर्हति। कुतः आरूढो नैष्ठिकमिति स्मृत्यायतनश्रुत्यनुमानात् प्रायश्चित्ता
योगात्। उपपूर्वमपीत्येके भावमशनवत्तदुक्तं। श्रुतिस्तावत्स्वरसतो संकुचितब्रह्मचारिमात्रस्य नैष्ठिकस्योपकुर्वाण
स्य चाविशेषेण प्रायश्चित्तमुपदिशति साक्षात्प्रायश्चित्तं न पश्यामीति तु स्मृतिः। तस्यामपि च साक्षात्प्रायश्चित्तं न कर्तव्यमिति प्रायश्चि
त्तनिषेधावगम्यते। न पश्यामीति तु दर्शनाभावेन सोनुमातव्यः तथा च स्मृतिनिषेधार्थं त्वनुमायन्नर्थाश्रुतेरनुमति आश्रुतिसामा
न्यविषयापि विशेषमनुपसर्पती शीघ्रप्रवृत्तिः इति स्मार्तं प्रायश्चित्तादर्शनं तु यत्नगौरवार्थमेतदुक्तं भवति। कृतनिर्णेजनैरथैते
नः संव्यानं कर्तव्यमिति। सत्रार्थस्तु उपपूर्वमपि पातकं नैष्ठिकस्यावकीर्णित्वं न महापातकं। अपि रेवकारस्थे अन एके प्रायश्चि
त्ताभावमिच्छंतीति आचार्याणां विप्रतिपत्तौ विशेषाभावात् साम्यं भवेत्। शास्त्रस्थायाः प्रसिद्धिः साच साक्षाच्छास्त्रमूलत्वात्। उपपा
दितं च प्रायश्चित्ताभावप्रसिद्धेः शास्त्रमूलत्वमिति स्फुटमन्यतरत् यदि नैष्ठिकानामस्ति। प्रायश्चित्तं तत्किमेतैः कृतनिर्णेजनैः
संव्यवहर्तव्यमुत नेति तत्र दोषकृतत्वादसंव्यवहारस्य प्रायश्चित्तेन च तन्निर्हरणात्। अतिवर्हणे पातककरणवैयर्थ्यात्संव्यवहार्या
एवेति प्राप्त उच्यते। वहिस्तूभयथापि स्मृतेराचाराच्च निषिद्धकर्मानुष्ठानजन्म मनोलोकद्वयप्रशुद्धिमापादयति द्वैधं कस्यचिदेनसो
लोकद्वयेप्यशुद्धिरपनीयते प्रायश्चित्तेन नो निवर्हणं कुर्वाणैः कस्यचित्तु परलोकाशुद्धिमात्रमपनीयते प्रायश्चित्तेन नो निर्हरणं कुर्वा
णैरिहलोकाशुद्धिस्तेन सर्पादिनाशक्यपनेतुं यथा स्त्रीबालादिघातिनां यथाह पित्रुडानपि धर्मेनापि न संव्यवहरेदिति तथा च प्रायश्चि

DR BHAU DAJI MEMORIAL

बाच०३ संतत्किंमेनैः कृतनिर्वाजनैः संमवहर्तव्यमुतनेतितत्रशेषकृतसारसंव्यवहारस्यप्रायश्चित्तेनचननिर्वहणं। अनिपनिर्हरणेयानलकरण
५३ वैयर्थ्यात्सं व्यवहार्यएवेतिप्राप्तउच्यते। यद्दित्वनयथापिस्खलिताचाराचनिषिद्धकर्मानुष्ठानजन्यमेनोलोकद्वयेप्यशुद्धिमापाद्य
दृष्ट्वंकस्यविदेनसोलोकद्वयेथशुद्धिरपनीयनेनप्रायश्चित्तेनानिर्यहरणंकुर्वाणः कस्यचिदुपरलोकाशुद्धिमात्रमपनीयतेप्राय
श्चित्तेरेनानिर्हरणंकुर्वाणैरिहलोकाशुद्धिस्तेनसाधारितानशक्यपनेतुंयथास्त्रीबालादियातिनायथाविशुद्धानपिधर्मनोपिन
संवरेमिदिवितथाचप्रायश्चित्तेरपत्वेनोपदज्ञानकृत्यंभवेत। कामतः कृतमपिबालघ्नादिस्तुकृतनिर्णेजनोपिवचनादव्य
कहारइहलोकेजायतइतिवचनंस्त्रीबालाघ्नांश्चेत्यादितस्मात्सर्वंभवदातं। स्वामिनः फलश्रुतेरित्यात्रेयः। प्रथमकांडेशेष
लक्षणेतथाकामइत्यत्रऋत्विक्संबंधकर्मणः सिद्धकिंकामोयाजमानडगातिअंदतिसंशयार्त्विज्यपिकर्मणियाजमानएवकामो
गुणफलेष्विति निर्णीतमिहत्वेवंजातीयकानिचांगसंबंधान्युपासनानिकिंयाजमानानेवउतार्त्विज्यानीतिविचार्यतइतिनपुनरुक्तं
॥ तत्रोपासकानांफलश्रवणादनधिकारणतदनुपपत्तेर्यजमानस्यकर्मजनितफलोपभोगभाजोधिकारित्वात्कृतिजांचतदनु
पपत्तेः। वचनाश्चराजाज्ञाख्यानीयात्स्वविद्धतिजांफलश्रुतेरसतिवचनेयजमानस्यफलवदुपासकस्यचफलश्रुतेः। तंहवको
द्दालोविदांचकारेत्यादेरुषस्तिख्यानस्यचसर्वविशेषतवान्वयायवादन्नसामर्थ्यालावात्। याजमानमेवोपासनकर्मेतिप्राप्तउच्य
ते। आर्त्विज्यमित्यौडुलोमिः नस्मैहिपरिक्रीयते। उपाख्यानानावदुपासनमौत्क्रात्रमवगम्यतेतद्धलवस्यसतिबाधकेन्यथोप
पादनीयंनचऋत्विक्कर्तृकउपासनेयजमानगामिनाफलस्यासंभविनी नहिसपरिक्रीतः। तद्धामिनेफलायघटतेतस्मानय
सनिनामात्रेणोपाख्यानमन्यथयितुंयुक्तमितिसिद्धांतः॥ ४८॥ सहकार्यंतरविधिः पक्षेणतृतीयंतद्वतोविध्यादिवत्॥
तस्माद्ब्राह्मणः पांडित्यंनिर्विद्यनिश्चयेनलब्ध्वाबाल्येनतिष्ठासेत्बाल्यंचपांडित्यंचनिर्विद्याथमुनिरमौनंचनिर्विद्याथब्राह्मणइति ५३

यत्रहिविधिविभक्तिः श्रूयतेसविधेयोवाल्येनतिष्ठासेदित्यत्रचसाश्रूयतेनश्रूयतेननुमौनेतस्मादपयाथब्राह्मणइत्येतदश्रूयमाणवि
धिकर्मविधेयमेवंमौनमपिनचापूर्वत्वात् विधेयंतस्माद्ब्राह्मणः पांडित्यंनिर्विद्येतिपांडित्यविधानादेवमौनसिद्धेः पांडित्यमौनिमौ
नमिति अथवाभिक्षुवचनोयंमुनिशब्दः तत्रदर्शनात् गार्हस्थ्यमाचार्यकुलंमौनंवानप्रस्थमित्यत्रतस्यान्यतोविहितस्याश्रम
नुवादः। तस्माद्बाल्यमेवात्रविधीयतेमौनंतुप्राप्तंतुप्राप्तप्रशंसार्थमनूद्यतइतियुक्तं भवेदेतदेवंयदिपंडितपर्यायोमुनिश
ब्दोभवेत् अपितुज्ञानमात्रंपांडित्यंज्ञानातिशयसंपत्तिस्तुमौनंतत्रैवतत्प्रसिद्धेराश्रमभेदेतुनत्स्वरूपतिगार्हस्थ्ययदिपद
सन्निधानात्तस्मादपूर्वत्वान्मौनंस्याबाल्यपांडित्यापेक्षयातृतीयमिदंमौनंज्ञानातिशयरूपंविधीयतएवंचनिर्वेदनीयत्वं
अपिविधानंआंजसंसारिलाह। निर्वेदनीयत्वेनिर्देशादिति। कस्येदंमौनंविधीयतेविद्यासहकारितयेत्यतआह। तद्व
तोविद्यावतः संन्यासिनोभिक्षोः पृच्छतिकथमितिविद्यावतःप्रतीयतेनसंन्यासिनेत्यर्थः। उत्तरंतदधिकारात् भिक्षोरधिका
रात्तदर्शयती आत्मानंविदित्वेतिस्त्रावयवंयोजयितुंशंकतेनत्विति योजयति अतआहपक्षेणेतिविद्यावान्नित्यवि
द्याशेषविवक्षितोअपितुविद्योदयाभ्यासप्रवृत्तोनपुनरुत्पन्नविद्यातिशयस्तथाचास्यपक्षेकदाचिभेददर्शनसंभवइत्यर्थः
विद्यादिविधिमुखः प्रधानमित्यावत्अतएवसमिदादिविध्यंतः सहिविधिः प्रधानविधेःपश्चाद्दिहिततत्रायंश्रूयमाणविधि
त्वेअपूर्वत्वाद्विधिरित्येयइत्यर्थः। ननुपथमाश्रमोबाल्यप्रभावः तस्मात्तुनगार्हस्थ्येनोपसंहरतीतिवाक्यादिविशेषइति
अतउत्तरंपठति। कृत्स्नभावात्तुगृहिणोपसंहारः। बहोप्यवहुलायाससाध्यकर्मबहुलत्वात् गार्हस्थ्यस्याश्रमांतरधर्माणाच
केषांचिदहिंसादीनांसंभवात्। नेतोपसंहारोनपुनस्तेनसमापनादित्यर्थः एतदाश्रमद्वयोपन्यासेनचविकल्पविरि
तराभावशंकामंदबुद्धेःस्यादिहितिरस्कारार्थंसूत्रं मौनवदितरेषामप्युपदेशात् ४ इतिवानप्रस्थनामान्येविधेयंत्र

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ह्मचारिणोपिति वृत्तिभेदानुष्ठातारो वा पुरुषा अभिधीयंते तस्माद्द्विलेपि बहुवचनमविरुद्धं। अनाविष्कुर्वन्नन्वयात्। बाल्येनेति याव
द्बालचरितश्रुतेः। कामचारवादभक्षता याश्चासंतबाल्येन प्रसिद्धेः शौचादिनियमविधानस्य सामान्यशास्त्रस्यानेन विशेषशास्त्रेणा
बाधनात्सकलबालचरितविधानमिति प्राप्ते विधीयते विद्यांगत्वेन बाल्यविधानात्। समस्तबालचर्यायां च प्रधानविधिविरोधप्रसं
गात् यत्तदनुगुणमप्रौढेंद्रियत्वादिभावशुद्धरूपं तदेव विधीयते एवं च शास्त्रांतराबाधेनाप्युपपत्तौ न शास्त्रांतरबाधनमन्याय्य
विषयत्वात्। ५१ ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनात्। संगतिमाह सर्वापेक्षा चेति किं श्रवणादिभिरिहैव जन्मनि विद्यासाध्यते उ
तानियम इह वामुत्र वेति यद्यपि कर्मणि यज्ञादीन्यनियतफलानि तेषां च विद्योत्पादसाधनत्वं विद्योत्पादस्यानियमः प्रतीतस्तथा
च गर्भस्थस्य वामदेवस्यात्मप्रतिबोधश्रवणात्। अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति च स्मरणात्। आमुष्मिकत्वमप्यव
गम्यते तथापि यज्ञादीनां प्रमेयाणामप्रमाणत्वात्। श्रवणादेश्च प्रमाणत्वात्। तेषां च प्रत्यक्षादिविद्यासाधनत्वात्। यज्ञादीनां तु सत्व
शुद्ध्याधानेन वा विद्योत्पादकश्रवणादिलक्षणप्रमाणवृत्तिविघ्नोपशमेन च विद्यासाधनत्वं श्रवणादीनां तु अनपेक्षणमेव विद्योत्पाद
कत्वं च प्रमाणेषु प्रवर्तमानाः प्रमातार ऐहिकमपि चिरभाविनं प्रमोत्पादं कामयंते किंतु तादात्विकमेव प्रागेव तु पारलौकिकं नहि
कुंभदिदृक्षुश्चक्षुषी समुन्मीलयति। कालांतरीयाय कुंभदर्शनाय किंतु तादात्विकाय तस्मादैहिकत्वं विद्योत्पादे नियतकालः।
श्रुतिस्मृतिश्च पारलौकिकं विद्योत्पादं स्तुत्या ब्रूते इत्थंभूतानि नाम श्रवणादीन्यावश्यकफलानि यत्कालांतरेपि विद्यामुपादयंती
ति प्राप्तमेवं प्राप्त उच्यते। यत एवात्र विद्योत्पादे श्रवणादिभिः कर्तव्ययज्ञादीनां सत्वशुद्धिद्वारेण वा विघ्नोपशमद्वारेण वा योगेनाए
व तेषां यज्ञादीनां कर्मांतरप्रतिबंधाप्रतिबंधाभ्यामनियतफलत्वेन तदपेक्षाणां श्रवणादीनामनियतफलत्वं न्याय्यं। अनपूहत
विघ्नानां श्रवणादीनामनुत्पादकत्वात्। अविशुद्धसत्वस्य वा पुंसः प्रसत्तादत्वात् तथा च तेषां यज्ञाद्यपेक्षाणां चानियतफलत्वेन

श्रवणादीनामप्यनियतफलत्वं युक्तं एवं च श्रुतिस्मृती प्रतिबंधे न स्तुतिमात्रत्वेन व्याख्येयो भविष्यति। पुरुषाश्च विद्यार्थिनः सा
धनसामर्थ्यानुसारेण तदनुरूपमेव कामयिष्यंते न तादृशमुक्तमभिसंधेनिरंकुशत्वादिति एवं मुक्तिफलानियमस्तदवस्थावधृते
स्तदवस्थावधृतेः। ५२ यज्ञाद्युपहृतस्य विद्यासाधनश्रवणादेर्वीर्यविशेषात् किल तत्फले विद्यायामैहिकामुष्मिकत्वल
क्षण उत्कर्षो दर्शितः। तथा च यथा साधनोत्कर्षनिकर्षाभ्यां तत्फलस्य विद्याया उत्कर्षनिकर्षावेवं विद्याफलस्यापि विमुक्तेरुत्कर्षो
संभाव्येते न च मुक्तावैहिकामुष्मिकत्वलक्षणो विशेष उपपद्यते ब्रह्मोपासनापरिपाकलब्धजन्मनि विद्यायां जीवतो मुक्तेरवश्यं
भावनियमात् सत्यप्यारब्धविपाककर्मपिक्षये तस्मात् मुक्तावेव रूपतो निकर्षोत्कर्षौ स्यातां अपि च सगुणानां विद्यानामुत्कर्षा
पकर्षाभ्यां तत्फलानामुत्कर्षनिकर्षौ दृष्टाविति मुक्तेरपि विद्याफलत्वात् रूपतस्तदुत्कर्षनिकर्षौ स्यातामिति प्राप्त उच्यते। मुक्तेस्त
त्र रतत्रैकरूप्यं श्रुतेरुपपत्तेश्च साध्यं हि साधनविशेषात्। विशेषवद्भवति न मुक्तिर्ब्रह्मणो नित्यस्वरूपावस्थानलक्ष
णा नित्यायास तो साध्या भवितुमर्हति। न च सेवा समनिःशेषक्लेशकर्माशयप्रक्षयो विद्याजन्मविशेषवान् येन तद्विशेषा
त्सोपि विशेषवान् भवेत् न च सावशेषः क्लेशादिप्रक्षयो मोक्षाय कल्पते न च चिराचिरोत्पादानुत्पादावंतरेण विद्यायामपि रूपतो
भेदः। कश्चिदुपलभ्यते तस्या अप्येकरूपत्वेन श्रुतेः सगुणायास्तु विद्यायास्तद्गुणाशावायोद्भावान्तकार्यस्य फलस्योत्कर्षनिकर्षौ
युज्येते न चात्र विद्यात्वं सामान्यतो दृष्टं भवति आगमतत्प्रभवयुक्तिबाधितत्वेन कालात्ययापदिष्टत्वात् तस्मात् स्यामुक्त्यव
स्थायाः एकरूप्यावधृतेर्मुक्तिलक्षणस्य फलस्याविशेषो युक्त इति ॥ ५२ ॥ इति वाचस्पतिमिश्रविरचिते शारीरकभगव
त्पादभाष्यविभागे भामत्यां तृतीयाध्यायस्य चतुर्थः पादः समाप्तः॥ श्रीकृष्णार्पणमस्तु॥ शुभं भवतु॥ ७ ॥ ७ ॥ ७॥